नं० ५१६२-घ

वाजसनेयसंहिताभाष्यम् वेददीपः (संपूर्णः)

नं० ५१६२ - घ

पत्राणि १-६१

१९१

वाजसनेयसंहिताभाष्यम् वेददीपः (वेदान्तः)

पत्राणि १-६१ (संपूर्णः)

श्रीगणेशाय नमः प्रणम्य शिरसा देवं लक्ष्मीकान्तमुमापतिं एकविंशोऽधुनाध्याये वेददीपो वितन्यते ॥ कात्यायनः इमं मे त
त्वेत्येककपालस्य। अवभृथेष्टौ वारुणस्यैककपालस्य पुरोडाशस्य हे पुरोनुवाक्यान्ये इत्यर्थः। इमं मे। वरुणदेवत्ये गायत्रीत्रि
१ ष्टुभौ। शुनःशेपदृष्टे। हे वरुण त्वं मम इमं हवं आह्वानं श्रुधि शृणु। एधि श्रुधीति हिधिः। संहितायां दीर्घः। च पुनः अद्य दिने मृ
ड य अस्मान् सुखय। यतो हे त्वा आचके। कामये। आ चक इति कान्तिकर्मा कीदृशोऽहं। अवस्युः। अवनं अवः पालनं। अवनेच्छन्।
न दिच्छतीत्यवस्युः सुप आत्मनः क्यच्। क्याच्छन्दसीति उ प्रत्ययः। आत्मनो रक्षणमिच्छन् त्वामिच्छामीत्यर्थः। तत्त्वा। त्वा त्वां ता।

श्रीगणेशाय नमः इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके १ तत्त्वा या
मि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुश ꣳ
स मा नः आयुः प्रमोषीः २ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽव यासिसीष्ठाः
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ꣳ सि प्र मुमुग्ध्यस्मत् ३

का॰ अग्नीवरुणयोस्त्वं नः स त्वं न इति। अवभृथेष्टावेवाग्निवरुणयागे पुरोनुवाक्यायाज्ये। त्वं नः अग्निवरुणदेवत्ये त्रिष्टु
भौ वामदेवदृष्टे। हे अग्ने त्वं नोऽस्मान् प्रति वरुणस्य देवस्य हेडः क्रोधं अवयासिसीष्ठाः। निवर्तय। यसु उपक्षये। अवपूर्वस्य णिज
न्तस्याशीर्लिङि रूपं। किंच। विश्वा। विश्वानि सर्वाणि द्वेषांसि द्वेषभागानि अस्मत् अस्मत्तः सकाशात् प्रमुमुग्धि। प्रमुञ्च
दूरीकुरु। मुचेर्व्यत्ययेन शपः श्लुः। कीदृशस्त्वं। विद्वान्। मायिकां जानन्। यजिष्ठः। अतिशयेन यष्टा यजिष्ठः। तुरिष्ठेमेय।
स्विति तृचो लोपः। वह्नितमः। वहतीति वह्निः अतिशयेन वह्निर्वह्नितमो हविषां वोढा। शोशुचानः। अत्यन्तं। शोचते दीप्यते शोशु

स त्वं नः हे अग्ने स त्वं अस्याः उषसो व्युष्टौ व्युष्टिकालेऽस्मिन्नहनि ऊती। ऊत्या अवनेन नोऽस्माकं अवनः रक्षकः नेदिष्ठोऽ
न्तिकतमः समीपतमश्च भव। अवतीत्यवमः। अवतेरमप्रत्ययः। यद्वा अवती अवकः। पचाद्यच अन्त्यतमे अवोऽवत्तमः नेला
पश्चादमः अन्त्यतमेति कोनेदिष्ठः अन्तिकबाढयोर्नेदसाधौ इति इष्ठे परे नेदादेशः किंच रराणो हविर्ददत्सन् नोऽ
स्माकं वरुणमवयक्ष्व अवयज अवपृथग्यजते लोटि णपालक् तेनास्मडोकं स्वावकं हवि वीहि भक्षय वीका
ति गानेष्वामिहेण प्रजनावादतेषु किंच नोऽस्माकं सुहवः स्वाह्वानश्चाथि भव ह्वे सौ ह्वावभ्यासलोपश्छेत्यकारः
कः आदित्यस्य सुत्रामाणं महीमूषुमातरमिति आदित्यं चरुं पत्यमाणो निर्वपन्यादित्यमी जानन्त्यादावेते चादित्यस्य

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अव यक्ष्व नो वरुणं॰ रराणो
वीहि मृळीकं॰ सुहवो न एधि ४ महीमू षु मातरं॰ सुव्रतानामृतस्य पत्नीमवसे हु
वेम तुविक्षत्रामजरन्तीमुरूचीं ७ सुशर्माणमदितिं॰ सुप्रणीतिम् ५

रूरूकं सूक्तस्य सुत्रामाणमिति पुरोऽनुवाक्या। महो अग्न ऊ षु इति याज्या। महीमू षु अदितिर्देवता त्रिष्टुप्। उ सु निपातौ पाद
पूरणौ। संहितायां माच्छन्दसी दीर्घोऽन्यस्य षत्वं। वयं अवसे रक्षणार्थं अदितिं हुवेम। आह्वयाम। तुमर्थे असे प्रत्ययः
। कीदृशीमदितिं महीं महतीं। सुव्रतानां शोभनकर्मणां मातरं निर्मात्रीं व्रतमिति कर्मनाम। ऋतस्य यज्ञस्य पत्नीं
पालयित्रीं। तुविक्षत्रां तुवीति बहुनाम बहुबलां त्राणशीलां अजरन्तीं। न जीर्यतीति अजरन्ती तां। जरारहितां। उरूचीं
उरु अञ्चतीति उरूचीं बहुगमनशीलां। सुशर्माणं। शोभनं शर्म आश्रयः सुखं वा यस्याः सा तां। सुप्रणीतिं। शोभना प्रणी
तिः प्रणयनं भजनं यस्याः सा तां। अदितिरदीना देवमाता २

सुत्रामाणम्पृथिवीम। अदितिर्देवत्या त्रिष्टुप् गायत्र्यानद्दृष्टा। दैवीं देवसंबंधिनीं नावं यज्ञरूपां स्वस्तये कल्याणाय अविनाशा
य वयं आरुहेम। यज्ञं कृत्वा स्वर्गं गच्छेमेत्यर्थः। कीदृशीं नावं सुत्रामाणं। सुष्ठु त्रायते रक्षतीति सुत्रामा तां। पृथिवीं। विशालां। द्यां। स्व
२ र्गरूपां। स्वर्गहेतुभूतामित्यर्थः। अनेहसं। एह इति क्रोधनाम। नास्ति एहो यत्र। क्रोधरहितां। यद्वा तनुमीयमानां। पृथिवीमि
व सुत्रामाणं पालयित्रीं। द्यामिव अनेहसं अक्रोधां। सुशर्माणं। सायुधारणभूतां। अदितिं। अखंडितं अदितिं नावं। सुप्रणीति
। सुष्ठु प्रणयतीति सुप्रणीतिः। साधुप्रणेत्रीं। स्वरित्रां। साधुकेंडुवालां। अरित्रं केनिपातक इत्यभिधानात्। प्रयाता तु याजाद

सुत्राणाम्पृथिवीन्द्यामनेहसꣳ सुशर्म्माणमदितिꣳ सुप्रणीतिम्। दैवीन्नावꣳ स्वरि
त्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ६ सुनावमारुहेयमस्रवन्तीमनागसम्। शता
रित्राꣳ स्वस्तये ७

योऽरित्रस्थानीयाः। अनागसं। अनपराधां। अस्रवंतीं। अच्छिद्रां। निर्दोषामित्यर्थः। ईदृशीं नावमारुहेम। संहितायां दीर्घः।
सुनावमारुहेयम्। स्वर्गसंबंधिनी देवत्या गायत्री। तद्धै सर्वमेव यज्ञो नौः स्वर्ग्येति श्रुतेः। स्वर्ग्या नौर्यज्ञ एव। सुनावं शोभनां नावं
यज्ञरूपां स्वस्तये अविनाशाय संसारसागरोत्तरणाय आरुहेयं। आरोहेयं। यज्ञं कुर्यामित्यर्थः। कीदृशीं। अस्रवंतीं। अ
च्छिद्रां। अनागसं। निरपराधां। सर्वदृढामित्यर्थः। शतारित्रां। बहुकेंडुवालां। ऋग्यजुःसामभिरित्यर्थः। स्मार्तेन नावारोह। २
णे विनियोगोऽस्या ऋचः ३

का॰ आग्नेः प्रवाहवेति पयस्यायाः। अवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतीति पयस्या। तस्या आ नो मित्रावरुणेति पु
रोनुवाक्या। प्रबाहवेति याज्या॥ आ नः। मित्रावरुणदेवत्या गायत्री विश्वामित्रदृष्टा। हे मित्रावरुणा मित्रावरुणौ देवौ नोस्माकं
गव्यूतिं यत्र मार्गं घृतैः युवां आ उक्षतं। सर्वतः सिंचतं। यद्वा गावि पृथिवीं आक्रमंति अवनहेतुभूतं देवं घृतैः उदकैः सिंचतं। किं च हे
सुक्रतू। शोभनः क्रतुः कर्म ययोस्तौ। हे सुकर्माणौ मध्वा मधुना रजांसि लोकान् आ उक्षतं। अनित्यमागमशासनमिति तुमभावः॥
प्रबाहवा। मित्रावरुणदेवत्या। त्रिष्टुप् वसिष्ठदृष्टा। हे मित्रावरुणौ हे युवाना युवानौ तरुणौ। छिन्नजरसौ नोस्माकं जीवनाय

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजां ७ सि सुक्रतू ८ प्रबाहवा सिसृतं जीव
से नः आ नो गव्यूतिमुक्षतं घृतेन। आ मा जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥

५

बाहवा बाहू प्रसिसृतं। अंतर्भूतण्यर्थः। प्रसारयतं। जीवनविघ्ननिवारणाय बाहुप्रसारणं कुरुतमित्यर्थः। किं च नोस्माकं
गव्यूतिं क्षेत्रं घृतेन जलेन आ उक्षतं सिंचतं। भवन्निक्तक्षेत्रनिष्पन्नधान्यैः यत्किंचन मा मां जने जनपदे युवां आ श्रवयेतं। आ श्रावयतं।
इच्छमदादिच्छमयालीदिति लोके मां कथयतमित्यर्थः। हवेमा वसिष्ठः। किं च युवां मे मम इमा इमानि हवा हवानि आह्वा
नानि श्रुतं शृणुतं। श्रुत्वा सर्वं कुरुतमित्यर्थः शृणोतेः छांदसो लुक्॥ ५ रामाय रामसेनाय नमः
रामाय रामचंद्राय नमः

का: वाजिनः स्पृशं नो वाजे वाज इति। एषस्मा एवा वाजिनयागोऽस्ति तत्र शान्त इति पुरोऽनुवाक्या। याजे इति याज्या। शं नः। वाजेवाजे। व्या
ख्याते का॰ वायोयथ समाप्रिय: समिद्धो अग्निः समिधेति। वायो अथ सैषैषा समिद्धो अग्निरित्याद्या एकादश ऋच आप्रियः प्रयाजानां
३ याज्या इति सूत्रार्थः समिद्धो अग्निः। एकादश आप्रीदेवत्या अनुष्टुभः स्वस्त्यात्रेय दृष्टाः। अग्निः गायत्री छन्दो गौः एते त्रय इन्द्रे
इन्द्रियं वीर्यं वयः सर्वं न आयुर्वा दधुः दधतु प्रत्येकं देवेषु:। कीदृशोऽग्निः समिधा प्रयाजदेवतया। समिद्धः दीप्तः। सुसमिद्धः अत्र
तिदीप्तः। प्रयाजवृन्देनेति शेषः। वरेण्य वरणीयः संभजनीयः। कीदृशो गौः त्र्यविः। त्रयोऽवयो ऽस्य चरन्तेन यस्य मत्र्यविः। एक

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः। जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्य
स्मद्युयवन्नमीवाः। १० वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः
पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः। गा
यत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः ११ तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती उष्णिहा छ
न्द इन्द्रियं दित्यवाड् गौर्वयो दधुः १२

षरामासावधिः कालो ऽवि:। त्रयो ऽवयो यस्य मासा ईदृवत्सो गौस्त्र्यविरित्यर्थः। तनूनपाच्छुचिव्रतः। तनूनामपां नपात् पौत्रोऽग्निः। तनू
नागर्भान पातरक्षतेत्र वा। प्रयाजदेवता सरस्वती। उष्णिहा छन्दः। हल्लतलादारा उष्णिक् छन्दः गौश्च। एते चत्वार इन्द्रे इन्द्रियं वय
श्च दधुः दधतु। कीदृशस्तनूनपात् शुचिव्रतः। शुचि शुद्धं व्रतं कार्यं यस्य सः। कीदृशी सरस्वती। तनूनपाः। तनूः शरीराणि पाति
३ तिरक्षतीति। कीदृशो गौः। दित्यवाट्। दित्यं द्विवर्षं वहतीति ५ रामाय रामचन्द्राय नमः रामरामराम ३

दैव्या होतारा। दैव्यौ होतारौ। कीदृशो गौः। पंचाविः। पंचावयो ऽनुचराः कालविशेषा वा यस्य सार्द्धद्विवर्षः। सुबर्हिरग्निः। शोभनं बर्हिः
ऽप्रयाजदेवता। अग्निः। बृहती छंदः। गौः। एते चत्वार इंद्रियं वयश्च दधुः। कीदृशो ऽग्निः। पूषणवान्। पूषा स्यास्तीति पूष्णा युक्तः।
स्तीर्णबर्हिः। स्तीर्णं बर्हिर्यस्य सः। अमर्त्यः। अनश्वरः। कीदृशो गौः। त्रिवत्सः। त्रयो वत्सा अनुचरा वत्सरा वा यस्य स त्रिवत्सः ३।

ऽइडाभिरग्निरीड्यः सोमो देवो ऽअमर्त्यः अनुष्टुप्छन्द ऽइन्द्रियम्पञ्चाविर्गौर्वयो दधुः १४
सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः बृहती छन्द ऽइन्द्रियन्त्रिवत्सो गौर्वयो द
धुः १५ दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः पङ्क्तिश्छन्द ऽइहेन्द्रियन्तुर्यवा
ड्गौर्वयो दधुः १६ उषे यह्वी सुपेशसा विश्वे देवा ऽअमर्त्याः त्रिष्टुप्छन्द ऽइहे
न्द्रियम्पष्ठवाड्गौर्वयो दधुः १७

गो देव्यः। प्रयाजदेवाः। द्वारं दसंप्रसारणं। महीः। महत्यो दिशः। ब्रह्मा देवः। बृहस्पतिः। पंक्तिः छंदः। तुर्यं चतुर्थं वर्षं वहतीति तु
र्यवाट् गौः। एते षट् देवा इह इंद्रे इंद्रियं वयश्च दधुः। उषे यह्वी। उषे द्विवचनात् दिवारात्रिश्च। अमर्त्या विश्वे देवाः। त्रिष्टुप्छं
दः। पष्ठं भारं वहतीति पष्ठवाट् गौः। एते पंच इह इंद्रियं वयश्च दधुः। कीदृश्यौ उषे। यह्वी। यह्व्यौ। महत्यौ। यह्व इति महन्नाम।
सुपेशसा। पेशो भंगं पेशो रूपं ययोस्ते सुपेशसौ। सुरूपे विभक्तेराकारः ६

सं ४

दैव्या होतारा। दैव्यौ होतारौ प्रयाजदेवौ। अयं पंचाग्निरसौ च मध्यमे वायुः। जगती छंदः। अनः शकटं वहतीत्यनड्वान् गौः। एते च
तावद्दुं इंद्रे इंद्रियं वयश्च दधुः। कीदृशौ होतारौ। भिषजा भिषजौ वैद्यौ। इंद्रेण सयुजा। सह युज्येते सयुजौ संयुक्तौ। युजा। परस्परे
संयुक्तौ। तिस्र इडा। इडा सरस्वती भारतीति तिस्रः प्रयाजदेव्यः। मरुतो विशः। इंद्र प्रजाः। विराट् छंदः। धेनुः दोग्ध्री गौः स्त्री।
नकारश्चार्थे। एते षट् इंद्रे इंद्रे इंद्रियं वयश्च दधुः त्वष्टा तुरीयः। त्वष्टा प्रयाजदेवः। इंद्राग्नी। द्विपदा छंदः। उक्षा सेक्ता स्त्र।

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः १८
तिस्र इडा सरस्वती भारती मरुतो विशः विराट् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः १९
त्वष्टा तुरीयो अद्भुत इन्द्राग्नी पुष्टिवर्द्धना द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः
२० शमिता नो वनस्पतिः सविता प्रसुवन् भगम् ककुप् छन्द इहेन्द्रियं वशा वेहद्वयो
दधुः २१

एते पंच इंद्रे इंद्रियं वयश्च दधुः। कीदृशः त्वष्टा तुरीयः। तूर्णमश्नोतीति अश्नोतीति तुरीयः। अद्भुत इतो महान्। कीदृशाविंद्राग्नी।
पुष्टिवर्द्धना। पुष्टिं पुनाति दिया? षं वर्द्धयतस्तौ पुष्टिवर्द्धनौ। नश्चार्थे। शमितानः। वनस्पतिः प्रयाजदेवः सविता सूर्यः।
ककुप् छंदः। वशा वंध्या गौः विहत्। गर्भघ्नी गौः। एते पंच इंद्रे इंद्रे इंद्रियं वयश्च दधुः। कीदृशो वनस्पतिः। नोस्माकं शामि
ताशायति स्तु वयति शमिता। शमिता मंत्रे इति ज्यादेशा ??? चालोपः। कीदृशः सविता। भगं प्रसुवन्। धनं प्रेरयन् ददत्। ४

स्वाहा यज्ञं। शोभनं क्षत्रं बलं त्राणं यस्य स सुक्षत्रः। शोभनक्षत्रो नाम वरुणः स्वाहा। नामैकदेशे नामग्रहणं। स्वाहाकृतिभिः
प्रयाजदेवैः सह यज्ञं भेषजं यज्ञलक्षणं भैषज्यं इंद्राय करत् करोतु। किंच। अतिच्छंदाः। छंदः बृहत्सहान् ऋषभः सम।
र्थो गौर्वरुणश्च स्वाहाकृतयोपि। एतेन बलादेरिंद्रियं वयश्च इंद्रे दधुः दधतु ददतु का याज्यापुरोनुवाक्याश्च वपापु
रोडाशपशूनां वसंतेन ऋतुनेति। चकाराद्धाय्याय शेषपशावेव वषट्चोदयथाक्रमं वपादीनां याज्यानुवाक्याः। वपायागे
वसंतेनेति पुरोनुवाक्या। ग्रीष्मेणेति याज्या। पशुपुरोडाशयागे वर्षाभिरिति पुरोनुवाक्या। शारदेनेति याज्या। हृदया।

स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः २२

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः २३

ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः
२४

दियागे हेमंतेनेति पुरोनुवाक्या। शैशिरेणेति याज्येति सूत्रार्थः। वसंतेन ऋतुना। अनुष्टुभः षट् लिंगोक्तदेवताः। वयो
या इंद्रे देवतेत्यर्थः। वसवो देवा इंद्रे तेजसा सह हविर्वयांसि व्ययः प्राक्तिं च दधुः दधतु। स्यापर्यंतं। कीदृशा वसवः।
वसंतेन ऋतुना त्रिवृता स्तोमेन रथंतरेण एतेन स्तुताः। ग्रीष्मेण। रुद्रा देवा इंद्रे यशसा सह बलं हविः। वयश्च दधुः
कीदृशाः रुद्राः। ग्रीष्मेण ऋतुना पंचदशे पंचदशेन स्तोमेन। विभक्तिव्यत्ययः। बृहता एतेन च स्तुताः ८
रामाय रामचंद्राय नमः

से
५
5

वर्षाभिर्ऋतुना। आदित्या देवाः इंद्रे विशा प्रजया ओजसा च सह हविर्वयश्च दधुः। कीदृशाः। वर्षाभिर्ऋतुना सप्तदशेन स्तोमेन तृतीयार्थे सप्तमी। वैरूपेण एतेन च स्तुताः। शारदेन ऋभवः ऋभुः सत्ता देवाः इंद्रे श्रियं हविर्वयश्च दधुः कीदृशाः शारदेन ऋतुना। एकविंशस्तोमेन। वैराजेन एतेन श्रिया लक्ष्म्या च स्तुताः। सप्तमी तृतीयार्थे। हेमंतेन। मरुतो देवाः इंद्रे बलेन

वर्षाभिर्ऋतुनादित्यास्तोमेसप्तदशेस्तुताः वैरूपेणविशौजसाहविरिन्द्रेवयोदधुः २५
शारदेनऽऋतुनादेवाऽएकविꣳशऽऋभवस्तुताः वैराजेनश्रियाश्रियꣳहवि
रिन्द्रेवयोदधुः २६ हेमन्तेनऽऋतुनादेवास्त्रिणवेमरुतस्तुताः बलेनशक्वरीः
सहोहविरिन्द्रेवयोदधुः २७ शैशिरेणऽऋतुनादेवास्त्रयस्त्रिꣳशेमृतास्तुताः
सत्येनरेवतीःक्षत्रꣳहविरिन्द्रेवयोदधुः २८

सहसहः इंद्रियसामर्थ्यं हविः। वयश्च दधुः कीदृशा मरुतः। हेमंतेन ऋतुना त्रिणवेन स्तोमेन स्तुताः। शाक्वरीरिति शाक्वरस्य योनिर्निर्देशः। शाक्वरेण एतेन च स्तुताः तृतीयार्थे। शैशिरेण। अमृता देवाः सत्येन सह दत्तवत्तं त्राणं हविर्वयः क्षात्रं च इंद्रे दधुः। दधतु। कीदृशा अमृताः। शैशिरेण ऋतुना त्रयस्त्रिंशेन स्तोमेन स्तुताः। रेवतीरिति रैवतस्य योनिः। रैवतेन एतेन स्तुताः ५

५

का॰ होतायक्षत्समिधाग्निमितिप्रयाजप्रैषास्त्रिष्टुभः । होतायक्षत्समिधाग्निमिडस्पदेइत्यादयो द्वादशकंडिकास्त्रिप्रैषाः प्रयाजप्रैषाः
होतायक्षत् । द्वादशाप्रीणां प्रयाजयाज्यानां प्रैषा अश्विसरस्वतींद्रदेवत्याः । आद्याः अष्टिः । दैव्यो होता समिधा प्रयाजदेवतया सद्
अग्निं अश्विना अश्विनौ इंद्रं सरस्वतीं च इडः पदे गोपदे आहवनीये यक्षत् यजतु । गोपदे स्थाप्यते इत्यभिप्रायेण देववचनं । तत्र
यागे अजो धूम्रो मेषश्च गोधूमैः कुवलैर्बदरैः शष्पैरंकुरितव्रीहिभिर्भेषजमौषधं भवति नकारश्चार्थः इंद्राय विशेषः । कीदृशं ।
भेषजं मधु मधुरं । तेजः तेजःप्रदं । इंद्रियं इंद्रियसामर्थ्यप्रदं । किंचा ते अश्विसरस्वतींद्रा दैव्येन होत्रेज्यमानाः संतः पयः परिस्रुता

होतायक्षत्समिधाग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजम्मधु
शष्पैर्न्न तेज इन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ २९ ॥ हो-
तायक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजम्पथा मधुमताभरन्नश्विनेन्द्राय वीर्य्यं
बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होत

मदिरया सह सोमः सोमः घृतं मधु च व्यंतु पिबंतु । सोमइति विभक्तिव्यत्ययः सर्वत्र । हे होतः मनुष्यहोतः त्वमपि आज्य-
स्य यज । कर्मणि षष्ठी । यजतिर्होत्रार्थः । अस्मादिष्य आज्यं देहि । होतायक्षत्तनूनपात् । एकाधिकात्यष्टिः । तनून-
पादिति प्रथमा द्वितीयार्थे । इंद्रायेति चतुर्थी च द्वितीयार्थे । नकारश्चार्थः । दैव्यो होता तनूनपातं प्रयाजदेवं सरस्वतीं
अश्विनौ इंद्रं च यजतु । तत्र यागे अविः अजो मेषश्च । नश्चार्थे । मधुमता रसवता पथा यज्ञमार्गेण भरन् आत्मानं हरन्
सन् बदरैर्बदरीफलैः उपवाकाभिः इंद्रयवैः तोक्मभिरंकुरितव्रीहिभिर्यवैर्वा सहितो वीर्यं वीर्यकरं भेषजं भवति । अ-

श्विसरस्वतींद्रा दैव्येन सह होत्रेज्यमानाः पयआदीनि यंतु । हे होतस्त्वम-
पि आज्यस्य यज । आज्यं देहि १०

सं ६

होतायक्षन्नराशंसं। देव्या होता नराशंसं प्रयाजे देवं सरस्वती सरस्वतीमिन्द्रं भिषजो ऽश्विना रथः रथं च पत्नीं यजतु। की
दृशो रथः चन्द्री। चन्द्रं सुवर्णं तस्मिन्नस्तीति चन्द्री सुवर्णमयः। रथस्य योगो ऽश्विनोरेव। तदुक्तं। अश्विनौ वाहनेनाश्विनौ स्पृ
हयते। तमेव तनस्तु तन्वि धानस्मान्नावहन्त्याहिमशनिः सरस्वती रथ्यो ऽयोः प्रथमा द्वितीयार्थे। तिपत्ति प्रथमा षष्ठ्यर्थे तत्र स्तुरया
सहतनयङ्केन यकुः किं पवः मेषः वपा वकुनाः त्रिपशु संवृष्येन्द्रा च यावद् वैरूपवाकाभिः यवैः तोकाभिः व्रीहिभिः सहितानं
इन्द्रस्य वीर्यकरं भेषजं भवतु। अस्मादयः पयआदीनि पिबन्तु। हे होतः आज्यस्य यजादेहि। कीदृशं नराशंसं। पतिं पाल

होतायक्षन्नराशंसं न नग्नहुं पतिं सुरया भेषजं मेषः सरस्वती भिषग्रथो न चन्द्र्यश्विनो
र्वपा इन्द्रस्य वीर्यं बदरैरुपवाकाभिर्भेषजं तोक्माभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वा
ज्यस्य होतर्यज ३। होतायक्षदिडेडित आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्
नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजं यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः

॥ परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज

ऋ॰ १८

कं। नग्नहुः सुराकंदः। नकामैश्चार्यौ। द्वितीया भेषजशब्दः आर्षः
होतायक्षदिडेडितः देव्या होता इडा इड्भ्यो प्रयाजे देवतां सरस्वतीं इन्द्रं अश्विनावश्विनौ च पत्नीं यजतु। किं कुर्वन्। ऋषभे
णगवा च येन्द्रा च बलेन वर्धयन् इडा दीन् समर्धयन् यजतु। कीदृशो होता इडितः। ऋत्विग्भिस्तुतः। आजुह्वानः इडा
दीनाह्वयन्। तत्र यवैः कर्कन्धुभिः लाजैश्च सहितं मधु मासरं च एतन्निस्तावं च इन्द्राय इन्द्रवीर्यकरं भेषजं भवति अ
श्विसरस्वतीन्द्रा देवा इज्यमानाः पयआदीनि पिबन्तु। हे होतः त्वं च यजे ॥ १०

होतायक्षद्बर्हिः। दैव्योहोता। ऊर्णम्रदाः ऊर्णामिवम्रदीयः। बर्हिः प्रयाजदेवं भिषजाभिषजौ वैद्यौ नासत्यानस्त्रमन्योस
त्यरूपौ अश्विनाअश्विनौ सरस्वतीं च यक्षत्। तत्र शिशुमती वालकोपेता अश्वा वडवा भिषक् येनुर्भिषक् च इंद्राय भे
षजं अंशबंधु हे दुग्धे एरयति। अस्मादेयादक्षिणादीयते। लोपस्त्यात्मनेपदेष्विति तलोपः। नेपयस्त्रादीनिवेत्तु।
होतर्यज। होतायक्षद्दुरोदिशः। दैव्योहोता दुरो द्वारः प्रयाजदेवीः इंद्रः इंद्रं सरस्वतीं अश्विनाअश्विनौ चयक्षत्तनयजत्तु।
नकारान्त्यार्थाः द्वारणत्स्थसंप्रसारणं। कीदृशी। द्वारः। दिशः दिशाश्चवसाक्काशाः। ककवथ्यः सत्तुभिताः अन

होतायक्षद्बर्हिरूर्णम्रदाभिषङ्नासत्याभिषजाश्विनाश्वाशिशुमतीभिषग्धेनुः सरस्वतीभि
षग्दुहइन्द्रायभेषजम्पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोतर्यज ३३ हो
तायक्षद्दुरोदिशः कवष्योनव्यचस्वतीरश्विभ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहे
धेनुः सरस्वत्यश्विनेन्द्रायभेषजꣳ शुक्रन्नज्योतिरिन्द्रियम्पयः सोमः परिस्रुताघृत
म्मधुव्यन्त्वाज्यस्यहोतर्यज ३४

एवं व्यचस्वतीर्व्यचो व्यंचनं गमनं विद्यते यासु ताः। गमनवत्यः दिशो दिक्कल्याः दुरो द्वारः अश्विभ्यां सहिता ८
मतेयारोदसी द्यावापृथिव्यौ इंद्रीयभेषजमूषजे दुहे दुग्धे कीदृश्यौ रोदसी दुघे कामदुघे दुहः कप्रत्ययः प्रति
हकारस्य घकारः। दुहेः अन्यत्र तलोपश्छांदसः वचनव्यत्ययः। दुहे तौ रोदसी अभ्यामकाशादिं द्रायोषयं दुहाते इत्यर्थः
। अकथितं चेति द्विकर्मकत्वात्। सरस्वती च धेनुर्भूता इंद्राय शुक्रं शुक्लं शुद्धं ज्योतिः इंद्रियं वीर्यं च दुहे दुग्धे अन्य

होतायक्षत्तनूपेपशसा। होतास्तुपेपशसास्तुहूपेउषेहिवचनाद्यात्रिस्थानेकोषप्रयाजदेवो सरस्वत्या सहितो अश्वि।
नौ च यक्षत्। नौ चाश्विनौ नक्तं रात्रौ दिवा दिने वरज साज्येन तिषा। रजः प्राहो दुसमसंजातेमे इषयत ः न कारा अर्थाः
७ तेपयश्रादीनि वंतु। हे होतः त्वं यज होता यक्षद्देव्या होतारा। दैव्या होतारौ अयं चाग्निरसौ चमध्यमः। एतौ प्रयाज
देवौ भिषजौ वैद्यौ अश्विनौ इंद्रं च यक्षत् यजतु। नौ चार्थौ। भिषग्भूता सरस्वती भेषजैः सह इषघवलं इंद्रियं वीर्यं च।

होतायक्षत्तनूपेपशसोषेन क्रूद्दिवाश्विना सम अन्नाते सरस्वत्यास्त्विषिमिन्द्रेण भेषजं ॐ पयेप
नोनरजसा हृदाश्विपानमासरम्पयः सोमः परिस्रुता घृतं मधुव्यन्त्वाज्यस्य होतर्यज ३५
होतायक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषꣳ सरस्वती भि
षक्सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ३६

सीसेन कृत्वा दुहे। दुहये। दुहे लिट्। लोपस्त आत्मनेपदेष्विति तलोपः। इंद्रियार्थे। कीदृशी सरस्वती। दिवा न ७
क्तं अहोरात्रं जागृविः जागरणशीला। स्वकार्ये सिद्धावसमर्था। सुपां सुलुगिति सो लुक्। नौ च दैव्यौ होता
रौ यक्षत्। अथ आदयः पयश्रादीनि वंतु। हे होतस्त्वमपि यज १३

होतायक्षत्तिस्रः। नौचार्थौ। दैव्यौ होतारावुक्ताः भारतीचेति तिस्रो देवीः प्रयाजदेवीः इंद्रं। इंद्रं। अश्विनौ अश्विनौचववत्
नौ। यजतां। या सरस्वती वाचा त्रपीलक्षणा या भेषजं औषधं हिरण्मयं हिरण्मयं धीतमानं रूपं च महत्तेजश्च इंद्रियं वे
द्रायइंद्रार्थं दुहे। दुग्धे। केकृत्वा। त्रयः त्रिधातवः। त्रिभिः पशुभिः तृतीयार्थे प्रथमा। त्रयो धातवः प्रधानांगा पय
दु। लक्षणा प्रकारा येषां ते त्रिधातवः पशवः। ते च त्रयः आश्विनो धूम्रः सारस्वतो मेषः। ऐंद्रः ऋषभः। कीदृशाः प
शवः अपसः। अपइति कर्मनाम। विनालोपः अपस्विनः कर्मवंतः। त्रिभिः पशुभिर्भेषजरूपं इंद्रियं महो सि इंद्राय।
महो सि इंद्राय दुग्धे। तेः स्मादयः पयआदीनि पिवंतु। हे होतः। त्वमप्याज्यस्य यज। हूं नंदेहि। होतायक्षत्त्वष्टारं तेन स

होतायक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा
सरस्वती महः इन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ३२
होतायक्षत्त्वष्टारमिन्द्रमश्विना भिषजं न सरस्वतीमोजो न जूति
रिन्द्रियं वृको न रभसो भिषग्यशः सुरया भेषजं श्रिया न मासरं पयः सोमः परिस्रुता घृत

ऋषभं। नकारास्त्वार्थाः। होता त्वष्टारं प्रयाजदेवं इंद्रं अश्विना अश्विनौ सरस्वतीं भिषजं च यक्षत्। कीदृशं त्वष्टारं। सुरेत
सं। येनाभवं रेतो वीर्यं दृष्टिलक्षणं यस्य स सुरेतास्तं। पद्मा सुष्टु रेताय स्मात्तं। पुंसा रेतसः कारणभूतं। ऋषभं वर्षितारं।
नयापसं। नरेभ्यो हितं नर्यं अपः कर्म यस्य स नर्यापास्तं। केन यजतु। नदाहृ। रभसः सोह्यमो भिषग्वेद्यभूतो याहृकः। ते
न। प्रथमा तृतीयार्थे। सुरां वा वृकलोमानि दिपंते। तो वृकेण यजतु। सुरया च यजतु। भेषजं पयमासरं तेन च यजतु। ए

व्यन्त्वाज्यस्य होतर्यज

स्वमध्याज्यस्य यज १४

होता यक्षद्वनस्पतिं। दैव्यो होता वनस्पतिं प्रयाजदेव्यं व्याघ्रं। विशेषेण जिघ्रतीति व्याघ्रं व्याघ्रमिव राजानं शत
क्रतुमिंद्रं। अश्विना अश्विनौ सरस्वती सरस्वतीं च नमसा अन्नेन यक्षत् यजतु। कीदृशं वनस्पतिं। शमितारं। पशूनां

८

8

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुम्भीमन्न मन्युꣳ राजानं व्या
घ्रन्नमसाश्विना भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रिय
म्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ३५

संस्कर्त्तारं स्वरूपेण। भीमं भयकरं मन्युं क्रोधात्मानं भिषक् वैद्यरूपा या सरस्वती इंद्राय भामं क्रोधं इंद्रियं वी
र्यं च दुहे दोग्धि। ते वनस्पत्यादयः इज्यमानाः पयआदीनि पिबंतु हे होतर्यज १५

८

होतायक्षदग्निं। होता अग्निं प्रयाजदेवं आहवनीयं वा यक्षत। यजतु। किंवा। आं स्वद्य तस्य लोकानां विप्रेषां स्वाहा स्वः पश्या
ह। शोभनं वदन्ति। इयेवात्तलिङ्ग श्रुतिदीर्घः बुवो हस्वः। यजमानः इति शेषः। यजमानो हूत विहूत शोभनात्वदतीत्यर्थः
कर्मणोषष्ठी। मेदसां वपामेवंविधिनापृथक स्वाहा। वयासंवंधि मेदांसि समीचीनानीति एथरवदिति। अश्विभ्यां अश्वि
नौ रूर्थवध्वा गाः शोभनमाह। सरस्वत्यै मेषं शोभनमाह। इंद्राय इंद्रियं वीर्यप्रदं ऋषभं स्वस्वाह। कीदृशायेंद्राय। सिंहाय।
सिंह इव तस्यायद्दिनस्तीति सिंहस्तस्मै शत्रूणामभिभवित्रे। तया सह हूता वलात्मकाय भेषजं हितकारिणमग्निं वस्व

होतायक्षदग्निं ॐ स्वाहाज्यस्य लोकानां ॐ स्वाहा मेदसां पृथक्स्वाहा छागमश्विभ्यां ॐ स्वा
हा मेषं सरस्वत्यै स्वाहा ऋषभमिन्द्राय सिंहाय सहस इन्द्रियं ॐ स्वाहाग्निं भेषजं ॐ स्वा
हा मिन्द्रियं ॐ स्वाहेन्द्रं सुत्रामाणं सवितारं वरुणं भिषजां पतिं ॐ स्वाहा वनस्पतिं
प्रियं पाथो न भेषजं ॐ स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः परिस्रुता घृतंमधु
॥ व्यन्त्वाज्यस्य होतर्यज

स्वाहा न स्वार्थः। इंद्रियं वीर्यप्रदं सोमं च स्व स्वाहा। एता षष्ठी द्वितीया वाज्यभागौ स्व स्वा
हेत्यर्थः। सुष्ठु त्रायते सुत्रामा तं सुत्रामाणं इंद्रं सवितारं भिषजां वैद्यानां पतिं वरुणं च स्व स्वाह। पशु पुरोडाशदेव
ताः स्वस्वाहेत्यर्थः। प्रियं रूपं पाथोन्नं स्वन्नभूतं भेषजं च पशुदेवतानां वनस्पतिं प्रयाजदेवं स्वस्वाहान कार स्वार्थः।
आज्यपा देवाः आज्यपान् देवान् स्वस्वाह। प्रयाजानुयाजा वै देवा आज्यपाः स्वाहेति। क्रियायजमानः कर्ता। देवा हवा
रूचुर्हन्त विजितमेवानु सर्वं यज्ञं संस्थापयेम यत्पशु कस्यनन उनमेप्रयाजे स्वाहाकारेण वयतं समस्थापयन्निस्वाहेति श्रु

का॰ होता यक्षदश्विना विति त्रयो वपानां प्रैषाय यथा लिंगं। होता यक्षदश्विनौ छागस्य होता यक्षत्सरस्वतीं २ होता यक्ष
दिंद्रमृषभस्येति त्रयो वपा त्रयस्य क्रमात्प्रैषाः एककंडिकायामिति सूत्रार्थः। होता यक्षदश्विनौ छागस्या सम लिंगाक
५ देवताः प्रैषा। तत्रा घास्त्रयो वपानां प्रैषा। त्रयाणां प्राजापत्या पंक्तिश्छंदः। द्वितीयस्य द्व्याधिका। प्रथमतृतीययोरेका।

होता यक्षदश्विनौ छागस्य वपाया मेदसो जुषेतां ॐ हविर्होतर्यज १
ज होता यक्षत्सरस्वतीं मेषस्य वपाया मेदसो जुषतां ॐ हविर्होतर्य
ज होता यक्षदिन्द्रमृषभस्य वपाया मेदसो जुषतां ॐ हविर्होतर्यज ३।

थिका। दैव्या होतारा अश्विनौ यक्षतां॥ यजतु। उत्पमानौ नाव अश्विनौ छागस्य वपाया मेदसः संवंथिर्हविर्जुषेतां सेवेतां॥
मेदः स्निग्धभागः। दे होतर्यज। १ होता सरस्वतीं यक्षत्। सा मेषस्य वपाया मेदसो हविर्जुषतां। हे होतः त्वं यज। २ हो ५
ता इंद्रं यक्षतु स इंद्र ऋषभस्य वपाया मेदसो हविर्जुषतां। हे मनुष्य होतस्त्वमपि यज ३

का॰ ग्रहाणां चतुर्थः। होता यक्षद् अश्विनौ सरस्वतीम् इति चतुर्थो ग्रहाणां प्रैषः। होता यक्षद् अश्विनौ सरस्वतीम्। सुत्रादि
ना इंद्रं च यक्षत्। एवं होता यजमानार्थं प्रत्याह। हे अध्वर्यवः इमे सोमा वो युष्माकं युष्माभिः सुताः अभिषुताः कीदृशाः
सोमाः। छागैर्मेषैर्ऋषभैः सुताः सुत्रामाणः सुष्टु रमयंतीति सुत्रामाणः। रमणीयाः। रमतेर्बनण्प्रत्ययः। पशुभिः क्र
यारमीयाः। नौ चार्थीयस्तदावंतः सुत्रामयावा। तथा शष्पैः तोक्मभिर्यवांकुरैर्लाजैश्च महस्वंतः तेजोयुक्ताः। मदाः

होता यक्षद् अश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः
सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः
प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु पिब
न्तु मदन्तु व्यन्तु होतर्यज ४२

मदयंतीति तर्पयंतीति मदाः। मासरेण सर्वौषधीकेन परिष्कृताः अलंकृताः। संपर्चये ... इति सूत्रे। शुक्राः शोचिष्मंतः। प
यस्वंतः पयसा युक्ताः। अमृता अमृतरूपाः प्रस्थिताः। होमाभिमुखं चलिताः। मधुश्चुतः। मधुश्च्योतंतीति मधु
स्राविणः। अश्विनौ सरस्वती सुत्रामा च वृत्रहा वृत्रासुरहंता इंद्रश्च तान् सोमान् जुषंतां सेवंतां। सोम्यं मधु पिबंतु
तृप्यंतां अंतर्वा जेतारो हविर्मदयंतु वा हे होतः त्वमपि यज १९

का॰ हविषामुन्नेरयथालिंगं। वनस्पत्यंतेषु षडग्रेपठमाना होता यक्षदश्विनौ छागस्य हविष इत्याद्यास्त्रयो यथालिंगमश्वि
नादिहविर्यागानां प्रैषा इत्यर्थः। होता यक्षदश्विनौ छागस्य दैव्यो होता अश्विनौ यक्षत् यजतु। ताविज्यमानावश्विनौ छा
१० गस्य हविषः छागसंबंधिहविः आत्तां। अभक्षयतां। कर्मणि षष्ठी। किंच। अद्य अस्मिन् दिने मध्यतः उदरमध्यात् उद्धृते
उद्धृतं मेदो वपारूपं चात्तां। इत्यग्रे हार्भस्कंदेदसि कथमुद्धृतं तत्राह। द्वेषोभ्यः द्विषंतीति द्वेषांसि। द्विषंतस्तत्प्रत्ययः। य
त्तेद्वेष्टृणि रक्षांसि तेभ्यः पुरा उद्धृतं। यावद्रक्षांसि पराभवाय न गच्छंति ततः पूर्वेवोद्धृतमित्यर्थः। तथा गृभः। गृ

होता यक्षदश्विनौ छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरु
षेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरु
द्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गाद
वत्तानां करत एवाश्विना जुषेतां हविर्होतर्यज ४३ ॥

ह्णेन भक्ष्यार्थं इति गृभ्। तस्मात् गृभः इडायाः पुरा प्रथममुद्धृतं। वपाया मिडाप्रयोजनाभावात्। कीदृश्या गृभः। पौरुषेय्याः
। पुरुषार्थमिमे पौरुषेयी। ऋत्विगर्थाः तस्याः। तावश्विनौ नूनं निश्चितं अंगानां घस्तां। अंगानि भक्षयतां। घस्लृ अद
ने विभक्तिव्यत्ययः। षष्ठी द्वितीयार्थे। कीदृशानामंगानां। घासे अज्राणां। एकपदं। घासेषु अज्रा गंतारो येषां तेषां। कृ
चिजनकानां अन्यानि ग्रासेषु नयंतीत्यर्थः। ये समानि नयंति। नेमानि तथा। यवसप्रथमानां यवसे प्रथमानां सुक्षराणां
सुमत्क्षराणां यत्स्यामायंधयमानामानि मासामिति श्रुतेः १९ १०

सुमत्राणां। सुमत्रयंत्वं तिनानि सुमत्राणि तेषां। सुमदिति स्वयमित्यस्य पर्यायः। पान्तमद्रियाणां। मद्र इति स्तो
त्र नाम स्तुपठितं। मद्र इत्यस्य स्तोत्र विमा मद्रियाः स्तुतय। पान्तमसं व्योमद्रियायेषां तेषां। बहुमंत्रैः स्तुतानामित्यर्थः
अग्निष्वात्तानां। अग्निना स्वात्तानां। आस्वादितानां पाककाले पूर्वमग्निनास्वादितानामित्यर्थः। पीवोपवसनानां
। पीवस् शब्दोः स्तुत्रेतः स्थूलवाची पीवसो स्थूलानां मंगानां उपसमीपे वसनं स्थितिर्येषां तानि पीवोपवसनानि।
तेषां स्थूलांगसमीपास्थितानां सूक्ष्माणामित्यर्थः। उपवसने पीव इति प्रातिशाख्यसूत्रेण उपवसने परे पीव
सो विसर्गलोपः। किंच। पार्श्वतः पार्श्वप्रदेशात् श्रोणितः। कटिप्रदेशात्। शितिनामतो बाहुप्रदेशात्। शितिनाम
तो बाहुप्रदेशात्। उत्सादतः उत्सादनमुत्सादः छेदनप्रदेशः। तस्मात्। एवं अंगादंगात्। एकपदे नित्यवीप्स
या इति द्वित्वं प्रत्यंगादवत्तानां अवदानधर्मेण गृहीतानां अंगावयवानां अश्विनौ घर्मं। तान् भद्रयतामितिष्
वैणांसंबंधः। एवाएवं। अश्विना। अश्विनौ हविर्भुवं नामेवन्तौ। भतित्वावदानैतोकरतः। कुरुतः। त्सिमिमिति
ष्टो षः। विकरणव्यत्ययः। पुनर्वचनमादरायाद्देमतुष्टदातः समपियज। पान्तामशब्देनवाहुयपक्षयोतिम
टोसंबंधेन १०

होतायक्षत्सरस्वतींमेषस्य । होतासरस्वतींयजतु । यासरस्वतीमेषस्यहविषः हविः आवयत् । अभक्षयत् । आडुः ए
वंस्यवेनेलेटि रूपं । यक्षाभक्षयतु । लेटिचाडागमेरूपं । अग्रघमध्यतोमेदउत्सादिव्याख्यापूर्ववत् । साङ्गानिघसत् । एवे

॥ होतायक्षत्सरस्वतीमेषस्यहविषऽआवयदद्यमध्यतोमेदऽउद्भृतम्पुराद्वेषोभ्यःपुरापौरुषेय्यागृभोघस्तन्नूनङ्घासेऽअज्राणांयवसप्रथमानां ॐ सुमत्क्षराणां ॐ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतःश्रोणितःशितामतऽउत्सादतोऽङ्गादङ्गादवत्तानाङ्करदेवं सरस्वतीजुषतां ॐ हविर्होतर्यज ४४ होतायक्षदिन्द्रमृषभस्यहविषऽआवयदद्यमध्यतोमेदऽउद्भृतम्पुराद्वेषोभ्यःपुरापौरुषेय्यागृभोघस्तन्नूनङ्घासेऽअज्राणांयवसप्रथमानां ॐ सुमत्क्षराणां ॐ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतःश्रोणितःशितामतऽउत्सादतोऽङ्गादङ्गादवत्तानाङ्करदेवमिन्द्रोजुषतां ॐ हविर्होतर्यज ४५

सरस्वतीहविर्जुषतां । तस्मिंक्करदित्येकवचनात्निग्रमडङ्के । होतायक्षदिंद्रमृषभस्य । होताइंद्रंयजतु । सइंद्रऋ ॥
षभस्यहविषआवयत्अभक्षयत् । एवमिंद्रोहविर्जुषतामित्यंतंसर्ववत् ॥

का॰ उत्तमौ वनस्पतिस्विष्टकृतोः अनेयष्टमानौ होता यक्षद्वनस्पतिमभि। होता यक्षदग्निं स्विष्टकृतमिति क्रमेणावन
स्पतियागे स्विष्टकृद्यागे च प्रैषौ। होता यक्षद्वनस्पति यूपादेवता। दैव्यो होता। वनस्पतिर्यूपं अभियक्षत्। अभिय
जतु। हि यस्मात् वनस्पतिः रशनया रज्वा कृत्वा अधित यन्त्रितवान् पश्यनिति शेषः। दधातेर्लुङि स्थाघ्वोरिच्चेतीका
रः कीदृश्या रज्वा पिष्टतमया। स्वरूपतमया। पिष्टशब्दो रूपवाची। अत्यंतं पिष्टा स्वरूपा पिष्टतमा तया रभिष्ठया

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित यत्राश्विनोश्छागस्य हवि
षः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्रिया धामानि यत्रेन्द्रस्य ऋषभस्य हविषः
प्रिया धामानि यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णः
प्रिया धामानि यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रि
या पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैता
न्प्रस्तुत्येवोपावस्रक्षद्रभीयस इव कृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज

। रभते यस्त्रियच्छनीतिरबीन्टचड़ीपा। अत्यंतं रब्धी रभिष्ठतया। तुश्छंदसीति इष्ठनि टचो लोपः। समर्थयेत्यर्थः
रशनी वनस्पतिः प्रार्थ्यते। यत्र अश्विनोः संबंधिनः छागस्य हविषः छागरूपस्य हविषः प्रिया प्रियाणि। उक्तानि।
नानि वर्तंते इति शेषः। एवमग्रेपि ११

यत्रसरस्वत्यामेषस्यमेषरूपस्यहविषः ॥प्रियाणिधामानि।यत्रइंद्रस्यऋषभस्यहविषः प्रियाणिधामानि।यत्रतेषांप
शुदेवानांस्थानानि।यत्राग्नेः प्रियाणिधामानि।यत्रसोमस्यप्रियाणिधामानि।यत्राज्यभागौ।यत्रसुत्राम्ण
१२ इंद्रस्यप्रियाणिधामानि।यत्रसवितुः।प्रियाणिधामानि।यत्रवरुणस्यप्रियाणिधामानि।यत्रतेपशुपुरोडाशदे
12 वाः।यत्रवनस्पतेः प्रियाणिपाथांसि।अत्राणि।अथयत्रप्रयाजानांदेवानांप्रयाजानुयाजानांप्रियाणिधामा
नि।यत्रहोतुः।अग्नेः स्विष्टकृतः प्रियाणिधामानि।एतानृत्वगादीन्पश्यन्नभीयसइवकुर्वन्।वर्जयंतेनेरत्वा
रः।अन्यंतेरक्षोरभीयामः।तानृभीयामः।सरमसोप्यकृत्वादूरवचार्यः।प्रस्तुत्यवप्रकैषाणांस्तुताचा।उपस्तु
त्यवा।उपसमीपेस्तुताचवरेवौचार्था।तत्रतेषुसर्वोकेषुस्थानेषुवनस्पतिर्देवउपावसृजतु।उपावसृजतु।
स्थापयतु।सृजतेर्लेटि।लृपोलेटिवा।सिब्बहुलंलेटीतिसिप्प्रत्ययेऽडागमेचरूपं।वनस्पतिर्देवएवंकरत्वक
रोतु।हविषश्चजुषतां।हेमनुष्यहोतः त्वमपियज॥ १३ ॥

१२

होता यक्षदग्निं स्विष्टकृतं । स्विष्टकृदग्निर्देवता । होता स्विष्टकृतं अग्निं यजतु । यजतु योऽग्निः स्विष्टकृत् अश्विनोः छागस्य
हविषः संबंधीनि प्रियाणि धामानि अयाट् अयाक्षीत् इष्टवान् । अवदानानि यजति स्मेत्यर्थः । एवमग्रेऽपि । यः सरस्वत्या
मेषस्य हविषः प्रियाधामानि । अवदानानि अयाट् अयाक्षीत् इष्टवान् । अवदानानि यजति । य इंद्रस्य ऋषभस्य हवि
षः प्रियाणि धामानि अयाट् । एताः प्रयाजदेवाः अग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामानि अयाट् । एतावाज्यभा
गौ । त्वष्टुर्वायतेः सुत्राम्णः इंद्रस्य प्रियाः । सवितुः प्रि॰ । वरुणस्य प्रियाः । हूताः पशुपुरोडाशदेवताः । वनस्पतेः प्रिया

होता यक्षदग्निं ॐ स्विष्टकृतमयाडग्निरश्विनोश्छागस्य हविषः प्रिया धामान्ययाट् सरस्वत्या मेष
स्य हविषः प्रिया धामान्ययाडिन्द्रस्य ऋषभस्य हविषः प्रिया धामान्ययाडग्नेः प्रिया धामा
न्ययाट् सोमस्य प्रिया धामान्ययाडिन्द्रस्य सुत्राम्णः प्रिया धामान्ययाट् सवितुः प्रिया धामान्य
याड् वरुणस्य प्रिया धामान्ययाड् वनस्पतेः प्रिया पाथांसि ॐ अयाड् देवानामाज्यपानां प्रिया धा
मानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो
॥ अध्वरा जातवेदा जुषतां ॐ हविः

णि धामानि यक्षत् । इष्टवान् । स्वं महिमानं स्वां विभूतिं यक्षत् । किं च आ उ
ज्याः समंतात् यष्टव्याः गव्याः राज्याः यागार्हाः । इषः इच्छंति इषः सकामाः प्रजाः आयजतां सम्यक् यजंतु । वचनव्यत्य
यः । प्रजा यागशीला यागयोग्याश्च भवंत्वित्यर्थः । स जातवेदाः स्विष्टकृदग्निः । अध्वरान् अध्वरान् यज्ञान् कृणोतु क
रोतु । हविश्च जुषतां हे मनुष्य होतः विभक्तेराकारः २५

का॰ अनयाजप्रैषाद्देवंबर्हिरितियाज्यास्त्रदेवंबर्हिः सरस्वतीत्याद्याएकादशकंडिकास्त्रियपेणअनुयाजायाज्या
नोप्रैषायाज्यास्त्रभवंतीत्यर्थः। देवंबर्हिः। एकादशानुयाजप्रैषाअश्विसरस्वतींद्रदेवत्याः। वनस्पत्यार्षंत्रिष्टुभः
१३ ।अवर्हिनयत्प्रायाः। शोभनादेवायस्मात्तत्तत्सुदेवंयत्तद्वर्हिर्देवमनुयाजेदेवतात्तिनवर्हिषासरस्वतीअश्विनाश्च
श्विनौचइंद्रेत्राजोदधुःदधतु। अश्योः इंद्रनेत्रयोः चक्षुः इंद्रियंचदधुः। नकारश्चार्थः। एवमग्रेपि। वसुवनेवसु
वननायधनलाभायचसुधेयस्यचसुनोपेयंवसुधेयं। नस्य। वसुनिधानायचअश्विनावेद्यावश्विनौसरस्वती

देवम्बर्हिः सरस्वतीसुदेवमिन्द्रे अश्विना तेजोनचक्षुरक्ष्योर्बर्हिषादधुरिन्द्रियंवसु
वनेवसुधेयस्यव्यन्तुयज ४८ देवीर्द्वारो अश्विनाभिषजेन्द्रेसरस्वती प्राणन्नवीर्यं
नसिद्वारोदधुरिन्द्रियंवसुवने वसुधेयस्यव्यन्तुयज ४९ देवीउषासावश्विना
सुत्रामेन्द्रेसरस्वती बलन्नवाचमास्येउषाभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यं

वेइंद्रेवीर्यंबलंदधुः। नसिइंद्रस्यनासिकायांप्राणंइंद्रियंप्राणेंद्रियंचदधुः। वसु। व्या। ख्यातंदेवीउषासानक्तो
षासाविति प्राप्तेछांदसआदिपदलोपः। उषासादेवीनक्तोषसौअनुयाजदेवतेनाभ्यांउषाभ्यांनक्तोषोभ्यांसह १२
अश्विनौसुत्रामाशोभनरक्षणकर्त्रीसरस्वतीचइंद्रेबलंदधुः। आस्येइंद्रमुखेवाचंइंद्रियंवागिंद्रियंचदधुः। नक्षा

देवीजोष्ट्री। हे जोष्ट्री जोषयित्र्यौ स्तुवन्त्यसेवयित्र्यौ देवी देव्यावनुयाजदेव्यौ द्यावापृथिव्यौ अहोरात्रे वा संयं च समाचे
तिकाङ्क्षरः। ताभ्यां जोष्ट्रीभ्यां सह सरस्वती अश्विनावश्विनौ च इंद्रं अवर्द्धयन्। कथमवर्द्धयन्नत आह। इंद्रियेणाद
धुः। तत्कर्णयोः श्रोत्रमिंद्रियं दधुः। वसुः। देवी ऊर्जाहुती। उत्तरार्द्धे आहुती शब्दस्तत्रैयार्थः। जोष्ट्र्यौ रेव देवता
विकल्पः। ये देवी ऊर्जा सरस्वती आहुती यद्वाने होमो वा ययोस्ते ऊर्जाहुती। दुघे दुग्धे येऽत्र दुघे कामसरके। सुदुघे
सुदोहनेन ताभ्यामाहुतिभ्यां सरस्वती भिषजावश्विनौ च इंद्रे इंद्रे इंद्रं अवतः। अवंति। एतेति वचनव्यत्ययः। कथं तदा

देवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन्। श्रोत्रन्नकर्णयोर्यशो जोष्ट्रीभ्यान्दधुरिन्द्रियंवसुव
नेवसुधेयस्यव्यन्तुयज ५१ देवीऽऊर्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्यश्विनाभिषजावतः शु
क्रन्नज्योतिस्तनयोराहुतीधत्तऽइन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ५२ देवादेवानां
भिषजाहोताराविन्द्रमश्विना वषट्कारैःसरस्वतीत्विषिन्नहृदयेमतिꣳहोतृभ्यान्दधुरि
न्द्रियंवसुधेयस्यव्यन्तुयज ५३ देवीस्तिस्रस्तिस्रोदेवीरश्विनेडासरस्वतीशूषन्नमध्येनां
॥ भ्यामिन्द्रायदधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ५४

ह। ज्योतिस्तेन इंद्रे इंद्रं धत्तः। दधति। स्तनयोः
शुक्रमिंद्रियं च धत्तः। वचनव्यत्ययः। नञ्चार्थः। व्याख्यानमन्यत्। देवादेवानां। देवानां देवादेवौ यौ होतारौ अनुयाजदे
वौ ताभ्यां होतृभ्यां। सह वषट्कारैश्च सह भिषजौ अश्विनौ सरस्वती च इंद्रे इंद्रे त्विषिं कांतिं दधुः। हृदये मतिं बुद्धिं इंद्रियं च बुद्धी
न्द्रियं च दधुः। नञ्चार्थः। वसुउक्तं। देवीस्तिस्रः। यास्तिस्रो देव्यो भारती इडा सरस्वती। तिस्रो देवीः विभक्तिव्यत्ययः।
ताभिः तिसृभिर्देवीभिः सह अश्विनौ सरस्वती इडा च इंद्राय इंद्रे नाभ्यां मध्ये च शूषं बलं इंद्रियं च दधुः। नञ्चार्थः। व

देवइंद्रः। नराश्चसिन्नासीनाः शंसंतीति यास्को ऽत्तेन नराशंसो देवो ऽस्तु यज्ञरूपो यत्तः रेतो वीर्यरूपं सोदर्यम् अमृतं जनि
त्रउत्तपं जन्म इंद्रियाणि च इंद्राय दधात्। नक्षत्रार्थः। कीदृशो नराशंसः। इंद्रः। इंद्रतीति इंद्रः ऐश्वर्यवान्। इदि परमैश्वर्ये। त्रि
सं वरूथः। त्रीणि वरूथानि गृहाणि सदोहविर्द्धानाग्नीध्राणि यस्य सः तथा लक्ष्मा लत्वतिः करोति कर्म जगतः कर्ता
१८ । यज्ञा देवजगदुत्पत्तेः। यस्य नराशंसस्य रथः सरस्वत्या अश्विभ्यां च ह्रीयते। नीयते ऊह्यते। वसुवने आत्मनि देवो
देवैः। वनस्पतिर्देवो नो ऽस्माकं उजः तेजः जूतिः जूतिं जवं वेगं भामं क्रोधं इंद्रियाणि च दधत् दधातु। यो वनस्पति

14

देवइंद्रो नराशंसः त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः रेतो न रूपममृतं जनित्रमि
न्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ५५ देवो देवैर्वनस्पतिर्हि
रण्यपर्णो ऽश्विभ्याꣳ सरस्वत्या सुपिप्पलः इन्द्राय पच्यते मधु ओजो न जूतिर्ऋषभो
न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य वेतु यज ५६

पुपः इंद्राय मधु मधुरं फलं पच्यते पचति फलति इंद्राय फलं ददाति। नकारो चार्थे। कीदृशो वनस्पतिः। देवै
र्हिरण्यपर्णः। हिरण्यरूपाणि पर्णानि यस्य देवाय यस्य दिव्यानि पर्णानि नीत्यर्थः। अश्विभ्यां सरस्वत्या च सु
पिप्पलः शोभनं पिप्पलं फलं यस्य सः। अश्विनौ सरस्वती च यस्य वनस्पतेः फलानि नीत्यर्थः। ऋषभः। एज्यः। १५
ऋषभशत्रूः स्तावचनः वस्तु २२

देवंवर्हिः। हेइड्वारितीनां। वारिजलंइतिगच्छन्तिर्यासांतावारितयः। तस्मात्जलोद्भवानामोषधीनांसंबंधिवर्हिः तेनवस
दामदस्मिन्नध्वरेयज्ञेअश्विभ्यांसरस्वत्याचस्तीर्णे। आस्तृतं। कीदृशंवर्हिः। देवं। दीप्यमानं। ऊर्णम्रदाः। ऊर्णामिव
म्रदोपः। छांदसईलोपापः। अतएववस्थानांस्तुवेहरूपं। किंच। अश्विसरस्वत्यः वर्हिषासहराजानंदीप्यमानंम
संकोचार्थंइंद्रियंचदेहेइंद्रतयिदधुः। किमर्थं। ईशाये। ऐश्वर्याय। ईशनंईशा। तस्यां गुरोश्चहलइतिस्त्रियिकारेउप
नेरप्रत्ययः। स्त्रीनाटाप्। वसुवने। उक्तंदेवोअग्निः। शोभनंइष्टंयागंकरोतीतिस्विष्टकृत् अग्निर्देवोयष्ठायष्टं।

देवम्बर्हिर्वारितीनामध्वरेस्तीर्णमश्विभ्यामूर्णम्रदाःसरस्वत्यास्योनमिन्द्रतेसदः ईशायै
मन्युꣳराजानम्बर्हिषादधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ४८ देवोऽअग्निःस्विष्ट
कृद्देवान्यक्षद्यथायथꣳहोताराविन्द्रमश्विनावाचावाचꣳसरस्वतीमग्निꣳसोमꣳस्वि
ष्टकृत्स्विष्टऽइन्द्रःसुत्रामासविता वरुणोभिषगिष्टोदेवोवनस्पतिःस्विष्टादेवाऽआज्यपाः
स्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमूर्जमपचितिꣳस्वधांवसुवने

यथास्वं। येनप्रकारेणइष्टव्यास्तथा। देवान्वक्ष्यमाणान् यक्षत्। इष्टवान्। कान्देवान्तत्राह। होतारौ। अयंचाग्निरसौच
मध्यमोवायुः। होतृमैत्रावरुणौवा। इंद्रं। अश्विना। अश्विनौच। वाचा। मंत्रेणवाचंचयक्षत्। सरस्वतीं। अग्निंसोमंच। किं
च। स्विष्टकृत्शोभनयज्ञकारी सुत्रामा। शोभनरक्षकः। मनिन्प्रत्ययः। इंद्रः स्विष्टः। सुष्ठुइष्टः। सविताचवरुणोभिषक् इ
ष्टः। वनस्पतिर्देवश्चइष्टः। आज्यपादेवाःप्रयाजानुयाजास्विष्टाः। अग्निरयिष्टाना अग्निनाभौमेनहविर्होताइष्टः। किंचहो

सं
~~१६~~
16 15

का॰ अग्निमद्येति सूक्तवाकप्रैषः। अग्निमद्य होतारमित्यादिः सूक्ता ब्रूहीत्यन्तः कंडिकात्रयात्मकः सूक्तवाकप्रैषो भवति। अग्निमद्य
लिंगोक्तदैवतः प्रैषः। प्रथमाशीः द्वितीयाधृतिः तृतीयाकूतिः॥ अयं यजमानः यम् अग्निं होतारं अवृणीत वृतवान्। वृणोते
र्लङ्। किं कुर्वन्। पक्तीः। पक्तव्यानि हवींषि पचन्। सामान्येनोक्त्वा विशेषमाह। पुरोडाशान् पचन्। अश्विभ्यामश्विनोरर्थे छाग
ं बध्नन् यूपे इति शेषः। सरस्वत्यै मेषं बध्नन्। तथा अश्विभ्यां सरस्वत्यै सुत्राम्णे रक्षकाय इंद्राय च सुरासोमान् सुन्वन्। अग्निम
वृणीत। सूपस्था अद्य अद्य वनस्पतिर्देवः छागेन कृत्वा अश्विभ्यां सूपस्था अभवत् सुष्ठु उपतिष्ठते सेव्यते स सूपस्थाः। छाग

अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्विभ्यां छाग९ं
सरस्वत्यै मेषमिन्द्राय ऋषभ९ं सुन्वन्नश्विभ्या ८७ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान्त्सू
पस्थाः अद्य ५९ सूपस्था अद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय
ऋषभेणाक्षंस्तान्मेदस्तः प्रतिपचताग्रभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः

नाश्विनोः मेषं च कारेत्यर्थः। मेषेण सरस्वत्यै सूपस्था अभवत्। ऋषभे ॥ सुत्रामा सुरासोमान्त्वामद्य ६·
ण इंद्राय सूपस्था अभवत्। वनस्पतिना छागमेषर्षभैः छागादीनां सूपस्थाने कृते तत्कथं ज्ञायते तत्राह। अक्षत्ते यो मेद
स्तः मेदो वपामेभ्यस्तान् छागादीन् अक्षन् अभक्षयन् पुनः पचता। पच्यन्तेनेति पचता। पचतानि पक्वानि अवदाना
नि प्रत्यगृभीषत। प्रत्यगृह्णन्। पचतेः भृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्यः इत्यतच् प्रत्ययः। भूतेपिदृश्यन्त।
इति वचनात् छूतेपिदृष्ट्वाः। विभक्तेराकारः। पुनस्तैः पुरोडाशैः। अवीवृधंत रोधंत। किंच अश्विनौ सरस्वती सुत्रामा
इंद्रश्च सुरासोमान् अपुः। पीतवंतः। पानेर्लुङ्। पिबादेशाभावश्छांदसः। रवहुवा। सुराश्च सोमाश्च जानन्। सुरा
सपान्सोमानवा २९ ॥

१५

ला मघा। देवो होता। अग्निरुच्यते। हे ऋषे मंत्राणां द्रष्टः। हे आर्षेय। यजमानार्षेयैर्विद्यते इत्येवं संबोध्यते। हे ऋषी
णां नपात् पुत्र अयं यजमानो बहुभ्यः संगतेभ्यो मिलितेभ्यो देवेभ्य इति हेतोः। यत्त्वामेव आग्रहणीत। सम्यग्वृ
तवान्। इति किं। एषोऽग्निर्मह्यं देवेषु वा विवरीतुं योग्यं वा विवरणीयं वसु धनं आपद्यते आदास्यते यज
नेऽर्थं ताद्यात्वम्। मया देवेभ्यो दातुं गृहीष्यते इत्यर्थः। किं च हे देव अग्ने। या। यानि। तानि दानानि देवा अदुः
दत्तवन्तः तानि दानानि अस्मै यजमानाय आशास्व च। इच्छ। तानि यजमानाय दातुमानीतिश इच्छेत्यर्थः। आगु

त्वामद्य ऋषऽआर्षेयऽऋषीणान्नपादवृणीतायँयजमानो बहुभ्यऽआ सङ्गतेभ्यः
एष मे देवेषु वसु वार्य्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ
च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय।
सूक्ता ब्रूहि ६१ इति संहितापाठे एकविंशतितमोऽध्यायः २१

रस्व च। उद्यच्छ च। गुरो उद्यमेन दाति। दानाय उद्यमं कुरु आकारौ चकारौ च भिन्नक्रमौ। हे होतः त्वं इषितः प्रे।
षितोऽसि प्रेरितोऽसि। कस्मै तदाह। भद्रवाच्याय। वक्तुं योग्यं वाच्यं भद्रं शुभं च तद्वाच्यं च भद्रवाच्यं तस्मै। भद्रं ब्रूहि
प्रेषितोऽसीत्यर्थः। किं च। सूक्तानि त्वं ब्रूहि इति सूक्तवाकाय सूक्तवचनाय सूक्तानि वक्तुं मानुषो होता च प्रेषितो
ऽसि ६१ इति श्रीमदनन्तदीयवत्कृते वेददीपमनोहरे एकविंशीयमध्यायो याज्यादिप्रैषाणां निगमः २१

सर्वकामस्य राज्ञोऽश्वमेधः तस्य फाल्गुनशुक्लाष्टम्यामारंभः का निष्कं प्रतिमुंचन्वाचयति तेजोसीति चतुःसुवर्णनिर्मित
माभरणं निष्कं तं यजमानकंठे प्रतिबध्नन्नध्वर्युस्तेजोसीति पाठीयं तं वाचयति तं च निष्कं प्रातर्दोमांते सुवर्णा हुतं निष्कं त्वाध्वर्य
१६ वे दद्यादिति सूत्रार्थः तेजोसि चत्वारोऽध्याया अश्वमेधमंत्रास्तेषां प्रजापतिर्ऋषिः तेजोसीत्यस्य सौवर्णो निष्को देवता प्रजाप
त्यानुष्टुप् हे निष्क त्वं तेजोसि आग्नेयत्वात् शुक्रं अग्नेर्वीर्यं चासि अग्निर्देवाश्वयोः भिद्यध्याविस्रुपक्रमयनास्तैनः प्रासिंच

तेजोसि शुक्रममृतमायुष्पा आयुर्मे पाहि देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे १

तद्धिरण्यमभवत् इति श्रुतेः अमृतं च। वह्निनायेऽनुक्षियमानद्रव्यनायिकरणत्वात् दानेनामृतत्वप्रदानाद्वा हि
रण्यदा अमृतत्वं भजंते इति श्रुतेः आयुःपाः। आयुः पातीति। आयुर्योगोपायिना। अतो याचे। मम आयुः पाहि रक्षय।
त्वमस्मान्निर्यर्यतमायुः प्रार्थ्यते का·देवस्येति रशनामादाय ब्रह्मन्नश्वं भंत्स्यामीत्याह। देवस्य त्वेत्यादि सवमावधे
तीयेनेन मंत्रेण त्रयोदशारत्निं दर्भमयीं हिरण्मयीं वा रशनां रज्जुमादाय ब्रह्मन्नश्वमित्यादि तेन वाच्यासमि।
त्येतं मंत्रं ब्रह्माणं प्रत्याहेति सूत्रार्थः देवस्येति व्याख्यातं १ १६

इमामस्मान्। यज्ञपुरुषः हृष्टा वृषाना देवस्या त्रिष्टुप्। स्तवनेवत्तनः यज्ञः। भावेक्तः। नोऽस्माकमस्मिन् सुते यज्ञे सारथानास्त्रा
वभूव उत्पात्ना। कीदृशी। ऋतस्य यज्ञस्य सामन् स्तोत्रे सरमा रंभेसरं यज्ञप्रसारं आरपन्ती रपउ कथा उच्चारयंती यज्ञप
सारो भवं नितिवदं ती त्यर्थः सा का विधेनेलभ्यते स्व गौयस्तिविदथ्याः यज्ञाः। विदथेष्वयज्ञेषु। विदे रथगिति। अथ
कृप्रत्ययः। कव्याः। कवयः। विभक्ते ड्याद्येशः सुपांसुलुगित्यादिना यज्ञेषु कुशलाः प्रजापत्यादयो याः इमां रथानं
ऋतस्य यज्ञस्य पूर्वं प्रथमे आयुषि प्रारंभे इत्यर्थः। अरटभ्यान्। अरटत्वन्। या पूर्वैरदृष्टीनासारमानाचा हूतास्य
धः कारना तेव याने ति ब्रह्मा तुत्ता नोः भिथा अमसीति वधान मध्ये। तेव यानदेवेभ्यः प्रजापतये तेन राधुद्वाति मंत्रेणाव

इमामरभ्यान्नृशंसा मन्तस्य पूर्वैः आयुषि विदथेषु कव्या सा नोऽअस्मिन्सुतः आव
भूव ऋतस्य सामन्सरमारपन्ती २ अभिथाऽअसि भुवनमसि यन्तासि धर्ता स त्वमग्निं
॥ वैश्वानरं सप्रथसं गच्छ स्वाहाकृतः ॥

स्लणानुत्ता नोः भिथा असीति वधान मध्ये तेव यानदेवेभ्यः
प्रजापतये तेन राधुद्वीति मंत्रेण ब्रह्मणा नुत्ता नोऽ स्वर्धुरभिथा असीत्यादि स्वगात्ता देवेभ्यः प्रजापतये उत्पं तेन मं
त्रेण वधानाया संवधाति। अभिथा असि। लिंगोक्त देवतानि यजूंषि। अश्वस्यो देवता यस्य। हे अश्व यस्त्वं अभिथा असि
अभिधीयते स्तूयते इत्यभिथाः क्लिप भुवनं सर्वेषामाश्रयस्त्वासि। यन्ता नियमनकर्ता चासि। धर्ता जगद्धारयिता च
स एवंविधः त्वं स्वाहाकृतः स्वाहाकारेण हुतः सन् अग्निं गच्छ प्राप्नुहि कीदृशमग्निं वैश्वानरं। विश्वेभ्यः सर्वेभ्यो
नरेभ्यो हितं। सप्रथसं प्रथने रसन प्रत्ययः। प्रथनं प्रथो विस्तारस्तत्सहितं। यद्वा सर्वतस्तिर्यगूर्ध्वमधश्च प्रथमे

यजु० वे० भा० ॥ ३ ॥ ८

सं
१८

स्वगाय त्वा। हे अश्व त्वां देवेभ्यः प्रजापतये च देवार्थं प्रजापत्यर्थं च स्वगा करोमीति शेषः। स्वेनैव गच्छतीति स्वगा। ड
न्तेनः। विभक्तेर्डादेशो वा स्वयं वा गामिनमित्यर्थः। ब्रह्मन्नश्वं ब्रह्मा देवता। ब्रह्माणमामंत्रयते। हे ब्रह्मन् अश्वं मेत्स्यामि
बंधनं करिष्यामि। बध्नातेर्लृटि रूपं पिपृक्काम्या इति मत्वा। किमर्थं। देवेभ्यः प्रजापतये च तेन अश्वबंधनेनाहं राध्या
सं। राध संसिद्धौ। सिद्धिकर्मसमाप्तिरूपां प्राप्नुयां। आशीर्लिङ्। ब्रह्मा प्रसौति। तं बधान अस्य श्रीदेवतं यजुः हे अ
ध्वर्यो यं बंद्धुमिच्छसि तमश्वं बधान। किमर्थं देवेभ्यः प्रजापतये च। तेनाश्वबंधनेन राध्नुहि सिद्धिं यज्ञसमाप्तिल

स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्। तम्ब
धान देवेभ्यः प्रजापतये तेन राध्नुहि॥ प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं
प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो
जुष्टं प्रोक्षामि यो अर्वन्तं जिघाँसति तमभ्यमीति वरुणः। परो मर्त्तः परः श्वा। ५

तां प्राप्नुहि। राधेः स्वादित्वाल्लोटि श्नुप्रत्ययः। कात्यायनः। प्रावरान्प्रयोगेत्वा प्रजापतये त्वेति प्रोक्षत्यश्वं प्रतिमंत्रं।
ततोऽध्वर्युः स्वयं वास्नरागारादिध्या प्रयोगात्वा प्रजामंत्रेणाभिराङ्गः पंचमंत्रैः प्रतिमंत्रमश्वं प्रोक्षति प्रजापतये त्वा
।लिंगोक्तदेवतानि पंच यजूंषि हे अश्व प्रजापतये जुष्टं त्वा प्रोक्षामि सिंचामि। अनेन प्रोक्षणेन प्रजापतेरिव त्वा अश्वो वी
र्यं दधाति तथा च श्रुतिः प्रजापतिर्वै देवानां वीर्यमेवास्मिन्दधाति तस्मादश्वः पशूनां वीर्यवत्तम इति। इंद्राग्नि
भ्यां जुष्टं त्वा प्रोक्षामि। अनेनेन्द्राग्न्योर्वीर्यमोजो दधाति तथा च श्रुतिः। इंद्राग्नी वै देवानामोजस्वितमावोजस एव।

१८

वायवेत्त्वाजुष्टंप्रोक्षामि अनेनवायोःप्रियोवास्मैवेगंदधाति तथाचश्रुतिः वायुर्वैदेवानामाशिष्ठोजवमेवास्मिन्दधातिन
स्मादश्वः पशूनामाशिष्ठइति आशिष्ठोवेगवत्तरः विश्वेभ्यस्त्वाजुष्टंप्रोक्षामि अनेनाश्वेपशौदधाति विश्वेवैदेवाय
शस्विनमायशएवास्मिन्दधातितस्मादश्वः पशूनांयशस्वितमइतिश्रुतेः सर्वेभ्योदेवेभ्यस्त्वाजुष्टंप्रोक्षामि अनेन
सर्वादेवताअश्वेदधाति सर्वेभ्यस्त्वादेवेभ्योजुष्टंप्रोक्षामीतिसर्वाएवास्मिन्देवताअन्वायातयतीतिश्रुतेः का॰ यो
अर्वन्तमितिवाचयति एतद्वैद्वेष्यापांजातेनसुसाध्वर्युरितेनवचनेनैतेश्रुतिवादिरश्वपालेनहतेसतियोअर्वन्त
मित्यादिवरुणइत्यन्तंमंत्रंयजमानंवाचयति योअर्वन्तंगायत्री एवार्हस्यस्तुतिः परोर्हीलिंगोक्तदेवताय: अर्वे
न्तमश्वंजिघांसति हंतुमिच्छति अर्वणाश्वस्यसावनतमस इतिमंत्रेनादेशः हन्तेः सनंताल्लट् वरुणः तमश्वजिघांसं
तमभ्यमीति हिनस्ति अमहिंसायां एतस्माल्लटितिरुत्तणाम्यमः सार्वधातुकइतिईप्रत्ययः का॰ वेतसकटेना
घाऽश्वंस्नावयतिपरोमर्तइति वेतसनकृतेनकटेनमरनपादं अश्वघोजल्लेनाशयति परोमर्तः अश्वजिघांसु
मनुष्यः परः पराभूतः अथसदंतीनः श्वाचपरः पराकृतः स्वरूपेणाश्वहन्तैवपराकृतइत्यर्थः ५ ॥

का॰ अग्निसमीपमानीयाग्नये स्वाहेति जुहोत्यनुवाकेन प्रतिमंत्रं सहस्रं वावर्त्ते ततः स्थावराभ्योऽद्भ्यः सकाशादप्स्वमग्निपा(
त्रमानीयाग्नये स्वाहेत्येककैकात्मकेनानुवाकेन प्रतिमंत्रं सकृद्गृहीतानुष्ठाने लौकिकीयमंत्रादशाज्याहुतीर्जुहोति यद्वा
१८ नुवाकमावर्त्यावर्त्य सहस्रमाज्याहुतीर्जुहोतीति सूत्रार्थः। अग्नये दशयज्ञलिंगोक्तदेवतानि अंगतीत्यग्निः १ सुनोति

18

अग्नये स्वाहा सोमाय स्वाहा यामोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा वि
ष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ६

तिसोमः २ अपां जलानां मोदयति हर्षयति मोदः जलैर्जनानां कर्त्रेत्यर्थः ३ सूते सविता ४ वातीति वायुः ५ वेवेष्टि
व्याप्नोतीति विष्णुः ६ इंदतीन्द्रः ७ बृहतां वेदानां पतिर्बृहस्पतिः ८ मियति स्निह्यतीति मित्रं वृणोति भक्तमजनेव वरुणः
९ एताभिराहुतिभिरेतेभ्यो दशभ्यो देवेभ्यः स्वं ददाति। तथा च श्रुतिः एतावन्तो वै सर्वे देवास्तेभ्य एवैनं जुहोतीति ५ १८

का दक्षिणाग्नेर्जुहुयात् निहिंकाराय स्वाहेति प्रक्रमात् एतदर्थमेवोक्तं तेदक्षिणाग्नेः प्रतिमंत्रप्रक्रमसंज्ञातान् होमानेकोनपंचा
शतं स्वाहान्तदेवतानीत्यर्थः हिंकाराय स्वाहा अश्वस्यैकोनपंचाशच्चेष्टितानि व्यापाराः कंडिकाद्वयेन हिंकरणं हिंकार
स्तस्मै १ हिंकृताय कृतं यद्हिंकृतं तस्मै २ क्रंदतीति क्रंदन् ३ अवनीचैः क्रंदतीत्यवक्रंदः ४ प्रोथतीति प्रोथन् प्रोथत्पर्या
शब्दे ५ प्रनष्टः प्रोथो घोणा यस्य घोणान्तप्रोथमस्त्रियां ६ गंधोस्यास्तीति गंधः ७ घ्रातमाघ्राणमस्यास्तीति घ्रातः ८ निविश

हिंकाराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय १
स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल
गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबु
द्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा संहानाय स्वाहोपस्थिताय स्वाहाय
नाय स्वाहा प्रायणाय स्वाहा ७ गमः

तेति निविष्टः ९ उपविशतीत्युपविष्टः १० सम्यक् दितं खंडितं यस्य स संदितः ११ वल्गतीति वल्गन् १२ आस्ते सावासीनः
१३ शेते सौ शयानः १४ स्वपितीति स्वपन् १५ जागर्तीति जाग्रत् १६ कूजतीति कूजन् १७ प्रकर्षेण बुध्यते प्रबुद्धः १८ विजृं
भते विजृंभमाणः १९ वृत्तीदीप्तौ विशेषेण वर्त्तते विवृत्तः २० संहानाय समेत शरीराय २१ उपतिष्ठते उपस्थितः २२
अयते ऽयनः २३ प्रकृष्टमयते प्रायणः २४ नमः स्वाहा ६

सं १५

यतेस्वाहा यतीतियन् २५ यथावतीतिधावन् २६ उतश्चयिकोद्रावोगतिर्यस्यसउद्रावः २७ उद्रथिकंद्रुतउद्रुतः २८ यद्रु
नीकिरोतीतिस्कारः २९ सुकृतमस्यास्तिसुकृतः ३० निषीदतीतिनिषण्णः ३१ उच्छ्रितेउच्छ्रितः ३२ जवतेजोवेगवान् ३३
बलमस्यास्तिबलः ३४ विवर्ततेसविवर्तमानः ३५ विवर्ततेस्मविवृत्तः ३६ विधुनुतेकम्पतेस्मविधून्वानः ३७ विधूयतेस्म
विधूतः ३८ श्रोतुमिच्छतिशुश्रूषमाणः शुश्रूषुस्सरूपासनश्तिशानच ३९ शृणोतीतिशृण्वान् ४० ईक्षतेसईक्षमाणः

यतेस्वाहाधावतेस्वाहाद्रावायस्वाहाद्रुतायस्वाहास्कारायस्वाहासुकृतायस्वाहानिषण्णा
यस्वाहोच्छ्रितायस्वाहाजवायस्वाहाबलायस्वाहाविवर्तमानायस्वाहाविवृत्तायस्वाहावि
धून्वानायस्वाहाविधूतायस्वाहाशुश्रूषमाणस्वाहाशृण्वतेस्वाहेक्षमाणायस्वाहेक्षिता
यस्वाहावीक्षितायस्वाहानिमेषायस्वाहायदत्तितस्मैस्वाहायत्पिबतितस्मैस्वाहायन्मूत्र
ङ्करोतितस्मैस्वाहाकुर्वतेस्वाहाकृतायस्वाहा ९ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि
धियोयोनः प्रचोदयात् ४ हिरण्यपाणिमूतयेसवितारमुपह्वये सचेत्तादेवतापदम् १०

४१ ईक्षतेस्मेतीक्षितः ४२ विशेषेणेक्षितोवीक्षितः ४३ निमिषतीतिनिमेषः ४४ यत्किंचिदत्तितस्मै ४५ यत्जलादि
कंपिबतितस्मैमूत्रयतेयानकर्त्रे ४६ यन्मूत्रंकरोतितस्मैमूत्रयते ४७ करोतीतिकुर्वन् ४८ कृतमस्यास्तीतिकृतन्तस्मै
स्वाहेतिसर्वत्र ४९ इत्येकोनपञ्चाशत्सुक्रमाः तत्सवितुः षट्टचः सवितृदेवत्यागायत्र्यः सावित्रीणाम्मिश्रणेनायाज्या
नुवाक्याः आग्याख्यातानाम् हिरण्यपाणिं मेधातिथिदृष्टा अहंसवितारउपह्वये आह्वयामि किमर्थंऊतयेरक्षव
नाय कीदृशं हिरण्यपाणिं हिरण्मयोयपाणीयस्यतं यतः ससविताचेत्ता चेतयिता सर्वज्ञः देवता पदस्यानितं १५

देवस्य चेततः । वयं सवितुर्देवस्य सुमतिं शोभनां बुद्धिं प्रकर्षेण हवामहे प्रकर्षेण प्रार्थयामहे । कीदृशस्य सवितुः चेततः चे-
ततीति चेतन् तस्य जानतः । कीदृशीं सुमतिं महीं महतीं । सत्यराधसं । सत्यमनश्वरं राधो धनं यस्याः तां । यद्वा सत्यमाययति
साधयति सा सत्यराधाः तां । सुष्टुतिं देवाय । मतिविदे श्रुतिं वक्तुं ऐश्वर्याय स्पर्द्धे । वयं सवितुर्देवस्य सुष्टुतिं शोभनां स्तुतिं ।
रातिं दानं च प्रईमहे । प्रकर्षेण याचामहे छन्दसि परेपीति क्रियायुदात्तत्वं श्रवः । कीदृशस्य सवितुः सुमतीवृधः शो-
भनां मतिं वर्द्धयति सुमतिवृत्तस्य संहितायामेतद्दीर्घः नयामतीविदः । सर्वेषां मतिं वेत्ति मतिवित् तस्मै । एवं वदीर्घः
रातिं सत्पतिं महे सवितारं उपह्वये आह्वयामि महे पूजयामि च । महः पूजायां । किमर्थं देववीतये । देवानां तर्पणाय । की-

देवस्य चेततो महीं प्र सवितुर्हवामहे सुमतिꣳ सत्यराधसम् ॥ ११ सुष्टुतिꣳ सुमतीवृधो रा-
तिꣳ सवितुरीमहे प्र देवाय मतीविदे ॥ १२ रातिꣳ सत्पतिं महे सवितारमुप ह्वये आस-
वं देववीतये ॥ १३ देवस्य सवितुर्मतिमासवं विश्वदेव्यम् धिया भगं मनामहे ॥ १४

ईदृशं सवितारं । रातिं । रातिर्दाता । रातिः तेऊदीप्तीत्यादिना कर्त्तरि क्तिप्रत्ययो निपातः । सत्पतिं सतां पतिं पालकं ।
आसवं । आभिमुख्येन सौति कर्माण्यनुजानातीत्यासवस्तं पचाद्यजन्तः । देवस्य सवितुः सवितुर्देवस्य मतिं बुद्धिं प्रति
वयं धिया बुद्ध्या भगं धनं मनामहे याचामहे । सवितुर्देवस्य बुद्धिरस्मासु दाननत्परा भवत्वित्यर्थः । कीदृशं भगं आस-
वं आसौत्यनुजानाति येन स आसवस्तं । धनेन सर्वेषामातिथ्यादातृत्वं करोतीत्यर्थः । विश्वेभ्यो देवेभ्यो हितं धनेनैव देव-
तर्पणादित्यर्थः ८

अग्निंस्तोमेनभतिसः स्विष्टकृत्पुरोनुवाक्याः अग्निर्देवताऽगायत्र्याऽयाज्याकर्मेस्तुतेभरवविश्वामित्रविश्वरूपदृष्टाः । हेस्म
त्वयीतत्स्तोमेनस्तुत्याऽग्निंबोधय अवगतार्थंकुरु किंकुर्वन्समिधानः । समिंधयत्समिधानः । समिंधेसमिधानः
२० संदीपयन् कीदृशमग्निंअमर्त्यं मरणधर्मरहितं सोऽग्निर्बोधितः सन्नोऽस्माकं हव्याहवींषिदेवेषुदधततथाऽर्पयतु
अस्यस्तोथिकारोऽस्ति सहव्यवाट् सोऽग्निर्धियाबुद्ध्यासमृण्वति संगच्छतेदेवैः सहहविर्दानाय कीदृशोऽग्निः । ह

अग्निं ॥ स्तोमेनबोधयसमिधानोऽअमर्त्यम् हव्यादेवेषुनो
दधत् १५ सहव्यवाडमर्त्यउशिग्दूतश्चनोहितः अग्निर्धि
यासमृण्वति १६ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे ।
देवाँ॥ऽआसादयादिह १७

व्यंवहतीति । हविषांवोढा अमरणधर्मा उशिक् । वष्टिउष्यतेकमः सर्वैर्विवृश्यतेकमनीयः मेधावीवा । दूतः । देवा
नांदूत्यकर्ता । चनोहितः चनइत्यन्ननाम चनसेऽन्नायहितः हविर्लक्षणान्नसम्पादनायस्थापितः अग्निंदूतं यंअग्निं
अहंपुरोदधे पुरतः स्थापयामि तंप्रतिउपब्रुवे कथयामि । किंतदाह । हेअग्नेऽहृयत्तत्वंदेवानासयानआसाद २०
यस्थापय कीदृशमग्निं दूतंदेवानांहव्यवाहं हविषांवोढारं ८

अजीजनो हि अजनयस्सूर्यं हे पवमान देवत्वात् पिपीलिकमध्याकृतिरनुष्टुप् यस्या आद्यतृतीयौ पादौ द्वादशा
क्षरौ द्वितीयोऽष्टाक्षरः सा पिपीलिकमध्याकृतिरनुष्टुप् जागतावष्टकश्चकृतिर्मध्ये चेदष्टकः पिपीलकमध्येति व
चनात् पवमानस्तुतिः हे पवमान त्वं सूर्यं अजीजनः। उत्पादितवानसि। जनेर्णिजन्ताल्लुङ्। शक्मना। शक्नेन शक्त्या।
शक्लृ शक्तौ मनिन्प्रत्ययः। शाकनाम्ना मेध्येन पयो जलं विधारे। विशेषेण धारयामि। हृष्येयं केन हेतुना। गोजीर

अजीजनो हि पवमान सूर्यं विधारे शक्म
ना पयः गोजीरया रंहमाणः पुरन्ध्या ९

या जीवनं जीवः स्य रेफः कोऽयं दृष्टः। गवां जीवः गोजीवः तया गवां जीविका हेतुना जलं धारयसि। तां सा हविषा
निष्पत्तेः प्राणिनां जीवनाच्च कीदृशस्त्वं पुरंध्या रंहमाणः पुरं बहु दधाति पुरंधिर्धीरा तया रंहमाणः रंहतेरु
ति रंहमाणः गच्छन् पवित्रान् द्रोणकलशं गच्छन्नित्यर्थः विधारे विधारये विधीरयसि पुरुषव्यत्ययः धारयते।
लडि लडुत्तमैकवचने धारयते इति प्राप्ते छंदसुभयथेति शित्वापि आर्धधातुकत्वे इटि निधीरनिटीति णिलोपः धारे [illegible]

का॰ अध्वर्युयजमानैरतिरोः स्वकर्णे जपतो विभूर्मात्रेति तृतीयायां मा विश्वामित्रैः समामायां अध्वर्युयजमानो दक्षिणे अश्वकर्णे
जपतो विभूर्मात्रेति सूत्रार्थः। विभूर्मात्रा अश्वदेवतं यजुः अतिजगती छन्दः द्वे मात्रापित्रेति तृतीयपंचम्यर्थे हे अश्व त्वं मात्रा मा
२१ तुः पृथिव्याः पृथिव्याः सकाशात् विभूरसि विभवति विभूः समर्थोसि पित्रा पितुः सकाशात् दिवः प्रभुः समर्थोसि इयं वै माता
सौ पिता आभ्यामेवैनं परिददातीति श्रुतेः अश्वनामभिरश्वं स्तौति त्वं अश्वोसि अश्नुते व्याप्नोति मार्गम् इत्यश्वः अशूप्रुषिलटिक॰

21

विभूर्मात्रा प्रभूः पित्राश्वोसि हयोस्यत्योसि मयोस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृम॰
णाः असि ययुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि देवा आशापालाः एत॰
न्देवेभ्योश्वं मेधाय प्रोक्षितं रक्षतेह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥१९

णिखटिविशिभ्यः क्वन्निति अशेः क्वन्प्रत्ययः। अश्नाति वा अश्वः हयोसि हयति याति हयः हयगतौ पचाद्यच् अ॰
त्योसि अतसातत्यगमने अतति अत्यः सततगामी अघ्न्यादित्वात् यप्रत्ययः मयोसि मयते गच्छति मयः मयगतौ
पचाद्यच् यद्वा मय इति सुखनाम सुखरूपोसि अर्वासि ऋगतौ इयर्ति गच्छति अर्वा स्नामदिपद्यर्तिपॄशकिभ्यो वनि॰
न्निति वनिन्प्रत्ययः यद्वा अर्वं वयो अर्वति हिनस्ति विसृणिन्यर्वा कनिन्प्रत्ययः सप्तिरसि सपति सैव्येन समवैति
सप्तिः। सप समवाये क्तिन्प्रत्ययः वाजी असि वजति गच्छति वाजी ॥ २१

वज्रगतौ अनेकगतिसूचनाय पुनः पुनर्गत्युक्तिः यद्वा वाजाः पत्ताश्च भूवन्नस्येति वाजी वृषासि वर्षति सिंचतीव
षा कनिखुवृषिभ्यां तिराजित्यन्वियुप्रतिदिव इति कनिप्रत्ययः त्वमणांसि त्वं यजमानेषु मनोपसमन्नमाणः ना
नाम्नायपुरसि अन्तर्भूयतीति यदुः पुरुषेभ्योस्मेधीयइत्यभिधानात् योद्देवेतिडप्रत्ययः किंच नाम्नाशिशुरसि शप
तिह्नंशाकेवातिस्तनमितिशिशुः शः किन्नस्त्वेतिड्वप्रत्ययः सन्वद्भावाद्दित्वमभ्यासस्येकारश्च एवंविधानामादे
आदित्यानामदितेरपत्यानां देवानां पत्नमार्गोऽस्ति हि पतति गच्छतीति पत्रम् पत्नामार्गः अमदीन्यादिनावनित्प्र
त्ययः आदित्यो येन पथा गच्छति तेन मार्गेण गच्छ ॥ का० देवा आशापाला इति वदति गोः स्यादिशन्ननुचरीजातीयां
तावतस्तावतस्तावतः कवचिनिषंगकालात्प्रदेष्टिनो यथासंख्यां चतुर्विंशतिवार्षिकाश्च शतमथास्यैशा
न्यामुक्तकवचस्य दत्तकान्तानादिशति कीदृशाननुचरीसजातीयान् तावतोऽनुचरीसंख्यान् तेन शतं राज
पुत्रान् शतं सूतग्रामाणिपुत्रान् सूतस्य पुत्रोषकालेषामथ्ये ग्रामणीपाणुख्यास्तस्तु नानित्यर्थः शतं दा
संगृहीतृणपुत्रान् ततस्त्रायच्छपायथ्यतास्तस्मृदूः दाचैतत्तायकृताः दावसंगृहीतारस्तस्तु तानक्र
मात्कवचिनिषंगिकलापदेष्टिनः तावसंगृहीत्पुत्रावेष्णतेन राजः पुत्राः सेनाद्वैतः दत्रियपुत्रानिषंगि
णः सखबद्ध्वा सूतग्रामणीपुत्राश्चपिमंतः तावसंगृहीतपुत्रावेष्णादिदंडयवाइत्यर्थः वडवाभ्यो जलस्ना
नाचाश्ववाराणां वर्ष्मस्वदत्तेणतावयजमानोवावानोर्वीऽश्रीतं सावित्रीः कारयति वीणागानंपाविलवषास्त
पाठ्यतिहोमं चैत्यादिनेय इति सूत्रार्थः देवा आशापालाः देवदेवत्यायज्ञः ऋत्विक् आशा दिशः पाल

यंनीति आशापालोहि देवा भूयेयन्तं अश्वंवदन्ते कीदृशे मेथायपयागायप्रोहितं प्रोहतोसंस्कृते राजपुत्रादयपवाशा
पालाः तदुक्तं शतैवैतल्लभ्यराजपुत्राआशापालास्मभ्यएवैनं पविदद्दानीति ॥ आहवनीयेऽस्तमितिचेत् स्तो
२२ धृनीविहरंतीति अस्तमितेर्केऽग्निहोत्रहोमात्प्रागग्निहोत्रार्थमुद्धृतेआहवनीयेग्रावतस्वाहुतिसंख्याआहुतीः
प्रतिमंत्रंजुहोति वर्षपर्यन्तेप्रत्यहं एवंचत्वारिंशदधिकाचतुर्दशशतीभवति तथाचश्रुतिः संवत्सरस्याहुती
22 र्जुहोतिचोशानवतीरेताथाअश्वस्यवंधनं ताभिरेवैनंवध्नातीतिउद्दंतिः चत्वारियजूंषिआग्निदेवत्यानि चतु
र्थमंत्रांतेस्वाहाकारश्रवणात्रिष्वपिस्वाहाकारः प्रयोज्यः अयंप्रत्युच्यते देअस्यउदहंतिरमणांतेस्य उद्भवा
नूमान्तो उद्दतेधृतिः संतेयास्तु उद्भपतेस्वधृतिः स्वानिजाधृतिर्थरणामस्तुस्वाहा १३ ॥ ॥ ॥

२२

का॰ कायस्वाहेतिचाश्वमेधिकानि त्रीणिकस्माजिनदीक्षातोऽश्वदीक्षणीयायाश्चत्वारित्रीणिचाश्वमेधिकानि चत्वार्यौ
श्वरिकाणिपाङ्क्तभवरणानिहुत्वाकायस्वाहेत्याश्वमेधिकानित्रीणिपाङ्क्तभणानिजुहुयात् अन्तर्भूतद्व्यहभणाहोमानन्तरंदीक्ष
णीयायाश्चैवसमाप्यकस्माजिनदीक्षात्रपवेशनानाकर्नेव्या समाहंप्रचरंतीतिसूत्रे समाहंदीक्षणीयाकार्यान्तत्र अत्र
हेकंनेव्यमाह अश्वदीक्षणीयायाश्चत्वारिस्रुलायौ्णिभणानि अकृतेप्रयुजेइत्यादीनित्रीणित्रीणिवाश्वमेधिका
निकायस्वाहेतिकंडिकायांपठितानिप्रत्यहंमन्त्रमन्त्रानिपाठक्रमेण एवंससससममन्यहंहूयन्ते कायस्वाहेतिकं

कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहास्वाहाधिमाधीतायस्वाहामनः प्रजापतयेस्वाहाचि
त्तंविज्ञातायादित्यैस्वाहादित्यैमह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यै
पावकायैस्वाहासरस्वत्यैबृहत्यैस्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापूष्णेनरन्धि
षायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाविष्णवेस्वाहाविष्णवेनि
भृयपायस्वाहाविष्णवेशिपिविष्टायस्वाहा ११ ।डिकायांसमत्रिकानिपठितानि तन्मध्येससमस्वाह

स्त्रक्रमेणैकैकंत्रिकंहूयते तत्रद्वितीयत्रिकेस्वाहाकाराघमंत्रत्रयंस्वाहाधिमाधीतायेत्यादीनिसूत्रार्थः कायस्वाहा
इत्यद्व्यहभणासंज्ञानियजूंषिलिंगोक्तदेवतानि कायप्रजापतयेसहुतमस्तु कस्मैप्रजापतये २ कस्मैप्रजापतेःश्रेष्ठाय ३
आधीतमाधीतायप्रजाय ४ मनः सवत्सरवर्तमानायप्रजापतये ५ सहुतमस्तु कस्मैप्रजापतये चित्तंविज्ञातायसर्वेषां
चित्तमाविष्ठाय ६ आदित्यैअवंविडिताये ७ मह्यैपत्न्यायैआदित्यै ८ सुमृडीकायैसुराधिपत्न्यैआदित्यै ९ सरस्वत्यैवागधिष्ठा

बृहन्नैमहन्नैमरक्षस्नै १२ एसे १३ प्रमथ्याय प्रगतः पंथ्याः प्रमेथ्याः तत्रमवः प्रपथ्यः नमेसृते १४ नंपथिपाय पि
घशावे हृद्दिवैदिकः नंदियेषिशावृपतिरुद्रपेनं यिघः नमैसृसे रुद्रपयेतिकः १५ त्वष्ट्रनदतितन्नकरोतिलक्षणत
२३ सैसे १६ उग्रीपाय नवेगतसैसेत्वष्ट्र १८ वैवष्टिव्यामेतिविस्नुस्नैसे १९ निभृपपाय निनंराभूत्वामनस्याघवनोवक
नायातिनिभृपपनसैसेविसवे २० शिपिविष्टपशुष्णापाणिभुविष्टः प्रविष्टोऽन्तर्यामिहृदयेणशिपिविष्टस्नैसेविसवे २१

विष्णोर्देवस्यनेत्रं मर्मनौबरीनमकव्यम् विष्णोरा
यः स्वयत्तिग्रमन्त्रं सूर्याणिवपप्यमेसाहा २१

पतेर्न्द्रुभाणमंत्राःकाः षडाग्निकानि वत्त्स्थानेदृशमं विष्णोदेवस्यनि सममेपादीनव्रणीपायामविशेषः प्रत्यहंयानिव
लायैन्द्रभराणान्याख्वरिकाणिहृयंतेतेषां चतुर्णां स्थाने षडाग्निकानिरुद्रहभराणानिस्थाकृनिप्रयुज्मागिस्वाहेतिहुत्वा २३
प्रामेयिकानि चतीणविसवे स्वाहेत्यादीनि हुत्वा विष्णोदेवस्यनिदयामनमैसोऽन्द्रभ्यां जुहोतीतिसूत्रार्थः विष्णोदेवस्यआख्याता १५

का॰ कृष्णाजिनाद्युत्समिदाधानांतकलाब्रह्मन्नितिजपउत्सर्गः कालएके कृष्णाजिनदीक्षान आरभ्या वा यात्रयो दृष्यमिदा
धानांतेकलाश्वयेवाब्रह्मन्नितिजपति उत्सर्गोहृयतिष्ठते इत्युत्सर्गोपस्थानकालेएके आब्रह्मन्नितिजपमिच्छंतिय
हा स्वे स्वोत्सर्गकाले विभूर्मात्रेतिजपांतेनरमित्यर्थः आब्रह्मन् लिंगोक्तदेवता उत्कृतिः हे ब्रह्मन् राष्ट्रे स्मदेशे ब्रह्म
वर्चसी यज्ञाध्ययनशीलो ब्राह्मण आजायतां उत्पद्यतां राजन्यः क्षत्रियः राष्ट्रे आजायतां कीदृशः शूरः पराक्रमी स
रविक्रांतोप्स्ररयति शूरः इषव्यः इषुभिर्विध्यतीति इषव्यः पटाकरषोकुशल इषव्यः अतिव्याधी अत्यंतंविध्यती
त्यतिव्याधी शत्रुभेदनशीलः महारथः एकः सहस्रं जयति स महारथः दोग्ध्रीदुग्धपूर्णपित्रीधेनुराजयजमानराष्ट्रे इति

आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो
जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्य
यजमानस्यवीरोजायतान्निकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनऽओषधयः पच्य

सर्वत्रसंबंधः अनड्वान् वृषभो वोढा वहनशीलो जायतां सप्तिरश्वः ॥ न्तांयोगक्षेमोनः कल्पताम् ५८
शुः शीघ्रगामी जायतां योषास्त्री पुरंधिः पुरं शरीरं सर्वगुणसंपन्नं दधाति पुरंधिः रथेतिष्ठतिरथेष्ठाः क्विप् सभमस्या
अलुक् रथस्थितो युयुत्सुर्जिष्णुर्जयनशीलो जायतां युवा आस्येतिपदच्छेदः अस्ययजमानस्ययुवासभ
ेयः सभेयः हृद्यंदसीतिसभायांसाधुर्विनयेन प्रत्ययलस्य ढकादेशः किंचनोऽस्माकंराष्ट्रे पर्जन्यो निकामेः
निकामेनितरांकामनायांसत्यां वर्षतु अस्माकमोषधयो यवाद्याः फलवत्यः फलयुक्ताः पच्य
न्तां सपमेव पक्वा भवंतु नोऽस्माकं योगक्षेमः कल्पतां योगेनयुक्तः क्षेमो योगक्षेमः सत्कृ मा भवतु अलब्धला

२५

व्रताः अग्न्यादयः प्रतिष्ठा : ८

का· आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमंत्रं सर्वरात्रमावर्तते आज्यादीनां प्रतिप्रहरमेको
कं क्रमेण सर्वरात्रमुत्तरवेदिस्थाग्नौ जुहोति प्राणाय स्वाहेत्यादि द्वादशकण्डिकात्मकैरनुवाकैः किंकृत्वा आवर्तते प्रा
णाय स्वाहेत्यादिकमेकशताय स्वाहेत्यन्तं मंत्रगणमावर्त्य सर्वरात्रमिति द्वितीयाग्रहणहोमक्रिययारात्रेः का
र्त्स्न्येन संयोगः कार्यः ततः प्रथमयामे घृतेन योगः कार्यः ततः प्रथमयामे घृतेन योगः द्वितीये सक्तुभिः तृतीये धाना
प्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा २३ प्राच्यै
दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहो
दीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वा
हा २४ अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वा
हा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा २५ वा
ताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा
वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वा
हा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा २६ अग्नये स्वाहा सोमाय स्वा
भिः चतुर्थे लाजैः एकस्मै अनिहादशेः जुवाके एकस्मै स्वाहा द्वाभ्यां स्वाहेत्यत्र त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पंचभ्यः स्वा
हा सप्तभ्यः स्वाहा अष्टभ्यः स्वाहा नवभ्यः स्वाहेत्येवमादयो मंत्रा अपठिता अपि एकैकावृद्ध्या एकशतपर्यन्ताः प्रयोक्तव्याः एको
तराजुहोतीति श्रुतेः उष्णयां समामायां रात्रौ उदुष्यै स्वाहेति घृताहुतिमेकां उदिते सूर्याय स्वर्गाय स्वाहेति च जुहोतीति सू

२५

नक्षत्रादयः कालाधिष्ठातारः पृथिव्यादयो लोकाधिष्ठातारः असवादयस्त्रयः मध्वादयो मासाधिष्ठातारः वाजादयो ऽन्नाधीशाः य
ज्ञेनायुरेवेत्यादयः कल्पतामेवमग्रेपि प्रार्थनामन्त्राः एकस्मै संख्याधीशाः व्युष्टि रात्रीः स्वर्गो दिनं रात्रिर्वै व्युष्टिरहः स्वर्गो

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा होरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संव
त्सराय स्वाहा द्यावापृथिवीभ्यां० स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः
स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पति
भ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा २८ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वा
हा सूर्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्ल
वेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा २९ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वा
हा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा संसर्पाय स्वाहा चन्द्रा
य स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतयते स्वाहा ३० मधवे स्वाहा माधवाय स्वाहा शुक्राय
स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे
स्वाहा तपस्याय स्वाहा ० हसस्पतये स्वाहा ३१ वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वा
हा स्वः स्वाहा मूर्द्ध्ने स्वाहा व्यश्नुविने स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये
स्वाहा ३२ आयुर्यज्ञेन कल्पतां० स्वाहा प्राणो यज्ञेन कल्पतां० स्वाहापानो यज्ञेन कल्पतां० स्वाहा
व्यानो यज्ञेन कल्पतां० स्वाहोदानो यज्ञेन कल्पतां० स्वाहा समानो यज्ञेन कल्पतां० स्वाहा चक्षुर्यज्ञे
न कल्पतां० स्वाहा श्रोत्रं यज्ञेन कल्पतां० स्वाहा वाग्यज्ञेन कल्पतां० स्वाहा मनो यज्ञेन कल्पतां०

स्वाहात्मा यज्ञेन कल्पतां० स्वाहा ब्रह्मा यज्ञेन कल्पतां० स्वाहा ज्योतिर्यज्ञेन कल्पतां०
स्वाहा स्वर्यज्ञेन कल्पतां० स्वाहा पृष्ठं यज्ञेन कल्पतां० स्वाहा यज्ञो यज्ञेन कल्पतां०

हो रात्रे रावृत्तवीणानीति श्रुतेः प्राणादयोऽश्वमेधस्यावयवानि तेऽवयवाः स च प्रजापतेरवयवः स प्राणमनुत्यान्येव तत्पते रश्वतेः
तिमाह सर्वमिदं प्रजापतिरिति श्रुतेः २८ श्रीमन्महीधरकृते वेददीपे ... २२

हु. विंशे होममंत्रास्तेषु ये विंशाः प्रत्यये शिष्टं कर्मोच्यते कात्यायनः प्रातः सौवर्णं महिमानं गृह्णाति सौवर्णेन पूर्वं हिरण्मयेन ।
भवति प्रातर्द्वितीयः हत्वाश्वं तस्य महद्भवति तत्र महिमसंज्ञौ द्वौ ग्रहौ गृह्णाति आगतं वा दाश्वयणात् आग्रयणो यो मध्ये तौ गृ-
ह्णाति अग्नेराग्रयणेऽश्वा वा गतस्तस्यानेन ग्रहणमिति वचनात् हत्वा मध्ये एवं महिमानं सौवर्णेनालाबुवलेन गृह्णाति हि-
 रण्यगर्भः व्याख्याता उपयाम प्रजापतये जुष्टं रुचितं लोहिग्रहाद्गृह्णामि काः एष ते योनिरिति ग्रहसादनं एष

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुते-
मां कस्मै देवाय हविषा विधेम ।१ उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृह्णा-
म्येष ते योनिः सूर्यस्ते महिमा यस्ते हन्त्संवत्सरे महिमा सम्ब-
भूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवे
भ्यः २

ते योनिः स्थानं तेतव महिमा शक्तिः सूर्यः दीप्यस्येव प्रभा काः यस्ते हन्नित्यजुहोति एवं महिमानं ग्रहं जुहोति ह
यद्युतेत सर्वं हन्ते यस्ते हन्नु देवदेवत्यं यज्ञः ह्यधिकाश्वमेधी हे महिमन् यः तेतव महिमा अहन् अहि दिवसे संवत्स
रे च निमित्ते संबभूव उत्पन्न वायौ अन्तरिक्षे च यः तव महिमा संबभूव दिवि सूर्ये च यस्ते महिमा संबभूव तेन वतस्मै
महिम्ने प्रजापतये देवेभ्यश्च स्वाहा हुतमस्तु ।

का॰ द्वितीयं राजतेन यः प्राणत इति द्वितीयं महिमानं ग्रहं राजतेनोलूखलेन गृह्णाति यः प्राणतः हिरण्यगर्भदृष्टा कदेवत्या
त्रिष्टुप् तस्मै कस्मै प्रजापतये देवाय एवं पदं हविषा विधेम हविर्दद्मः विद्यतिर्दानार्थः तृतीया द्वितीयार्थे तस्मै कस्मै यः प्र
जापतिः प्राणतः प्राणनं जीवनं कुर्वतो निमिषतो निमेषणं कुर्वतः उपलक्षणमेतत् दृगादीन्द्रियव्यापारं कुर्वतः सचेतन
स्य जगतो विश्वस्य एक एव राजा बभूव केन महिम्ना महे महिम्नो भावो महित्वं तेन महित्वेन विभक्तेः एवं स्व
र्गिः महाभाग्येनेत्यर्थः यश्चास्य द्विपदः द्वौ पादौ यस्य स द्विपात् तस्य पादः पदित्यपदादेशः द्विपादस्य मनुष्यपक्ष्या
देः चतुःपादश्चतुष्पादो गवादेः प्राणिजातस्य ईशे ईष्टे ऐश्वर्यं करोति लोपस्त आत्मनेपदेष्विति तकारलोपे ईशे इति।

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव य ईशे अस्य द्विपदश्चतुष्पदः कस्मै दे
वाय हविषा विधेम ३ उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्यस्ते
महिमा यस्तेऽहन्त्संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते नक्ष
त्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ४

रूपं अयीर्गर्भदये शाकमिणीति कर्मणि षष्ठीः उपयाम पात्रेण गृहीतोसि प्रजापतये जुष्टं त्वा गृह्णाति सादयति एष
ते चन्द्रमास्ते तव महिमा दीप्तिः का॰ वपाते द्वितीयेन सर्वं वपोत्तरा त्राविनिजुहोति वपायां तेद्वितीयेन महिम्ना सर्वे
वदितिसर्वं हुतं महिमानं जुहोति यस्तेऽहन्त्सौ सूर्याः हे महिमन् रात्रौ संवत्सरे च यस्तव महिमा सम्बभूव पृथिव्यामग्नौ च
यस्ते महिमा सम्बभूव नक्षत्रेषु चन्द्रमसि च यस्तव महिमा सम्बभूव सर्वव्यापकस्तव यो महिमा तस्मै महिम्ने प्रजापतये दे

[illegible] २

का॰ युनक्को नं युंजंति ब्रध्नमिति अस्यं रथे युनक्ति युंजंति ब्रध्नं मधुच्छंदोदृष्टस्य आदित्यदेवत्या गायत्री तस्थुषः विभक्तिव्य
त्ययः तस्थिवांसः कर्माधिस्विना ऋत्विजः ब्रध्नं आदित्यं युंजंति रथे योजयंति अस्य आदित्यत्वेन स्तूयते असौ वा
२६ आदित्यो ब्रध्नो ह्लयो अमुमेवास्मा आदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्यै इति श्रुतेः किंभूतं ब्रध्नं अरुषं रोषति क्रुध्य
26 ति रुषः उगुपधेति कः नरुषः अरुषः तं कोपरहितं परिचरंतं वैदिककर्मसिध्यर्थं सर्वं जगद्गच्छंतं यस्य ब्रध्नस्य
वनाद्विभक्तिलोपः रोचना दीप्तिमयो दिवि आकाशे रोचंते प्रकाशंते यद्वा रोचनानि दीप्तिमानि चंद्रग्रहतारकादीनि य
स्य ब्रध्नस्य भासा रोचंते तेजसां गोलकः सूर्यः जलमयान्येव गोलकाः इति ज्योतिःशास्त्रविदः का इतरांश्च युंजंत्यस्येति इत

युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परितस्थुषः रोचन्ते रोचना दिवि ५
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे शोणा धृष्णू नृवाहसा ६

रान्त्रीनध्यान्नयेद्युनक्ति युंजंत्यस्य गायत्री अस्य स्तुतिः ऋत्विजो हरी अश्वौ रथे युंजंति कीदृशौ अस्याश्वमेधि
काम्यस्य काम्या काम्यौ काम्यते तौ काम्यौ कामसंपादितौ नह्येको रथं वोढुं शक्त इति तौ काम्यौ विपक्षसा पक्षपरिग्र
हेष्वसत्प्रत्ययः पक्षयंति शरीरं परिगृह्णंति पक्षसः पक्षाः। विविधाः पक्षपक्षासः ययोस्तौ विपक्षसौ यद्वा विविधे निशाक
तिनाम विविधे गतिकर्मणा इति यास्कः वेः पक्षणा इव पक्षसौ ययोस्तौ शोणा शोणौ रक्तौ धृष्णू प्रगल्भौ निधृषा प्राग १ २६
ल्भो क्रुप्रत्ययः नृवाहसा नॄन् वहतस्तौ नृवाहसौ वहेरसुप्रत्ययः सर्वत्र विभक्तेराकारः नृणां वोढारौ ३

का अयोयन्नावगाढेष्ववाचयति यद्वाउ इति चतुर्भिरश्वैर्युक्तं रथमाध्वर्युर्यजमानावारुह्य तडागादिजलं गत्वा जले
प्रविष्टेष्वश्वेषु यजमानं वाचयति यद्वातः वृहतीपश्वस्तुतिः सिंहो माणवक इतिवत् वातः वातसमानवेगः अश्वा

यद्वातोऽ अपोऽ अगनीगन्प्रियामिन्द्रस्य तन्वम्।
एतं स्तोतरनेन पथा पुनरश्वमावर्त्तयासि नः १

यत् यस्मात् अपो जलानि अगनीगन् इंद्रस्य प्रियां तन्वं शरीरं च अगनीगन् अत्यर्थं गतः दाधर्त्तिर्धर्त्तीत्यादिना १
यद्वा गतेति पानः अतो हे स्तोतः अश्वपोषणेन अस्माकमश्वमनेन पथा मार्गेण येन गतस्तेन पुनः आवर्त्तयासि १
आवर्त्तय आनय लेटोऽडाटौ सरूपव्यत्ययः ४

का॰ अपायविमुक्तमश्वं महिषी वावाता परिवृक्ता जेनाभ्यञ्जन्ति पूर्वकायमध्यापरकायान्यथादेशं वसवस्त्वेति प्रतिमन्त्रम्
यायजलप्रदेशाद्देवयजनमागम्य रथ्याद्विमुक्तमश्वं महिष्याद्यास्तिस्रः पत्न्यो यथाक्रमं अश्वस्य पूर्वादिकायानभ्यञ्जन्ति घृ
२२ तेन महिषी पूर्वकायं वसवस्त्वेति वावाता देहमध्यं रुद्रास्त्वेति परिवृक्ता पश्चाद्भागं आदित्यास्त्वेति मन्त्रेणेति सूत्रार्थः वसवस्त्वा
27 त्रीणि यजूंषि लिङ्गोक्तदेवत्यानि हे अश्व वसवो देवा गायत्रेण छन्दसा त्वा त्वामञ्जन्तु । स्निग्धं कुर्वन्तु । रुद्रा एकादश त्रै
ष्टुभेन छन्दसा त्वामञ्जन्तु । आदित्या द्वादश जागतेन छन्दसा त्वामञ्जन्तु का॰ अश्वस्य मानान्मणीनावर्णानेकशतं केश म
नेकसरापुच्छेष्वावयन्ति भूर्भुवः स्वरिति प्रतिमन्त्रं महाव्याहृतिः । महिष्याद्यास्तिस्रः पत्न्यः एकाधिकशतेन शतेन सौवर्णा म

वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसादित्यास्त्वाञ्जन्तु जाग
तेन छन्दसा भूर्भुवः स्वर्लाजी३ञ्छाची३न्यशो ममा३ः पतन्न्यद्धि प्रजायते ९

णमणीन्यथाक्रमं प्रोतयन्ति तथा केसरा वाः शिरस्कन्धस्ययोः पुच्छे चावयन्ति महिष्यश्वशिरोरोमसु भूरिति एकशतं मणी ।
न्युवयति वावाता ग्रीवारोमसु भुव इति परिवृक्ता पुच्छरोमसु स्वरिति पत्नीति सूत्रार्थः भूर्भुवः स्वः आव्याताः का
अश्वाय परात्रिवृत्तं शेषं प्रयच्छन्ति लाजीञ्छाचीनिति सक्तुधाना लाजानां रूपं त्रिवृत्तं शेषमश्वाय ददाति भक्षणाय अश्वो ना
श्नाति चेज्जले प्रक्षेपः । लाजीन् अश्वदेवत्यं यजुः लाजानां समूहो लाजी नित्युक्तः सक्तूनां समूहः शाचीन् यश्वाय यवे
भ्यः यवसमूहः । गव्यगव्यः गोर्विकारसमूहो दध्यादिः हे देवा एतदन्नं अश्वमदयत्त हेम जायते एतदन्नं अद्धि भव
२२

का॰ ब्रह्मा पृच्छति होतारं यूपमभितः कास्विदेकाकीति यूपसमीपे स्थितो उदङ्मुखो ब्रह्मा यूपोपान्ते दक्षिणतः प्रत्यङ्मुखं होता
रं पृच्छति कः स्वित् ब्रह्मोद्यकर्मणि होतृब्रह्मणोः प्रश्नप्रतिप्रश्नभूतास्तत्रोऽनुष्टुभः स्विदिति वितर्के एकाकी अ
सहायः कः चरति गच्छति उपादद्राणः कः स्वित् विनष्टः सन् पुनर्जायते उत्पद्यते किं स्वित् हिमस्य शीतस्य भे
षजं औषधं किं स्वित् महत् आवपनं आ समन्तात् उप्यते यस्मिंस्तत् वपनस्थानं का॰ सूर्य इत्याचष्टे होता ब्रह्मा
णं प्रतिवक्ति सूर्य एकाकी सूर्यः असहायो गच्छति अनेन होता ब्रह्मणो यजमाने ब्रह्मवर्चसं धत्तः असौ वा आदि

कः स्विदेकाकी चरति क ऽ उ स्विज्जायते पुनः किं स्विद्धिमस्य भेषजं किम्वावपनम्महत् ९
सूर्य्यः एकाकी चरति चन्द्रमा जायते पुनः अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् १०

त्य एकाकी चरत्येष ब्रह्मवर्चसं ब्रह्मवर्चसमेवास्मिन्धत्त इति श्रुतेः चंद्रमाः क्षीणः पुनर्जायते वर्द्धते अनेनायु
र्धत्तः चंद्रमा वै जायते पुनरायुरेवास्मिन्दधत इति श्रुतेः हिमस्य भेषजं अग्निः अनेन तेजो धत्तः अग्निर्वै हिमस्य भे
षजं तेज एवास्मिन्दधत इति श्रुतेः भूमिरयं लोको महदावपनं अनेनास्मिन्प्रतिष्ठापयतः अयं वै लोक आवपनं म
हदस्मिन्नेव लोके प्रतितिष्ठतीति श्रुतेः ९ ॥ ॐ नमो भगवते वासदेवाय नमः
ॐ नमो नमः

का॰ होताब्रह्माकास्विदासीदिति होताब्रह्माणंपृच्छति कस्वित् पूर्वचित्तंतेइतिपूर्वचित्तिः सर्वेषांप्रथमंस्मृतिविषया का
स्विदासीत् बृहत्महत्वयः पक्षी किंस्विदासीत् पिलिप्पिला कास्वित् पिशङ्गिला च कास्विदासीत् का॰ द्यौरि
२९ तिप्रत्याह ब्रह्माहोतारंप्रतिवक्ति द्यौरासीत् पूर्वचित्तिः पूर्वस्मरणविषया द्यौर्वृष्टिरासीत् द्योशब्देन वृष्टिर्लक्ष्यते सर्व
प्राणिनांप्राणानामिष्टत्वात् तथा च श्रुतिः द्यौर्वै वृष्टिः पूर्वचित्तिर्दिवमेवमवरुन्धे इति अश्वो बृहद्वय आसीत् अश्वशब्दे

कास्विदासीत्पूर्वचित्तिः किꣳस्विदासीद्बृहद्वयः कास्विदासीत्पिलि
प्पिलाकास्विदासीत्पिशङ्गिला ॥ द्यौरासीत्पूर्वचित्तिरश्वआसी
द्बृहद्वयः अविरासीत्पिलिप्पिलारासीत्पिशङ्गिला १२

नाश्वमेधोलक्ष्यते अश्वमेधेमवयमेवस्वर्गमारोहतीत्यश्वमेधोवयः अवतीत्यविः पृथिवी पिलिप्पिलासीत् वृष्ट्या
भूः पिलिप्पिलाविक्कणाभवति श्रीर्वै पिलिप्पिलेतिश्रुत्याश्रयंतपनामितिश्रीशब्देनभूरेव रात्रिः पिशङ्गिला २९
सीत् पिशामितिरूपनाम पिशंरूपंगिलतिपिशङ्गिला रात्रौसर्वाणिरूपाण्यंतर्भवंति १ ॥

का॰ अस्येमानताणाम ग्रस्मावायुष्ठेति अग्रस्त्वोषधीभ्य इति प्राकृतमंत्रेणवायुष्टेस्मारम्यदेवः सविता दधातीत्यंपतेनकोटि
कावतुष्टयेनास्यमेथिके नचास्यप्रोताणाकरोतीतिसूत्रार्थः वायुष्टा चत्वारि पञ्ज्युष्टिर्देवस्यानि हे यवायुः पचते॰
पाकैः त्वाला अग्रवत्तु वायुसंयोगादग्निः पीयूषं पचति असिताग्रीवायस्य एमेनेन्यसितग्रीवोऽग्निः त्वा गौः तामवत्तु
अग्निर्वा असितग्रीव इति श्रुतेः कृष्णग्रीव आग्नेयाररादेश इति वक्ष्यमाणत्वाद षांग षक्कृष्णग्रीवादयः पंचदशापर्ण्यापपः प
शवः सन्तिनैरग्निरवलिस्यर्थः नग्रोधस्त्वमसेः सोमपात्रैः तामवत्तु शल्मलिर्वृद्धाविशेषाद्वृध्यातामवत्तु शल्मलि

वायद्वायपवतैरववासितग्रीवस्य च्छागैर्न्यग्रोधस्त्वमसैः शल्मलिर्वृद्ध्या पथस्मवान्योवृषाय।
द्विस्त्वंतत्रीरिदग स्मात्क सस्त्वनोवत्तुनमोग्नये ५

र्वनस्पतीनांवर्षिष्ठे वर्द्धेते इति श्रुतेः किंच यः सपथवृषाभेत्वाम्यः राथ्याद्येः सायुः पद्भिः पादैः चतुर्भिरेवस्मा
अगात् आगतः आगुत् अगान्नितिपदच्छेदः अस्य त्रिभिः पादैः लिहति चतुर्भि प्रगच्छति चतुरंद्राण तथाचश्रुतिः
तस्मादश्वस्त्रिभिस्तिष्ठंस्तिष्ठत्य प्रयुक्तः सर्वेः षड्भिः समममायुतेति पदशाकृसप्तंतनवेंड्रारस्ते किंच अग्रकृष्णःना
स्लिकृष्णललाटंयस्मिन्नवृषा चेंद्रोनोऽस्मानवत्तुंचन्द्रमावैव्रताः कृष्णलेश्चन्द्रमसप एतपादद्राणीतीति श्रुतेः नोऽस्माक
मध्यमवत्विति वा अग्नयेनमोनमस्कारोऽस्तु विघ्नाभावायाध्वेर्नतिः क्रियते ६

संशितः अश्वदेवत्यानुष्टुप् सेऽर्थ्वः प्रपतिषेधामवार्थः रथो रश्मिना कृत्वा संशितो दर्शनीयो भवति तस्माद्धयः पर्यु
तोदर्शनीयस्तेजो भवतीति श्रुतेः हयोऽश्वो रश्मिना संशितः शोभितः अप्सुजायते अप्सुजा अश्वः अप्सु अद्भिः सं
शित विभक्तिव्यत्ययः अप्सुयोनिर्वा अश्व इति श्रुतेः कीदृशः ब्रह्मा परिवृतः सोमः पुरोगमः सोमः पुरोगामी अग्र
गामी यस्य सः सोमं पुरस्कृत्य स्वर्गं लोकं गच्छति सोमपुरोगममेवैनं स्वर्गं लोकं गमयतीति श्रुतेः स्वयं वाजिन्

२५
29

संशितो रश्मिना रथः संशितो रश्मिना हयः संशितो
अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः १४ स्वयं वाजिंस्तन्वं
कल्पयस्व स्वयं यजस्व स्वयं जुषस्व महिमा तेऽन्येन न सन्नशे १५

आर्ष्वी विराट् हे वाजिन् स्वयं तन्वं शरीरं कल्पयस्व स्वयं रूपं कुरुष्व यादृशमिच्छसीति श्रुतेः स्वाराज्यं त
वास्तीति भावः अतः स्वयं यजस्व न तु वा अन्यो यष्टास्ति स्वयं जुषस्व इष्टं स्थानं सेवस्व यतस्ते तव महिमा अ
न्येन न महिम्ना न संनशे न संनश्यते न व्याप्यते न शिवदर्शनार्थः व्रत्यवाप्यर्थः नलोपे यलोपेन शोरूपं २५
९० ॥ राम राम

नवै म्राप्नोर्नित्रिष्टुप् हे अश्व अस्माभिर्यत्वं संज्ञप्यसे एतत् न्लेन म्रियसे मरणं नाप्नोषि न च रिष्यसि न विनश्यसि
विशस्यमानः । वै उ । निपातौ पादपूरणौ । पथस्सुगेभिः सुगैः सुखेन गम्यते येषु ते सुगास्तैः सुडेरधिकरणेरु
त्तिगमेर्ड्प्रत्ययः साधुगमनैः पथिभिः देवयानमार्गैः देवानृ इत् देवानेव निषि गच्छसि किंच सुकृतः साधु
कारिणो नरा यत्र लोके आसते निवसन्ति यत्र च ते सुकृतो यथुर्गताः तत्र लोके सविता देवः लालाटं दध्यात् स्थापय
तु सविनैवेनं स्वर्गे लोके दधातीति श्रुतेः का० उपारकृतान्ययाप्येहरग्निः पशुरिति अग्निः पशुरिति प्राह तेन मंत्रेण
ग्निः पशुरिति वैकृ तेन वप्रादनानि अस्यापूपरतान्ताती तिश्रुत्यर्थः अग्निः पशुः अस्य देवत्यानि त्रीणि यजूंषि स्टष्टि

न वा ऽउ ऽएतन्म्रियसे न रिष्यसि देवा २ ऽइदेषि पथिभिः सुगेभिः यत्रासते सुकृतो यत्र ते य
युस्तत्र त्वा देवः सविता दधातु १६ अग्निः पशुरासीत्तेनायजन्त स ऽएतं लोकमजयद्य
स्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता ऽअपः वायुः पशुरासीत्तेनायज।
न्त स ऽएतं लोकमजयद्यस्मिन्वायुः स ते लोको भविष्यति तं जेष्यसि पिबैता ऽअपः
सूर्यः पशुरासीत्तेनायजन्त स ऽएतं लोकमजयद्यस्मिन्त्सूर्यः स ते लोको भविष्यति

देवानाम् अग्निः पशुरासीत्तेनाग्निरूपेण पशुना देवा अयजन्त इज्जिरे स पशुभावमुपगतो ऽग्निः एतं लोकं पृथ्वीलोकं अज
यत । यस्मिन् लोके ऽग्निः हे अश्व स लोकस्तेनैव भविष्यति । तं लोकं त्वं जेष्यसि एताः प्रोक्षणीरपः पिब । तथा वायुः
तिः यावान् अग्निर्विजयो यावांल्लोको यावदैश्वर्यं तावांस्ते विजयस्तावदैश्वर्यं भविष्यतीत्येवैनं तदाहेति वायुः पशुः

का॰ परिपशव्ये हुत्वा प्राणाय स्वाहेति तिस्रोऽपराः परिपशव्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेति द्वे आहुती हुत्वा प्राणाये
त्याद्या प्राणायेत्याद्यास्तिस्र आहुतीर्जुहोति एकामश्वसंज्ञपनादौ चतस्रोंते इति सूत्रार्थः प्राणाय स्वाहा त्रीणि य
३० जूंषि अपानाय व्यानाय। अभिराहुतिभिरश्वप्राणवतं करोति तथा च श्रुति प्राणानेवास्मिन्नेतद्दधातितयो
30 हास्यैतेन जीवतैव पशुनेष्टं भवतीति वाचयति पतिपत्नीर्नयन्त्यमम्बेत्र इति सर्वाः पत्नीः पशुशोधनाय पां
नेजनीर्हस्ताः पश्वन्त्यतिनयन्तु नमम्ब आनानेति प्राहुतं तमम्बे अम्बे इत्याश्वमेधिकं वा वाचयतीति सूत्रार्थः अं
वे अम्बिके अश्वदेवत्यानुष्टुप् पत्न्यः परस्परं वदति हे अम्बे हे अम्बिके हे अम्बालिके नामान्यनानिकश्चन नरो मां

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा अम्बेऽअम्बिकेम्बालिके न मान
यति कश्चन ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् १८

नयति अश्वं प्रति न प्रापयति। तर्हि किमर्थं गम्यते तत्राह। अश्वकः कुत्सितोऽश्वोऽश्वकः अनुकम्पितो पीयथा
कुत्स्यते सुभद्रिकायाः कुत्सिता सुभद्रा सुभद्रिका ईदृशया कुत्स्यते तां नारीमादाय ससस्ति शेते समस्त्व प्रेरितु
ह्रि। महत्राग्मनेऽश्वोऽस्मामादाय शायिष्यते इति मया गम्यते जातु मां कश्चिन्नयतीति भावः किंभूतां सुभद्रि
कां कांपिलवासिनीं कांपीलनगरे वसतीति कांपिलवासिनी तां तत्र हि विदग्धाः सुरूपाः कामिन्यो भवं
ति अश्वोपाजद्भाणाहस्तावर्षिष्ये वा लेविकेपूर्वे इति प्रकृतिभावः ११

का॰ अश्वं त्रिस्त्रिः परियंति पित्नवन्मध्ये गणानां प्रियाणां निधीनामिति सर्वाः पत्न्यः पांनेजनहस्ताः एवमाणयाथना
स्याकु अश्वं त्रिः त्रिः परियंति मध्ये पित्नवत्प्रदक्षिणं परियंति त्रिः त्रिभिर्मंत्रैः वसोममेति विश्वप्रतुसंगः ततश्चैवं
प्रथमं गणानामिति त्रिः प्रदक्षिणं परियंति तत्र सकृन्मंत्रेण द्वितीयसी ततः प्रियाणामित्यप्रदक्षिणं त्रिः निधी
नामिति प्रदक्षिणं त्रिः एवं नवकृत्व इति सूत्रार्थः। गणानां त्वा त्रीण्ययं षिलिंगोक्ताति हे अश्व वयं त्वां हवामहे
आह्वयामः कीदृशं त्वां गणपतिं गणानां मध्ये गणपतिं गणरूपाणां पालकं प्रियाणां वल्लभानां मध्ये प्रिय

गणानां त्वा गणपति ठं हवामहे प्रियाणां त्वा प्रियपति ठं हवामहे निधीनां त्वा निधि
पति ठं हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधम् ।१९

पतिं प्रियस्य पालकं निधीनां सुखनिधीनां मध्ये निधिपतिं सुखनिधेः पालकं त्वां हवामहे हे वसो वसुरूप
अश्व मम पतिस्त्वं भूया इति शेषः का प्रत्नालिनेवमहिष्यश्वसमीपसुप्तविशस्याहमजानीति प्रत्नालितेषु प्राणि
नेषु पत्नीनां प्राणेषु पत्नीभिरश्वं पुण्णायजमानेन प्राणेशायनेकृते महिषी अश्वसमीपे शेते अहं अश्वदेवं
हे अश्व गर्भधं या ति गर्भं धापकं रेतः अहं आ अजानि आकृष्य दधामि त्वं जगाति देपणायोः लट् त्वं च गर्भधं
रेत आ अजासि आकृष्य दधासि ।१२

नाउभो एर्वमंत्रपोषः लालेयरहं चउभोचत्वरः पदः पादानस्मावांसंप्रसारयावनवहैमम्हो एवंसंवेष्टनप्रकारः का
अयीवासेन प्रच्छादयति स्वर्गं लोकइति अयीवासिनास्वमहिषाच्छादयति अथउपरिष्टाच्छादनत्वमेवासोऽयी
३१ वासः स्वर्गो लोकः अश्वदेवत्यमश्वं पूर्ववदिति । हेअश्वमहिषायुवांस्वर्गेलोकेऽसांयत्तम्भूमेप्रोर्णुवाथांवासस्आ
3| च्छादयेत ऊर्णुभ्याम्आच्छादनेन एवंवैस्वर्गोलोकाय त्रपगुसंत्तपयंतीतिश्रुतेः का अश्वशिश्नस्तुपयेष्यकरुतेह
मावाजीवि महिषीस्वयमेवाश्वशिश्नशिश्नमाक्रष्य स्वयोनावुपयपतिक्रमवाजी अश्वदेवत्यं वाजीअश्वोरे
नाः उभोचत्वरः पदः संप्रसारयावस्वर्गोलोकेप्रोर्णुवाथांवृषावाजीरेतो धारेतोदधा
तु २ उत्सक्थ्याऽअवगुदन्धेहिसमञ्जिञ्चारयावृषन् यस्त्रीणांजीवभोजनः २१
नोदधातु । मपिवीर्यस्थापयतु कीदृशोऽश्वः वृषासेक्तारेतोधाः रेतोदधातीतिरेतोधाः वीर्यस्यधारयिता का उ
त्सक्थ्याउत्सक्थ्यंप्रजमानोऽभिमंत्रयते उत्सक्थ्याः अश्वदेवत्यागायत्री हेवृषन्सेक्तः अश्वमहिषायुदम्अवगुदेऽप
रिवेतोधेहिवीर्यंधारय कीदृश्याः उत्सक्थ्याः उन्ऊर्ध्वेसक्थिनीऊरूयस्याः साउत्सक्थीतस्याः कथंतदाह
अञ्जिलिंगंसंचारय । अनक्तिव्यनक्तिपुंस्त्वमिन्यञ्जिलिंगं । लिंगंयोनौप्रवेशयायोऽञ्जिः स्त्रीणांजीवभोजनः
जीवयतिजीवः । भोजयतिभोजनः जीवश्चासौभोजनश्च । जीवभोजनः । यस्मिन्लिंगेयोनौप्रविष्टेस्त्रियोजीवंति ३१

का॰ अथर्वयुवतोद्गारहेमरतामाः कुमारीपत्नीभिः संवदंते यकासका विनिदशर्वस्याभ्याहयेहयेः साविन्यामंत्र्या
मंत्र्या अथर्वर्णोदयुः पंचहयेहयेः साविनिसंवुधन्ननामोच्चारणपूर्वकं संस्तुवीकन्ययकासका विनिदशर्वसंवं
यिनीभ्यांहाभ्यांहाभ्यामरगभ्यांकुमारीपत्नीभिः सहस्रोपहासंसंवदंते तत्रप्रथमसख्यर्थुः कुमारी एच्छतिकुमा
री हयेहयेकुमारि यकासकौ शकुंतकेनीत्यर्थः यकासकौ कुमार्यादिदेवत्यादृश तन्मध्ये द्वितीयापरिहासह
हती अन्मानवानुष्टुभः अव्ययसर्वनाम्नामकत्वाक्तविन्यकवकत्मायां अल्पाशकुंतिः शकुंतिका अल्पे
इतिकान् अंगुल्यायानिप्रदर्शयन्नाह यकायान्नसकौ असौ शकुंतिका अल्पापतिर्णीच आहलकशब्दात्

यकासकौ शकुन्तिका हलगिति वञ्चति आहन्ति गभे पसो निगल्गलीति धारका २२
यकोसकौ शकुन्तकः आहलगिति वञ्चति विवक्षतः इव ते मुखमध्वर्यो मा नस्त्वमभि
भाषथाः २३

तुकरणं। हलहलेइतिशब्दं यंती वंचति गच्छति सीर्णगशीघ्रगमनेयानो हलहला
शब्दोभवतीत्यर्थः। गभेवर्णविपर्ययश्छान्दसः। भगे योनौ शकुनिसहप्प्यायदायसो लिंगं आहंति आगच्छति। पसः
तिपसते स्पृशतिकर्मण इति यास्कः। प्रजननस्य नामधेयं इति गीत्यर्थः। गर्भवर्णविपर्ययमश्छान्दसः यदाभगोयोनिं अन्त्रा
गच्छति तदाधारकधरतिलिंगमिति धारकायानिनिमलालीति। नितरां गलति वीर्यं द्रवति। यानुकरणं गलगलेति
शब्दं करोति कुमारी अध्वर्युमन्याह यकोसकौ अंगुल्या निर्दिश्य प्रदर्शयन्नाह। हे अध्वर्यो यापकः यः असकौ असौ
शकुंतकः। पक्षीव विवक्षतो वक्तुमिच्छतस्तव मुखमिव आहलगिति वंचति इतस्ततः स्खलति। अयं भागो मस्ति

दृं लिंगं तव मुखमिव भासते अतो नो मा त्वातिमस्माभि
भाषथा मावदतल्पत्वात् १४

मानाच। ब्रह्माणंमहिषीमाह महिषीहयेहयेमहिषि तेतवमाताचपुनस्तेतवपिता यदाहृदजस्यकाष्ठमयस्यमंच
कस्याग्रेउपरिभागेरोहतः आरोहतः तदातेपिताग्रामेभगोमुष्टिंमुष्टिंतस्याः लिंगाग्रंनेमयत् तेमयति। प्रक्षिपति
एवंनवान्यतिविंत्य स्त्रीलंगा तसिग्रलंकृतोचुवादिः लिंगामुत्थानेनालंकरोतिवा किंकुर्वन्। प्रतिलामीतिवदन्निति
शेषः। तिलमिहनेनतवभोगेनतस्थिताम्मिश्रनिवदन् एवंतवान्यतिः। सानुचरीमहिषीब्रह्माणंप्रत्याह। माताचते।
हेब्रह्मन्। तेतवमातातेपिताचयदाहृदस्य वृत्तविकारस्यमंचकस्याग्रेक्रीडतः। वमेतेनतदातेवापतिविंतितव।
पितृलं। यत्राभयोः समोदोषः परिहारोपिवासमः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे इतिन्यायात्वयेदं न

मातानचतेपितावतेगृंभूतस्यरोहतः प्रतिलामीतितेपिताग्रामेमुष्टिमतंसयत् २४
मातानचतेपिताचतेग्रेवृक्षस्यक्रीडतः विवदन्तःश्वतेमुखंब्रह्मन्मातंवदावद २५
ऊर्ध्वमेनामुच्छ्रापयगिरौभारंहरन्निव अथास्यमध्यमेधतां शीतेवातेपुनन्निव २६

वक्तव्यमितिभावः एवंसत्यपिविवदतोवक्तुमिच्छसि विवतेतवऊर्ध्वामुखं लस्यतइतिशेषः हेब्रह्मन्नूनंमावदद्भव
दमाब्रूहि उद्गातावावातामाह ऊर्ध्वमेनां किंचिन्नरंप्रत्याह हेनरएनांवावातांऊर्ध्वांउच्छ्रापय उच्छ्रितांकुरु
कथमिव। गिरौभारंहरन्निव यथाकश्चिन्नगिरौपर्वतेभारंहरन्पर्वतोपरिभारमारोपयन्पश्चात्तं उच्छ्रयतितथानामु
र्ध्वांकुरुकथम्। ऊर्ध्वाकार्यातदाह अथेति अथेतिनिपातोयथार्थः यथाअस्यअस्यावावातायामध्यंएधतां यो
निप्रदेशोवृद्धिंयायात्कथमिव यथायोनिर्विशालाभवतितथामध्येप्रदेशोलोकेपन्यर्थः हव्यंतातरमाह शीते

वावातोहातारंप्रत्याह ऊर्ध्वमेनं भवतोऽप्यनल्पमाने हेनरएनंउद्गातारंऊर्ध्वंउच्छ्रयतात् उर्ध्वंकुरु गिरौभारमिति
पूर्ववत् अथयथाउद्गातुर्मध्यंलिंगंराजत्व कंपतां एककंपनेलोट् शीतेवानेउक्तं २७ होतापरिवृक्तामाह
यदस्याः। यतयदाअस्याःपरिवृक्तायाः कृधुह्रस्वंस्थूलंचशिश्नंउपातसत्उपगच्छेत्तयोनिंप्रतिगच्छेत् तंम

ऊर्द्ध्वमेनमुच्छ्रयताद्गिरौभारꣳहरन्निव अथास्यमध्यमेजतुशी
तेवातेपुनन्निव २७ यदस्याअꣳहुभेद्याःकृधुस्थूलमुपात
सत् मुष्काविदस्याएजतोगोशफेशकुलाविव २८

उपतयो।नदामुष्कौवृषणौउत्तएवंअस्याः योनेरुपरिराजतः कंपेते।लिंगस्यस्थूलत्वाद्योरेल्पत्वात् वृषणो
वहिर्लिप्यत इत्यर्थः। तत्रदृष्टांतः।गोशफेजलपूर्णेगोः खुरेशकुलौमत्स्याविव।यथाउदकपूर्णेगोःपदेम
त्स्यौकंपेते।कृधिवितिह्रस्वनाम।कीदृश्याअस्याः।अꣳहुभेद्याः अꣳहुभगंभेद्यंविदार्यंयस्याः साअꣳहुभेदीतस्याः
अꣳहुभिंयत्नेयस्यावा १६ ॐनमोभगवतेवासुदेवायनमः
रामायरामचंद्रायनमः

परिहृत्का होतारमाह यद्देवासः। यत् यदा देवासः देवाः दिव्यन्ति क्रीडन्तीति देवा दीव्यत्राद्ययस्ततिजो ललामगुं लिङ्गं प्रस्रा
३२ विष्टुः योनौ प्रवेशयन्ति। अव च्छेगतौ कोनोऽर्मे प्रानो घुनो प्सुतो प्रामोः इत्येषु धेने वेशन्भागे बृहद्ग्रहेवयेऽस्मि के च
त्रावयान्तः प्रवेशनार्थः लुङ् छन्दसि लुङ्लङ्लिटः इति वर्तमाने लुङ् व्यवहितांश्चेति आपसर्गाणां व्यवधाने ललामा
33 मिति स्तुखेनाम ललामस्तु वेगच्छति प्राप्नोति ललामगुः शिश्नः। यद्वा ललामं पुंङ्गं गच्छति। ललामगुः। लिं
गं योनिं प्रविशाद् उच्छ्रितं पुण्ड्राकारं भवतीत्यर्थः कीदृशं ललामगुं। विष्टीमिनं। ष्टीम क्लेदे विशेषेणाक्लीमनं
क्लेदनं विष्टीमः घञ् प्रत्ययः। विष्टीमक्लेदोऽस्यास्तीति विष्टीमीनं अत इनिठनौ वितमत्वर्थे इनिन प्रत्ययः। शिश्न

यद्देवासो ललामगुम्प्रविष्टीमिनमाविषुः सक्थ्ना देदिश्यते नारी सत्यस्यातिभुवो यथा २९

स्य योनिप्रवेशात् क्लेदो भवतीत्यर्थः यदा देवाः शिश्नक्रीडिनो भवन्तो ललामगुं योनौ प्रवेशयन्ति तदा नारी सक्थ्या
ऊरुभ्यां देदिश्यते निर्दिश्यते अन्यं तेलक्ष्यते दिशाते यङ् प्रत्ययः भोगसमये सर्वस्य नार्थे इस्यन्ते णाव्यामस्या
ऊरु मात्रे लक्ष्यते तूर्यं नारीत्यर्थः। तत्र दृष्टान्तः सत्यस्यातिभुवो यथेति। सत्यं हि द्विविधं। अतिभ्यां भवतीत्यतिभु
प्रत्यक्षं। एकं च श्रोत्रग्राह्यं चक्षुर्ग्राह्यमितीयार्थे यथा कश्चिदतिभुवा प्रत्यक्षेण सत्येन निर्दिश्यते तत्र विश्वासो भव
ति तथा ऊरुणा दृष्टेन नारी निलक्ष्यते इत्यर्थः श्रोत्रग्राह्येन सत्येव कश्चिदसत्यमपेदिते ८ ३२

तता पालागलीमाह यद्धरिणः यत् यदा हरिणो यवं अत्ति स्रगीपदाते त्वं स्थ्यानं न नयति तदा ते त्रीयपशुं हरि
णापुष्टं न मन्यते। मम यावन्मभ दतो न पशुः पुष्टो जातः मम्यगीति न जानाति किं तु मदीये दत्ते मत्तिन मिति दुःखी भव
तीत्यर्थः पशुप्रशाहृात्त्वस्तु पोस्तलुगिति अपालुकः। एवं शूद्रा शूद्रजातिः स्त्री यत् यदा अर्यजारा भवति अर्यः स्वा
मि वैश्यश्च ये ति निपातनात् अर्ये वैश्ये जार उपपतिर्यस्याः सा अर्यजारा शूद्रा स्वामहत्त्वं वा जातीति विति शूद्र
ष्टाहात्कात्यर्थदाप वैश्येपपदा शूद्रागच्छति तदा शूद्रः पोष्यायनाय नायति पुष्टिं न इच्छति। मद्भार्या वैश्ये

यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते शूद्रा यदर्यजारा न पोषाय धनायति ३०
यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते शूद्रो यदर्यायै जारो न पोषमनुमन्यते ३१

न भुक्ता सती पुष्टा जातेति न मन्यते किं तु व्यभिचारिणी जातेति दुःखितो भवतीत्यर्थः। अशनाय पोदन्यधनाया वु
भुक्षापिपासागर्द्धे ष्विति क्याचि धनायतीति इत्यर्थे निपातः। पालागलीं क्षत्तारमाह। यद्धरिणः यदा हरिणो यव
मत्ति तदा बहु यवान्नत्वा पशुं पुष्टं न मन्यते इदं भवतोपि तुल्यं रूपा विशेषः यत् यदा शूद्रोऽर्यायै वैश्यायाः जा
रो भवति तदा वैश्यः पोषं पुष्टिं नानुमन्यते मम स्त्री पुष्टा जातेति नानुमन्यते किं तु शूद्रेणानीचेन भुक्तेति खि

का॰ महिषीमुत्थाप्य पुरुषाद्दधिक्राव्णेत्यादिः महिषी यजमानस्य प्रथमपरिणीता पत्नी मस्य समीपस्थं माम् उत्थाप्य पुरुषाः अध्वर्युब्रह्मोद्गातृहोतारः तत्र वीमं मन्त्रं पठेयुरिति सूत्रार्थः । दधिक्राव्णः वामदेवात्मजदधिक्रावाहयादेवात्मानुष्टुप् वयम् अध्वर्य्वादयः अकारिषम् आकर्षणं कृतवन्तः । वचनव्यत्ययः अश्लीलभाषणमिति शेषः किमर्थम् अस्य संस्कारायेति शेषः अश्वसंस्काराया श्लीलभाषणं कृतवन्त इत्यर्थः । कीदृशस्याश्वस्य दधिक्राव्णः दधाति धा

३७

34

दधिक्राव्णोऽकारिषञ्जिष्णोरश्वस्य वाजिनः

सुरभि नो मुखा करत्प्रणऽआयूꣳषि तारिषत् २२

रयतिरथमिति दधिः अह्नगमह्नतेति किप्रत्ययाः दधिः सन् क्रामतीति दधिक्रावा । तस्य अन्येभ्योपि दृश्यन्त इति ।
वनिप् प्रत्ययः विह्वनोरनुनासिकस्यादिति धातोराकारः जिष्णोर्जयनशीलस्य । वाजिनः वजनिगतौ तिवाजीवा ।
नोऽन्नमस्यास्तीति वाजी तस्य च नोऽस्माकं मुखान्मुखानि सुरभीणि करत् करोतु यज्ञ इति शेषः अश्लीलभाषणेन
दुर्गन्धप्रायाणि सुरभीणि यज्ञः करोत्वित्यर्थः । तथा च श्रुतिः सुरभिमती मृचं मन्त्रेण तां वाहुर्वाचमेव पुनन्त इति
सुरभिशब्दाद्द्विभक्तिलोपः । किञ्च नोऽस्माकमायूंषि जीवनानि वाल्ययौवनवार्द्धकानि प्रतारिषत् । प्रतारयतु ।

३८

का- तिस्रः पंक्त्योऽस्मिन्यथाऽन्कल्पयंत्वश्वस्य सूचीभिर्लोहराजतसौवर्णीभिर्मणिसंख्याभिर्गायत्री त्रिष्टुब्विति द्वाभ्यां
द्वाभ्यां गायत्री त्रिष्टुब्विति षट्सु वेदाभ्यां द्वाभ्यां च गर्भ्यांम दक्षिणायास्तिस्रः पंक्त्याः सात्वरूप्यसुवर्णमयीभिः प्रत्येक
मेकाधिकशतसंख्याभिः सूचिभिरश्वाऽसिः पथस्तमार्गानकुर्वंति। पथास्तस्यासुखप्रवेशाय सूचीभिर्वितुध
तितु यास्थलवंज्जरीकुर्वंतीतिसूत्रार्थः गायत्री। अस्य देवत्याः षट्च्छंदसः आयास्मिक हेऽश्व गायत्री त्रिष्टुप्
जगती। अनुष्टुप् पंक्त्या सह बृहती उष्णिहा सह ककुप् एतानि छंदांसि सूचीभिरेताभिः लोशम्यातु स
स्कुर्वंतु विकरणमन्यथाः असिपथार्थं त्वग्भेदनसंस्कारः द्विपदाः। चतस्रोऽनुष्टुभः हे पदे यासां न द्विपदाः
गायत्री त्रिष्टुब्जगत्यनुष्टुप्पंक्त्या सह बृहत्युष्णिहाककुप्सूचीभिः शम्यन्तु त्वा १३ द्विप
दा याश्च चतुष्पदास्त्रिपदा याश्च षट्पदाः विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा १४
महानाम्न्यो रेवत्यो विश्वाऽऽशाः प्रभूवरीः मेघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा
याः चतुःपदाः याः त्रिपदाः। याः षट्पदाः याः विच्छंदाः विगतं छंदो याभ्यः ताः छंदोलक्षणहीनाः याः स
छंदाः छंदोलक्षणयुक्ताः सर्वाः छंदोजातयः हेऽश्व सूचीभिः लोशाम्यंतु महानाम्न्यः महत्तनाम यासां ता
महत्वाः ऋचः शाक्वर्यः ऋचः रेवत्यः ऋचः यस्यामृचि रैवतं साम गीयते सा रेवती विश्वाः सर्वा आशाः दिशः कीदृ
श्य आशाः प्रभूवरीः प्रभवंति सर्वभूतानि धारयितुं समर्था भवंति प्रभूवर्यः अन्येभ्योपि दृश्यंत इति वनिप्
ऋतेभ्यः इति ङीप् वनो र चेति नस्य रेफः एवं सर्वाणि दीर्घत्वे मेघभवा मेघ्याः एवं सर्वाणि मेघान्विद्युतः वा
चो वेदलक्षणा अन्या अपि एताः सर्वाः सूचीभिः हेऽश्व त्वा शाम्यंतु हविः कुर्वंतु २

नार्यस्ता हे अश्व नार्यः नराणामपत्यानि स्त्रियः तेनव लोमस्तोमणीमनीषया मनसः इच्छया विचार्य विचिन्वंतु एष्यु
कुर्वंतु रोमेत्यत्र जातावेकवचनं विभक्तिलोपो वा कीदृश्यो नार्यः पत्न्यः पत्युर्नो यज्ञसंयोगे इति नकारः यजमान
३८ भार्या महिष्याद्या इत्यर्थः किंच देवानामिंद्रादीनां पत्न्यो दिशः प्राच्याद्याः सूचीभिः त्वा सम्यंतु रजताः रजताः
रजतमय्यः हरिणीः हरिण्यः सुवर्णमय्यः सीसाः सीसेन त्रपुमय्यः त्र्यः सूच्यो भवंति लोहमय्यो राज
ताः हरिण्यः दिशः सैसा लोहमय्यः वांतरदिशः रजताः ऊर्ध्वा हरिण्य एताभिरेव नकल्पयंतीति श्रुतेः सूचीनां।

नार्यस्ते पत्न्यो लोम विचिन्वंतु मनीषया देवानां पत्न्यो दिशः सूचीभिः शम्यंतु त्वा ३६
रजता हरिणीः सीसा युजो युज्यंते कर्मभिः अश्वस्य वाजिनस्त्वचि सिमाः शम्यंतु शम्यतीः
३७

दिग्रूपतात्स्वसंस्कारत्वमवं ताः सूच्यः कर्मभिः अश्वदेहे सीमाकरणलक्षणैः युज्यंते योगं प्राप्नुवंति सी।
माकरणे योग्या भवंतीत्यर्थः कीदृश्यस्ताः युजः। युज्यंते ता युजः संयुक्ता एकीभूता इत्यर्थः ताः सूच्यो वाजि
नो वेगवतो ऽश्वस्य त्वचि सीमाः सीमा रेखाः शाम्यंतु सम्यक् कुर्वंतु सिमा शब्दः सीमापर्यायः। कीदृश्यस्ताः
शम्यंतीः। शाम्यंत्यः संस्कारं कुर्वाणाः ॥ ३५

35

कुविदंगविरुण्याख्याता का ग्रंथविशासम्पतु वाकेनकस्वाध्यातीति षट्वेनानुवाकेनाग्रविशानास्ति आ
ष्वादंवाउयंति मेदमः हरएायवयायाग्रभावात उदरमथ्यस्थस्यान घृतामंघनेष्वेतमांसंमेदश्तिसूत्रार्थः
कत्वा। अथदेवत्वाषड्वः आघागायत्री हेस्रषकः प्रजापतिः। लालांआछ्यातिविनमि छोछेदनेलट् अ
नस्यातीति अकारलोपः हेग्रषक लांविशासिनवाविर्योजयति। तेनवगात्राणिकः शम्यति शमेनेनह्रविः
करोति। कः ३। कश्चप्रजापतिरेवक विर्मियावीतेनवशामितामपिताप्रजापतिरेवसर्वंकरोतिनाहमित्यर्थः कु

कुविदङ्गयवमन्तोयवञ्चिद्यथादान्त्यनुपूर्वं वियूय इहेहैषांकृणुहिभोजनानि येवर्हि
षोनमः उक्तिंयजन्ति ३९ कस्त्वाछ्यतिकस्त्वाविशास्तिकस्तेगात्राणिशम्यति क ३
तेशमिताकविः ४१ ऋतवस्तऋतुथापर्वशमितारोविशासतु संवत्सरस्यतेजसा
शमीभिः शम्यन्तुत्वा ४१ अर्धमासाः परूंषितेमासाः आछ्यन्तुशम्यन्तः अ
नवेलपंचानहुभः हेअश्वऋतवत्थाऋतौऋतौकालेतेन ॥होरात्राणिमरुतोविलिष्टं सूदयं
वपर्वपर्वाणिअस्थिग्रंथीन् शमीभिः कर्मभिः विशासतु
भिन्नानिकुर्वंतु। केनासंवत्सरात्मकस्यकालकालस्यतेजसा किंच ऋतवः लालाशम्यंतुपर्वविशासने
नरुविःकुर्वंतु अर्धमासाः। अर्धमासाः। अर्धमासाः पता मासाश्वनद्भिमानिनोदेवाः शाम्यंतः संकुर्वंतः
संतो हेअश्वतेनवपरूंषिपर्वाणि आछ्यन्तु समंतात्छिदंतु ग्रंथिर्नोपर्यपरुषीतिकोशः किंच अहोरात्राणि

अहोरात्राभिमानिदेवामरुतश्चदेवानेनवविलिष्टंलि
शान्तल्पीभावे विशेषेणाल्प अंगंतन्सूदयंतुसंदयंतु

[illegible] २२

देवाः देवानामिमे दैव्यः आश्विनौ देवानामथर्वशृङ्गस्तुत्यत्वात् आश्विनाप्रहतपो देवसंबंधिनो ऽथर्वदेवोऽस्य अहल्लालंता आछं
तं आछिद्यंतु विपाणमतुच चकारो भिन्नक्रमः हविः कुर्वंतु किंच तेनवगात्राणि विभक्तिव्यत्ययः गात्रेषु शरीरेषु पर्व
शापर्वणिसिमाः सीमामर्यादाः कल्पयन्तु कुर्वंतु ककरणे स्वादिः कीदृशीः सीमाः शाश्वतीः संस्कर्वाणाः घोस्तो
३६ द्यौः स्वर्गः पृथिवी अन्तरिक्षं लोकत्रयाभिमानिनो देवाः अग्निवायुसूर्याः वायुर्वनेषापि शरीरस्थः प्राणादिः हेअश्वने
नवछिद्रप्राणात्तु वचनव्यत्ययः प्रीणंतु मरयंतु यतन्मूलं नमस्यंतु किंचनदत्तैः सहनन्तश्चसूक्तः सूर्यः तेन

देवाः अङ्गुष्ठिवमन्वाछ्यन्त्वविचशाम्यत गात्राणिपर्वशोलसीमाः कल्पयन्तु शमस्त्वोः ५२
द्यौस्त्वा पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते सूर्यस्तेनक्षत्रैः सहलोकं कृणोतु साधुया ५३
शंतेपरेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः शमस्थभ्यो मज्जभ्यः शमस्वतन्वैतव ५४

वसाधुयासाधुं समीचीनांतेलोकं कृणोतु करोतु स्वपांस्तु किंगित्यादिना साधुशब्दात्परस्यामो यादेशः सूर्यस्तेउत्तमे
लोकं ददातित्यर्थः शेते हे अश्वते तव परेभ्यो गात्रेभ्यो अवयवेभ्यः उत्तमेभ्यः शिरआदिभ्यः शमस्तु विअस्तु अवरेभ्योऽध
स्थेभ्यः पुणादिभ्यो गात्रेभ्यः शमस्तु अस्थभ्यः तवास्थिभ्यश्च शमस्तु अस्थिदधिसज्ञ्यदाणामनङ्दात्तइत्यस्मा
तुदृत्तैनोकृत्स्यपिदृश्यतइति सूत्रेणाहलादावप्यस्थिशब्दस्यानङादेशः मज्जभ्यः षष्ठ्यर्थे तभ्योपि शमस्तु किं

वहुनानवतन्वैतन्वाः सर्वस्यापि शरीरस्य शमस्तु एवमेवाश्चपष्ठीच
तुर्थ्यर्थे आपिषिवाचतुर्थ्या २३
३६

का० आवपनाद्धोमाद्धोताध्वर्युं ब्रह्मोद्यमभिसंवदेते एवं तत्समभिः कः स्विदेकाकीति सृभिर्वदतः वपाहोमाध्याकु चतुर्ऋग्भिः पूर्वब्रह्म
कि प्रश्नुत्तमामहोम ध्येगालो होतारमध्वर्युश्च संवादे कुरुतः कः स्वित् अष्टादशाक्षराभोत्प्रेक्षा घर्मेत्ता ब्रह्मोद्यं परस्परं
संवादः आद्याश्चतस्रोऽनुष्टुभः कास्विदासीदित्याद्याश्चानुष्टुभः षोडशाद्या त्रिष्टुभः होताध्वर्युं पृच्छति कः स्वित् आ
त्मानः अध्वर्युः प्रत्याह सूर्यः उक्ता। अध्वर्युर्होतारं पृच्छति किं स्वित् हे होतः स्यादिति वितर्के सूर्यसमं सूर्यमंडले
तुल्यं ज्योतिस्तेजः किंतु ब्रूहि संबद्धसमं समुद्रतुल्यं सरः किं स्वित् पृथिव्ये पृथिव्याः सकाशात् वर्षीयो महत्तं

माध्यंदिन १ ४८

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः किꣳ स्विद्धिमस्य भेषजं किम्वावपनम्म
हत् ४५ सूर्य एकाकी चरति चन्द्रमा जायते पुनः अग्निर्हिमस्य भेषजं भूमिरावपन
म्महत् ४६ किꣳ स्वित्सूर्यसमं ज्योतिः किꣳ समुद्रसमꣳ सरः किꣳ स्वित्पृथिव्यै
वर्षीयः कस्य मात्रा न विद्यते ४७ ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमꣳ सरः इन्द्रः
पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यते ४८ पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा

रं किं स्वित् प्रियस्थिरे स्यादिना हृह स्ववर्षीदेशः कस्य मात्रा परिमाणं न विद्यते होता प्रत्याह ब्रह्म सूर्यसमम
सूर्यसमं ज्योतिर्ब्रह्म त्रयीलक्षणं च समुद्रसमं सरो द्यौ यतो वृष्टिर्भवति पृथिव्यै पृथिव्याः सकाशात् इन्द्रो व
र्षीयान् हृहत्तरः नु पुनः गोर्धेनोः मात्रा न विद्यते यत्तथा तत्कलात् का० ब्रह्मोद्गातारं पृच्छति पृच्छामीति चकारात्
चतुर्ऋग्भिः सदसि ब्रह्मोद्गातारौ संवदेते ब्रह्मोद्गातारं पृच्छति पृच्छामि देवानां सख्या देवसखः पत्नीहोम विश्वपृच्छ देवे

३७

37

उद्गाताप्रत्याह अर्पितेषु येषु त्रिषु पदेषु विश्वंभुवनं आविवेशेति पत्न्याः एतेषु त्रिषु पदेषु गार्हपत्यादिषु अहमस्मि अहम
पि तत्रैव स्थितोस्मि अपि शब्दात् त्वं च तत्रैवासि किमेतावदेव जानामि किंतु पृथिवी उतापि च द्यां स्वर्गं दिवः स्वर्गस्य पृष्ठमु
परिभागमपि सर्वपृष्ठतृणमेव एकेनांगेन मनसा पर्यमि परिगच्छामि सर्वं जानामि किं पुनर्भूतानि प्रविष्टानीति भावः उ
द्गाता ब्रह्माणं पृच्छति केष्वन्तः हे ब्रह्मन् पुरुषः केषु पदार्थेषु अन्तर्मध्ये आविवेश प्रविष्टः पुरुषेष्वन्तः पुरुषमध्ये कानि
वस्तूनि अर्पितानि स्थापितानि एतत् त्वा त्वां प्रति उपवल्हामसि उपवल्हामः स्पर्धया पृच्छामः वल्ह प्राधान्यपरिभा

अर्पितेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश सद्यः पर्येमि पृथिवीमुत द्यामेके
नाङ्गेन दिवो अस्य पृष्ठम् ५० केष्वन्तः पुरुष आविवेश कान्यन्तः पुरुषे अर्पितानि
एतद्ब्रह्मन्नुपवल्हामसि त्वा किं स्विन्नः प्रतिवोचास्यत्र ५१ पञ्चस्वन्तः पुरुष आ
विवेश तान्यन्तः पुरुषे अर्पितानि एतत्त्वात्र प्रतिमन्वानो अस्मि न मायया भव

षणाद्धिंसादानेषु लट् उंदोतो मसि अत्र प्रश्ने किं स्वित् त्वं प्रतिवोचासि प्रतिवदसि वच उपमितिलेटि ग्लादसउत् लेटो डाटा
मित्याडागमः ब्रह्मा प्रत्याह पंचस्वन्तः पुरुष आत्मा पंचसु प्राणेषु अन्तः प्राणमध्ये आविवेश प्रविष्टः तानि प्रसि
द्धानि श्रोत्रादिकरणानि पुरुषेऽन्तर्मध्ये अर्पितानि प्राणात्मानामन्योन्यापेक्षत्वात् हि विस्पर्धः न चात्मानमन्तरेण ।
प्राणा व्याप्रियंते न प्राणानन्तरेणात्मेति वद्रुच श्रुतेः पद्मा पंचसु भूतेषु भूम्यादिषु आत्मा प्रविष्टस्तानि चात्मनि प्रविष्टा
नितानि सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः उद्गातः अहं अत्र प्रश्ने त्वां त्वा प्रति एनं तु नरं प्रतिमन्वानः प्रतिजानानोस्मि ८

३७

का पुनः पूर्वा वपरेणागत्य वेदिकायां विदासीदिति ततः सदस्येति: कस्मन्ह्वविर्द्धानमण्डपउत्तरवेदेः पश्चादुपविश्य
पूर्वा पूर्वां कोहोत्रध्वर्यूचतुर्ऋग्भिः संवदंते इति सूत्रार्थः होताध्वर्युं पृच्छति कास्विदासीत् आख्याता अध्वर्युः प्र
त्याह द्यौरासीत् आख्याता अध्वर्युहोतारं पृच्छति कः इमे ईमिति निपातस्वार्थः॥ अरे इति संबोधनार्थः॥ अ
रे होतः का च पिशंगिला काचकुरुपिशंगिला कश्चस्कं दोम्रलतः आस्कंद्य उत्प्लुत्य अर्षति गच्छति कश्च ग
तौ तुदादिः अन्यमेन शप् कश्च पंथां पंथानं मार्गं प्रति विसर्पति विविधं गच्छति होता प्रत्याह अजारे अरे अ

कास्विदासीत्पूर्वचित्तिः किᳬ स्विदासीद्बृहद्वयः कास्विदासीत्पिलिप्पिला कास्विदासी
त्पिशङ्गिला ५३ द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः अविरासीत्पिलिप्पिलारा
त्रिरासीत्पिशङ्गिला ५४ कः ईमरे पिशङ्गिला कः ईं कुरुपिशङ्गिला कः ईमास्कन्द
मर्षति कः ईंपन्थांविसर्पति ५५ अजारे पिशङ्गिला श्वावित्कुरुपिशङ्गिला शशः
॥ आस्कन्दमर्षत्यहिः पन्थावि सर्पति ५६

ध्वर्यो अजा नि व्याप्ता या रात्रिर्वा पिशंगिला पिशंरूपं गिलति भक्ष
यति पिशंगिला मायाविश्वग्रपते रात्राव पिरूपाणि न प्रतीयं तेन मसा श्वावित् सेधाकुरुपिशंगिला कुरुशा
होत्रकर्णा पिशस्त्रवयवे इति धातोर्नाविगुपयेति कप्रत्ययः कुरु इति शब्दात कर्वाणा पिशान् मूलाग्रवचनान्गि
लति पिशंगिला मूलानां शानं कुदोस्यापयति शातेच भक्षयतीति सेधायाः स्वभावः शशः वन्यो जीवविशेषः

स्कंदं आस्कंद्याक्रम्य अर्षति गच्छति सततस्य स्वभावः अहिः सर्पः पंथां पंथानं विसर्पति विशेषेण गच्छति २६

कान्या। उत्तरौ च कतमस्येति उत्तरौ पश्चाद्युक्तौ ब्रह्मोद्गातारौ चत्वारः ऋग्भिः संवदेते ब्रह्मोद्गातारं पृच्छति कतमस्य अस्य यज्ञ

३८ स्य कति विष्टाः किं यति स्तवानि कास्ता व्यायामानाः कति विशेषेणातिष्ठन्ति यज्ञे या यास्तुताः विष्टा स्तवानि कियत्प्रकाराणि

कत्यस्य विष्टाः कत्यक्षराणि कति होमासः कतिधा समिद्धः य

ज्ञस्य त्वा विदथा पृच्छमत्र कति होतारः ऋतुशो यजन्ति ५७

यज्ञे अक्षराणि च कति होमासः होमाः कति समिद्धः समिधः कति प्रकाराः प्रकारस्य हि त्वमर्थः यज्ञस्य विदथ वेत्ती।

ति विदः विदस्य भावो विदथा यत्त्ववेदित्वेन हेतुना अत्र यज्ञस्थले त्वां त्वा अहं पृच्छं अपृच्छं पृच्छामि पृच्छतेर्लङ्। अडभावः

आर्षः ऋतुशः ऋतौ ऋतौ कति होतारो यजन्ति ५७ ३५

उद्धानामन्याह षडस्य दशसंख्यामश्रुत्वसंख्यामाह अस्य यज्ञस्य षड्विंशाश्चत्वारि सर्वेषामाद्यानां षट्सप्तमान्यानि षष्ठे चत्वारी
त्यर्थः अस्य यज्ञस्य शतं अक्षराणि छंदोभिर्धियंतानिः पाद्यते तानि च छंदांसि गायत्र्यादीन्यतिधृत्यंतानि चतुर्दश चतु
र्विंशत्यक्षरादीनि चतुर्वर्णोत्तराणि तेषाक्रमेणक्रमगताम्याह्रास्यांह्रास्याणां शतमक्षराणि भवंति तथाहि गायत्री चतु
र्विंशतिवर्णा अतिधृतिः षट्सप्ततिः एवं द्वे मिलित्वा शतमक्षराणि उष्णिक २८ धृतिः ७२ एवं शतं अनुष्टुप् ३२
अत्यष्टिः ६८ एवं शतं अष्टिः ६४ बृहति ३६ एवं शतं अतिशक्करी ६० पंक्तिः ४० एवं शतं शक्करी ५६ त्रिष्टुप्

षट्स्य विंशाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः । य
तस्य ते विद्यया प्रब्रवीमि सप्त होतारः ऋतुशो यजन्ति ५८

४४ एवं शतं अतिजगती ५२ जगती ४८ एवं शतमक्षराणि अनेनाभिप्रायेण शतमक्षराणीत्युक्तं होमा अशीतिः
अश्वमेधे एकविंशतिर्यूपाः तत्राग्निष्ठे मध्यमयूपे स्वत्पदशः मृगास्त्रिषु नक्षि इतरेषु षोडशपशवः तत्र विंशतिसंख
षु चत्वारिंशीतयः षण्णवो भवतीत्यभिप्रायेणोक्तं अशीतिर्होमाः इत्युक्तं तिस्रः समिधः अश्वस्तूपरो गोमृगाः प्राजाप
त्याः पशवस्तद्वयाभिः समिद्भिर्धियंतो होम इति तिस्रः समिध उक्ताः यज्ञस्य विद्यया वेदनेन हेतुना ते तुभ्यं प्रब्रवीमि प्र
वदामि किंच सप्त होतारो वषट्कर्तारः ऋत्वृतुशः ऋतुयाजेषु यजंति २८

उद्गाता ब्रह्माणं पृच्छति को अस्य हे ब्रह्मन् अस्य भुवनस्य भूतजातस्य नाभिं नह्यते बध्यते यत्र सा नाभिर्बंधनस्थानं कारणमि
३५ ति यावत् नाभौ हि सर्वं नाड्यो बध्यंते नभ हिंसायां अत्र बंधनार्थः औणादिक इ प्रत्ययः भूतस्य जातस्य कारणं को वेद जाना
ति द्यावापृथिवी द्यावापृथिव्यौ अंतरिक्षं च को वेद बृहतो महतो जनित्रं जन्म को वेद सूर्यस्येत्यर्थः जनस्त्रल्प्रत्ययः यतो
जायते उत्पद्यते इति यतोजाः यत इत्युपपदे जनसनखनक्रमगमो विडिति विट्प्रत्ययः विड्वनोरनुनासिकस्यातिनकारस्या
39 ले प्रथमा द्वितीयार्थे यतोजाय उत्पन्नं चंद्रमसं इंदुं को वेद यतश्चंद्रमा उत्पन्नस्तं को वेद इत्यर्थः ब्रह्मा प्रत्याह वेदाहं

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् कः सूर्यस्य वेद बृहतो जनित्रं को
वेद चन्द्रमसं यतोजाः ५९ वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् वेद
सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ६० पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छा
मि यत्र भुवनस्य नाभिः पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ६१

अस्य भुवनस्य नाभिं कारणं अहं वेद जानामि विद्लृ लाभे वा यं ब्रह्मैव जगत्कारणं जानामीत्यर्थः द्यावापृथिवी अंतरिक्षं च
वेद ब्रह्मणो विकारभूतं जानामि बृहतः सूर्यस्य जनित्रं उत्पत्तिकारणं ब्रह्मैव वेद अथो अपि च यतोजाः चंद्रमसम् अहं वेद परमा
त्मनो जातं चंद्रमसं अहं वेद्मीत्यर्थः का यजमानो अध्वर्युं पृच्छति पृच्छामि त्वेति यजमानो अध्वर्युं पृच्छति पृच्छामि त्वा हे अध्वर्यो पृथिव्याः
परं अंतं अवधिभूतं पर्यंतं त्वां अहं पृच्छामि हि किं मेकः यत्र यस्मिन् स्थले भुवनस्य भूतजातस्य नाभिः कारणं तदपि ३५
त्वां पृच्छामि वृष्णः सेक्तुः अश्वस्य रेतो वीर्यं त्वां पृच्छामि वाचो वाण्याः त्रयीलक्षणायाः परमं उत्कृष्टं व्योम स्थानं त्वां पृच्छामि २५

श्रुतेः भाद्यन्ताऽक्षरीयं ३ इति श्रीमन्महीधरकृते वेददीपे मनोहरे
त्रयोविंशोऽयमध्यायो व्यंसीः समर्धिकः २३

का॰ इयं वेदिरित्याद्यर्धर्चः अध्वर्युर्यजमानं प्रत्याह इयं वेदिः इयं वेदिरेव त्रवेदिः पृथिव्याः परः अन्तोऽवधिः वेदेः सर्वपृथ्वीरूपत्वा
दित्यर्थः भुवनस्य नाभिः कारणं अयं यज्ञः सर्वमेधो भुवनस्य प्राणिजातस्य नाभिः कारणं यज्ञाद्वै प्रजायन्त इति श्रुतेः वृ
ष्णः अश्वस्य रेतो यः सोमः सोमलताख्यस्य वीर्यात्ज्ञातेन स्वार्थः अयं ब्रह्मा ऋत्विक् वाचः त्रयीरूपायाः परमं व्योम स्था
नं ब्रह्मणस्त्रिवेदसंयोगादित्यर्थः ब्रह्मा यं समाम्नं सुभूरिति पूर्वस्य महिम्नः पुरोनुवाक्या उत्तरस्य याज्या च उदितं ब्रह्मा
द्यं संप्रयाद्यर्धर्चः हिरण्मयेन पात्रेण प्राजापत्यं महिमानं ग्रहं गृह्णाति तमस्य पुरोरुचि हिरण्यगर्भः समवर्ततेत्यादिरूपा (
याज्यापुरोनुवाक्यात्मकं भूः स्वयंभूः प्रथम इति श्रुतेः सुभूः प्रजापतिर्देवत्या त्रिष्टुप् इदं तिसृभिर्ग्रहं प्रथमः सर्वस्यादिः अ

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः अयं सोमो वृष्णो अश्वस्य रेतो ब्र
ह्मायं वाचः परमं व्योम ६२ सुभूः स्वयंभूः प्रथमोन्तर्महत्यर्णवे दधे ह गर्भमृत्वियं यतो
जातः प्रजापतिः ६३ होता यक्षत्प्रजापतिं सोमस्य महिम्नः जुषतां पिबतु सोमं होत
र्यज ६४ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो
अस्तु वयं स्याम पतयो रयीणाम् ६५ इति संहितापाठे त्रयोविंशोऽध्यायः २३

नादिर्निधनः पुरुषः महति अर्णवे कल्पान्तकालीने समुद्रे अन्तर्मध्ये स्थापितवान् कीदृशः सुभूः सुष्ठु भूर्भवति यस्मात्स
सुभूः विश्वोत्पादकः स्वयं भवतीति स्वयंभूः स्वेच्छाधृतशरीरः स्वेच्छाधृतशरीरः कीदृशं गर्भं ऋत्वियं ऋतुः प्राप्तोऽस्य ऋत्वि
यः प्राप्तकाल यतो गर्भात्प्रजापतिर्ब्रह्मा जातः उत्पन्नः होता यक्षत् महिम्नः प्रैषः होता यक्षत्प्रजापतिमिति प्रैषा इति श्रुतेः
आर्षी गायत्री महिम्नः सोमस्य महिमसंज्ञस्य सोमस्य संबन्धिनं प्रजापतिं होता देवो यजतात् यजतु इज्यमानः स प्रजापतिः

ग्रहं गृहीत्वा सोमं महिमसंज्ञकं ग्रहं गृहीत्वा होताः समधिकृत्य प्रति
पते एकस्य महिम्नः प्रजापते न त्वदेतानीत्यस्य प्रजापतिर्ऋषिः

श्रीविश्वेश्वराय नमः ॥ श्रुतिरूपमंत्राश्वमेधिकानां पशूनां देवतासंबंधविधायिनोऽध्यायेनोच्यंते तत्राश्वमेधे राकविंश
तिर्यूपाः संति तत्र मध्यमो यूपोऽग्निष्ठसंज्ञः तत्र सप्तदश पशवो नियोजनीयाः तान् देवतासंबंधकथनपूर्वकमाह अश्वस्तू
५० 50 परो गोमृगस्ते प्राजापत्याः अश्वः तूपरः शृंगोत्पत्तिकालेऽतीतेऽपि शृंगहीनः गोमृगो गवयः एते प्रजापतिदेवताः
ततः प्राजापत्येष्वश्वे निपुरुषग्रीवः श्यामवर्णगलः आग्नेयः अश्वस्य पुरस्तात् ललाटे उपायेन बध्नीयः हन्वोरधस्तात्
सारस्वती मेषी बंधः आश्विनावधोरामौ अधोभागे श्वेतकवर्णौ वृत्तौ बाह्वोरश्वस्य पूर्वपादयोरेकैक सौमपौष्णदैवत्यः

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती
मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याᳪ सौ
र्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः
पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥ १

श्यामः शुक्लकृष्णरोमा नाभ्यामश्वस्य नाभ्यां बंधः श्वेतः कृष्णश्च सौर्ययामौ श्वेतः पशुः सूर्यदेवतो दक्षिणपार्श्वे बंधः
यमदेवः कृष्णः सव्यपार्श्वे । त्वाष्ट्रौ त्वष्टृदेवतौ लोमशसक्थौ बहुरोमयुक्तसक्थिकौ पश्चादश्वस्य सक्थ्नोरूर्वोः प
श्चात्पादयोरेकैकः वायव्यः श्वेतवर्णः पशुरश्वस्य पुच्छे स्वपस्याय शोभनकर्मणे इंद्राय स्वयंसिद्ध इंद्रदेवता वेहत् गर्भघा
तिनी वैष्णवो वामनः पशुः पुच्छ एव संगतः अश्वादिभिः एवमश्वादिभिः सह पंचदश भवंति एते पर्यंगा उच्यंते अ
त्राश्वस्य शरीरे तरणाय तेषु फलवद्रज्जुबंधा गुंफनीयं ततः कृष्णग्रीव आग्नेयो रराट इत्यादयोऽश्वस्य शरीरे यथो ५०
क्तस्थाने संबद्धा योक्त्रा बंधनीयाः ततो रोहितो धूम्ररोहित इत्यादयो द्वादश संख्याकाः शितिबाहुरन्यतः

शितिबाहुः समंतशितिबाहुस्ते बार्हस्पत्या इत्यंतानां मध्यमे एव यूपे नियोज्याः सप्तदशैव पशून् मध्यमे यूपे आलभत इति श्रुतेन तत्र त्रयो
ऽश्वतूपरगोमृगाः द्वावाग्नेयाविति कादशिनौ द्वादश रोहितादयः एवं सप्तदश मध्यमे यूपे ततः पृषती क्षुद्रपृषतीत्यादीनां षो
ताः सौर्या इत्यंतानां शतत्रयसप्ताशीतिकानां मध्ये पंचदश पंचादश पशून् एकैकस्मिन् यूपे नियुनक्ति एवमितरेषु यूपेषु पंचदश पं
चदश पंचदशेति एते पशवः एकैकस्मिन्नेकादशिनः एवं मध्यमयूपव्यतिरिक्तेषु विंशतियूपेषु षोडश पशवो भवंति षोडश षोडशे
तरेष्विति श्रवणात् २ रोहितो धूम्ररोहितः रोहितः सर्वरक्तः धूम्ररोहितः धूम्रवर्णमिश्रो रक्तः तृतीयः कर्कंधुरोहितः ब
दरसदृशरक्तः ते त्रयः सौम्याः सोमदेवत्याः सोमाय जुष्टं नियुनज्मीत्यादिमंत्रेण प्रत्येकं मध्यमे यूप एव नियोज्याः तेनाव

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रो
ऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः शितिबाहुः समन्तशिति
बाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः २

भ्रुः कपिलवर्णः अरुणवर्णमिश्रः कपिलः शुकबभ्रुः शुकपक्षिसमवर्णः कपिलश्च ते त्रयो वारुणाः वरुणदेवत्याः म
ध्यमयूप एव शितिरन्ध्रः रंध्रं छिद्रं यस्य स शितिरंध्रः अन्यतः अन्यकपार्श्वे शितिरंध्रः समंतः सर्वतः शितिरंध्रः एते सावित्रा
मध्यमे एव शितिबाहुः स्कंधेन पूर्वपादः अन्यतः शितिबाहुः एकस्मिन्नेव पार्श्वे शितिपादः समंतशितिबाहुः सर्वश्वे
तबाहुः शिती धवलमेचकौ एते बार्हस्पत्या बृहस्पतिदेवता मध्यम एव । अथ तृतीययूपे पृषती विचित्रवर्णा विंदुयु
क्ता शरीरात् क्षुद्रपृषती सूक्ष्मविचित्रविंदुयुक्ता स्थूलपृषती स्थूलविचित्रविंदुयुक्ता एवं स्त्रीपशवो मित्रावरुण
देवताः द्वितीययूपे नियोज्याः २

शुद्धवालः शुभ्रवालः सर्वशुद्धवालः मणिवालो मणिवर्णकेशः ते त्रय आश्विदेवत्याः द्वितीये श्येन श्वेतः वर्णः श्येतता
तः श्वेतनेत्रः अरुणो रक्तः ते त्रयो रुद्राय पशुपतये पशुपतिरुद्रदेवता द्वितीये कर्णास्त्रयः पशुविशेषाः कर्णाश्च द्वेवह्न।
धा देवैरिति विश्वाके कर्णाश्चद्रुमहदपाश्वेन कर्णास्त्रयः पशवः बहुवचनस्य त्रित्वे पर्यवसानात् यामा यमदेवताः द्वितीये
अवभिस्रः सर्गावास्त्रयो रौद्राः एते द्वितीये पंचदश २ अथ तृतीये यूपे नभोरूपा आकाशवन्नीलवर्णाः पार्जन्याः प
५१ र्जन्यदेवतास्त्रयः पशवः बहुवचनस्य त्रित्वे पर्यवसानात् यामा यमदेवताः द्वितीये अवभिस्रः सर्गावास्त्रयो रौद्राः एते
द्वितीये पंचदश २ अथ तृतीये यूपे नभोरूपा आकाशवन्नीलवर्णाः पार्जन्यदेवतास्त्रयः पशवस्तृतीये तिष्ठन्त्याः ॥३

शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये
कर्णा यामाः अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ३ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः
फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते
त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उ

पृश्निः तिरश्चीनपृश्निः पृश्निर्विचित्रवर्णः तिरश्चीनानि पृश्नीनि विंदवो यस्य सः ते त्रयो मारुता मरुद्देवतास्तृतीये। फल्गूः अ
पुष्टशरीरा लोहितोर्णी प्लीहाकर्णः प्लीहा रोगविशेषविशिष्टस्तद्युक्तौ कर्णौ यस्य स प्लीहकर्णः अन्येषामपि हृष्यते इति संहिता
यादीर्घः शुंठकर्णः ह्रस्वकर्णः अध्यालोहकर्णः रक्तवर्णकर्णः। ते त्रयः त्वाष्ट्राः त्वष्टृदेवतास्तृतीये कृष्णग्रीवः शितिक।
क्षः श्वेतकक्षः अंजिसक्थः अंजिपृष्ठे संक्थो लक्षणौ यस्य स ते त्रय ऐंद्राग्ना इंद्राग्निदेवतास्तृतीये। एवं तृतीये पंचदश पशवः कृ
ष्णांजिः कृष्णपुंड्रः अल्पांजिः महांजिः अल्पमंजिर्यस्य महदंजिर्यस्य स तथा ते त्रय उषस्याः उषोदेवताश्चतुर्थे यूपे नियो धा

शिल्पा वैश्वदेव्यः विचित्रवर्णा लिप्साः स्त्रीपशवो विश्वेदेवाः विश्वेदेवदेवताः श्चतुर्थे रोहिण्यो रक्तवर्णाः अवयः
साईसंवत्सरास्तिस्रः ज्ञावाचे वा देवताः श्चतुर्थे अविज्ञाताः कृष्णग्रीवादिचिह्नविज्ञातास्त्रयः पशवो
ऽदित्यै अदितिदेवताः श्चतुर्थे समरूपास्समानरूपास्त्रयः पशवो धात्रे धातृदेवताः श्चतुर्थे एवं पंचदश ५ अथ पं
चमे यूपे तिस्रो वत्सतर्यो वालक्षणा पोदेवानां पत्नीभ्यः तद्देवताः पंचमे कृष्णग्रीवाः कालकण्ठास्त्रयः पशव
आग्नेया अग्निदेवताः पंचमे शितिभ्रवः श्वेतवर्णाभ्रुयुक्तास्त्रयो वसूनां वसुदेवताः पंचमे रोहिताः रक्तवर्णाः

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचे विज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो दे
वानां पत्नीभ्यः ५ कृष्णग्रीवा आग्नेयाः शितिभ्रवो वसूनां रोहिता रुद्रा
णां श्वेता अवरोकिण आदित्यानां नभोरूपाः पार्जन्याः ६ उन्नत ऋषभो
वामनस्त ऐन्द्रावैष्णवा उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः शु
कल्पा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ७

स्त्रयो रुद्राणां रुद्रदेवताः पंचमे श्वेता अवरोकिणः वलोकिनः यद्वा अवाचस्नात् रोकः छिद्रं येषां ते छिद्रेति
अर्थ न रोकः तेत्रय आदित्यानां तद्देवताः पंचमे अथ षष्ठे यूपे नभोरूपाः पार्जन्यास्त्रयः षष्ठे उन्नत ऋषभः
उच्चः ऋषभः पुष्टः वामनो बहुत्यपि वयसि गतो वृद्धिरहितः तेत्रय ऐन्द्रावैष्णवा इन्द्रविष्णुदेवताः षष्ठे उन्न
तः शितिबाहुः श्वेतपूर्वपादः शितिपृष्ठः शिश्वेतपृष्ठः तेत्रय ऐन्द्राबार्हस्पत्या इन्द्रबृहस्पतिदेवताः षष्ठे शु

कपर्दिसमवर्णास्त्रयो वाजिना वाजिदेवताः षष्ठे क
ल्माषाः कर्बुरास्त्रयः पशवो वैशास्त्र आग्निमरुद्देवताः

षष्ठे। एवं पंचदश ६ अथ सप्तमे यूपे। श्यामाः शुक्लकृष्ण
वर्णाः पौष्णाः पूषदेवताः सप्तमे ७

एतास्ते द्वाग्नाः कर्बुरवर्णास्त्रयः इन्द्राग्निदेवताः सप्तमे द्विरूपावर्णाद्वयोपेतास्त्रयः अग्नीषोमीयाः अग्नीषोमदे
वताः सप्तमे वामना अनड्वाहस्त्रयः आग्नावैष्णवदेवताः सप्तमे वशा वन्ध्या स्त्रियः मैत्रावरुण्यः तद्देवताः स
प्तमे ८ अन्यतएन्यः अन्यतः एकपार्श्वे कर्बुरवर्णाः स्त्रियः मैत्र्यः मित्रदेवताः अष्टमे कृष्णग्रीवा आग्नेयाः
त्रयोऽष्टमे बभ्रवः कपिलवर्णास्त्रयः सौम्याः सोमदेवताः अष्टमे श्वेतास्त्रयो वायव्या वायुदेवता अष्टमे अवि
ज्ञाताः स्थिरवर्णविशेषा अज्ञातास्त्रयोऽदितिदेवता अष्टमे अथ नवमे सरूपा धात्रे देवता नवमे वत्सतर्यो देवपत्नीदे

एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवा वशा मैत्रा
वरुण्योऽन्यतएन्यो मैत्र्यः ८ कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या
अविज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ९ कृष्णा भौमा धू
म्रा आन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः १० धूम्रान्वसन्ता
ता याऽऽलभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥११॥

वता स्त्रियो नवमे कृष्णा भौमाः भूमिदेवतास्त्रयो नवमे धूम्रवर्णास्त्रयोऽन्तरिक्षदेवता नवमे बृहन्तो महान्तस्त्रयो
दिव्या द्युदेवता नवमे ९ अथ दशमे शबलाः कर्बुरास्त्रयो वैद्युता विद्युद्देवता दशमे सिध्माः सिध्मरोगवन्त
स्त्रयस्तारकाः नक्षत्रदेवता दशमे ॥ १ धूम्रान्वसन्ताय धूम्रवर्णांस्त्रीनजान्वसन्तदेवतानालभते तिष्ठन
क्तिदशमे श्वेतांस्त्रीन्ग्रीष्माय दशमे कृष्णवर्णांस्त्रीन्वर्षाभ्यो दशमे १ अथैकादशे अरुणान्रक्तान्
त्रीन् शरदे एकादशे एषतो नानावर्णा बिन्दुयुक्तान्
त्रीन्हेमन्ताय पिशङ्गान् लोहितमिश्रकपिलव

अवयो गायत्र्यै सार्द्धसंवत्सरास्त्रयः पष्ठौहो गायत्र्यै ए। पंचावयः सार्द्धद्विसंवत्सरास्त्रयः त्रिष्टुभे प· ॥ अथ द्वादशो यूपे
दित्यवाहो द्विसंवत्सरास्त्रयो जगत्यै द्वा॥ त्रिवत्साः त्रिवर्षास्त्रयो ऽनुष्टुभे द्वा·। तुर्यवाहः सार्द्ध त्रिवत्सरास्त्रय उष्णिहे।
द्वा· पष्ठवाहः चतुःसंवत्सरास्त्रयो विराजे। द्वा·। उक्षाणः सेचनसमर्था युवानस्त्रयो बृहत्यै द्वा·॥ अथ त्रयोदशो यूपे
ऋषभा जरद्गावो ऽप्यधिकवयस्कास्त्रयः ककुभे त्र· अनड्वाहः शकटवहनसमर्था अजास्त्रयः पंक्त्यै त्र· धेनवो नवप्रसू
ता अजा स्त्रियस्त्रयो ऽतिच्छंदसे त्र· कृष्णग्रीवा आग्नेयाः अथ चातुर्मास्यदेवा पशवः श्वेताः सौर्या ऽइत्यंता तत्र प्रथमे वैश्वदे

अवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा ऽ अनुष्टुभे तुर्यवाह ऽ उष्णिहे १२
पष्ठवाहो विराज ऽ उक्षाणो बृहत्या ऽ ऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे १३
कृष्णग्रीवा ऽ आग्नेया बभ्रवः सौम्या ऽ उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः
श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः १४

वपर्वपशव उच्यंते कृष्णग्रीवास्त्रयः आग्नेयाः त्र· बभ्रवः कपिलास्त्रयः सौम्याः त्र अथ चतुर्दशो यूपे उपध्वस्ता उ
पध्वंसनमयः पतनेन न्यूनाङ्गा विशिष्टवर्णान्तरमिश्रिता वा त्रयः सवितृदेवताः च· वत्सतर्यः तिस्रः सरस्वतीदेवताः
च· श्यामाः शुक्लकृष्णवर्णाः पौष्णाः पूषदेवत्याः च· ए अथ पृश्नयस्तनुकाया विचित्रवर्णा वा त्रयो मरुद्देवताः च बहुरू
पास्त्रयो वैश्वदेवाताः च बहुरूपास्त्रयो वैश्वदेवाः च· १४ अथ पंचदशे वशा वंध्या स्त्रियो ऽजा द्यावापृथिवीया द्या
वापृथिवीदेवताः पं ६

८३

43

उक्ताः संवराः अथ याज्यायामसु पर्वे पशव उच्यंते संवत्सरेणैनेन कृष्णग्रीवा आग्नेया इत्यादयः पूर्वकंडिकोक्ताः पंचदश पशव उ
च्यंते पंचसंचराणि हवींषि भवंतीतिवत् यथा चातुर्मास्ये प्रथमे पर्वणि आग्नेयादीनि पंचदश हवींषि समानानि
एवमत्रापि चतुर्णां पर्वणां संचरणीनामाद्यानां पंचानां देवानामाद्या एते पंचदश पशवः समाना एव भवंति तेन
संचरा उक्ताः आग्नेयादयः पंचदश पशव उक्ताः इत्यर्थः आग्नेयाः कृष्णग्रीवास्त्रयः पं सौम्या बभ्रवस्त्रयः पं सावि
त्रा उपध्वस्तास्त्रयः पं । सारस्वत्यो वत्सतर्यस्तिस्रः पं । अथ षोडशे पौष्णाः श्यामास्त्रयः पौ । एते संच १

उक्ताः संचराः ऽएत ऽऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः १५
अग्नयेनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमे
धिभ्यो बष्किहान्मरुद्भ्यः क्रीडिभ्यः संसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान् १६

रा उक्ताः । एता कर्बुरास्त्रय ऐंद्राग्ना इंद्राग्निदेवताः । षो । कृष्णाः कृष्णवर्णास्त्रयो वारुणा वरुणदेवताः । षो । पृश्नयस्तनुशरीरा
स्त्रयो मारुताः । षो । त्रयः तूपराः निःशृंगाः कायाः कदेवताः । षो । १६ अग्नयेनीकवते । अथ सप्तदशे अथ साकमेधपश
शवः प्रथमजान्मातुः प्रथमगर्भे जातान् त्रीन् अजान् अनीकवते अनीकवद्गुणविशिष्टायाग्नये आलभते निरूप्यंति स·
वातन्समूहो वात्या तया अहर्वर्तन इति सवात्यान्वाचमंडलीमध्यस्थान्त्रीनजान्सांतपनेभ्यो मरुद्भ्यः स· बष्कि
हान्चिरप्रसूतान्त्रीन्गृहमेधिभ्यो मरुद्भ्यः स· संसृष्टान्मरुसृष्टान्त्रीन्क्रीडिभ्यो मरुद्भ्यः स· अनुसृष्टानु ८३

उक्ताः संवराः अथाष्टादशे यूपे महाहविः पशवः कृष्णग्रीवादयः पंचदश सर्वे वत् अथैकोनविंशतितमे एताः कर्त्तव्याः तूपरे
द्वाग्याः ए॰ प्राश्रृंगाः प्रश्रृंगाः संहिताया दीर्घः प्रकृष्टश्रृंगयुक्ता मा हैन्द्रामहेन्द्रदेवताः ए॰ । बहुरूपास्त्रयो वैश्वकर्मणा विश्वक
र्मदेवताः ए॰ । धूम्राः अथ पितृयज्ञे देवता पशवः धूम्राः कृष्णवर्णा मिश्रा लोहितवर्णा बभ्रुनीकाशाः कापिलवर्णाः सदृशास्त्रयः
पशवः सोमवन्तः पितरः तानि पोद्धाः ए॰ बभ्रवः कपिलाः धूम्रनीकाशाः धूम्रा ऊर्ध्वनितरोकाशे तेतु निमाःदृशास्त्रयो बर्हिष
दः पितृणां ए॰ अथ विंशे यूपे कृष्णा बभ्रुनीकाशा अग्निष्वात्ता नां पितृणां विं॰ कृष्णाः एषां तो विष्ठ युक्ताः त्रैयंबकाः अव

उक्ताः संवराः एताः ऐन्द्राग्नाः प्राश्रृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः २२
धूम्रा बभ्रुनीकाशाः पितृणां सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां ब
र्हिषदां कृष्णा बभ्रुः नीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्ब
काः २३ उक्ताः संवराः एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः २४

कदेवता । विं॰ उक्ता संवराः अथ शुनासीरीय पशवः तत्र संवरा आग्नेयादयः पंचदशोक्ता तेन कृष्णग्रीवा आग्नेयाः विं॰ बभ्र
वः सौम्याः विं॰ उपध्वस्ताः सावित्राः २१ अथैकविंशे यूपे वत्सतर्यः सारस्वत्यः ए॰ श्यामाः पौष्णाः एकविंशे एताः कर्त्तव्याः
शुनासीरीयाः शुनासीरदेवताः एकः श्वेतास्त्रयो वायव्या वायुदेवताः । एकः श्वेतास्त्रयः । सौर्याः सूर्यदेवता एकविंशे यूपे
२१ एवं समासाः पशवः उत्पन्ना आद्याः सौर्यान्ताः सप्तविंशत्रयं याम्याः पशवः सर्वे उक्ताः ८ ॥

वसंताय कपिंजलान् अथारण्याः पशव उच्यंते अत्रैकविंशतिर्यूपाः तेषां यूपानां विंशतिरंतरालानि तेष्वंतरालेषु
अंतरालेष्वग्निक्रमेण कपिंजलादयस्त्रयोदशत्रयोदश पशव आलभनीयाः अत्र यूपांतरालेषु आरण्यपशूनां बंधनोपा
४४ य उक्तो मानवसूत्रे नाडीषु स्तुषिमशकान् करंडेषु सर्पान् पंजरेषु मृगव्याघ्रसिंहान् कुंभेषु मकरमत्स्यमंडूकान् जा
44 लेषु पक्षिणः कारासु हस्तिनो नौषु चौदकानि यथार्थमितराणीति ये पशवो येनोपायेन यूपांतरालेषु प्रतिष्ठंति ते

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्ति
त्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विककरान् २०

ते तेनोपायेन स्थापनीयाः इति तात्पर्यं अत्र येषामारण्यजीवानां विपदानामर्था न ज्ञायंते ते निगमनिरुक्तनिघं
टुव्याकरणादिशब्दाभिधानग्रंथेभ्यो विलोक्यावगंतव्याः आटविकेभ्यश्च लब्धव्याः तत्र प्रथमे यूपांत
राले त्रीन् कपिंजलान् वसंताय आलभ्यते नियुनक्ति त्रीन् कलविंकान् चटकान् ग्रीष्माय तित्तिरीन् त्रीन् वर्षाभ्यः
वर्त्तिकाः पादविशेषान् शरदे ततस्त्रयाणां ककराणाम् अन्योपकं ककरं हेमंताय अथ द्वितीयेऽवकाशे शिशिराय ४४
ककरोपाधिविशेषो हेमंताय त्रीन् विककरान् शिशिराय ९

समुद्राय त्रीन्शिशुमारान्जलचरांजंतून्समुद्रामालभते त्रीन्मण्डूकान्भेकान्पर्जन्याय त्रयाणांमत्स्यानांमध्येद्वौ
अद्भ्यः अथतृतीयेऽवकाशे एकंशिशुंमत्स्यमद्भ्यः त्रीन्कुलीपयान्जलजान्मित्राय त्रीन्नाक्रान्नक्राख्यान्जल
चरान्वरुणाय सोमायत्रीन्हंसान्सोमायशिष्टावलाकावकपत्नीः वायवे अथचतुर्थेऽवकाशे त्रीन्क्रुंचान्
दिशाइंद्राग्निभ्यां त्रीन्मद्गून्जलकाकान्मित्रान्त्रीन्चक्रवाकान्वरुणाय अग्नये त्रीन्कुटरून्कुक्कुटानग्नये

समुद्रायशिशुमारानालभतेपर्जन्यायमण्डूकानद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणायना(
क्रान् २१ सोमायहꣳसानालभतेवायवेबलाकाऽइन्द्राग्निभ्याङ्क्रुञ्चान्मित्रायमद्गून्वरुणायच
क्रवाकान् २२ अग्नयेकुटरूनालभतेवनस्पतिभ्यऽउलूकानग्नीषोमाभ्याञ्चाषानश्विभ्या
म्मयूरान्मित्रावरुणाभ्याङ्कपोतान् २३ सोमायलबानालभतेत्वष्ट्रेकौलीकान्गोषादीर्देवा
नाम्पत्नीभ्यःकुलीकादेवजामिभ्योग्नयेगृहपतयेपारुष्णान् २४

ततस्त्रयाणामुलूकानांमध्येएकमुलूकंवनस्पतिभ्यः अथपंचमेऽवकाशे द्वौउलूकौकाकवैरिणौ त्रीन्चाषानग्
नीषोमाभ्यां त्रीन्मयूरानश्विभ्यां त्रीन्कपोतान्मित्रावरुणाभ्यां सोमायलवान् त्रयाणांलवानांलावकानांला
वकानांमध्येद्वौसोमाय अथषष्ठेऽवकाशे एकंलवंसोमाय कौलिकान्पक्षिणः त्वष्ट्रे तिस्रोगोषादीः गवांसाद
यित्रीः पक्षिणीः देवानांपत्नीभ्यः। तिस्रः कुलिकापक्षिणीः देवजामिभ्यो देववधूभ्यः जामिस्वसृकुलस्त्रियः त्री

मह्ने अथसप्तमेऽवकाशेत्रीन् पाराएवतानकलविङ्कान् अह्ने। तिस्रः सीचापूः पदिणीः रात्रौ तिस्रोजतूः पात्रात्मा
पादिणी अहोरात्रयोः सन्धिभ्यः त्रीन्दात्योहान्कालकण्ठान्मासेभ्यः त्रयाणांमहतांस्नुपर्णानामध्येपकंसंवत्सरा ४५
य १ अथाष्टमेऽवकाशे द्वैमहानेसुपर्णासंवत्सराय भूम्याआखूनालभते भूमेम्आखून्कृषकान्त्रीन् पाङ्क्तान्मषका
जातिविशेषान्अन्तरिक्षायकामान्तन्द्रदानेवदिवेत्रीननकुलान्दीगभ्यः तत्रहोअष्टमे अथनवमेएकं त्रीनव

अग्नेयपारावतानालभतेरात्रौसीचापूरहोरात्रयेः सन्धिभ्योजतूर्मासेभ्योदात्योहान्संवत्सरायम
हतः सुपर्णान् २५ भूम्याऽआखूनालभतेन्तरिक्षायपाङ्क्त्रान्दिवेकशान्दिग्भ्योनकुलान्बभ्रुका
नवान्तरदिशाभ्यः २६ वसुभ्यऽऋश्यानालभतेरुद्रेभ्योरुरूनादित्येभ्योन्यङ्कून्विश्वेभ्योदे
वेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् २७ ईशानायपरस्वतऽआलभतेमित्रायगौरान्वरुणाय
महिषान्बृहस्पतयेगवयांस्त्वष्ट्रऽउष्ट्रान् २८ प्रजापतयेपुरुषान्हस्तिनऽआलभतेवाचेप्लु२ ॥२॥
(षीँश्चक्षुषेमशकान्छ्रोत्रायभृङ्गाः
भ्रुकान् अल्पनकुलान्अवान्तरदिशाभ्यः वसुभ्यः त्रीन्कृष्यान्वसुभ्यः
ऋश्यादेयामृगविशेषाः रुरून्द्रेभ्यः त्रीन्न्यङ्कून्आदित्येभ्यः ९ अथदशमेऽवकाशे त्रीन् पृषतान्विश्वेभ्योदेवे
भ्यः त्रीन्कुलुङ्गान्साध्येभ्यः ईशानाय परस्वतोमृगविशेषान्ईशानाय त्रीन्गौरान्मित्राय। त्रीन्महिषान्वरुणा
यत्रैकंदशमे १० अथैकादशेऽवकाशे। हि। त्रीन्गवयान्गोसदृशान्आरण्यपशून्बृहस्पतये त्रीन्उष्ट्रान्त्वष्ट्रे। ४५
प्रजापतये। पुरुषान्हस्तिनस्त्रीन्। त्रीन्प्लुषीन्वकुनेडानवचि नत्सयोहोप्लुषा ॥ १॥ अथद्वादशेऽवकाशे प

प्रजापतयेचवायवेच एको गोमृगो गवयः एक आरण्यो मेषः वरुणाय एकः कृष्णो मेषाय माय्या एको मर्कटी मनुष्य
राजाय एको रोहित् ऋश्यः शार्दूलाय एका गवयी ऋषभाय नदास्येदेवाय १२ अथ त्रयोदशोऽवकाशे एका व
र्तिका क्षिप्रश्येनाय देवाय एकः क्रिमिकीट नीलङ्गोः नीलङ्गवे शिशुमारः एको जलचरः समुद्राय हस्ती हिमवते
मयुः प्राजापत्यः तुरगवदनः किंनरः प्रजापतिदेवतः उलो मृगविशेषः हलिक्ष्णः सिंहविशेषः वृषदंशो विडा

प्रजापतयेचवायवेचगोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहि
दृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती ३० मयुः
प्राजापत्य उलो हलिक्ष्णो वृषदंशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पु
ष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ३१ सोमाय कुलुङ्ग आरण्योजो नकुलः शका ते पौष्णाः क्रो
ष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ३२

लः ते त्रयो धात्रे एकः कंकोवकः दिशाद्दिग्भ्यः एका धुंक्षा पक्षिणी आग्नेयी अग्निदेवत्या कलविंकश्चटकः लोहि
ताहिः रक्तवर्णसर्पः पुष्करसादः पुष्करे सीदतीति कमलभक्षीपक्षिविशेषः ते त्रयः त्वाष्ट्राः त्वष्टृदेवताः १३
अथ चतुर्दशोऽवकाशे एकः क्रुंचः वाचे सोमाय कुलंगः कुरंगो हरिणः एकः सोमाय आरण्यो वनजो ऽजश्छागः
नकुलः शका शकुंति एते त्रयः पौष्णाः पूषदेवताः क्रोष्टा मृगालो मायोः इंद्रस्य एको गौरमृगः इंद्रस्य पिद्वो मृग
विशेषः न्यंकुरपि कक्कटः स एव ते त्रयोऽनुमत्यैः चक्रवाकः प्रतिश्रुत्कायै १४

सौरी वलाका वरुणेस्त्रीमस्त्र्यदेवत्या शार्गः पत्त्रिविशेषः १५ अथ पंचदशोऽवकाशः सृजयः पत्त्रिविशेषः शायांडकोपि
तेमैत्रा मित्रदेवत्याः पुरुषवाक् मनुष्यवद्वदतीति शारिः सरस्वत्यै शाविर्मैत्याभौमीभूदेवत्या शार्दूलो व्याघ्रः वृकप्रिय
४६ कः पृदाकुः सर्पः तेत्रयोऽमन्यवे पुरुषवाक् शुकः सरस्वतेऽमृष्टाय सुपर्णः गरुत्मान्पार्जन्यः पर्जन्यायत्मानि
आडी वाहसः दार्विदा काष्ठकुटः तेत्रयः पत्त्रिविशेषः अथ षोडशोऽवकाशो वायवे बृहस्पतये वाचो वास्याः पत्त
ये इति बृहस्पतये पैंगराजः पत्त्रिविशेषः अथ षोडशोऽवकाशः अलजः पत्त्रिविशेषः आन्तविदः अन्तविदितदेव

सौरी वलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दू
लो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ३३ सुपर्णः पार्जन्य आतिर्वाहसो दर्वि
दा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलजः आन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्या
वापृथिवीयः कूर्मः ३४ पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः
सावित्रो हंसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः ३५

नः प्लवो जलपक्षी मद्गुः काकस्वः मत्स्यः तेनदीपतये कूर्मः कच्छपो द्यावापृथिवीयः द्यावापृथिवीदेवतः
पुरुषमृगः ऐमृगः चन्द्रमसः गोधा कालका पत्त्रिविशेषः दार्वाघाटः ते वनस्पतीनां कृकवाकुः ता
म्रचूडः सावित्रः सवितृदेवतः हंसो वातस्य नाक्रः मकरः कुलीपयः तेत्रयो जलचरविशेषाः अकूपार ४६
स्य समुद्रस्य त्रयाणां मध्ये ह्यैषोडशो १८ अथ सप्तदशोऽवकाशः एकः कुलीपयः अकूपारस्य शल्यकः श्वावि

एण्यह्नः एणी मृगी अह्नः आलभ्याः मण्डूकः मूषिका तित्तिरिः ते त्रयः सर्पाणां लोपाशो वनचरविशेषः आश्विनः आश्विदेव
तः कृष्णो मृगो रात्र्यै ऋक्षो भल्लूकः जतूः सुषिलिका पक्षिपतिविशेषौ ते त्रयः इतरजनानां देवानां जहका गात्रसं
कोचनी वैष्णवी विष्णुदेवत्या अन्यवापः कोकिलाख्यः पक्षिविशेषोऽर्धमासानां पशुः ऋश्यः श्वेतपादः श्वेतकाशे ऋष्यो मृग
विशेषः मयूरः बर्ही सुपर्णो गरुत्मान् ते गन्धर्वाणां पशवः उद्रः जलचरः कर्कटसंज्ञः अपां पशुः कश्यपः कच्छपः
मासां मासानां रोहित् ऋष्यः कुण्डृणाची वनचरी विशेषः गोलत्तिका ये ते त्रयोऽप्सरसां असितः कृष्णः पशुर्मृत्यो

७५

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्या ऋक्षो जतूः सुषि-
लीका त इतरजनानां जहका वैष्णवी ३६ अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपा-
मुद्रो मासां कश्यपो रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ३७ वर्षाहूरृतूना-
माखुः कशो मान्थालस्ते पितृणां बलायाजगरो वसूनां कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै
वरुणायारण्यो मेषः ३८ श्वित्र आदित्यानामुष्ट्रो घृणीवान् वार्ध्रीनसस्ते मत्या अरण्याय सृम-

वे वर्षाहूः वर्षाभूः भेकी ऋतूनां आखुः मूषकः कशः मान्थालः पक्षिविशेषौ ते त्रयः पितॄणां अश्वैकोन विशेषः वकाख्यो अज
गरो महासर्पः वलाय कपिञ्जलो वसूनां कपोतः उलूकः शशः ते निर्ऋत्यै आरण्यो मेषो वरुणाय श्वित्र आदित्यानां
श्वेतः पशुरादित्यानां उष्ट्रो दीर्घग्रीवः घृणीवान् तेजस्वी पशुविशेषः संहितायां घृणीवानुष्ट्रस्य दीर्घः वार्ध्रीनसः कण्ठे स्तन
वानजः ते त्रयो मत्यै देव्यै सृमरो गवयः अरण्याय देवाय रुरुर्मृगः रौद्रो रुद्रदेवतः क्वयिः पक्षिविशेषः अथ विशेषः वका
शो कुटरुः कुक्कुटः दात्यौहः कलकण्टकः ते त्रयो वाजिनां देवानां पिकः कोकिलः कामाय १४

खड्गो वैश्वदेवः खड्गो मृगविशेषो विश्वदेवदेवतः एकः कुलः श्वासारमेयः द्वितीयः कर्णौ लंबकर्णो गर्दभः तृतीयस्तस्मान्मृगाद
४७ नः तेत्रयो रक्षसायशवः सूकरः इन्द्राय सिंहो मारुतो महद्देवताः कृकलासः सरटः पिप्पकायद्वितीयः शकुनिः पक्षी तेत्रयः
शरव्यायै एकः एषु तो मृगविशेषो विश्वेषां देवानां पशुर्भवति विश्वेभ्यो देवेभ्यो नृत्यं निपुनजन्मीति निपाज्यः २०
एवमष्टाधिकशतद्वयमारण्याः पशवः उक्ताः अत्र द्वाविंशतिरेकादशिनः सप्तविंशत्यधिकानि त्रीणि शतानि सद्यः सो

खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिंहो मारुतः कृकलासः
पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ४ इति संहितापाठे चतुर्विंशोऽध्यायः
२४

र्याताः षष्ठ्यधिकशतद्वयं कपिञ्जलादयः एवं तेनारण्याः पशवः सर्वे मिलिताः षट्शतानि नवाधिकानि पशवो
भवन्ति श्लोकश्च षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि चेति तेषामारण्याः स
र्वे उत्सृष्टव्या न तु हिंस्याः १५ श्रीमन्महीधरकृते वेददीपे मनोहरे गतोऽध्यायश्चतुर्विंशो देवतापशुवाचकः २४ ४७
ओं नमो भगवते वासुदेवाय नमः

प्रणम्य कमलानाथं गणेशं गिरिजां गिरं पंचविंशोऽयमध्याये वेददीपे निरूप्यते कात्यायनः स्विष्टकृद्धवनसमनंतरं स्व
ल्पं हुत्वा देवताभ्यो भागेभ्यो जुहोत्यमुष्मै स्वाहेति प्रतिदैवतं शाद्यप्रभृतिभिर्गतेभ्यो विमुखाः स्थ परेभ्य इति स्विष्टकृद्धन
मन्येऽपि ललेवनस्यागानंतरं स्विष्टकृद्यागात्पूर्वं मूलेऽप्यले अपि नेमां संप्रजापतये: स्व इति वचनात् प्रजापतये हुत्वा
अमुष्मै स्वाहेति प्रतिदैवतं शादादिद्वयंतेभ्यो देवताभ्यो भागेभ्यो हुतं जुहुयात् अनादेशहुतमेकत्वात् तत्र शादंद
द्भिरित्यादि पृथिवीं त्वचेत्यतः संहिताभागो ब्राह्मणेन मंत्राः शादादयो देवाः देवताः भागानि ततश्चतुर्दशीनमा
ज्यं गर्दशीनां गर्दशीभ्यां स्वाहा दत्रुः स्वाहा अवकाय स्वाहा दंतमूलेभ्यः स्वाहेत्यादि पृथिव्यै स्वाहा त्वचे स्वाहे
त्यंतं जुहुयात् अन्यकः पदतः शाखिनरोदितः स्वपदेन तु शादं दद्भिः प्रीणामि स्वाहेत्यादि होममंत्राः देवताभो
ग्नौ द्वितीयया निर्दिश्यते अन्यां गं भागं पंचतृतीयया करणविभक्त्या निर्दिश्यते क्वचित्केवलादेवनेव यथा शुल्का
य स्वाहा कृष्णाय स्वाहेति क्वचिदन्यविभक्त्या बहुव्रतयो निर्दिश्यः यथा अग्रैः पतति वायो निपतति शुल्काय स्वा
हा कृष्णाय स्वाहेति क्वचिदन्यविभक्त्या बहूवतयो निर्दिश्यः यथा अग्रैः पतति वायो निपदतिरिति तथावस्तु
तिः शादं दद्भिरवकां दंतमूलैरित्याज्यमवदानानां कृत्वा व्यायं देवताभ्य आहुतीर्जुहोति या एव देवता अपि ताग
येयेन समर्द्धयंतीति अस्यायमर्थः शादं ना मदेवं अस्वस्वदद्भिर्दैनैः प्रीणामीति शेषः स्वाहाकारोदानार्थः
ततश्च शादं दद्भिः प्रीणामि स्वाहेति एवमन्यान्यपि योज्यानि आज्यं अवदानानि कृत्वा आज्यमेवाघारावेन परिक्ल
प्त्या व्यायं अवदानं प्रतिशादादिदेवताभ्य आव्यायाज्याहुतीर्जुहोति संकल्पितानागताभावादन्ताहुतीः शादादि
भ्यो ददाति एवं कुर्वन् अपि भागाः कल्पितभागास्ताभागेन समर्द्धयंती प्रीणातीत्यर्थः

रामायनमः

अथ संहितार्थः दद्भिरस्य द्वैतैः शादं देवं प्रीणामि दंतमूलैः अवकां देवतां प्री । वर्त्सैर्दंतमूलपीठैः मृदं देवतां प्री । बर्स्वैस्तेगान्दंतपी
ठिका शादादयो प्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः दंष्ट्राभ्यां तेगां देवतां प्री । सरस्वत्यै अग्रजिह्वं अत्र चतुर्थ्या द्देव
५८ तोद्देशः प्रथमयोगस्य अनो विभक्तिव्यत्ययः जिह्वाया अग्रं अग्रजिह्वं जिह्वाग्रेण सरस्वतीं प्री । जिह्वाया उत्सादं अत्र
षष्ठ्या संयोगोद्देशः द्वितीयया देवस्य विभक्तिव्यत्ययः जिह्वाया उत्सादं देवं प्री । अवक्रंदेन तालु अत्र देवे तृतीया अ
गे प्रथमा व्यत्ययः तालुना अवक्रंदं देवं प्री । वाजं हनुभ्यां हनुभ्यां च क्रेकदेशाभ्यां वाजं देवं प्री । अप आस्येन
आस्येन मुखेनायो देवताः प्री । वृषणमाण्डाभ्यां आण्डाभ्यां वृषणाभ्यां वृषणं देवं प्री । आदित्यान्श्मश्रुभिः मु

शादं दद्भिरवकां दंतमूलैर्मृदं बर्स्वैस्तेगान्दंष्ट्राभ्यां सरस्वत्या अग्रजिह्वं जिह्वाया उत्सा
दमवक्रंदेन तालु वाजं हनुभ्यामप आस्येन वृषणमाण्डाभ्यामादित्यान्श्मश्रुभिः पन्थानं
भ्रूभ्यां द्यावापृथिवी वर्त्तोभ्यां विद्युतं कनीनकाभ्यां शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्मा
ण्यवार्या इक्षवो वार्याणि पक्ष्माणि पार्या इक्षवः ।१

श्वकेशैरादित्यान्प्री । पंथानं भ्रूभ्यां ललाटगरोमपंक्तिभ्यां पंथानं देवं प्री । द्यावापृथिवी वर्त्तोभ्यां वर्त्ताः पक्ष्मप
क्तिः ताभ्यां द्यावापृथिव्यौ देवते प्री विद्युतं कनीनकाभ्यां नेत्रमध्यगकृष्णगोलाभ्यां विद्युतं देवतां प्री । शुक्लाय
स्वाहा कृष्णाय स्वाहा देवोद्देशपवनलिंगं शुक्लाय कृष्णाय देवाय स्वाहुतमस्त्व यद्वा चतुर्थ्या भागमेव निर्दिश ५८
ते प्रजापत्योश्च इति वचनाद्देवो ध्याहर्तव्यः शुक्लेन कृष्णेन च भागेन प्रजापतिं प्री । पक्ष्मलोमभ्यः साहत्यादेः

पार्श्वाणि पक्ष्माणि । अत्र नहि तेन देवतोद्देशः पक्ष्माणि नेत्रोपरि लोमानि पार्श्वाणि पार्श्वदेवत्यानि ततः पक्ष्मभिः पा
र्श्वं प्री · अथवार्थाः ऋतवः ऋते घ्राणनेत्रयोनागरोमाणि अथवार्द्देवत्याः ततः ऋतुभिर्वार्श्वं प्री · विपरीतं वा अथवार्द्देवत्या
नि पक्ष्माणि ऋतवः पार्श्वाः पार्श्वदेवत्याः वातं प्राणेन । अथ सप्राणेन वायुना वातं प्री · अपानेन नासिके अपानवा
युना नासिकासंज्ञं हे देवने प्री · उपयाममधरेणौष्ठेन । अथ स्तनेन अधरेण उपयामं देवं प्री · सदुत्तरेण उपरि

वातं प्राणेनापानेन नासिकेऽउपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्तरमनूकाशेन बाह्य
न्निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां कर्णाभ्यां ॐ ।
श्रोत्रं ॐ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदितिं ॐ शी
र्ष्णा निर्ऋतिं निर्जर्जल्पेन शीर्ष्णा संक्रोशैः प्राणान्रेष्माणं ॐ स्तुपेन २ ॥

तेनेन ओष्ठेन सन्तं सन्नं देवं प्री · प्रकाशेनान्तरं प्रकाशेन उपचितेन देहकान्त्यान्तरं देवं प्री · अनूकाशेन वाशेन बा
ह्यं उपसर्गास्थनमनु काशो बहुलमित्यनो दीप्तिः अनुकाशेनायत्तेन देहकान्त्या बाह्यं देवं प्री · निवेष्यं मूर्ध्ना मस्तकेन
निवेष्यं देवं प्री · स्तनयित्नुं निर्बाधेन निश्रितं वध्यते निर्बाधः शिरोऽस्थिमध्यसंलग्नो मज्जाभागः तेन स्तनयित्नुं
देवं प्री · अशनिं मस्तिष्केण मस्तके भवं मस्तिष्कं शिरोमध्यस्थो मज्जोत्तमांसभागः मस्तिष्कं गोर्दमित्यमरः मस्त

मरः मस्तकमिच्छतिगच्छतिमस्तिष्कं इष्वगतो मस्तकेमज्जनितीरस्वामी तेनमस्तिष्केणाशानिंदेवंप्री॰ विद्युतं
५५ कनीतिकाभ्यांप्रीणामीति एवंवत् कर्णाभ्यांश्रोत्रं अत्रार्थंश्रामिकाएवदेवत्ता कर्णाभ्यांकर्णशष्कुलीभ्यांश्रोत्रं
देवप्री॰ श्रोत्राभ्यांकर्णाद्वैवाप्री॰ नेदनीमेपरकंठेन कंठायोभागेनतेदनींदेवतांप्रीणाति अपः शुष्ककंठेन शु
ष्कश्चासौकंठश्च शुष्ककंठः कंठस्यः शुष्कतानिर्मितोदेशः तेनापोदेवताप्री॰ चित्तंमन्याभिः पश्चाद्ग्रीवासिराम
न्यत्यमरः ग्रीवायपश्चाद्भागेहृत्काटिकायांसिरामन्या मन्यते इतिमन्या संतायामसमजनीतिकाए ग्रीवायपश्चात्रा
डीभिश्चित्तंप्री॰ अदितिंशीर्ष्णा शिरसादितिंदेवतांप्री॰ शीर्षमपशीर्षत्वादेशः शासांदा निर्ऋतिंनिर्जल्पेनशीर
स्योतिनराजजतीभूतेनशिरोभागेननिर्ऋतिंदेवंप्री॰ संक्रोशैःप्राणान् सम्यक्क्रोशतिशहायेनेतानिसंक्रोशा
नि गच्छतो स्वस्यापाम्यगानि शब्दंकुर्वंतितेरौः प्राणान्देवान्प्रीणाः रेष्माणंणास्तूये स्तुपउच्छ्रये स्तुपेनच्छिन्नेन
शिखाभूतेनांगेनरेष्माणंदेवंप्रीणाति ३

५५

मशकान्केशैः । केशैः स्कंधस्थैरोमभिर्मशकान्देवान्प्री० इंद्रं स्वपसावहेन वहः स्कंधस्तैरिंद्रंप्री० कीदृशेन
वहेन स्वपसा अपरुनिकर्मनाम शोभनं अपः कर्मपर्यायाणां पारणानरजन्वहनादिकं यस्य स स्वपाः तेन वहंहस
तिं शकुनिसादेन शकुनिः पतित्वहत्वारोगमनं षट्त्रिंशत्परिणाम्यादेः घञ् वेगवत्कूर्दनं तेन वहंहस्ति दे
वंप्री० कूर्मान्शफैः शफ क्लीवेखुरः पुमान् खुरैः कूर्मान्देवान्प्री० आक्रमणं स्थूराभ्यां ऋलयोरैक्यं स्थूला
भ्यां गुल्फाभ्यां आक्रमणं देवंप्री० ऋतलाभिः कपिंजलान् गुल्फाधस्थानाङ्गऋतलास्ताभिः कपिंज

मशकान्केशैरिन्द्रं ७ स्वपसा वहेन वहस्पतिं ठ० शकुनिसादेन कूर्मान्छफैराक्रमणं ठ० स्थू
राभ्यामृतलाभिः कपिञ्जलान्जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निं
मतिरुग्भ्यां पूषणं दोर्भ्यामश्विनावंसाभ्यां ७ रुद्रं ठ० रोराभ्याम् ३

लान्देवान्प्री० गवं जंघाभ्यां गुल्फजान्वोर्मध्यभागो जंघा ताभ्यां जवं वेगं देवंप्री० अध्वानं बाहुभ्यां अग्रपादयोः
जानुर्ध्वभागौ बाहू ताभ्यां मार्गं ध्यानं देवंप्री० जांबीलेनारण्यं जांबीरं जंबीरजनेराः फलं ऋलयोरभेदः तदाकारो जा
नुमध्यभागजांबीलस्तेनारण्यं देवंप्री० अग्निमतिरुग्भ्यां अत्यंतं रोचेते ते अतिरुचौ जानुदेशौ ताभ्यां अग्निं देवंप्री० पूष
णं दोर्भ्यां अग्रपादयोरधोभागौ दोषौ ताभ्यां पूषणं देवंप्री० अश्विनावंसाभ्यां अंसौ स्कंधौ ताभ्यामश्विनौ देवौप्री० रुद्रं

अग्नेः पदतिः अत्र षष्ठ्या देवतोद्देशः प्रथमया योगोद्देशः ततोऽस्तित्वस्याध्याहारः अग्नेर्देवस्य पदतिरस्तु पदः साध्य
विशेषयोः वल्केकालेपदनैवच्छैचापार्श्वस्य कल्पितेप्यभिधानोक्तेरत्र पदः पार्श्ववाची पदस्य मूले पदतिः पदा
 न्निरिति मूलार्थे तिप्रत्ययः ततः पदस्य पार्श्वस्य पार्श्वस्य मूलं मूलान्यस्थीनि वंक्रिशब्दवाच्यानि पदतिशब्देनो
च्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति षड्विंशतिरस्य वंक्रय इति श्रुतेः तेषां क्रमेण देवता मंवतामंवयं वक्ति
तत्रादौ दक्षिणपार्श्वास्थ्यो देवता आह अग्नेः पदतिः पदतिः प्रथमं दक्षिणपार्श्वास्थि अग्नेरस्तु विभक्तिव्यत्ययो
वा पदत्याग्निर्देवं प्रीः वायोर्निपदतिः नीचापदतिर्निपदतिः द्वितीयं दक्षिणपार्श्वास्थि वायोर्देवस्यास्तु एव

अग्नेः पदतिर्द्वितीयो निपदतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुतां दशी
सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयो

मग्नेपित्र्याश्विये इंद्रस्य तृतीया तृतीयापदतिः इंद्रस्यास्तु सोमस्य चतुर्थी चतुर्थीपदतिः सोमस्य अदित्यैपं
चमीपदतिरदित्याः इंद्राण्यै षष्ठी षष्ठीपदतिरिंद्राण्याः मरुतां सप्तमी सप्तमीपदतिर्मरुतां बृहस्पतेर
ष्टमी अष्टमीपदतिर्बृहस्पतेः अर्यम्णो नवमी नवमीपदतिरर्यम्णो देवस्य धातुर्दशमी दशमीधातुर्देव
स्य इंद्रस्यैकादशी एकादशीपदतिरिंद्रस्य वरुणस्य द्वादशी द्वादशीपदतिर्वरुणस्य यमस्य त्रयोदशी त्र
योदशीपदतिर्दक्षिणपार्श्वास्थि यमस्य देवस्यास्तु ५

इंद्राग्नेभ्यो: अथवामपार्श्वास्यादेवानाह पदानि: प्रथमं उपरिस्थं वामपार्श्वे शिखि इंद्राग्न्योर्द्वयोरस्तु सरस्वत्यै नि य
दानि: द्वितीयापदानि: सरस्वत्या: मित्रस्य तृतीया तृतीयापदानि मित्रदेवस्य चतुर्थी अपांदेवानां निर्ऋत्यै
पंचमी पंचमी निर्ऋत्यै: षष्ठी अग्नीषोमयो: सप्तम सप्तमी सर्पाणां देवानां अष्टमी विश्वा: नवमी एषोदेवस्य

इन्द्राग्निभ्यां पदानि: सरस्वत्यै निपदानि मित्रस्य तृतीयायामपांचतुर्थी
निर्ऋत्यै पंचमग्नीषोमयोः षष्ठी सर्पाणां ७ सप्तमी विश्वेभ्यः अष्ट
मी एषोनवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशीयमस्य
त्रयोदशी द्यावापृथिव्यो र्द्वितीयमार्गं विश्वेषान्देवानामुत्तमम् ५

दशमी त्वष्टु: एकादशी इंद्रस्य द्वादशी वरुणस्य यमस्य त्रयोदशी यमस्य पंचमी त्रयोदशीपदानि यमसंबंधि
नी चतुर्थी प्रथमाद्य अथसप्तमस्तयो: पार्श्वयोर्देवानाह द्यावेति दक्षिणपार्श्वसंबंधद्यावापृथिव्योरस्तु उत्तरे वाम
पार्श्वे विश्वेषांदेवानामस्तु ६ ॥

स्कंधागणनगणांदेवतानामाह मरुतो स्कंधयाः विभक्तिव्यत्ययः स्कंधप्रदेशैर्मरुतोदेवीन्प्रीणामि अथपङ्क्तिपरितिसेवास्थि
पङ्क्तयः सन्तितासादेवतानामाह विश्वेषामिति कीकसंकुल्यमस्थि चेत्यमरः कीकसमिति शब्दंकरोतीति कीकसं अस्थि
५१ 51 प्रथमा कीकसा प्रथमा त्रिकीकसानि पङ्क्त्यापरिस्याधास्थिपङ्क्तिर्विश्वेदेवानां देवानां प्रथमकीकसैर्विश्वान्देवान्
प्रीरुद्राणां द्वितीया द्वितीयास्थिपङ्क्तिः रुद्राणां द्वितीयैरुद्रान्प्री० तृतीयानि कीकसानि आदित्यानां तृती
यैः कीकसैरादित्यान्प्री० वायोः पुच्छं पुच्छेन वायुं प्री० भासदो भासदेनेनौ भासदौ इति नैवोक्ताव ग्नीषोमयोः भास
द्भ्याम ग्नीषोमौ प्री० कुञ्चौ श्रोणिभ्यां पुनः पूर्ववदेवगात्रतोया देवाद्वितीया कटिः श्रोणिः ककुद्मतीत्यमरः श्रो

मरुतां स्कन्धा विश्वेषान्देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृ
तीया वायोः पुच्छमग्नीषोमयोर्भासदौ कुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊ
रुभ्यां मित्रावरुणावल्गाभ्यामाक्रमणं स्थूराभ्यां बलं कुष्ठाभ्याम् ९

णिभ्यां दलवामाभ्यां कटिप्रदेशाभ्यां कुञ्चौ देवौ प्री० इन्द्राबृहस्पती ऊरुभ्यां सक्थिक्लीवे पुमानूरुरित्यमरः ऊरुभ्यां
इन्द्राबृहस्पती देवौ प्री० मित्रावरुणावल्गाभ्यां अलमत्यर्थं गच्छत ऊरुभ्यां संयोगभ्यां मुत्तमेनाश्रलगेवं वक्षणौ तरु
संधौ नाभ्यां मित्रावरुणौ प्री० आक्रमणं स्थूराभ्यां स्थूरौ स्थूलौ स्फिचौ नितम्बौ याभ्यां गत्ना भ्यामाक्रमणं देवं प्री
बलं कुष्ठाभ्यां कुषनिष्कर्षे कुष्णेते नौ कुष्ठौ नितम्बस्थरूपकौ आवर्तौ कुकुन्दरशब्दवाच्यौ ताभ्यां बलं देवं प्री० २ ५१

वृषणाभ्यां च निहुना वनतिसंभजति वनिहु: स्थूलाग्रे तेन वृषणा देवंश्री अथाहरीनस्थूलगुदया गुदेनयानं पायुर्नस्य
मरः स्त्रीलिङ्गादेसं स्थूलाचासो गुदाचस्थूलगुदाहानया गुदस्यस्थूलभागेन अथाहीनी अथास्त्रेन अहपस्त्र
धाताल् सर्पानगुदाभि: स्थूलगुदातिरिक्तैर्गुदभागै: सर्पाश्री विद्रुन आत्रै: अत्रपुरीतदित्यमर: अमगनो
भजनेशद्वे अमनि भज्यतेत्यनेनान्त्रमित्यंत्रे अत्रभवाआन्त्रा: अत्रसंबंधिनो मांसभागास्तैर्विद्रुतो देवाश्री अथ
वस्तिना वस्तिर्नाभेरधो द्वयोरित्यमर: वसतिमूत्रं यस्मिन्स वस्ति नाभेरधो वर्तमानं मूत्रपुटं तेनापाटेवता:
श्री वृषणाभ्यां मांडाभ्यां मुष्कोऽण्डो वृषण: कोश: अण्डावाण्ड: ताभ्यां लिंगोभयपार्श्वस्थाभ्यां मांसपिंडाभ्यां वृषणा

वृषणाभ्यां वनिहुनान्याहीनस्थूलगुदया सर्पान्गुदाभिर्विद्रुत: आन्त्रैरपो वस्तिना वृषणामाण्डा
भ्यां वातिनर्दैः शेपेन प्रजा तेन साचाघान्तितेन प्रदराभ्यायुनाहृषंमांल्लकपिरोडे: १

देवश्री वाजिनं शेपेन शेपो लिंगं तेन वाजिनं देवंश्री शिश्नो मेढ्रो मेहनशेपसी इत्यमर: शिनिणाने शिनो लिभा
गमिनि शिश्न: सोनासो देतसप्र प्रजा रेतसा शुक्रं तेजो रेत: सीचवीजवीर्येन्द्रियाणि चेत्यमर: रेत: स्रवाण गेयतेन
वनिरेतो वीर्यं तेन प्रजा देवश्री वाघान्तिन मायु: पित्तं पतति स्रवति तेनापि मुथान्तुविशेषस्तेन वाघानं देवाश्री
प्रदरान्पायुना पायुमलोत्सर्गेन्द्रियगुदं तेनातिरिक्तं तेन गुदस्तृतीयभागेन प्रदरा देवाश्री कश्मानशकापि

डे: शकोदेशेन्द्रये विशि विशि विश्यायां शकस्य विश्यायाः
पिंडै: कृष्माण्डेवाश्रीगामि ८

इंद्रस्य क्रोडः पुनर्देवि षष्ठी अंगे प्रथमा नाना क्रोडं भुजान्तरमित्यमरः क्रोडयन्ते क्रोडन्तीति क्रोडः पर्वतो वक्षो मध्य
५२ भागः स इंद्रस्यास्ति क्रोडे नवा इंद्रं प्री० एवमग्रेऽपि अदितेर्या पाजस्यं याजस्य वल्लायहितं पानस्य वलकारमंगल
दृदित्याः देवतायाः दिशा जत्रवः संधीनस्य वजत्रुणी इत्यमरः अंसकवयोः संधिर्जत्रु जायते इति प्रसव।
मार्गानानि दिशां देवतानां अदितेर्भसत् भसभस्तनदीप्त्याः वभासि दीप्यते भसन्तलिग्गग्र नददित्यास्य।

इन्दुस्य क्रोडोऽदितिर्या पाजस्य दिशा जत्रवो दित्यै भसज्जीमूतान् हृदयोपशोभनाभ्रान्वित स्तुरीतनतामस
उदर्येण चक्रवाकौ मतस्ना ब्रह्माङ्गुरी सक्नाशिभिस्तपलान्क्लोन्द्राव लक्ष्मीकान्क्लो मभिर्ग्लौ
भिर्गुल्मान्हिरणाभिः स्वपन्नी हृदान्कृतिभ्या ॐ नमुद्रसुदेवेणावैष्णवानरस्य स्मता ८

स्तुजीमूतानहृदयोपशोभेन पुनर्देवं द्वितीयांत्रेगोल्लतीया हृदये उपशोभते हृदयस्य मांसं तेन जीमूतान् देवान् प्री०
णनीतिं प्रीणता सृष्टिते प्रीणन हृदयाच्छादकं मंत्रं तेनानानिर्देवं प्री० नभउदर्येण उदरे भवं उदर्यं उद्र
स्य मांसं तेन नभोदेवं प्री० शरीरावयवायतन चक्रवाकौ मतस्नाभ्यां ग्रीवायस्ताङ्गागस्थित हृदयाभयपार्श्वस्थ
अस्थिनी मतस्ने ताभ्यां चक्रवाकौ देवौ प्री० दिवं वृक्काभ्यां वृक्काग्रमांसमित्यमरः वृक ५२

ग्राटाने वृक्कातेस्याङ्गनयामदग्नेवृक्कानांनः पुंस्ययंस्त्रीत्येके इतिदीरस्वामी वृक्कासुग्रंथिमांसंतेनदिव्यंदेवतांप्री॰ वृक्कौ
अग्रौदिस्थामांसगोलकावाम्रफलाकृतीइतियाज्ञिकाः गिरिल्याशिभिः प्रकर्षेणगोष्ट्रतिभुंजतेः ग्लानीनिक्लोमाशयः
शिप्फलनाड्यन्नाडीद्वारेवान्नस्यदेहेसंचारात् ग्लैयारभेदः नाभिर्गिरीनदेवान्प्री॰ उपलान्प्लीहा गुल्मस्तुप्ली
हांपुंसीत्यमरः हृदयवामभागेशिथिलोमांसभागः पपुंसस्तः प्लिहगतौ प्लेहतेप्लीहा तांतत्तेनउपला
न्देवान्प्री॰ वल्मीकान्क्लोमभिः तिलकंक्लोमेत्यमरः क्लाम्यतिक्लोमाउदर्याजलाधारः हृदयस्यदक्षिणेपार्श्वे
न्क्लोमा वामेप्लीहापपुंसश्चेतिविग्रहइतिदीरस्वामी क्लोमागलनाडीतिकर्कः तैर्वल्मीकान्देवान्प्री॰ ग्लाभिर्गु
ल्मान् ग्लायंतिश्राम्यंतिग्लायो हृदयनाड्यः ताभिर्गुल्मान्देवान्प्री॰ हिराभिः स्रवंतीः हरंत्यन्नरसमितिहिरा
अन्नवाहिन्योनाड्यः ताभिः स्रवंतीर्ह्रदान्प्री॰ हृदान्कुक्षिभ्यांपिचंडःकुक्षीजठरोदरंतुंडमित्यमरः जठरस्य
वादक्षवामभागौकुक्षी ताभ्यां हृदान्देवान्प्री॰ समुद्रमुदरेण जठरेणसमुद्रंप्री॰ वैश्वानरंभस्मना भस्मना
गोच्छेनवैश्वानरंदेवंप्री॰ १०

विप्रुष्तिं नाभ्या नाभ्या उदरमध्यस्थग्रंथिना विप्रुष्तिं देवतां प्री॰ घृतं रसेन रसो गंधरसे स्वादे तिक्तादौ विषरागयोः शृंगारादौ द्र
वे वीर्ये देहधात्वंबुपारदे इति विश्वः रसेन वीर्यगणेन यातु विशेषेण वा घृतं देवं प्री॰ अपो यूष्णा यूषः क्वथितो रसः प
५३ क्वान्निष्पादितान्नादेशः पक्वान्नरसेनापो देवताः प्री॰ मरीचीर्विप्रुड्भिः पृषंति बिंदुपृषताः पुमांसो विप्रुषः
53 स्त्रियः इत्यमरः विप्रुड्भिर्वसाबिंदुभिर्मरीचीर्देवताः प्री॰ नीहारमूष्मणा ऊष्माणस्तु निदाघोष्मग्रीष्मा ऊष्मस्तद्धर्म
म्रपीति विश्वः ऊष्मणा शरीरगततेजसा हिमेन नीहारं देवं प्री॰ शीनं वसया मेदस्तु वपा वसेत्यमरः वसा मांसमि
ति वसा शुद्धमांसस्य यः स्नेहः सा वसेति वैद्य इति स्वामी वसया मांसस्नेहेन शीनं देवं प्री॰ प्रुष्वा अश्रुभिः अश्रु नेत्रांबु रो

विप्रुष्तिं नाभ्या घृतं रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वाऽश्रुभि २
र्ह्रादुनीर्दूषीकाभिरस्ना रक्षांसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय स्वाहा

दनमित्यमरः अश्रुभिर्नेत्रांबुभिः प्रुष्वा देवताः प्री॰ ह्रादुनीर्दूषीकाभिः दूषिका नेत्रयोर्मलमित्यमरः
दूषिकाभिर्नेत्रमलैर्ह्रादुनीर्देवताः प्री॰ अस्ना रक्षांसि रुधिरे असृग्लोहितास्ररक्तक्षतजशोणितानीत्यमरः अस
ृज्यते इति वा असृक् रुधिरं पद्दन्नित्यसृजादेशः अस्ना रक्षांसि प्री॰ ॥ चित्राण्यङ्गैः अंगैः अवयवैः चित्राण्यवय
वैः चित्राणि देवतानि प्री॰ नक्षत्राणि रूपेण रूपस्वभावे सौंदर्ये नाणके पशुशब्दयोरिति विश्वः रूपेण सौंदर्ये
ण नक्षत्राणि देवतानि प्री॰ पृथिवीं त्वचा त्वचा चर्मणा पृथिवीं देवीं प्रीणामि स्वाहेति मंत्रे राज्ञ्यो जुह्वतीत्यर्थः ५३

राम॰ राम॰

अत्रअग्निं हृदयेनाशनिं हृदयाग्रेणेत्यादियावापृथिवीभ्यांस्वाहेत्यन्तानामष्टाहुतीर्जुहुयात् आश्वमेधिकत्वात् कात्या
यनः अवभृथेष्टौ अंते एतुमयस्य पिंगलस्य खलतेर्विक्लिधस्य शुक्लस्य मूर्द्धनि जुहोति त्र्यंबकाय स्वाहेति अवभृ
थयागान्ते एवंविधस्य पुंसो मूर्द्धनि त्र्यंबकायेति मंत्रेणान्त्यमष्टकद्रष्टीन् जुहुयात् कीदृशस्य पुंसः जलेमग्नस्य
पिंगलाक्षस्य खलतेः खलत्वारस्य विक्लिधस्य दंतुरस्य शुक्लस्याति गौरस्य इति सूत्रार्थः त्र्यंबकाय स्वाहा वक

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामु
तेमां कस्मै देवाय हविषा विधेम १० यः प्राणतो निमिषतो महित्वैक इन्द्राजा
जगतो बभूव य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ११

णदेवत्या द्विपदा यजुर्गायत्री उदकमध्ये वर्त्तमानं दिभरष्टौ त्र्यंबकाय वरुणाय स्वाहा अप्सु हुतमस्तु वरुणो वेदेषु वरु॥
श्रुतेः एषा चोनजले जलेऽग्निसमा पापनाशनी तदुक्तं हारीतेन त्र्यंबका नाम गायत्री वेदे वाजसनेयके अंते जले
सकृज्जप्ता ब्रह्महत्यां पृथ्वीं हन्ती हिरण्यगर्भः वनस्तदेवत्या त्रिष्टुभः प्रजापतिस्तु तद्धिरण्यगर्भ ऋषिः प्राजाप
त्यपशुनामसु प्राटीनां याज्यानुवाक्याः हिरण्यगर्भः यः प्राणत इति द्वे व्याख्याते १२

यस्य मे वयं कस्मै प्रजापतये देवाय हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः कशब्दस्य सर्वनामत्वमार्षं इमे हिमवन्तः
बहुवचनादन्येपि हिमाचलप्रभृतयः पर्वताः प्रथमा द्वितीयार्थे सुपां सुपो भवन्तीति वचनात् इमान् हिमवत्प्रभृ
५४ त्यद्रीन् यस्य प्रजापतेर्महित्वा महित्वं महिमानमाहुर्वदन्ति महित्वेति विभक्तेराकारः रसा नदी रसतेः शब्दक
54 र्मण इति यास्कः रसया नद्या सह समुद्रं यस्य महित्वमाहुः इमाः प्रदिशः पूर्वाः याः प्रकृष्टाश्चाशा यस्य महित्व

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः यस्येमाः प्रदिशो यस्य बाहू
कस्मै देवाय हविषा विधेम ११ य आत्मदा बलदा यस्य विश्व उपासते प्र
शिषं यस्य देवाः यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम १२

माहुः यस्य बाहू भुजौ जगद्रक्षकौ विनिशेषः सर्वं जगद्यस्य प्रजापतेर्विभूतिरित्यर्थः य आत्मदाः आत्मानं ददातीत्या
त्मदाः उपासकानां सायुज्यप्रदः बलदाः बलसामर्थ्यं ददातीति बलदाः भुक्तिमुक्तिप्रद इत्यर्थः विश्वे सर्वे मनुष्याः यस्य
प्रशिषं शासनं उपासते देवाश्च यस्य प्रशिषं उपासते तदुक्तं यस्याज्ञया वयि ज्ञाने शिखा वयि च शासनं कार्यां वयि वा
कर्त्तव्यं स्वयं भूः पुनातु वइति किंच यस्य च्छायाश्रयो ज्ञानपूर्वमुपासनं अमृतं मुक्तिहेतुः यस्य अज्ञानं इति ५८
शेषाः मृत्युः संसारहेतुः तदुक्तं येन तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्तीति १२

आनोभद्राः वैश्वदेवपञ्चमयाष्ट्रवैतृष्टाषण्मनायाज्यानुवाकादयाः ऋचोविश्वेदेवदेवत्यागोतमऋषिः तत्राद्याःपंच
जगत्यः क्रतवोयन्तुः संकल्पावानोऽस्मान्प्रतिआप्रुवन्तुआगछन्तु यत्तत्कर्तारोवयंभवेमेत्यर्थः कीदृशाः क्रतवः
भद्राः भंदनीयाः भद्रिकल्याणि कल्याणकारिणः तथाविश्वतः सर्वतोऽदब्धासः सर्वतोऽनुपहिंसिताअपिविघ्नादित्यर्थः
अपरीतासः नपरिताअपरीताः अपरिगताअज्ञाताकेनचिन्नाफलानुमेयाइत्यर्थः उद्भिदः उद्भिदः उद्भेत्तारोय
ज्ञानशत्रूणांप्रकटीकर्तारइत्यर्थः किंच यथायेनप्रकारेणदेवाः नोऽस्माकंसदंइत्सदैववृधेवृद्ध्यैअसन्भवं
तितथाक्रतवआयंत्वित्यर्थः सदमित्यव्ययंसदार्थे कीदृशाःदेवाः अप्रायुवः प्रकर्षेणआयुवन्तिप्रमाद्य
न्तिनेप्रायुवः यातेः क्विप् उणभावआर्षः नप्रायुवोऽप्रायुवः अनलसाअस्माकंवृद्धैभवन्तित्यर्थः तथादिवे

आनोभद्राः क्रतवोयन्तुविश्वतोऽदब्धासोऽअपरीतासउद्भिदः देवानोयथासदमिद्वृधेऽअसन्न
प्रायुवोरक्षितारोदिवेदिवे ॥१॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानांसख्यमुपसेदिमावय

दिवेअहन्यहनिअन्यदहरतिमारःपालकाः देवानांभद्राः भद्राकल्या ॥न्देवानऽआयुःप्रतिरन्तुजीवसे ॥१॥
णकारिणीदेवानांसुमतिः शोभनाबुद्धिः नोऽभिनिवर्ततांअस्मदभिमुखीभवतु कीदृशानांदेवानां ऋजूयतां ऋजु नोऽ
स्मान्प्रतिअभिनिवर्ततांयतां ऋतुमवक्रंपतिगछन्तिऋजूयंतस्तेषां शतृः शतृप्रत्ययः अवक्रगामिनांयद्वा
ऋजुमवक्रंसाधुंयजमानंकामयंतेइतिऋजूयंति सुपआत्मनः क्यच् ऋजूयंतिइतिऋजूयन्तस्तेषां कान्तनाऽक्षत्र
साधुयजमानंकामयमानानामित्यर्थः किंचदेवानांरातिर्दानंनोऽस्मानभिनिवर्ततां देवाअस्मभ्यंददत्वित्यर्थः देवे
भ्योलब्धदानावयंदेवानांसख्यमैत्रींउपसेदिम सेदितिइउपगताभवतु तेऽपिअस्मिन्यास्य देवाः नोऽस्माकंमायी

तान्पूर्वया पूर्वया प्राचीनया अकृत्रिमया स्वयंभुवा निविदा वेदरूपया वयं तान् अस्मिद्धान्देवान् हूमहे आह्वयामः नि-
विदः शब्दो वाग्वाचकः तान्कानित्याह भगं मित्रं अदितिं देवमातरं दक्षं प्रजापतिं अर्यमाणं वरुणं सोमं अश्विनौ
५५ अस्रिधमिति भगादीनां विशेषणं नस्रेधयन्ते ध्यानं ते मास्रिधन्ते अक्षतमहावं किंच शोभनं भगं भाग्यं यस्याः सा सु-
भगा भजनीया सरस्वती भगादिसहिता नोऽस्माकं मयः करत् सुखं करोतु तन्नः वातः पावनः नोऽस्माकं भेषजं
55 ईषधं हितं पथ्यान्नपाचारं वातु वा गतिगन्धनयोः लोट् प्रवातु अनुगृह्णात्वित्यर्थः इदानीं नियावत् कीदृशं हितं

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्य-
मणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् १६ तन्नो
वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सो-
मसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् १७

मयः सुखं भवति यस्मात्तन्मयोभु सुखोत्पादकं हितं ददातु माता जगन्निर्मात्री पृथिवी तत् हितं वातु पिता पालको
द्यौः स्वर्गः तत् हितं वातु सोमं सुन्वन्ति सोमसुतः सोमाभिषवकारिणो ग्रावाणो दृषदः तत् भेषजं वातु ददतु की-
दृशा ग्रावाणः मयोभुवः मयः सुखं भावयन्ति ते मयोभुवः सुखस्य दातारः हे अश्विना अश्विनौ युवं युवां तत् वाता-
दिभ्यो भेषजं प्रार्थितं शृणुतं युवामपि हितं दत्तमित्यर्थः कीदृशौ युवां धिष्ण्यौ धिष्ण्यो गृहवह्न्याधारधिनौ १५ ५५

तमीशानं वयं तं प्रसिद्धं ईशानं रुद्रं हूमहे आह्वयामः कीदृशं तं जगतो जंगमं स्पतस्थुषः स्थावरस्य वस्तुव्रजस्य पतिं पालकं धियंजिन्वं धियं बहिर्जिन्वति प्रीणातीति धियंजिन्वस्तं अलुक् बुद्धिं संतोषकारकं जिन्वतिः प्रीण नार्थः किमर्थं हूमहे अवितं तर्पयितुमर्थं असेप्रत्ययः यथा येन प्रकारेण पूषा नोऽस्माकं हृये वृध्ये सलयेक ल्याणाय च असत् भवतु तथा हूमहे इत्यर्थः कीदृशः पूषा वेदसां धनानां ज्ञानानां वा रक्षिता रक्षकः पायुः पालकः पुत्रादीनां अदब्धः अनुपहिंसितः स्वस्तिनः विराट्स्थाना आद्यो पादो नववर्णा तृतीयो दशकः तुर्यो

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् पूषा नो यथा वेद
सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तिनः इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्व
वेदाः स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु १५

सप्तैकादशकः नवकौ वैराजैस्त्रुष्टुभश्छन्द इति वचनात् इंद्रो नोऽस्मभ्यं स्वस्ति अविनाशं शुभं दधातु ददातु कीदृ शः विश्ववेदाः विश्वं सर्ववेदो धनं यस्य वृद्धश्रवाः वृद्धं महत् श्रवः कीर्तिर्यस्य सः पूषा नः स्वस्ति दधातु की दृशः विश्वं वेत्तीति वा विश्ववेदाः तार्क्ष्यो रथो गरुडो वा नः स्वस्ति दधातु कीदृशः अरिष्टनेमिः अरिष्टा अनुप हिंसिता नेमिश्चक्रधारा यस्य सः बृहस्पतिर्देवगुरुर्नोऽस्मभ्यं स्वस्ति ददातु १६

पृषदश्वाः जगती मरुतो देवा अवसा अन्नेन तद्धविर्लक्षणेन हेतुना इह यज्ञे अस्मिन् आगमन् आगच्छन्तु कीदृशा मरुतः पृष
दश्वाः पृषत्यः पृषती संज्ञा अश्वा वडवा वाहनं येषां ते पृषदश्वाः पृषदश्वा मरुताम् इति वचनात् यद्वा पृषतः
शवला अश्वा येषां ते पृश्निर्धेनुर्गौर्द्यौर्वा माता जननी येषां ते पृश्निमातरः शुभं कल्याणं यान्ति प्राप्नुवन्ति यापयन्ति
वा शुभंयावानः आत्मानमलंकर्तुं विपदं वा पश्येति प्रत्ययः विदथेषु यज्ञगृहेषु जग्मयः गमनशीलाः प्राणमहते
ति किं अग्निजिह्वाः अग्निर्जिह्वा भोजनसाधनं येषां ते अग्निमुखा वै देवा इति श्रुतेः हुतादनार्थं मनवः मन्यते ज्ञान
ति मनवः सर्वज्ञाः सूरचक्षसः सूरः सूर्यस्तद्वच्चक्षुर्येषां ते सूर्यवत्तेजः प्रपन्ना वा सूरचक्षसः किंच न केवलम

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः अग्निजिह्वा मनवः सूरच
क्षसो विश्वे नो देवा अवसागमन्निह १० भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभि
र्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ११

मरुतो विश्वे सर्वे देवा अस्माकं यज्ञे आगमन् आगच्छन्तु भद्रं कर्णेभिः त्रिष्टुप् हे देवाः कर्णेभिः कर्णैः भद्रं क
ल्याणम् अनुकूलं वयं शृणुयाम हे यजत्राः यजन्ते त्रायन्ते रक्षन्ति यजत्रा यजमानपालकाः अक्षभिः नेत्रैः भद्रं वयं पश्ये
म वह्नलं छिद्रं (?) सौनिहृलादौ अविशदृश्यानं इष्टदेशः किंच देवहितं देवैः स्थापितं देवानां हितं देवोपासनयोग्यं वाय
पायुजीवनं तत् वयं व्यशेमहि प्राप्नुयाम कीदृशा वयं स्थिरैः दृढै रोगरहितैः अङ्गैः करचरणादिभिः तनूभिः शरीरैश्च पुत्रा

शतमिन्नु हे देवाः शतमित् शतमपि शरदो वर्षाणि शतवर्षपर्यन्तं नु उप अन्ति अन्तिके समीपे भवतेति शेषः यत्र श
रदं ते नोऽस्माकं तनूनां शरीराणां स्वरूपं जरसं जरां च चकृत तथा करोतेर्लिटि मध्यमबहुवचनं द्व्यचोतस्तिङः
इति चक्रेत्यत्र संहितायां दीर्घः निपातस्य चेति यत्रेत्यत्र दीर्घः वा ह्वकावयितृ यूयं समीपे भवथेत्यर्थः यत्रास्माकं ज
रायां पुत्रासोऽस्मत्पुत्राः पितरो भवन्ति नो भवन्ति यावदस्माकं पौत्रा भवन्तीत्यर्थः यत्रास्मानावत मध्या मध्ये शत
वर्षमध्ये नोऽस्माकं आयुर्मा रीरिषत मा हिंसिष्ट रिषतेर्हिंसार्थस्य णिजन्तस्य चङि रूपं कीदृशमायुः गन्तोः ग

शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् पुत्रासो यत्र पितरो भवन्ति मा नो मध्या
रीरिषतायुर्गन्तोः २२ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः विश्वे देवा
ऽअदितिः पञ्च जना ऽअदितिर्जातमदितिर्जनित्वम् २३

न्तुं गमनशीलं तदुक्तं संचिं संसेचिन्यतमुग्रदंडं महरसमनुष्यस्य विचक्षणस्य वर्षाणि सिक्ता इव पर्मदंडाः सर्वे
प्रमत्ताः शिथिलीभवन्तीति मन्त्रद्वयं अखण्डात्मकत्वेनादितिं स्तौति अदितिर्द्यौः द्यौः स्वर्गोऽदितिनिनदपि छान्दसत्वा
त् एवमग्रेपि अन्तरिक्षमदितिः माता पिता पुत्रश्च सः साऽदितिरेव लिंगव्यत्ययः विश्वे सर्वे देवा अदितिः पंच
जना मनुष्या अप्यदितिः किं बहुना जातं उत्पन्नं प्राणिजातं जनित्वं जनिष्यमाणं च सर्वं अदितिरेव यद्वा अदिति
मेत्रेणेनोच्यते द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितिः अदितीनि अदीनानि महाभाग्ययुक्तानि सन्तु १९

कात्यायनः मानोमित्रइतिचप्रत्यृचमनुवाकाभ्यां मानुश्वादिषोडशकंडिकात्मकेनानुवाकद्वयेनसर्वंवचतुर्गृहीतं।
माज्यंगृहीत्वागृहीत्वाजुहोति मानोपदस्यस्याष्टकाविंश्यकेः षोडशाश्वस्तोमीयाज्जुहोतीतिसूत्रे तेच मानोमित्रः द्वावि
५७ 57 शतिऋचोश्वस्तुतिपरत्वादश्वदेवस्यास्त्रिष्टुभोदीर्घतमोदृष्टाः अत्रएवस्वामीगइतितत्तैयायूपवक्काइतिषष्ठीपत्तेहङ्ग।
नैमित्तिकः षोडशभिर्होमः षड्भिःस्तुतिः सर्वाभिर्वाहोमः अश्वस्तोमीयंहुत्वाद्विपदाजुहोतीतिसूत्रतः अथमंत्रार्थः विदथे
यज्ञेवाजिनोऽश्वस्यवीर्याणियानवयंप्रवक्ष्यामः उच्चारयिष्यामः तत्रमित्रादयोदेवानोस्मान्मापरिख्यान् मानिंदंतु
परिख्यानंनिंदा अस्मनिवक्रियातिख्याङि तिङ्ल्लेरङ् नमाङ्योगेइतिअडभावः अस्माभिर्हवाःस्तुत्यानामश्वस्याद

मानोमित्रोवरुणोअर्यमायुरिंद्रऋभुक्षामरुतःपरिख्यन् यद्वा
जिनोदेवजातस्यसप्तेः प्रवक्ष्यामोविदथेवीर्याणि । २४ ।।

यस्मिर्थचइतियद्यपिनिंदोचिता तथाप्यश्वरूपेणदेवानामेवस्तुतिः क्रियतेइतिमापरिख्यन्नित्यर्थः कीदृशस्यवाजि
नः देवजातस्य देवात्सूर्याज्जातस्याश्वस्य देवैर्जनितस्यवा सूरादश्वंवसवोनिरतष्टेत्युक्तेः सप्तेः सप्तसंवर्पसपति
देवैःसह्यूयतेइतिसप्तिःतस्य केमानिंदंतु तानाह मित्रः अहरभिमानीदेवः वरुणः रात्र्यभिमानीदेवः अर्यमाआदित्यः
आयुः पतिसततंगच्छतीत्यायुर्वायुः इंद्रोदेवराजः ऋभुक्षाः ऋभवोदेवाः क्षियंतिनिवसंतियस्मिन्सऋभुक्षाः देवायाः ५७
प्रजापतिः यद्वाद्यर्तिमामातिसर्वमितिऋभुक्षाः अर्तेमुक्तिन्प्रत्ययः पश्चिमएषऋभुक्षामादित्तिसावाकारः इंद्रविशे

यन्निर्णिजा यत् यदा विप्रास्य स्वस्य मुखतो मुखाग्रे गृभीतां गृहीतां रातिं दानं आज्यमक्तया नालल्तणं नयन्ति
अश्वस्य पराति हुतशेषं प्रयच्छन्तीत्युक्तेः तदाऽजः छागः अप्येति भक्षणायागच्छति कीदृशोऽजः सुप्राङ् सु
ष्टु प्राञ्चति सर्वं गच्छति सुप्राङ् ललाटे बद्ध इत्यर्थः कृष्णग्रीव आग्नेयो ललाटे पुरस्तादित्युक्तेः तथा मेम्यते श
ब्दं करोति मेमे इति शब्दं कुर्वन् विश्वरूपः विश्वानि रूपाणि यस्य नानावर्ण इत्यर्थः किंच इन्द्रापूष्णोः
इन्द्रश्च पूषा च इन्द्रापूषणौ तयोः देवताद्वन्द्वे चेतीन्द्रपदस्य दीर्घः इन्द्रस्य पूष्णश्च प्रियं यद्दक्षं पाथोऽन्नं पशुलक्ष

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः २५

णं तदप्येति भक्षणाय नाभिबद्धोऽजोऽप्यागच्छति सौमापौष्णः श्यामो नाभ्यामित्युक्तेः हुतशेषमश्वं यदा श्वो
पदीयते तदा ललाटनाभिबद्धावजौ भक्षणायागच्छत इत्यर्थः कीदृशस्याश्वस्य निर्णिजा निर्णेजनेन स्ना
नेन प्रावृतस्य संस्कृतस्य आलंभनकाले स्नापितस्य निर्णेजनं निर्णिक् तस्मात् तेजसः संपदा हिरण्या इव वे
ष्टितस्य तथा रेक्णसा प्रावृतस्य आच्छादितस्य रेक्ण इति धननाम यजमानेन सौवर्णमणिलक्षणेनाहृतस्य
अश्वस्य सौवर्णान्मणीन् पत्न्य आवयन्तीत्युक्तेः २०

एषछागः यत् गलदेशः छागोऽजः वाजिनावेगवताश्वेन पुरस्तान्नीयते प्राप्यते ललाटस्वदृष्ट्या कीदृशः छागः
पूष्णो भागः पूष्णा निदेवानितिपूषाग्निस्तस्य भागः भजनीयः आग्नेयाज्याष्टत्वकत्वात् तथा विश्वदेव्यः विश्वेभ्यो देवेभ्यो हि
५८ 58 तः सर्वदेवार्हः अग्नेः सर्वदेवात्मकत्वात् तदा त्वष्टा इत् एव प्रजापतिरेव सर्वतात्मस्थेन समृद्ध्यं तं छागं जिन्वति प्रीणाति
किमर्थं सौश्रवसाय शोभनं श्रवः कीर्तिर्यस्य सः सुश्रवास्तस्य भावः सौश्रवसं तस्मै सुकीर्तये यतोऽश्वस्तानेनास्वर्गाभिसृत्कत्वा
त किंभूतेन पतं अभिप्रियं अभिप्रीणातीति तं समंतात् देवानां प्रीणयितारं पुरोडाशं पुरोडाशत्वेन दत्तं एतेन पुरोडाशः ता ।

एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेन
ठं सौश्रवसाय जिन्वति २६ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति अत्रा पू
ष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः २७

प्रस्तादाज्ञावं यद्धविष्यमात्षामनुष्या ऋत्विजो यत्नयत अश्वं त्रिः परिणायंति वारत्रयं पर्यग्निकुर्वंति कीदृशमश्वं हवि
ष्यं हविषे हितं हविर्योग्यं ऋतुशः ऋतौ ऋतौ यज्ञकाले देवयानं देवान् प्रापणीयं देवेषु यानं गमनं यस्य तं देवया
नमार्गगामिनं वा यद्वा देवदादिस्यत्यानं गतिर्यस्य अनिवार्यगतिमित्यर्थः अत्रास्मिन् समये पर्यग्निकरणकाले पूष्णः
पोषकस्य ऋत्वाग्ने भागोऽजः प्रथमः पुरोगामी सन् एति गच्छति किं कुर्वन् देवेभ्यो यज्ञं प्रतिवेदयन् प्राप्यापगन् स्वशाह ५९
न्तापयन् एष हदो एषाति वर्द्धिते एषाग्निः २७

होताध्वर्युः हे होत्रादयः ऋत्विजः तेन प्रसिद्धेन यज्ञेनाश्वमेधेन वक्षणा नदीः घृतकुल्या आपृणध्वं घृतपयो
दधिपयसा पुरोडाशमांसैः पूरयत वहन्तीति वक्षणाः यज्ञं सम्पाद्य फलसाधयतेत्यर्थः कीदृशेन यज्ञेन स्वरंकृतेन
अलंकृतेन स्वरं अलंकृतेन विप्रहूविंदादिभिः शोभितेन स्विष्टेन सुष्टु इष्टेन के ऋत्विजस्तानाह होता आह्वाता
देवानां तत्रामक ऋत्विक् अध्वर्युः अध्वरं युनक्तीत्यध्वर्युरिति सुप आत्मनः क्यच् कव्यध्वरपृतनस्यर्चि लोप इति टि
लोपः ततः क्याच्छन्दसीति उप्रत्ययः आवयाः आभिमुख्येनावयजतीत्यावयाः श्वेतावाहुत्वत्प्रशासनेनेति उस आवयाः

होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आपृणध्वम् २८

प्रतिप्रस्थाता अवयजत इति निपातनम् आवाप्यानित्यवस्याल्लोपः अग्निमिन्धः अग्निमिन्धे दीपयत्यग्निमिन्धः आग्नीत् भागु
ग्ग्राभः इति गुणम् ग्रावग्राभः ग्राव्णो गृह्णातीति ग्रावग्राहः कर्मण्यण् हस्य भः ग्रावस्तोता उत अपि शंस्ता प्र
शंसतीति शंस्ता प्रशास्ता स्तु विप्रः शोभनो विप्रो मेधावी स्तुविप्रः ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीति सुके अ
यमत्रक विगुप्यलक्षकः एते येन वक्षणां पृणाध्वमिति संबंधः २२

यूपव्रस्काः तेषां ऋत्विजां अभिगूर्त्तिः अभिगोरणाम् अभिगूर्तिः उद्यमो नोऽस्मान् इन्वतु प्रीणातु व्याप्नोतु वा अस्माकं यज्ञं सम्य
क्समापयत्वित्यर्थः इन्वतिर्व्याप्तिप्रीणनयोः लोट् शपि इदितो नुम् धातोरिति नुमागमः तेषां केषां ये यूपव्रस्काः यूपाय व्र
५१ श्चन्ति तरुं छिन्दन्ति ते यूपव्रस्का वृः उतापि च ये यूपवाहाः यूपं वहन्तीति यूपवाहाः कर्मण्युपपदे अण् छिन्नस्य यूपस्य वोढारः ये
59 चाश्वयूपाय अश्वबन्धनयूपार्थं चषालं तक्षति यूपाग्रभागे स्थाप्यं काष्ठं तनूकुर्वन्ति वचनव्यत्ययः चषालो यूपकटकः इत्य
मरः तक्षतिस्तनूकरणे साधु संपादयन्तीत्यर्थः उतो अपि च ये नराः अर्वते अश्वाय पचनं पच्यते तेनेति पचनं पाकसाध
नं काष्ठभाण्डादिकं संभरन्ति संहरन्ति आनयन्ति येषां उद्यमोऽस्मान्प्रीणात्वित्यर्थः उप प्र मन्म मननीयं फलं सुमत्

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ये चार्वते पचनं सम्भरन्त्युतो तेषा
मभिगूर्तिर्न इन्वतु २९ उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः अन्वेनं
विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ३०

स्वयं उप प्रागात् उपगच्छतु सुमत् दिव्यमयं स्वयमित्यर्थः सुमत् स्वयमित्यर्थे इति यास्कोक्ते तन्मम फलं मे मया स्वयाऽपि
सृतमित्यर्थः किंच अयं वीतपृष्ठः पृष्ठस्य यद्धा वीतं कामितं पृष्ठं यस्य अश्वपृष्ठमारोहणाय सर्वकामयेत सर्वान् पृष्ठोऽश्वो दे
वानां प्राणाम्येनाश्यान्तर्यपितं इति आशाः उपगच्छतु उपसर्गाणां क्रियावृत्तिः किंच देवानां पुष्टे पोषणाय पुष्टे भावे निष्ठा निमि
त्ते सप्तमी देवपुष्टिनिमित्तं यमश्वं वयं सुबन्धुं चकृम कृतवन्तः मन्दिना यादीर्घः सोमनोवंध्यदैवतं यस्य तं यं पुष्टं वहन्तः एते अ ५१
न्वं विप्रा मेधाविनः ऋषयो मन्त्रदर्शिन ऋत्विजोऽनुमदन्ति अनुमोदन्ते तर्पयन्तु २३

यद्वाजिनः वाजिनो वेगवतोऽर्वतोऽश्वस्य यत् दाम ग्रीवाबंधरज्जुः यच्च संदानं पादबंधनरज्जुः या च शीर्षण्या शीर्षभ
वा शीर्षण्या शिरोबंधनास्याश्वस्य रज्जुः शिरः शब्दाङ्गवेष्टे दसीनियत् ये च तद्धितउतिशीर्षन्वादेशः निस्वरितं कटि।
स्या रशना रज्जुः अस्याश्वस्यापि या रज्जुः वा घ्वा अस्याश्वस्य प्रसिद्धं आस्ये मुखे विप्रभृतं प्रहृतं प्रक्षिप्तं यत्तृणं हे अश्व एतेन
वसर्वा सर्वाणि तानि तानि देवेष्वस्तु संतु देवेषु योग्यानि भवंतु देवत्वं प्राप्नुवंतु का अत्रोपयुक्तानां सर्वेषां देवत्व
माशास्यते। यदश्वस्य मक्षिका अश्वस्य क्रविषा क्रविः यत् आश भक्षितवती अस्थाने लिप्ट् क्रविष इति कर्मणि षष्ठी

यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते ऽ
अपि देवेष्वस्तु ३१ यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति यद्धस्तयोः शमितु
र्यन्नखेषु सर्वा ता ते ऽपि देवेष्वस्तु ३२ यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति
सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकं पचन्तु ३३

वा घ्वा यत् मांसं स्वरौ पशुबंधनकाले विमे लिप्तमस्ति स्वरुणा पशुमनक्तीति श्रुतेः यत् स्वधितौ प्रासे लिप्तमस्ति छे
दनकाले ऽवदानकाले च यच्च शमितुर्हस्तयोर्लिप्तं यच्च शमितुर्नखेषु लिप्तं हे अश्व सर्वा वा सर्वाणि तानि अ
पि देवेषु अस्तु भवंतु वचनव्यत्ययः सर्वं तदीयं देवभोग्यं भवतु यदूवध्यं उदरस्य ऊवध्यं ईषज्जीर्णतृणपुरीषं यत्।
अपवाति अपगच्छति मलिनमपक्वमामाशयस्थं ऊवध्यं उच्यते आमस्य अपक्वस्य क्रविषो मांसस्य यो गंधो लेशो अस्ति श
मितारो विशसितारः तत्सर्वं सुकृता सुकृतं शोभनं कृतं कुर्वंतु उत अपि च मेधं मेध्यं अश्वं शृतपाकं यथा तथा
पचंतु एतो देवयोग्योस्तु ततः पाको यस्मिन्कर्मणि तत्तथा पचंतु अ
पि पक्वं ईषत्पक्वं च मा कुर्वंतित्यर्थः २५

यत्ते। हे अश्व अग्निना पच्यमानात् ते तव गात्रात् शरीरात् यत् उष्मा रसो वा अवधावति अधस्तात् गच्छति तथा निहतस्यातिः
शयेन हतस्य यत् अंगं शूलं अभि अवधावति शूलेन पाके क्रियमाणे यत् निर्गच्छति तत् निर्गतं तृणाग्रादिकं भूम्यां मा आश्रि-
षत् भूम्यां श्लिष्टं मा भूत् श्लिषः प्रशादिलाने ज्ञेरङ् तथा तृणेषु मा श्लिषत् विशसनसमये तृणालयं मा अस्तु। किं तर्हि
तपति तत्सर्वं देवेभ्यो यत् तद् तत् अस्तु रातं दत्तं। कीदृशेभ्यो देवेभ्यः उशद्भ्यः उशन्ति कामयन्ते ते उशन्तः तेभ्यः। हवि-
विः कामयमानेभ्यः वश कान्तौ लटः शत्रादेशः ये वाजिनं ये जनाः पक्वं वाजिनमश्वं परिपश्यन्ति अथ पक्व प्रतिज्ञा

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति मा तद्भूम्यामाश्रिषन्मा तृ-
णेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ३४ ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुर-
भिर्निर्हरेति ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ३५

नेति य ईं इति पदद्वयं चार्थे ये च इत्याहुः एवं कथयन्ति। किं सुरभिः सुगन्धः पाको जातः अतो निर्हर अग्नेः सकाशात् उ-
त्तारयेति ये च जना अर्वतोऽश्वस्य मांसभिक्षामुपासते। हुतशिष्टमांसयाचनां कुर्वते उतो अपि च तेषां पाकद्रष्टॄणां द्विजना-
नां अभिगूर्तिरुद्यमो नोऽस्मानिन्वतु प्रीणातु। यद्वा अयं मंत्रो देवपरो व्याख्येयः ये देवाः पक्वं वाजिनं परिपश्यन्ति कदा हो-
ष्यतीति किंच ये च विलंबे दृष्टा सुरभिः पाको जातोऽस्मभ्यं निर्हरेति आहुः ये चार्वतो मांसभिक्षामुपासते मांसं प्रा-
र्थयन्ते तेषां अभिगूर्तिः तेषां अभिगूर्तिः संकल्पोऽस्मान् प्रीणातु सफलो भवत्वित्यर्थः ३५

यन्त्रीवतां । एते पदार्था अस्य सूपादेर्भूषयन्ति । अलंकुर्वन्ति स्वस्वव्यापारेण शोभयन्तीत्यर्थः भूष अलंकारे भौवादिकः एतेके नामाह
यन्तृ उखायाः स्थाल्याः नीवृत्त्राणि नितरां इन्त्वं पाक परिपाकार्थं दर्शनं कीदृश्या उखायाः मांसपचन्याः मांसं पच्यते यस्यां
सा मांसपचनी तस्याः मांसपाकाधिकरणभूतायाः अधिकरणाधिकरणयोश्चेति ल्युट् मांसस्य पचि युड्घञोरिति
मांसाकारलोपः टिड्ढाणञिति ङीप् पृष्ठतः पश्चात् सम्यगासेचनानि आसिच्यन्ते येषु तानि आसेचनसाधनानि यानि

यन्त्रीवतां मांसपचन्याः उखायाः पात्राणि पृष्ठेऽऽसेचनानि
ऊष्मण्यापिधानानि च हृतानि मङ्क्षु सूदाः परिभूषयन्त्यमुष्यम् २९

पात्राणि पृष्ठतनिति एष शब्दः पृष्ठशब्दस्य पृष्ठत्रादेशः यानि च हृतानि मांसपर्णपात्राणि अपिधानानि आच्छादन
पात्राणि कीदृशानि तानि ऊष्मण्या ऊष्माणं वादयन्ति तानि ऊष्मण्यानि ऊष्मन्शब्दात् हारणार्थे यत्प्रत्ययः आ
च्छादने ऊष्मा बहिर्न यातीत्यर्थः तथा अङ्काः चिह्नसाधनानि हृद्याय वस्त्राणि पकानि वेतनस्समयानि सूदाः विशस
नकरणभूतानि अस्यपिन्याद्यः एते अस्य परिभूषयन्ति २३

मा त्वा हे अश्व पच्यमानस्यायं वह्निरग्निः त्वां मा धूनयीत्। ध्वनिं माकारयतु। ध्वनौ सति भाण्डभङ्गः स्यात् दह्यमाने मांसे मसि मसि
६१ मेति शब्दं करोति तन्मास्तु। नोनयतीति ध्वनयतेर्लुङि णिपि नाच्च ङः प्रतिषेधः ह्म्यन्तक्षणेति वृद्ध्यभावः कीदृशोऽग्निः। धूमगन्धिः
६१ धूमस्य गन्धो लेशो यत्र सः अल्पधूमवानित्यर्थः। अल्पाख्यायामिति धूमादिकारः किंच। भ्राजन्ती अतितापेन दीप्यमाना
उखा स्थाली मा अभिविक्त। मा चलतु ओविजी भयचलनयोः। लुङि न ङित्। कलोकलीति सिलोपे रूपं। न माङ्योगे उत्यडभा

मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ३२

वः कीदृशी उखा। जघ्रिः जिघ्रतिर्गन्धं गृह्णातीति जघ्रिः आदृगमेति किन्प्रत्ययः अपि हव्यमादेवतायाः घ्राणं तं एवं विधम्
मश्वं देवासो देवाः प्रतिगृभ्णन्ति प्रतिगृह्णन्ति कीदृशं अश्वं इष्टं प्रयाजैः वीतं आप्रीभिः पर्यग्निकृतं अभिगूर्तं येयजा
महे इत्यागूर्त्या उक्तं वषट्कृतं वषट्कारेण संस्कृतं २२ ६१
राम: राम: राम: राम:

निक्रमणं। यत् निक्रमणं नितरां क्रमते यत्र तत् निक्रमणं स्थानं निषदनं नितरां सीदन्त्यस्मिन्निति निषदनं उपवेशनस्था
नं विवर्त्तनं विविधं वर्त्तते यत्र तत् उत्तानतो लुठनस्थानं सर्वत्राधिकरणे ल्युट्। यत् चार्वतोऽस्य पड्वीशपदेषु विशा
न्ति पड्वीशं पादबन्धनं। क्रियापरा वा निक्रमणादयः शब्दाः आलम्भसमये यान्यस्य निक्रमणादीनि चेष्टितानि विहि॥
तानि। किंच। यच्च पपौ यज्जलं पीतवान् यच्च घासिमष्टनीयं तृणादिकं जघास भक्षितवान् यत्स्पृष्टं नेलिढाहे
अस्य तानि तानि। सर्वाणि तेन तु निक्रमणादीनि देवेष्वस्तु सन्तु देवार्थस्यास्य रोमादीनामपि निरर्थकत्वं मास्त्वित्यर्थः

निक्रमणन्निषदनं विवर्त्तनं यच्च पड्वीशमर्वतः यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवे
ष्वस्तु ३८ यदश्वाय वासः उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै सन्दानमर्वन्तं पड्वीशं प्रिया
देवेष्वायामयन्ति ३९

यदश्वाय। प्रिया प्रियाणि एतानि वस्तूनि देवेष्वायामयन्ति आगमयन्ति ऋत्विजोऽस्यैतानि देवेष्वेव प्रापयन्तीत्य॥
र्थः कानीत्यत आह। अश्वाय यत् अधीवासं आच्छादकं वासो वस्त्रं उपस्तृणन्ति आच्छादयन्ति। स्तृञ् आच्छादने। का
दिकः तथा। या यानि हिरण्यानि सौवर्णशकलानि अस्मै अश्वाय उपस्तृणन्ति तथा अर्वन्तं षष्ठ्यर्थे द्वितीया अर्व॥
तो अस्य सन्दानं शिरोबन्धनं पड्वीशं पादबन्धनं एतानि देवेष्वापयन्ति कीदृशानि प्रिया। प्रियाणि। देवानामिष्टानि ३९

यत्ते सादे हे अश्व स्वारः सादे गमने यत्तेन वंशा पार्ष्ण्या पादाग्रभागेन कशया वा तुतोद पीडितवान् तुद व्यथने लिट् सद
६२ नेसादः ग्रजक्रीडस्य तव महसा बलेन शूकृतस्य शुकृतमस्यामिप्रद्रतः तस्य शब्दानुकरणमेतत् सत्कारं कुर्वतः
अध्वरेषु यज्ञेषु ताः सर्वाणि तानि सर्वाणि तेन तव पार्ष्णिकशाताडनानि ब्रह्मणा मंत्रेण हे अश्व सूदयामि प्रदत्तोऽसि स्वराद्विः ताच
यामि यज्ञे स्वाहुतित्वेन कल्पयामीत्यर्थः तत्र दृष्टान्तः हविषः स्रुचेव हविराज्यादिकं यथा स्रुचा जुह्वा सूदयामि
तद्वत् एकं तावदे पादप्रहरणाय चतुस्त्रिंशत् स्वधितिः पशुच्छेदनसाधनोऽसिः अश्वस्य चतुस्त्रिंशद्वंक्रीः चतु
स्त्रिंशत्संख्याकास्तमयपार्श्वास्थीनि समेति सम्यगागच्छति छेदनाय कीदृशस्याश्वस्य वाजिनः वेगं गच्छतीति

यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद स्रुचेव ता हविषो अध्वरेषु स
र्वा ता ते ब्रह्मणा सूदयामि ७ चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधि
तिः समेति अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ८

वाजी तस्य वेगवत्त्वमर्थः देवबंधोः देवानां बंधुः प्रियस्तस्य देवं वंधयो गास्येतिथा भावीति दृशः अश्वस्य चतुस्त्रिंशद्वंक
यः अजादीनां षड्विंशतिः अतो हे ऋत्विजो वयुना वयुनेन ज्ञानेनाश्वस्य गात्राणि अच्छिद्राण्यच्छिद्राणि छिद्ररहिता
नि यूयं कृणोत कुरुत स्वधितिना छिन्नानि सच्छिद्राणि वर्णनेतानच्छिद्राणि कुरुत किंच परुष्परुः ग्रंथिनां पर्व परु
षीत्यमरः तिस्रप्वीप्सयेति द्वित्वं प्रति पर्व प्रत्यवयवं अनुघुष्य उद्देदमितिनाम्ना संशब्द्य यूयं विशस्त छेदनं कु
रुत शंसु हिंसायां छांदसः शयोलुक् कृणोत कुरुत स्वादिः तमनमन यनाश्वेतिमध्यमबहुवचनस्य ६२

ततपादष्याः तोद्गाः ऋग्वेदभाष्ये कोशस्य २५

एकस्त्वयैः अस्यस्य विशाला विशासनक ऋतुः कीदृशस्यास्यस्य। त्वष्टुः। दीप्तस्य। कृतपल्लवितः कालान्तप्रजापतिरेवास्य स्रष्टा
सोन्यर्थः शासेस्त्च तथायंनाशायंनौ नियमकर्तारौ द्वा। द्यावापृथिव्यभिमानिदेवौ भवतः तयोरेवसर्वंपालितयत्र
त्वादिति भावः तथा ऋतुः अत्र कृत्यकरः इति हूस्वप्रकृतिभावो एवमस्यस्य विशासितः पल्लवकाद्यर्थः स्वकर्मा हा हे अस्य
तेन वगात्राण्यपिडानंगात्रसंबंधिनां मांस पिडानां यायानिअंगानि अंहकृणामिदमिच्छिनत्ति कृत्नुवपेत्वादिः ऋतु
था ऋतौ ऋतनपल्लवितेन वसन्तादियत्नकालेतानानि। तामंगानिअग्रैशाप्रजुहोमि एकर्पाकृतानिकरोति ३ माना।
हे अस्यप्रियावल्लभो भोगायनवानन वामा देहः त्वांत्वां मातयत नमङः विवृतं माकार्षीत नवदेहवियोगजनिताव्य

एकस्त्वष्टुरभ्यस्याविशालाद्वायन्ताराभवनत्यय ऋतुः यातेगात्राणामत्तयाहृतोभिमता तापिडा।
नाम्रजुहोम्यग्नौ ५२ मात्वातपत्प्रियस्त्वाततापियन्तमात्वपितिस्तन्वः आतितिष्ठिपते मातरट।
न्युरविशालातिहायछिद्रागात्राण्यसिनामिथूकः ५३

॥यामाभूदितिविवृतात्मानंप्रसुच्यते किंभूतंत्वा।
॥आपियंतं आप्नोतीति आपियन्तं देवलोकंगच्छन्तं आपिपूर्व्यादेतेः शतृप्रत्ययः किंच स्वधितिः शतृप्रत्ययः किंच स्वधितिः
शास्त्रंतेनतव तन्वः तनूः अंगानिमात्वानितिष्ठियन्मास्थापयतु सर्वाण्याछित्त्वादेवभ्यादद्यादित्यर्थः। तिष्ठतेर्ण्यन्तस्यलुङि
चङि तिष्ठतेरिदितिकारेकृतेद्वित्वादि। किंच शासिताते तव गात्राण्यंगानिअतिहायपत्यकाणास्त्वात कमत्यकाम्
सिनाशासेनमिथुमिथ्याछिद्राछिद्राणि अपयाछित्वानिमाकः। माकार्षीत करोतेर्लुङि मन्त्रेघसह्वरेत्यादिनाक्लेः
लुक। गुणोहल्ड्याब्विति तिपोलोपविसर्गः मिथुइति मिथ्यार्थे अयं संहितायां दीर्घः कीदृशः गत्युः। गरप्वतीतिगट

नवै वैशब्दार्थे उ अवधारणे हे अश्व त्वं एतन्नैव म्रियसे इत्थमवयवशः शसनेन न मृतो भवसि देवत्वप्राप्तेर्वक्ष्यमाणत्वात् अत एव न
रिष्यसि न हिंस्यसे अवयवहिंसाया अभावात् विधते यत्किंचिदस्मै पदं मार्ष्टं ननु प्रत्यक्षेण मरणमंगनाशश्च दृश्यते न हि
कथमेवमुच्यते तत्राह सुगेभिः गम्यते यत्र ते सुगाः तैः सुगेभिः सुगैः सुखगमनैः पथिभिर्मार्गैः देवयानरूपैर्देवानु
६३ नणेषि देवान् गच्छसि अतो युक्ता मरणोक्तिः। कथं देवाभिगमनं तत्राह। हे अश्व ते तव हरी इन्द्रस्याश्वौ युञ्जा युजौ युक्तौ अभू
63 तौ भविष्यतः। आप्रायामाभूतवाक्ये निभूतकालप्रयोगो भविष्यदर्थे हरी इन्द्रस्येति यास्कः तथा पृषती मरुतां वाह

नवैनवा ऽ उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः
हरी ते युञ्जा पृषती ऽ अभूतामुपास्थाद्वाजी धुरि रासभस्य ४४

न भूते न वयुञ्जैः अभूतां पृषत्यो मरुतामिति यास्कः। युक्तेषु युञ्जौ ऋत्विग्दधृगित्यादिना क्विन् क्विन्प्रत्ययस्य कुरि।
ति कुत्वं युजेरसमासे इति नुम् सुपां सुलुगिति विभक्तेराकारः किंच। रासभस्याश्विवाहनस्य धुरि अश्विवाहनस्थाने वा।
जी कश्चिदश्व उपास्थात् उपस्थास्यति देवत्वप्राप्तस्य तव वहनाय इन्द्रादयो निजवाहनानि प्रेषयिष्यन्तीति भावः। यद्वा तत्तद्देव। ६३
भावप्राप्तं त्वां तानि तानि वाहनानि वक्ष्यन्तीत्यर्थः ३२

स्तुतिर्नीयाञ्चाक्रियते सुगव्यन्नः वाजी देवत्वं प्राप्तोऽश्वः नोऽस्माकं सुगव्यं शोभनं गोसमूहं कृणोतु करोतु गवां समूहो गव्यं ख
लगोरथादिति यत्प्रत्ययः शोभनं गव्यं सुगव्यं तथा स्वश्व्यं कृणोतु अश्वानां समूहोऽश्व्यं केशाश्वाभ्यां यञ्छावन्यतरस्या
मिति विकल्पात् यत्प्रत्ययः शोभनमश्व्यं स्वश्व्यं तथा पुंसः पुत्रान् करोतु पुत्रशब्दोऽपत्यवाचक इति पुंस इति विशेष
णं यद्वा पुंसः पुरुषार्थसाधकान् पुत्रान् करोतु तथापि च रयिं धनं करोतु कीदृशं रयिं विश्वपुषं पुष्यत्यनेनेति पुषः इगुपधे
ति कप्रत्ययः विश्वस्य सर्वस्य पोषकं सर्वजनपोषणसमर्थं धनं करोत्वित्यर्थः संहितायां विश्वशब्दस्य दीर्घः। किंच।

सुगव्यन्नो वाजी स्वश्व्यम्पुंसः पुत्राँ उत विश्वापुषं रयिम् अनागास्त्व
न्नोऽअदितिः कृणोतु क्षत्रन्नोऽअश्वो वनतां हविष्मान् ५५

नोऽस्माकं अनागास्त्वं करोतु नास्ति आगो अपराधः पापरूपो यस्य सोऽनागाः तस्य भावोऽनागस्त्वं दीर्घश्छान्दसः। तिः
पापत्वं करोतु पापसङ्गवे ऽकर्मफलप्राप्तेः। किंच। अश्वो नोऽस्माकं क्षत्रं क्षत्रं बलं पराभवाद्रक्षणं वा करोतु। की
दृशोऽश्वः अदितिः। नास्ति दितिः खण्डनं दैन्यं वा यस्य सः हविष्मान् हविरस्यास्तीति हविष्मान् तदस्यास्तीति मतुप्। हवि
र्भूतावयवः यद्वा देवता प्राप्तहविष्मान्। ईदृशोऽश्वो नः क्षत्रं वनतां करोतु। वनतिः करोत्यर्थः ३३
राम राम

कात्यायनः इमानुकमितिचद्विपदाः अपस्मयपात्रेणाश्वेलोहितहोमानंतरं इमानुकमित्याद्याः षट् द्विपदास्तुहोति कंडिकाह
यमप्यषड्द्वानितिमतितेः षडाहुतीर्जुहोतीतिसूत्रार्थः इमानुकं। द्विपदाछंदस्कादिश्वदेवदेवत्याआप्त्यपुत्रभुवनदृष्टालिंगकर
६८ वः। नुकं। एतेनानिपातेनापादपूरणे। इमानि। भुवना। भुवनानिभूतजातानिवयंसीषधाम। साधयामः। वशीकुर्मइत्यर्थः। सा
धयतेर्लुङि। उत्तमबहुवचनेरूपं। अडभावश्छांदसः। किंच। इंद्रः इदि परमैश्वर्ये ऐश्वर्यवान्मरुद्गणेननिजगणेः परिवारैः स
64 हित इंद्रोदेवेण विश्वेदेवाश्च आदित्यैर्द्वादशभिर्महद्भिरेकोनपंचाशन्मरुद्भिश्चसहिताअस्मभ्यंभेषजाभेषजाभेषजानि

इमानुकंभुवनासीषधामेंद्रश्चविश्वेचदेवाः आदित्यैरिन्द्रः सगणोमरुद्भिरस्मभ्यंभेषजाकरत्
यज्ञंचनस्तन्वंचप्रजांचादित्यैरिन्द्रः सहसीषधाति ६८ अग्नेत्वन्नोऽअन्तमउतत्राताशि।
वोभवावरूथ्यः वसुरग्निर्वसुश्रवाः अच्छानक्षिद्युमत्तमं रयिन्दाः तन्त्वाशोचिष्ठदीदिवः
सुम्नायनूनमीमहेसखिभ्यः ४७ इतिसंहितायांपंचविंशतितमोऽध्यायः २५

न्सीषधाति हितानिकरोतु कुर्वंतु। सर्वेदेवाः अस्माकंहितकारिणोभवंत्वित्यर्थः। किंच। इंद्रआदित्यैः सहनोऽस्माकंय
ज्ञंअश्वमेधंतन्वंशरीरंप्रजांपुत्रादिकांचसीषधाति साधयतुवशीकरोत्वित्यर्थः। नीरोगाः सपुत्रावयंयज्ञंसमाप्नुकंकर्मइति
भावः। अग्नेत्वन्नइतिहोताद्विपदाव्याख्याताः समिद्धोअग्निर्जन्ताश्वमेधिकोऽध्याय इतिवचनादत्रैवहोत्रेनमंत्राणामवितियोगाः स
माप्तोऽश्वमेधः समविंशसत्तरवर्षसाध्यः ३४ श्रीमन्महीधरकृतेवेददीपमनोहरे अध्यायः पंचविंशोयमश्वमेधगा। ६८
नोगमत् २५

इषेत्वेत्यारभ्यदर्शपौर्णमासपितृयज्ञाग्निहोत्रोपस्थानपशुचातुर्मास्याग्निष्टोमवाजपेययज्ञसूत्रयाग्निसौत्रामण्यश्वमेधयज्ञब्रह्ममंत्राम्नाया
नाः इदानींखिल्यासुच्यन्ते कचिद्विनियोगाज्ञकेः तेषांविवक्षात्परिशिष्टानुक्तेः आदित्यानीमानियजूंषिव्यामाम्नायंतइतिश्रुतेः

अग्निश्चपृथिवीचसन्नतेतेमेसन्नमतामदोवायुश्चान्तरिक्षञ्च
सन्नतेतेमेसन्नमतामदः आदित्यश्चद्यौश्चसन्नतेतेमेसन्नमताम
दः आपश्चवरुणश्चसन्नतेतेमेसन्नमतामदः सप्तसंसदोऽ
अष्टमीभूतसाधनी सकामाँऽअध्वनस्कुरुसंज्ञानमस्तुमेमुना ।

याज्ञवल्क्योवाऽयाज्ञवल्क्येनाम्नायंतइतिश्रुतेः अग्निश्च सप्तलिंगोक्तानियजूंषि। चतस्रःत्र्यगायत्र्यः सप्तसंसदः। आस्त
पज्ञष्टुप्।सकामान् प्राजापत्यानुष्टुप् यथोक्ता।ब्राह्मीगायत्री अग्निः पृथिवीचसंनते।संनमंतं संनतं आनुकूल्येनप्रवृत्ति

अग्निःपृथिव्यांभोगायसंगते अतोब्रवीमि तेऽग्निःपृथिव्यामेममादः अमुकंसंनमन्ता संनमयन्तावशावर्त्तिनंकुरुतामित्यर्थः
।अदश्रुतिवृहत्पादेनामद्वितीयानप्रयोज्य छंदस्युभयथेतिशेषाण्यार्द्धधातुकत्वाणेरनिटीतिणिचोपः लोसंनमनमित्यत्र
६५ 65 एवमुत्तरेष्वपिमंत्रेष्वयोज्यं १ वायुरंतरिक्षेचसंगतेतेममामुकंसंनमयन्ता २ आदित्यश्चद्यौश्चसंनते ते ३ आपश्चवरुणश्चसं
नतेते ४ समसंमदःपरमात्मातेममामुकंसंनप्रयुज्यते हेस्वामिन्त्वप्रसन्नत्वसमसंमदः संमदनानिअधिष्ठानानि।
अग्निवाय्वन्तरिक्षादित्यद्युलोकांबुवरुणाख्यानि तत्राष्टमीभूतसाधनीपृथ्वीभूतानिसाधयतिउत्पादयतिभूतसाध
नी भूमिंविनाभूतोत्पत्तेरभावात् ५ अतःसर्वाधिष्ठानभूतस्त्वंअखण्डनामाधानात्सकामान्कुरु।येषुमार्गेषुमयागम्यते
तत्रास्माकंकामप्राप्तिरस्त्वित्यर्थः।किंचमेममामुनादेवदत्तादिनासंज्ञानंसंगतंज्ञानंअस्तु उष्टेनममप्रीतिरस्तु
उष्टेनममप्रीतिरस्तु विज्ञानात्मावोच्यते यस्त्वंसममसंमदः।पंचबुद्धीन्द्रियाणांमनोबुद्धिश्चेनिसमसाधनानि।
अष्टमीभूतसाधनीभूतानिसाधयति।वशीकरोतिभूतसाधनीवाक् सर्वेनोऽस्माकंअखण्डनःसकामान्कुरु अमुनास
हमेसंज्ञानंसंगतमस्तु ६ २

यथेमां इमां कल्याणीमनुद्वेगकरीं वाचमहं यथायतः आवदानि सर्वतो ब्रवीमि दीपनं मनुष्याणामिति सर्वेभ्यो वच्मि केभ्य इत्य
दाह ब्रह्मराजन्याभ्यां । ब्राह्मणाय राजन्याय क्षत्रियाय च शूद्राय अर्याय वैश्याय । स्वाय आत्मीयाय । अरणाय परकीयाय अरणो
परकीयोदकः शत्रुः नास्ति रणः शब्दो येन सह । वाक्सम्बन्धरहितः शत्रुरिति वा । प्रियो देवानां मध्ये वसानरहितानुरूपः ।
लोगाति हृष्ट यथेति सर्वोक्तरत्र तथा शब्दोऽप्याहार्यः यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं वदामि तथा ततोऽहं देवा

यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु २

नां प्रियो भूयासं अहं संसारे दक्षिणायै दक्षिणाया दातुश्च प्रियो भूयासं देवाद् दक्षिणादातारश्च मम पि प्रीतिकर्तारो भवन्त्विति भावः
किं च मे मम अयं कामः समृध्यतां सफलो भवतु अयमिति नामनिर्देशः । धनपुत्रादिलाभकामो मे मम सम्पद्यतामित्य
र्थः किं च अदो मामुपनमतु अद इति उद्देशनामग्रहणं देवदत्तादिर्मा प्राप्नोतु ३

60

बृहस्पते ब्रह्मदेवत्या त्रिष्टुप् गृत्समददृष्टा। बृहस्पतिसवे बार्हस्पत्यग्रहणे स्याः सोपयामाया विनियोगः ऋतात् सत्याद्
ब्राह्मणः सकाशात् सुजातेन प्रकृष्टजातेन जन्म यस्य ऋतप्रजातः हे ऋतप्रजात हे बृहस्पते बृहतां वेदानां पते पालक चित्तं नाना
विधं तत् द्रविणं धनं अस्मासु यजमानेषु धेहि धारय स्थापय देहीत्यर्थः। तत् किं। अर्थ्यः स्वामी यद्धनं अर्हात् अर्हति पूजय
ति लोटो डाटाविन्याडागमः अर्थः स्वामिवैश्ययोरिति निपातः अर्थ्यस्यावृः स्वामिन्यतोटाञ्चः वैश्ये आद्युदात्तः ईश्वरयोग्य
धनं देहीत्यर्थः यज्ञधनं जनेषु लोकेषु विभाति विविधं शोभते। कीदृशं धनं द्युमत् द्योः कान्तिरस्यास्तीति द्युमत् दि

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मा
सु द्रविणं धेहि चित्रम् उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ३

वश्चेति उकारः क्रतुमत् क्रतवो यज्ञा विद्यन्ते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः यत् धनं शवसा बले।
न दीदयत् दापयति प्रापयति दापयति वा धनं तत्तेन धनं देहीत्यर्थः यत् धनं यद्दानगानिर्हिंसादानेषु अस्मात्
णिजन्तात् लुङि रूपं अडभावश्चार्षः। उपयामेन पात्रेण गृहीतोऽसि बृहस्पतये त्वां गृह्णामि। स्थापयति ६६
[illegible]ापते योनिः स्थाने बृहस्पतये त्वा सादयामि ४

इंद्रगोमन् हे इंद्र देवत्वे गायत्र्या रम्यादित्ष्टे गोमत्वे यज्ञे यद्द्रोणनियुक्ते सोमयामि शतंक्रतवः कर्माणि यस्य शतक्रतुः हे
शतक्रतो हे इंद्र हे गोमन् गावो येन वस्तुतयः किरणा वा विद्यंते यस्य गोमान् त्वं हे यज्ञं आयाहि आगच्छ सोमं च पिब ह्य
चानस्मिन् इति दीर्घः कीदृशं सोमं ग्रावभिः स्तुतं अश्मभिरभिषुतं । कीदृशैर्ग्रावभिः विघद्भिः विशेषेण घ्नंति विडन्यानि ते वि

इन्द्रगोमन्निहायाहि पिबा सोमं शतक्रतो विद्यद्भिर्ग्रावभिः सुत
म् उपयामगृहीतोसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गो
मते ४ इन्द्रायाहि वृत्रहन्पिबा सोमं शतक्रतो गोमद्भिर्ग्रावभिः
सुतम् उपयामगृहीतोसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ५

घ्नंतः तैः । दीर्घत्वं छांदसो दिवादिवात् शयनस्यपतनीर् अतः शयनीत्योकारलोपः उप गोमते इंद्राय त्वां गृह्णामि सादयामि
एषते इंद्राय आहि । हे वृत्रहन् हे इतिहृत्र हा शतंक्रतवो मखाय यस्य सशतक्रतुः । हे वृत्रहन् हे शतक्रतो हे इंद्र त्वं आयाहि आग
च्छ । सोमं च पिब । कीदृशं सोमं ग्रावभिः सुतं कीदृशैर्ग्रावभिः । गोमद्भिः गावः स्तुतिर्विद्यंते येषां ते गोमंतस्तैः उपयाम एषते

ऋतावानं निस्रोवैश्वानरीयाः प्रोक्तानुवाक्याः आद्यागायत्रीप्राक्तुगादिति्वृष्टा वयंवैश्वानरंईमहेयावामः यज्ञः समामिमितिशेषः
ईमहे पात्राकस्तुपरिति :कीदृशंवैश्वानरं ऋतवानं ऋतेसत्ययज्ञेजलेवासमाप्तिऋतवा तं ज्योतिसोवनीयोवाच्यावितिऋतस्य
६७ थिवन्स्मन्यः संहितःपतिःज्ञसस्त्रेस्मात्रपतीरा जसदिंसायां नमिकंपीतिप्रत्ययः घर्मज्योतिरणदीप्योः जिघर्तिदर
67 निजलंघर्मिलं दीप्तंवा।उपावैश्वानरायत्वागृहात्सिमितिमादयामि वैश्वानरस्यसुमतौत्रिष्टुपकल्पदृष्टा।वैश्वानरा।

ऋतवानंवैश्वानरमृतस्यज्योतिषस्पतिम् अजस्रंघर्ममीमहे उपयामगृहीतोसिवैश्वानरायत्वै
षतेयोनिर्वैश्वानरायत्वा ६ वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः इतोजातोवि
श्वमिदंविचष्टेवैश्वानरोयततेसूर्येण उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरा
यत्वा ७ वैश्वानरोनऊतयःआप्रयातुपरावतः अग्निरुक्थेनवाहसा उपयामगृहीतोसिवैश्वा
॥नरायत्वैषतेयोनिर्वैश्वानरायत्वा ८
स्यसुमतौशोभनबुद्धौवयंस्याम।भवेम।कंनिपातः पादपूरणः हियस्मा
द्वेतोवैश्वानरइतोजातोजातउत्पन्नःसन्इदंविश्वंसर्वंविचष्टेकर्मानुरूपंपश्यति सूर्येणसहयतते स्पर्धतेचासूर्यस
मतेजाइत्यर्थः कीदृशोग्निः राजा।राजतेदीप्यतेराजा भुवनानांभूतजातानामभिश्रीः।आश्रयणीयः अभिसमंतान्श्रीय
तेसेव्यतेऽभिश्रीः कर्मणिक्विप्।उपयाम।एषतेउक्तो।वैश्वानरोन।गायत्रीनोऽस्माकमूतयेऽवनायपरावतोदूरदेशाद्वै
श्वानरआप्रयातुआगच्छतु।केन।वाहसा।वाहनभूतेनउक्थेनस्तोमेनावाहित्वेनवाहनानांस्तोमोहूतोकुर्वन्नगाइतिश्रुतेः ६७

नोसिमस्य स्याहरतस्प्रकोंउपाथ॰ऊँ॰ ८

अग्निर्ऋषिः अग्निर्देवत्या गायत्री वसिष्ठभरद्वाजदृष्टा पुरोरुक् महान्गयः स्तुतिर्यस्य स महागयो महागयस्तद्रूपो वा
तमग्निं वर्चसे ईमहे याचयामः। तेन कः। योऽग्निर्ऋषिः मंत्रद्रष्टा। पवमानः। पवनाते। पर्वते ऽनस्तो गच्छतीति पवमानः
यद्वा। पूङ् शोधने। पवने शोधयतीति पवमानः। पांचजन्यः। पंचजनेभ्यो हितः। विप्रादयश्चत्वारो वर्णा निषादश्चेति।
पंचजनास्तेषां यत्नाधिकारात्। पुरोहितः पुरोग्रे हितः स्थापितः। दधातेर्निष्ठा। उपयाम। वर्चसे तेजोरूपाय

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः तमीमहे महागयम् उपयामगृहीतोस्यग्न
ये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे ९ महाँ२ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु ह
न्तु पाप्मानं योस्मान्द्वेष्टि उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा १०

ग्नये त्वां गृह्णामि। एष। महां इंद्रः। महेंद्रदेवत्या गायत्री वसिष्ठदृष्टा पुरोरुक्। इंद्रः शर्म सुखं यच्छतु ददातु। योऽ
स्मान्द्वेष्टि। तं च पाप्मानं पापिष्ठं हंतु नाशयतु यद्वा अस्मद्द्वेष्टारं पाप्मानं पापं ब्रह्महत्यादिकं हंतु अस्तीपकं प्रमान्या
छमत्यमरः। कीदृशः इंद्रः। महान् श्रेष्ठः वज्रहस्तः वज्रं हस्ते यस्य सः षोडशी। पंचप्राणा दशेन्द्रियाणि मनश्चेति
षोडशपदार्था लिंगशरीररूपा यस्य स षोडशी आत्मरूप इत्यर्थः अमा एष उक्ते ८

तेवः॥ इंद्रदेवतापथ्याहहनीनोयागेनमहस्तं॥ख्याप्यायाद्दिश्रुतियुक्ता आदित्ययाज्ञवल्क्ययो वर्षमाप्यायान् हेयजमा
नाः तं इंद्रं वयंगीर्भिस्तुतिलक्षणाभिर्वाभिः अभिनवामहे सम्यकस्तुमहे नुमतो ध्वन्ययेनशप्राकिंभूतमग्निं वेयुक्ता
६८ कदसांदर्शनीयांदसदर्शनोमप्रत्ययः॥ कृतीषहे॥ कृतिसहे॥ कृगतौ॥ क्विप्प्रत्ययः कृत्यागत्यासहतेअभिभवतिशत्रून
68 इतिकृतिषहं तं एर्वेपदस्येतिषत्वं संहितायांदीर्घः॥ वसोः वासयितुः स्थितिहेतुभूतंसांयसोऽन्नस्यामघोनंतोया

तेषांदसममहतीषहं वसोर्मिन्द्रानमत्यमः अभिवत्सन
समरेषुयेनवः इन्द्रंगीर्भिर्नवामहे ॥

र्थे अन्नेनमदानं॥मोदमानंमहिदु स्वपतेजाड्यमदेमोदेस्तुमौगना विवितियातेः शानच॥ध्वन्ययेनशयोलुक् हर्षणं॥
माद्ध वसंन॥नकारइवार्थः॥वसरेषुवेनैवात्मनैवसर्वंतिकिरणायेषुतेषुसमदिवसांसुष्वयथायेनवानवप्रसूता ६८
गावोवसंततवतिस्तुवंति पाहेराहूयंतीत्यर्थः नदहयामिंद्रंस्तुमः ८

यद्वाहिष्ठं अग्निदेवत्यमानुष्टुप् वसूयव ऋषयः । हे उद्गातः अग्नये अग्न्यर्थं तत् बृहत् साम अर्च । गाय । बृहत्साम्ना गानं कुरु तत् । किं
यत् वाहिष्ठं वाहयति प्रापयति स्वर्गं इति वाहयितृ । वहिष्ठमेतत्तृच् अत्यन्तवाहयितृ वाहिष्ठं अतिशायने तमबिष्ठनावि
ति तुश्छन्दसीति इष्ठनि परे तुरिष्ठेमेयस्स्विति तृचो लोपे वाहिष्ठमिति रूपं किं च साम गानेन प्रसन्नस्त्वमग्ने ब्रूहि । किं
हे विभावसो विभा कान्तिः एव वसु धनं यस्य सः विभावसुः । हे अग्ने त्वद्विधर्तृत्वात् वाजाः अन्नानि च त्वत्तः सकाशात् उदीरते उ

यद्वाहिष्ठन्तदग्नये बृहदर्च विभावसो महिषीव त्वद्रयिस्त्वद्वाजा उदीरते १२
एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः एभिर्वर्धास इन्दुभिः १३

दीरते उद्गच्छन्ति ईर गतौ कम्पने च लट् । शपो लुक् । अदभ्यस्त्वात् तत्र दृष्टान्तः महिषीव । यथा महिषी प्रथमपरिणीता
स्त्री गृहात् भोगार्थं पतिं प्रति उदीर्ति उद्गच्छति । एवं त्वत्पदं पादपूरणे रयिः त्वत्त उदीर्ते इति वा एहि अग्निदेवत्यं गाय
त्री भरद्वाजदृष्टा । हे अग्ने त्वं एहि आगच्छ उ पादपूरणः । सुञि चेति संहितायां उकारस्य दीर्घः । इत्था इत्थं अनेन प्रकारेण
न इतराः अन्याः गिरो वाणीः स्तुतिलक्षणाः ते तव सुब्रवाणि सुतरां वदानि ब्रूञो लोट् । किं च । एभिः इन्दुभिः सोमैः त्वं वर्धा

ऋतवस्ते अग्निर्देवस्याहहती ऽ।८।।।।८।वर्णपादाः।विषयपादाः।नवकात्स्कैकादशाक्षिनोविषमयादेतिवचनात् हे अग्ने
ऋतव ऋतुपलक्षिताः कालविशेषाः तेतव यज्ञं वितन्वंतु विस्तारयंतु। मासाश्चैत्राद्यधिष्ठातारो देवास्तेतव हविः पुरोडाश
६५ दिकं रक्षंतु पांतु।संवत्सरस्तदधिष्ठातादेवः तेतुभ्यंतदर्थंनोस्माकंयज्ञंदधातु पुष्णातु।नोस्माकं प्रजांपुत्रादिकांच परि
69 पातु रक्षतु संवत्सर एव उपह्वरे।सोमदेवस्यागायत्रीवत्सउष्णि गिरीणांपर्वतानां उपह्वरे निकटे वनदीनांगंगादीनां
च संगमे विप्रोमेधावी सोमः अजायत उत्पन्नः जनेर्लङ्कपतियाव्युत्पा विप्रादयामयायज्ञेकारेष्मतोतिविचार्यतां।
र्थः उच्चाते सोमदेवस्याक्षिसोगायत्र्याः महीयवरष्टोः हेसोमतेतवअंधसोन्नाद्रसरूपादुज्जातं उपन्नं हे सोमतेजातं

ऋतवस्तेयज्ञंवितन्वंतुमासारक्षंतुतेहविः संवत्सरस्तेयज्ञंदधातुनः प्रजांचपरिपातुनः १४
उपह्वरेगिरीणां संगमेचनदीनाम् धियाविप्रोअजायत १५ उच्चातेजातमन्धसो
दिविसद्भूम्याददे उग्रंशर्ममहिश्रवः १६ ॥

अप्पर्वे उच्चाउच्चंगतं दिविस्वर्गे सत् विद्यमानं भूमिः आददे स्वहस्ति। भूमिशब्दस्य विसर्गलोपसंधिश्छांदसः किंत
तु पलोकस्थमूर्मिरह्णातितदाह उग्रं उत्कृष्टं शर्मसुखं वा रक्षतुपत्रादिजन्य। महिमहत्। श्रवः कीर्तिर्यशो वा अग्रेतमं
त्रेणपंचाहुतिपरिणाममुक्तः। सयथा हुताहुतिरादौ दिवि गच्छति। ततोंऽतरिक्षे जलरूपेण २ ततो भूमावन्नरू ६५
पेण ३ ततो नरे रेतोरूपेण ४ ततो पानीनरूपेण ५ गर्भे नरे तनयनयशी भाषास्तु। शिवतकरोतीतिभावः १०

सनः। हे सोम स त्वं नोऽस्माकं यज्ञे परिस्रव क्षर रसरूपेणाभूतान्कुरुनित्वमहीत्यर्थः किमर्थं इन्द्राय वरुणाय मरुद्भ्यश्च इन्द्रादीनां
त्रमये परिस्रवेत्यर्थः। कीदृशायेन्द्राय। यज्यवे। यष्टुं योग्याय यज्ञलिसे यष्टव्याय। इदं त्रयाणां विशेषणं यज्ञमध्ये इति मरु
तां कीदृशस्त्वं वरिवोवित् वरिवो धनं वेत्ति जानाति विंदति लभते वा वरिवोवित् धनस्य ज्ञाता प्रापकश्च। एना विश्वानि।
अर्यईश्वरः। सोम एना एनानि विश्वानि सर्वाणि मानुषाणां नराणां द्युम्नानि धनानि यशांसि वा। आ। आनयतदिति शेषः
अस्मभ्यं ददातीत्यर्थः तानि सोम दत्तानि द्युम्नानि वयं वनामहे वनसंभक्तौ शाहृयोः लट् संभजामहे। कीदृशा वय

सनः इन्द्राय यज्यवे वरुणाय मरुद्भ्यः वरिवोवित्परिस्रव ९ एना विश्वान्यर्य आ
द्युम्नानि मानुषाणाम् सिषासन्तो वनामहे १८ अनु वीरैरनु पुष्यास्म गोभिरन्व
श्वैरनु सर्वेण पुष्टैः अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु १९

सिषासंतः षणुदाने सनितुं दातुं इच्छन्ति। सिषासंति ते सिषासंतः सनेर्यान्तः सनंताच्छतृप्रत्ययः। जनसनखनां सनझलोरि
त्यात्वं। सन्यतेः इत्यभ्यासेकारः दानं कुर्वाणा यजमाना सम इत्यर्थः। अनुवीरैः आशीरियं देवदेवत्या त्रिष्टुप्समृद्धलदृश वयं वीरैः
पुत्रैः अनुपुष्यास्म पुष्टा भवेम पुषपोषे आशीर्लिङि उत्तमबहुवचनं गोभिर्धेनुभिरनुपुष्यास्म उपसर्गाद् हस्याः क्रियाहृतिः अश्वैर
नुपुष्यास्म। सर्वेणाभिमतेनापि कामेनानुपुष्यास्म पुष्टैः सर्वपदार्थैः दित्तादिभिः पुष्यास्म द्वौ पादौ येषां ते द्विपात्तेन द्विपदा
मनुष्याणां दासादिना चतुःपदा गवादिना च पुष्यास्म पादौ ऽन्यतरस्यामिति नलोपः पादःपदिति पदादेशः। किंच। ऋतु
था ऋतौ ऋतौ काले देवा नोऽस्माकं यज्ञं नयंतु प्रापयंतु प्रभुवंतु ११

अग्ने पत्नीः। अग्निर्देवता गायत्री मेधातिथिर्दृष्टा ऋतुः पंचऋचो ग्निष्टोमे नेष्टुर्याज्या आद्या प्रातःसवने नेष्टुश्चमसस्य यागे याज्या
। हे अग्ने देवानां पत्नीः इह यज्ञे अस्मिन् उपावह आगमय कीदृशीः पत्नीः उशतीः हविः कामयमानाः वशः शत्रंतात् उगितश्चेति ङी
प् किंच नो ममीनये सोमपानाय त्वष्टारं देवं चावह॥ अभियज्ञं हे ऋतु देवते गायत्री मेधातिथिर्दृष्टा ऋतुयागे नेष्टुर्या
ज्या ग्नायते ग्नाऽस्यास्तीति ग्नावा तदस्यास्तीति मतुः मादुपधायाश्चेति वत्वं नमस्सेवायं नेष्टा ग्नावः पत्नीवन् हे नेष्टः नोऽ(
स्माकं यज्ञं अभिगृणीहि। स्तुहि गॄ शब्दे क्र्यादित्वात् श्ना ई हल्यघोरिति तत्स्थकारः प्वादीनां ह्रस्व इति ह्रस्वः

अग्ने पत्नीरिहावह देवानामुशतीरुप त्वष्टारं सोमपीतये २०
अभियज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना त्वं हि रत्नधा असि २१
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत नेष्ट्रादृतुभिरिष्यत २२

किंच ऋतुना देवेन सह पिब सोममिति शेषः हि यस्मात् त्वं रत्नधा असि रत्नानि दधाति ददातीति रत्नधाः रमणीयधनानां
दातासि द्रविणोदाः द्रविणशब्दः सोऽत्र धनवाची द्रविणं धनं ददातीति द्रविणोदाः धनदाता अग्निः पिपीषति पातुमिच्छति
सोममिति शेषः पीङ् पाने स्वादिर्दिवादिकान्तत्वात् यः अतो हे ऋत्विजः यूयं जुहोत जुहुत च प्रतिष्ठत च तप्तत्वादिनिवाद
पः कर्मस्तु युक्ता भवतेत्यर्थः किंच नेष्ट्रादित्यनेन नेष्टुः यागात् ऋतुभिर्देवैः सहरतत सोमं प्रतिग
गच्छत इषगतौ दिवादित्वात् श्यन् लोट् १२

तवायं इंद्रदेवत्या त्रिष्टुप् विश्वामित्रदृष्टा माध्यंदिने सवने नेष्टुश्चमसस्य यागे याज्या हे इंद्र तवायं सोमोस्ति अतः अर्वाङ्-
अस्मात् अभिमुखः त्वं एहि आगच्छ शश्वत्तमं सर्वकालं अस्य पाहि कर्मणि षष्ठी इमं सोमं रक्ष पालय लोट् कीदृशः
त्वं सुमनाः शोभनं मनो यस्य सः प्रसन्नचित्तः। किंच। अस्मिन् यज्ञे बर्हिषि आस्तृते दर्भे निषद्य उपविश्य इमं इंद्र।
सोमं जठरे उदरे दधिष्व धारय पिपासितेत्यादिः अन्ययेन प्रायः श्रुलङ् अभ्यासस्याकारस्याकारश्चार्षः अमेव नः त्वष्ट
देवत्या जगती गृत्समददृष्टा तृतीयसवने नेष्टुश्चमसस्य यागे याज्या देवपत्न्यः प्रार्थ्यंते अमा शब्दो गृहवाचकः
अमेन स्वगृहमिव नो अस्माकं यज्ञगृहं ह्रा गोष्ठे देवपत्न्यो यूयं आगंतन आगच्छत गमेः पापाल्लुक लोटि मध्यमबहु-

तवायं॰ सोमस्त्वमेह्यर्वाङ् शश्वत्तमं॰ सुमना ऽअस्य पाहि अस्मिन्यज्ञे बर्हिष्या निषद्या दधि
ष्वेमं जठर ऽइन्दुमिन्द्र २३ अमेव नः सुहवा ऽआ हि गन्तन नि बर्हिषि सदतना रणिष्टन अ
था मन्दस्व जुजुषाणो ऽअन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः २४

वने हि पादपूरणः बर्हिषि दर्भे निषदतन निषीदत उपविशत सद गतौ रणिष्टन। रण शब्दे। अस्य लङि रूपं अ-
डागमाभावः परस्मैपदे वा तनेकृते नत्यथः तप्तनप्तनथनाश्चेति सर्वत्र तनप्रत्ययस्यादेशः कीदृश्यो यूयं सुहवाः शोभ-
नः सुको आह्वानं यासां ताः एवं देवपत्नीयः हविर्लात्वा मन्त्र त्वष्ट जुजुषाणः सेवमानः जुषी प्रीतिसेवनयोः अन्ध
येन शानतिशयः शुः अयमत्र इति कर्मणि षष्ठी देवेभिर्देवैः जनिभिर्देवपत्नीभिश्च समन्वगणः सुष्ठु माद्यंति हृष्यंति
सुमदः मदेः क्विप् सुमदः संतुष्टगणा देवाः स्त्रीगणाश्च यस्य स सुमद्गणः त्वनयेतित्वनयेनार्थः १२

स्वादिष्टया। सोम देवेभ्यो हे गाय अमृतं दोहयं जयादिषु निपुणे हे सोम धारया कृत्वा पवस्व गच्छ इत्याद्यवित्र्यां द्रोणकल
शं प्रति गच्छति। कीदृश्या धारया। स्वादिष्टया। स्वादो विद्यते यस्यां सा स्वादवती अत्यन्तं स्वादवती स्वादिष्टा तया। विकारतो लोपि।
७१ ति इष्टन् इति मतुपो लुक् स्वादुतमया। मदिष्टया मदयति मदयित्री अत्यन्तं मदयित्री मदिष्टा तया। इष्टनेन तृच इमेयस्विति
71 तृचो लोपः। यत इन्द्राय पानेवेदं दूस्यपातृत्वं तु तेनोः अभिषुतोसि अस्माभिस्तोयायया पवस्व रक्षोहा। सोमः द्रोणा विभक्ति
व्यत्ययः द्रोणं द्रोणकलशं लक्षणं योनिं स्थानं अभि आसदत् आभिमुख्येन सीदति तिष्ठति कीदृशः सोमः रक्षोहा
रक्षांसि हन्तीति रक्षोहा दुष्टनाशकः विश्वचर्षणिः विश्वं सर्वं जगत् चष्टे पश्यतीति विश्वचर्षणिः सर्वस्य द्रष्टा।

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुतः २५ रक्षोहा विश्वचर्ष
णिरभि योनिमयोहते द्रोणे सधस्थमासदत् २६ इति संहितापाठः षड्विंशोऽध्यायः २६

ष्टा। यद्वा चर्षणिरिति मनुष्यनाम सु पठितं विश्वे सर्वे चर्षणयो मनुष्या ऋत्विग्यजमानलक्षणा यस्य के इन्द्राह्वा।
णादिषु सत्तया कीदृशं द्रोणं अयः सुपां सुलुगिति तृतीयैकवचनलोपः अयसा लोहेन हते उत्कीर्णे वास्याकर
णानन्तरणे सोम भाजनीकृते। हन्तमिति विभक्तिव्यत्ययः तथा सधस्थं। सह स्थानं तिष्ठन्ति सोमा यत्र स सह स्थः सु।
पि स्थ क इति कप्रत्ययः आतो लोप इति आलोपः सधमादस्थयोश्छन्दसीति सहस्य सधादेशः असदत् पुषादिद्यु
ताद्यृदितः परस्मैपदेष्विति च्लेर्ङः छन्दसि लुङ्लङ्लिट इति लडर्थे लुङ् १४ श्रीमन्महीधरकृते वेददी
पे मनोहरे अनुक्रमं मंत्रकथनः षड्विंशो ध्याय ईरितः २६ ७१

समस्त्वा इत्यध्यायः पंचचितिकस्याग्नेः संबंधी प्रजापतिर्दृष्टः नव ऋचोऽग्निदेवत्यास्त्रिष्टुभोऽग्निना दृष्टाः ऋक्कामशोभमि
ध्यमानसमिद्धेष्वारंभकाले श्रामा विनियोगः अग्निर्ऋषिः कर्मांगभूतमग्निं स्तौति हे अग्ने गणते त्वां वर्द्धयंतु के समाः मासाः
संवत्सरस्य एकदेशात्मके समाशब्दो मासवाचकः ऋतवो वसंताद्याः संवत्सराः तत्तदधिष्ठातारः ऋषयो मंत्रद्रष्टारः यानि स
त्या सत्यानि सत्यरूपाणि मंत्रा इत्यर्थः त्वमप्येतैर्वर्धमानो दिव्येन दिवि भवेन रोचनेन दीप्त्या संदीदिहि संदीप्यस्व दिवेः
लौकिकरूपं त्वगादीनां दीर्घाभ्यासे स्यानि स्वभ्यः सम्यक् दिवः। किंच विश्वाः सर्वाः प्रदिशो विदिशश्चतस्रो दिशश्च आभा

समास्त्वाग्न ऋतवो वर्द्धयन्तु संवत्सरा ऋषयो यानि सत्या सन्दिव्येन दीदिहि रोच
नेन विश्वा आभाहि प्रदिशश्चतस्रः १ सञ्चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ म
हते सौभगाय मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये २

द्वितीयमग्निं तु भूतोपार्थः मा दीप्ता सञ्च अवहिताश्रितपाणिस्तके रूपमग्निं किंपयोर्म्मेवधानं हे अग्ने समिध्यस्व
च दीप्यस्व स्वपात्रेन श्रपयन् एनं यजमानं प्रबोधय च ज्ञानार्थं कुरु। अग्निष्टेन व्युत्तिष्ठ महते सौभगाय ऐश्वर्याय उ
त्तिष्ठ च ऐश्वर्यदातृत्वमुद्यमं कुर्वित्यर्थः किंच हे अग्ने ते तव उपसीदन्तोऽस्युपसत्तारः सेवकाः मा रिषन्तु मा नश्यन्तु
च यजमानो ह्यग्निमुप, सीदति। ते तव ब्राह्मणा ब्राह्मणा ऋत्विग्यजमानाः यशसो यशस्विनः सन्तु मन्वर्थे यत्र
यलोपः मा अन्ये अन्ये अयजमाना मा यशसः सन्तु १

त्वामग्ने हे अग्ने इमे ब्राह्मणाः। ऋत्विजः त्वां आवृणते वृणुते संभक्तौ यागाय भजन्ति अतो हे अग्ने संवरणो ब्राह्मणैः सहैक
१२ मिच वरणो मन्त्रितो मा कं शिवः शान्तो भव नः अस्माकं सपत्नहा अभिमातिजिच्च भव अभिमातिरपि शत्रुः न त्वेकं आत्म
सपत्नानां हन्ता भव हन्ता वशिष्णां जेता च भव। किंच स्वे गये जे गृहे जागृहि सावधानो भव। किं कुर्वन् अप्रयुच्छ
न् अप्रमाद्यन् इहैव। हे अग्ने इहैवास्मास्वेव यजमानेषु पिंयन त्वं अधिधारय अधिकं देहि किंच पूर्वचितं वत्ति सर्वं

त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः सपत्नहा नो अभिमातिजि
च स्वे गये जागृह्यप्रयुच्छन् इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन् पूर्वचितो नि
कारिणः क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ५

चितः पूर्वमग्निं चितवन्तो जना एवं निकारिणो निकरणशीलाः त्वां मा निक्रन्। मा नीचैः कुर्वन्तु। मावजानन्तु इ
त्यर्थः। करोतेः शपि लुङि मलाडि प्रथमबहुवचने रूपं किंच हे अग्ने त्वत्ते दत्रजातिः तुभ्यं तव सुतनयमं अस्तु सुखेन य
न्तुं शक्यं सुयमं सुखेन वशीकर्तुं शक्यमस्तु ईदृशं सुक्षितिः सुपूर्वा घमेः भवन्। किंच। ते तव उपसत्ता उपसदनकर्त्ता य १२
मानोऽनिष्टृतोऽनुपहिंसितः सन् वर्द्धतां। धनपुत्रादिभिरेधयं ते स्तृहिंसायामिति निष्टृतः २

त्वेणाग्ने। हे अग्ने त्वं त्वेणा संरभस्व समारभस्वांपितो वायुः। त्वेणा समारभ्य यज्ञमिति शेषः तत्रियान् यज्ञं कारयेत्यर्थः
कीदृशस्त्वं स्वायुः। शोभनमायुर्जीवितं यस्मात्सः यद्वा आयुरहकारान्तो मनुष्यवाची शोभन आयुर्मनुष्यो यजमानो
यस्य स स्वायुः। किंच। हे अग्ने मित्रेणा सूर्येण सह वर्तमानः सन् मित्रधेये यतस्व। यानि द्रुं पारयितुं योग्यं धेयं मित्रस्य
जमानस्य धेयं कार्यं पालयितुं तत्र यत्नं कुरु यजमानेन यज्ञं कारय। किंच। सजातानां समानजन्मनां मध्यमस्थाः
मध्यमे तिष्ठतीति निक्षिप्। मध्यस्थ गा विभव। सजातानामपि यज्ञानो भवेत्यर्थः। किंच। हे अग्ने इह अत्र यज्ञे दीदिहि। दीप्य
स्व। दीमनेन्मयेन प्रायः स्तुः स्तावितिच्छिन्नं तु जाटीनां दीर्घाभ्यां समेम्नन्मभ्यामसदीर्घैः कीदृशस्त्वं राज्ञां विहव्यः। क

त्वेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेये यतस्व सजातानां मध्यमस्था ए
धि राज्ञामग्ने विहव्यो दीदिहीह ५ अतिनिहो अतिस्रिधोत्यचित्तिमत्यराति
मग्ने विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यं सहवीरां रयिन्दाः ६

नो दीदिहि। राजभिर्विविधं हूयते आहूयते विहव्यः राजभिर्यज्ञे आह्वातव्यः। अतिनिहः। हे अग्ने हि निश्चितं विश्वा। वि
श्वानि सर्वाणि दुरिता। दुरितानि पापानि त्वं सहस्व अभिभव तिरस्कुरु वर्जयेत्यर्थः किं कृत्वा अतिनिहः। निहन्तीति निहः। ति प
वाईनेर्डप्रत्ययः। सुपां सुलुगिति शसः स्वादेशः। निहान् हन्तॄन् निक्रम्य सेधतिः कुत्सितकर्मा सेधति स्रिधः
। क्विप्। कुत्सितान् चारान् अतिक्रम्य। अचित्तिं अन्यमनस्कतां अतिक्रम्य। अरातिं हीनं यस्मात्सः रातिस्तं अरातीन् अतिक्र
म्य। दुरितानि सर्वान् अतिक्रम्य पापं नाशयेत्यर्थः। किंच। अथानन्तरं हे अग्ने अस्मभ्यं सहवीरां वीरैः पुत्रैः सहितां रयिं दाः देहि

अनाधृष्याः हे अग्ने इह कर्माणि वर्तमानस्त्वं विश्वाः आशाः दीदिहि सर्वाः दिशः प्रकाशय त्वं । अनाधृष्यः पराभवितुमशक्यः
जातवेदाः जातवेदो धनं ज्ञानं वा यस्मात् । अनिष्टृतः । न हिंसितः केनापि स्तृ हिंसायां क्तान्तः । विराट् । विविधं राजमानः
२३ तत्र भव । तत्रे विभर्ति षष्ठ्यर्थः । किं च मानवीभिः मनुष्यसंबन्धिनीभिः योजनाभिः अस्मत्सकाशात् निर्दिष्टशोकाद्विकाः प्रमुञ्चन् । निवर्तय
त्वं शिवेभिः शिवैः शान्तैः तैः अभिरक्ष परि पाहि वर्द्धनं हृत्त्वा नमस्कृत्ये । संपदादित्वाद्भावे क्विप् । बृहस्पते ।

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह विश्वा आशाः प्रमुञ्चन्मानुषी-
र्भियः शिवेभिरद्य परि पाहि नो वृधे ॥ ७ ॥ बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्सन्तराꣳ स-
ꣳ शिशाधि वर्द्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥ ८

हे बृहस्पते हे सवितः एनं यजमानं बोधय यज्ञकर्माभिज्ञं कुरु । किं च विद्याऽर्थे । शामितं चित् । संशितं शितमपि संतरां सं
अतितरां संशिशाधि शितया । शो तनूकरणे । शाप इत्यादि इदं समम्यास स्येवं । किं च महते सौभगाय ऐश्वर्याय एनं वर्द्धय
विश्वे देवाः एनं यजमानं अनुमदन्तु हृष्टा भवन्तु बृहस्पति सवितः शब्दाभ्यां समिधे मं गाभूतौ स्निहो च्यते वा २३
कठ यवा । एके तु बृहस्पतिरुक्तः ऽनेन सविता ॥ ॥

अमुत्रभूयादथ हे बृहस्पते त्वं अमुत्रभूयान्मुंचः । अमुत्र परलोके भवनं अमुत्रभूयं । भुवो भावे इति क्यप् एव लोकगमनान्मर
णान्मुंच । मरणाद् इत्यर्थः । लकारस्त्वन्वयः । अथाऽथ यत् यमस्य भयं यमलोके भयं नरकपातादि तस्मादपि मुंच । किं
च । अभिशस्तेः अभिशापादपि विमुंच । किंच । देवानां भिषजा भिषजौ अश्विना । अश्विनौ । अस्माद्यजमानात् मृत्युं प्रत्यौह
तां । निवर्तयतां कैः शचीभिः कर्मभिः कृत्वा । अत्र बृहस्पतिरग्निरेव । सामिधेनीप्रकरणात् आग्नेयत्वात् उद्वयमिति
मात्मानां । ऊर्ध्वा अस्य । द्वादशाक्षी देवस्या उष्णिक् । द्वे विषमपदा आग्नेय्यौ ऽग्निना दृष्टाः । अग्निः प्रजापतिः तेन सूय

अमुत्रभूयादध यद्यमस्य बृहस्पतेः अभिशस्तेरमुञ्चः प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने
भिषजा शचीभिः ९ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्त
मम् १० ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः द्युमत्तमा सुप्रतीकस्य सूनोः ॥

नेतेन प्राजापत्या अपि । ता आग्नेय्यः प्राजापत्या यदग्निरेव एष तेनाग्नेय्यो यत्प्रजापतिमाप्नोति तेन प्राजापत्या इति
श्रुतेः । अस्याग्नेः समिधः ऊर्ध्वा देवगामिन्यो भवंति शोचींषि तेजांस्यपि ऊर्ध्वानि भवंति कीदृशानि शोचींषि शुक्रा
शुक्राणि शुद्धानि । द्युमत्तमा । द्यौः दीप्तिः प्रकाशो येषां तानि द्युमंति अत्यंतं द्युमंति द्युमत्तमानि । विश्वप्रकाशकानि ।
कीदृशस्याग्नेः । सुप्रतीकस्य सुष्ठु प्रतीकं मुखं यस्य तस्य । सूनोः । यजमानपुत्रस्य । स यदेनं जनयति तेनास्यैष पुत्र इति
श्रुतेः यद्दृशास्तत्त्वमर इति शेषः ५

७४

तनूनपादः। देवोऽग्निः मध्वा मधुरेणाज्येनेन पथ्याः यज्ञमार्गान् अनक्तु। मध्वेति तृतीयासमभावः सुतिनिरुमागामपणासनामिसुक्तेः पथ्या
ऽनक्तु अपत्र प्रकन्यानः पादमन्मपर उनिमेध्यभावः पतेवद्धृयन्नमध्वयेनमार्गाहृ[illegible]ताभ्यक्ताः स्तुवितिभावः कीदृशो वेदन तनू
नपात् तनूनामपां नपात् पौत्रः। अद्भ्यो ह्यन्नं जायते तेभ्योऽग्निरिति अपां पौत्रः। ऋतावः। ऋमवोऽस्यामृतानि। प्रमाणवान् रोम
तर्थः। विश्ववेदाः। सर्वधनः। देवेषु पितृदेवादीनिमानुषेषः। मध्वायन्ता। हे अग्ने त्वं मध्वा स्वादुभाज्येनेन यज्ञं नत्वा मेध्या।
मोषि। नदन्निर्धामिकर्मा। कीदृशं त्वं। प्रीणानः। प्रीणातिप्रीणानः। देवान् तर्पयन्। नराशंसः। नरैः। ऋत्विग्भिः।

तनूनपादृतो विश्ववेदादेवोदेवेषुदेवः पथोऽअनक्तुमध्वाघृतेन १२ मध्वायज्ञन्नक्षत
तेप्रीणानोनराशंसोऽअग्ने सुकृद्देवः सविताविश्ववारः १३ आच्छायमेतिशवसा
घृतेनेडानोवह्निर्नमसा अग्निं स्रुचोऽअध्वरेषुप्रयत्सु १४

शंस्यते नराशंसः सुकृत्। शोभनकारी देवो दीप्तिमान्। सविता। विश्वस्योत्पादकः विश्वेन व्रियते संभज्यते विश्ववारः
विश्वं ह्वोरणं संगीकरोतीति वा कर्मापणा। सर्वस्य वरणीयः सर्वाङ्गीकर्ता वा अच्छाय। अयमध्वर्युः अध्वरेषु यज्ञेषु प्रयत्सु प्र
वर्तमानेषु सत्सु अग्निं स्रुचः आनीतः अभ्येति। अच्छाभेराप्तुमिति शाकपूणिः। कीदृशः। शवसा तु बलेन ईडानः अग्नि
स्तुवन् पूर्ववत् उतिवलनाम ईडेस्तुतिरीडानः ईडस्तवे। णानच्। तथा वह्निः वह्नितियज्ञभारमिति वह्निः यज्ञनिर्वाहकः ७४
किंकृत्वा। घृतेन नमसा अन्नेन हविर्लक्षणेनोपलक्षिता स्रुचो जुह्वाद्याः सहिता इति शेषः ६ ॥

मयवत्तना सा। यद्वस्यग्नेर्महिमानं यवतत् सिबहुलं लेटि। लेटोऽडाटौ। इतश्च लोपः परस्मैपदेष्विति सूत्रे यद्वा वि
तिरूपं सं ईमवइंद्राम्ंद्राणि। मदकाननिहवीं पिचयजत्तु। ददातु। कीदृशस्याग्नेः। सुप्रत्नयमसः। प्रयसिमत्र
नाम। शोभनानि प्रयांसि यस्य समुप्रयास्तस्य। कीदृशस्याग्नेर्महिमानं यजतु। यावसुः। वासयिता। चेतिष्ठः। अति
चेतयिता। वसुधातमः। वसूनां धनानां दातृतमः। क्विं तानमप्। द्वारोदेवीः। द्वारोदेवोऽस्याग्नेर्व्रता। व्रतानि कर्मा
णि। ददंते धारयंति ददयानि कृतेऽच अनुपश्यति। विश्वसर्वे देवाः अग्निव्रतानि ददंते। कीदृश्यो द्वारः उरुव्य
चसः। उरु विशालं व्यचोऽवकाशो यासां ता। विशालान्तरा। तथा यास्मास्थानेन पत्यमानाः। पतये दिवादि

मयवदस्य महिमानमग्नेः सं ईमन्द्रासु प्रयसः वसुश्चेतिष्ठो वसुधातमश्च १५
द्वारो देवीरन्वस्य विश्वे व्रतानि ददन्तेऽग्नेः उरुव्यचसो धाम्ना पत्यमानाः १६
शतं १५०० तेऽस्य योषणोदिव्ये न योनावुषासानक्ता इमं यज्ञमवतामध्वरं नः १७

त्मनेपदी। पत्यतेर्दृशाततोः पत्यमानाः। स्थाने ऐश्वर्यं कुर्वाणाः। हविर्जा स्थानानि ददानाइत्यर्थः। ताः सुमः। तेऽस्य
स्था। उषाश्च नक्ता च रात्रिश्च उषासानक्ता। उषासादेशो द्वंद्वे। छंदसि द्वे। उषासानक्ता अहोरात्रि देवौ ते। अस्माकमिमं यज्ञ
मवतां रक्षतां। कीदृश्यौ ते। अस्याग्नेः योषणा भार्ये। तथा दिव्ये दिवि भवे अस्य। कीदृशस्याग्नेः। योनौ गार्हपत्य
स्थाने स्थितस्य गीः शोषः। नकारः पादपूरणः। कीदृशं यज्ञं। अध्वरं। ध्वं कौटिल्ये नध्वरतीत्यध्वरस्तं अकुटिलं।

॥ऋग्वेदभाष्यम्॥

दैव्या होतारा। अयं चाग्निरसौ च मध्यमो वायुः। हे दैव्या होतारौ अग्निवायू युवां नोऽस्माकं। स्विष्टिं शोभनं यजनं कृणुतं। कुरुतं। किंच।
नोऽस्माकं अध्वरं यज्ञं ऊर्ध्वं कृणुतं देवमार्गगामिनं कुरुतं अग्नेर्जिह्वां ज्वालां अभिगृणीतं वर्णयतं। समीचीनं वह्नि
७५ ज्वालेति स्तुतमित्यर्थः। तिस्रो देवीः। तिस्रो देव्यः इदं बर्हिः आसदंतु। आसीदंतु। छांदसः सीदादेशाभावः। व्यवहिता
श्चेति आङुपसर्गः क्रियापदसंबंधात्। कास्तास्तत्राह। इडा पृथिवीस्थाना। सरस्वती मध्यस्थाना। भारती द्युस्थाना। मही
महती। गृणाना स्तुवंतीति विशेषणद्वयं निरूपणं। तत् नः त्वष्टा देवः तुरीपं क्षिप्रं आयायनस्पोषं पुष्टिं अस्मे अस्माकं नाभिं
प्रति विष्यतु। विमुंचतु। नाभेः सकाशात् मुक्तं गोपनतीति भावः। षोऽन्तकर्मणि अत्र सुपनोति अकारलोपः स्यतिरूपस्य

दैव्या होतारा ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभिगृणीतम्। कृणुतं नः स्विष्टिम् १८ तिस्रो देवीर्बर्हिरेदं
सदंत्विडा सरस्वती भारती मही गृणाना १९ तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम्। रा
यस्पोषं वि ष्यतु नाभिमस्मे २० वनस्पतेऽवसृजा रराणस्त्मना देवेषु अग्निर्हव्यं शमिता सू

षो विमोचने इति धातुः। कीदृशं तुरीपं। तुरीयं त्वरया वेगेन आप्नोतीति तुरीयं। शीघ्रं प्रापकं। अद्भुतं महदा
नं महांतं। पुरुक्षु। पुरूणि बहूनि क्षूणि अन्नानि यस्मिन्निति पुरुक्षु सुपां सुलुगिति अमो लुक्। दीपनेर्गुणादिकोऽप्रत्ययः। सु
वीर्यं सुवीर्यं सामर्थ्यं येन तं। ईदृशं पनं देहीत्यर्थः। वनस्पते। अग्निः शमिता हव्यं सूदयाति। सूदयति संस्करो
तियतः अतो हे वनस्पते त्वं हव्यं अवसृज। सृज त्वत्तोऽवाचीनं हविः। कीदृशस्त्वं। त्मना आत्मना देवेषु
॥ ॥ ॥ रराणः हविर्ददानः। रादाने कानच्। मंत्रेष्वाङ्यादेरा ७५
त्मन इत्यालोपः ८ ॥

अग्ने स्वाहा। हे अग्ने हे जातवेदः जातप्रज्ञान हव्यं इन्द्राय स्वाहाकृणुहि। स्वाहाकारेण प्रयच्छ। किंच। विश्वे देवाः इदं हविर्जुषंतां सेवंतां।
।अश्वैयानं वायवे नियुत्वते शुक्लं तूपरमालभते इत्यस्य पशोः पीवोरयिवृधः इत्याद्याः षट् याज्यानुवाक्याः पीवोअन्नारयिवृधः। हे
वायुदेवत्यास्त्रिष्टुभो वसिष्ठदृष्टाः। शुक्लो हि वायुरिति श्रुतेः। श्वेतो वायुर्यान् नियुतोऽश्वान् सिषक्ति सेवते ते नियुतः समनसः समा
नमनस्काः संतो वायवे वायुं प्रति वितस्थुः। विशेषेण तिष्ठंति। कीदृशान्नियुतः पीवोअन्नाः पीवः पुष्टं अन्नं येषां तान्। नका
रलोपः। प्रकृत्यान्तः पादमिति पीवोअन्नानित्यत्र संध्यभावः। तथा रयिवृधः रयिं धनं वर्द्धयंति तान्। कीदृशः श्वेतः सुमे
अभिश्रीयते अभिश्रीः ६ धाः। शोभना मेधा यस्य। नियुतामभिश्रीः अश्वानामाश्रयणीयः। एवमश्वयोगे वायुना कृते नरा मनुष्या ऋत्विजः विश्वाइ

अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम्। विश्वे देवा हविरिदं जुषन्ताम् २२ पीवोअन्नाँ र
यिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः। ते वायवे समनसो वितस्थुर्विश्वेन्नरः स्वप
त्यानि चक्रुः २३ रायेनुयंजज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्। अध वायुं नियुतः सश्च
॥त स्वा उत श्वेतं वसुधितिं निरेके २४

न्विश्वानि सर्वाण्येव स्वपत्यानि शोभनापत्यप्रापकाणि चक्रुः कर्माणि निःशे
षं रायेनु। इमे रोदसी द्यावापृथिव्यौ यं वायुं जज्ञतुः उत्पादयामासतुः। नु इति प्रश्ने। किमर्थं राये धनाय उदकरूपाय। धियं सनो
ति ददाति धिषणा वाक् देवी देवं वायुं धाति धारयति शोपालुका राये धनाय। रोदसीमे सवर्णदीर्घः अपि वायुं विना जगद्धारणा
शक्तेर्वायुरुत्पादितः। धिषणेति ह्रस्वमार्षं। अध अथ। उत्पत्त्यनंतरमेव उत निश्चितं स्वा नियुतो निजा अश्वा वायुं सश्चत स
श्चंते सेवंते। पुरुषव्यत्ययः। क्व निरेके। निर्गतः रेकः रेचनं रेकः स्थानं। तादृशे बहुजनाकीर्णस्थाने। कीदृशं वायुं

श्वेतं। श्वेतवर्णं। वसुधितिं वसूनि धीयन्ते यस्मिन् तं। यायजीकानां ५

आपोहयद्वेप्रजापतिर्देवत्यैत्रिष्टुभौहिरण्यपहृष्टे। प्रथमाद्यधिका। आपोहवाइदमग्रेसलिलेवासेतिब्राह्मणमेतत्पोकंडिकयोर्निदान
भूतंवोध्यं। हअसिद्धै। यत्यदापुरा आपोजलानि विश्वमायन प्रापुः कीदृश्य आपः। वृहतीः वृहद्यैमहद्यः बहुलाः तथा। गर्भंहि
रण्यगर्भलक्षणं दधानाः धारयन्त्यः अतएवाग्निं जनयन्तीः अग्निरूपं हिरण्यगर्भं जनयन्त्यः उत्पादयिष्यन्त्यः ततो गर्भात् संवत्सरो।
धितान्देवानां असुः प्राणरूप आत्मा लिंगशरीररूपो हिरण्यगर्भः समवर्तत। उदपद्यत। कस्मै प्रजापतिरूपाय देवाय हिर
ण्यगर्भाय हविषा विधेमः। हविर्दद्मः। विभक्तिव्यत्ययः। विपरिहीनार्थः। यश्चित् चिदप्यर्थः। यो देवोऽन्तर्यामी महिना म
हिम्ना आपः। विभक्तिव्यत्ययः। अयः पूर्वोक्ताः पर्यपश्यत् सर्वतो ददर्श। कीदृशः। दक्षं कुशलं प्रजापतिं दधानाः। यज्ञं ज

आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ततो देवानां समवर्ततासुरेकः कस्मै देवा
य हविषा विधेम २५ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् यो देवेष्वधि
देव एक आसीत्कस्मै देवाय हविषा विधेम २६ प्रयाभिर्यासि दाश्वांसमच्छा नियुद्भिर्वाय
विष्टये दुरोणे नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः २७

नयन्तीः यज्ञशब्देन यज्ञकर्त्रीः प्रजा उच्यन्ते। सृष्टिकर्त्रीरित्यर्थः। यश्च देवेष्वधि। अधिकः एको मुख्यो देव आसीत् तस्मै दे
वाय हविर्दद्मः। प्रयाभिः हे वायो देवत्यं त्रिष्टुभा वसिष्ठदृष्टे। हे वायो यास्त्वं याभिर्नियुद्भिरश्वाभिः कृत्वा उष्टये यागाय दुरोणाय
ज्ञगृहे वर्तमानं दाश्वांसं हविर्दत्तवन्तं यजमानं अच्छ अभिमुखं प्रयासि गच्छसि। निपातस्य चेति संहितायामच्छा इति दीर्घः। व्यव
हितां प्रतिप्रयाणयासीत्यस्य अवयानेन तिर्हि नियुद्भिरागत्य नोऽस्मभ्यं रयिं धनं नियवस्व देहि। निपाति दीर्नार्थः। व्यत्ययेन
श्नप्रत्ययः। कीदृशं रयिं सुभोजसं सुष्ठु भुज्यत इति। सुभोजाः तं भुजेरसुन्प्रत्ययः। किंच वीरं पुत्रं गव्यं गोसंबंधि अश्व

आ नः। हे वायो नियुद्भिरश्वाभिर्नोऽस्माकमध्वरं यज्ञमुपयाहि कीदृशीभिः सहस्रिणीभिः शतं सहस्रं च संख्याया आसां ताभिः
वयं वह्नवाहननतृप्तोऽभक्ता इति भावः। एत्य चास्मिन्सवने तृतीये मादयस्व तृप्यस्व अर्धपादेन ऋत्विज आह हे ऋत्वि
जः स्वस्तिभिः कल्याणैर्यूयं नोऽस्मान्पात रक्षत। नियुत्वान् षट् ऋचो वायुदेवत्याः वायव्यैककपालपशुपुरोडाशादीनां या
ज्यानुवाक्यात्वेन नियुक्ताः। आद्या गायत्री गृत्समदद्दृष्टा हे वायो यतः सुन्वतो यजमानस्य गृहं प्रति गन्ता गमनशी
लोऽसि तत्तस्मात् आयुदात्ततमात् अतो नियुत्वान् अश्वावान्सन् आगच्छ एषोऽलकः। अयं शुक्रो ग्रहः ते तव प्रति अयामि

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् वायो अस्मिन्त्सवने मादयस्व
यूयं पात स्वस्तिभिः सदा नः २८ नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते गन्तासि सुन्वतो गृ
हम् २९ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु आ याहि सोमपीतये स्पार्हो देव नियुत्वता

अयत्नप्राप्तोऽत्र लकारप्रकृष्यमान्यय: शुक्रादिग्रहाणां पात्रेत्वमेवेति भावः। वायो शुक्रः। अनुष्टुप् पुरमीढाजमीढदृष्टा
हे वायो शुक्रो ग्रहः ते त्वां अयामि आगच्छतु कीदृशः शुक्रः दिविष्टिषु मध्वः। अग्रं यो यज्ञेन प्राप्यन्ते यामिस्ता दिविष्टयो
यज्ञाः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्युक्तेः मध्वो मधुनो रसस्याग्रं सारभूतः यत्र रसेषु शुक्रो ग्रहः सारभूत इत्यर्थः।
किं च हे देव वायो नियुत्वता अश्वावता रथेन आयाहि आगच्छ। किमर्थं सोमपीतये सोमपानाय कीदृशस्त्वं स्पा
र्हः स्पृहायोग्यः। यजमानादिभिः स्पृहणीयः ॥

वायुरग्रेगाः देवानां यज्ञे। वायुः शिवाभिः कल्याणरूपाभिः नियुद्भिरश्वाभिः कृत्वा मनसा साकं चित्तेन सह साकं यज्ञं गन् गच्छ-
तु कीदृशः। अग्रेगाः। अग्रे गच्छन्ति अग्रेगाः। विद्वांस्तु नास्ति कस्यादित्याकारः। यज्ञप्रीः। यज्ञेन प्रीयते तुष्यति यज्ञप्रीः। शि-
११ वः कल्याणकरः वायो हे वायो ये ते तव सहस्रिणः सहस्रसंख्याकाः रथाः सन्ति तैः रथैः आगच्छ। किमर्थं। सोमपी-
१७ तये। सोमपानाय। कीदृशस्त्वं। नियुत्वान्। अश्वयुक्तः। नियुतो वायोरित्युक्तेः। एकया च त्रिष्टुप्। अनयर्चा पात्राणि मु-
ञ्चेते स्वानि जाभूतिः स्वभूते हि स्वरूपाय स्वस्वभूतिः। हे स्वभूते हे वायो एकया दशभिः द्वाभ्यां विंशतिविंशत्या। इ-

वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः ३१ वायो ये ते
सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्सोमपीतये ३२ एकया च दशभिश्च स्वभू-
ते द्वाभ्यामिष्टये विंशती च। तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता वि-
मुञ्च ३३ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे ३४

ष्टये च विंशतिः। तिसृभिः। त्रिंशता च नियुद्भिरश्वाभिः कृत्वा इष्टये यज्ञाय पर्वयानि पात्राणि वहसे। तानि पात्राणि इह यज्ञे विमु-
ञ्च। पंच चकाराः समुच्चयार्थाः। तव वायो। गायत्री अस्य ऋषिः। हे वायो हे ऋतस्पते। सत्यस्य पालक। ऋतस्पतिर्वे। ६६
त्वडागमः हे त्वष्टुर्जामातः। आदित्यादयः आदाय वायुर्गर्भं पतिनं तो वृष्टिर्भवतीति वायुरादित्यस्य जामाता। हे अद्भुत
आश्चर्यरूप। तव अवांसि रक्षणानि वयं आवृणीमहे। प्रार्थयामहे १२

अभित्वा। बृहती सप्तो बृहती छंदः प्रगाथं वसिष्ठ दृष्टम् इंद्र देवत्यं। रथंतरं दंदति। णोपदेश इति श्रुते। नाभ्याः ध्वर्यैर्गीयेदित्यपर्यो
गोन विहितं। अतः साम्नाग्योनत्य ऋचः पठ्यंते। तत्रेंद्रः प्रगाथो रथंतरस्य योनिः। हे शूर हे इंद्र। वयं त्वा त्वाम् अभिनोनुमः
आभिमुख्येनात्यंतं स्तुमः। नु स्तुतेः यङ्लुगंतात् लङि। तत्र दृष्टांतः। अदुग्धा येन वत्सा वा यथा अदुग्धा गावो वत्सान् स्तुवंति। की
दृशं त्वां। जगतो जंगमस्येशानं। प्रभुं। किंदृशं स्वः पश्यतीति स्वर्दृकं तं यद्वा। स्वः आदित्यस्य इव दृश्यत इति स्वर्दृकं। तस्थुषः स्था

अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः ईशानमस्य जगतः स्वर्दृशमी
शानमिंद्र तस्थुषः २५ न त्वावाँ ॥ अन्यो दिव्यो न पार्थिवो न जातो
न जनिष्यते अश्वायंतो मघवन्निंद्र वाजिनो गव्यंतस्त्वा हवामहे २६

वरस्येशानं। विश्वनियंतारं इत्यर्थः। न त्वावान्। हे मघवन्। हे इंद्र। दिवि भवो दिव्यः पृथिवीभवः पार्थिवः त्वावान् त्वत्सदृशोऽ
न्यो नास्तीति शेषः। न जातः। न जनिष्यते उत्पत्स्यते त्वत्सदृशोऽस्तीति त्वावान्। सादृश्यार्थे वतुप् प्रत्ययः अतो वयं
त्वां हवामहे कीदृशा वयम् अश्वायंतः। अश्वान् कामयमानाः। अश्वाय मात् इति क्यच्। तस्मात् शतृ प्रत्ययः। वाजिनो
न्नवंतः। हविर्युताः गव्यंतः गा इच्छंति गव्यंतः गोकामाः। गवां स्यादिहोत्यर्थः १३

त्वामित्। ऋ॰ हयस्यैन्द्रः प्रगाथः शंयुर्बार्हस्पत्यः बृहत्साम्नो योनिः। अथ यागे गानस्योक्तेः आद्या बृहती द्वितीया सतोबृहती बृह
दुत्तरे पदे द्वितिस्तुते। हे इन्द्र कारवः कर्तारो यज्ञानां नरः ऋत्विजो वयं त्वामेव हवामहे आह्वयामः इत् एवार्थे। हि निश्चये।
७८ किंनिमित्तं वाजस्यान्नस्य सातौ लाभनिमित्तं वृत्रेषु शत्रुषु प्रादुर्भूतनिमित्तं काष्ठासु आदित्यदिग्विजयनिमित्तं कीदृशं
त्वां सत्पतिं सतां पालयितारं श्रुतिस्मृत्युक्ताचाररतानित्यर्थः। नरः कर्मनेतारः अर्वतः अश्वप्राप्तिनिमित्तं च।
विभक्तिव्यत्ययः। त्वां शब्दावृत्तिरादरार्थं सत्वं। हे चित्र आश्चर्यकारिन्। हे वज्रहस्त। वज्रं हस्ते यस्य हे अद्रिवः। अद्रयो

त्वामिद्धि हवामहे सातौ वाजस्य कारवः त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां
काष्ठास्वर्वतः ३७ स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अ
द्रिवः गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे २५

ज्येयत्वेन संतीत्यद्रिवान्। तत्सम्बुद्धिः। मतुवसोरिति रुत्वं। हे इन्द्र स त्वं नोऽस्मभ्यं गां अश्वं च सं किर। देहि। सं पूर्वः किरतिर्दा
नार्थः। कीदृशम् अश्वं रथ्यं रथवहनसमर्थं कीदृशस्त्वं धृष्णुया प्रागल्भ्येन। महः महसा तेजसा च स्तवा
नः। स्तूयमानः। धृषेः क्रुः नमो विभक्तेर्यादेशः। धृष्णुना धृष्णुत्वेन भावप्रधानो निर्देशः। महः विभक्तिलोपः ७८
स्तवान इत्यत्र विकरणव्यत्ययः। कथमिव। वाजं न। वाजमिव। न इवार्थे। यथा जिग्युषे जितवतेऽश्वाय हविर्वा या
याम सत्रा। त्राणा। रक्षणा। तत्सहितं वाजमन्नं प्रयच्छति तथास्मभ्यं देहि १५

कयानः इति सप्तगायत्रम् इंद्रदेवत्यं वामदेवदृष्टं । वामदेव्यसाम्नो योनिः वामदेव्यमाम्नन्ति इति श्रुतेः । अंत्या पादनिचृत् सप्तमा च त्रि
पदा पूर्ववच्च इंद्रपदमनुषंजनीयं । इंद्रः कया ऊती । ऊत्या । अवनेन तर्पणेन प्रीणनेन वा नोस्माकं सखा सहाय आभुवत् १
आभिमुख्येन भवति । तथा वृता वर्तनेन इति वृत् तया वृता वर्तमानया शचिष्ठया । अतिशयेन शचीशचिष्ठा । तया । अतिय
शवत्या यागक्रियया अस्माकं सखा भवति शचीति कर्मनाम । तत्र इष्ठन्प्रत्ययः । कीदृश इंद्रः । चित्रः विचित्रः । पूज्यो वा । सदा
वृधः । सदा वर्धनः इति सदावृधः । इगुपधेति कप्रत्ययः । सदा वर्धमानः । ऊती । तृतीयैकवचनस्य सुपां सुलुगिति पूर्वसव
र्णः आभुवत् । इतश्च लोपः । परस्मैपदेष्विति पदलोपः । शपश्छांदसो लुक् । बहुलं छंदसीति वा उवङादेशः । कस्त्वा । हे इंद्र अंधसोऽन्नस्य

कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता ३९
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः दृढा चिदारुजे वसु ४०

सोमरूपस्यकः अंशः त्वां त्वां मत्सत् । माद्यति । मत्तं करोति । मदी हर्षे । लेटोडाटाविति अडागमः । सिब्बहुलं लेटीति सिप्प्रत्ययः
इतश्च लोपः । कीदृशः । मदानां मंहिष्ठः मंहयति । दानेन महीं मदयति । दानेन महीं ता नियच्छति च मदजनका । तद्वी
षितेषां मध्ये मंहिष्ठः । श्रेष्ठः अत्यंतं मदजनकः । मंहिकामा । तुरादिः । मंहयति । दानेन मंहेत । अत्यंतं मंहा मंहिष्ठः । य
द्वा । मंहिष्ठे वा दि मंहनेवर्द्धनेमंही । अत्यंतं मंहो मंहिष्ठः । येन सोमेन मत्तः संदृढा चित् दृढान्यपि वसूनि धनानि
केनकादीनि वस्त्राहृतेः । हृजो भंगे । पुरुषपदव्यत्ययः । आरुजसि । चूर्णयसि दासानां धनानि । भंजकाः भंजकाः दस्यवः तेषां सर्वः १५

अभीषुणः। हे इंद्र त्वं ऊतये अवनाय पालनाय सु सुष्ठु सम्यक् अभि आभिमुख्येन शतं भवासि। भवसि। आडागमः। शतशब्दोऽत्र
७६ हुवाची बहुरूपो भवसि पालनाय नानारूपाणि दधासीत्यर्थः। कीदृशस्त्वं। सखीनां मित्राणां जरितॄणां स्तोतॄणां नोऽस्मा
कं अस्त्विज्ञां अविता रक्षिता इत्यस्मणां त्वां। यज्ञायज्ञा वः। त्वं च प्रगाणु अग्नये यः शोभ्य हर्षणः। यज्ञायज्ञियमस्मास्त्रोयोनिः। यज्ञायज्ञि
79 यं पुच्छमिति श्रुतेः। इदं षष्ठी। तृतीया सप्तमी वृद्धती। यज्ञायज्ञा। वीप्सायां द्वित्वं। सप्तम्येकवचनस्याकारः। बहुतिद्वितीयाबहुव
चनमेकवचनार्थे। यजमानविषयं वा। अग्नये चतुर्थ्येकवचनं द्वितीयैकवचनार्थे। गिरागिरा। वीप्सायां द्वित्वं। चः पादपूर
णः। दक्षसे। चतुर्थी द्वितीयार्थे। प्रप्र। प्रसमुपोदयः पादपूरणे इति द्वित्वं तस्य वशासिषमिति क्रियया संबंधः। वयमिति प्र

अभीषुणः सखीनामविता जरितॄणाम् शतम्भवास्यूतये ४। यज्ञायज्ञा वोऽअग्नये गि
रागिरा च दक्षसे प्रप्र वयममृतञ्जातवेदसम्प्रियम्मित्रन्न शꣳसिषम् ५२

थमा बहुवचनमेकवचनार्थे। तथा चैवं योजना। यज्ञेयज्ञेऽनेकयज्ञेषु गिरागिरा अनयानया स्तुत्या वः त्वां यद्वा वो युष्मा
कमर्थे अग्निं प्रशंसिषं स्तौमि। शंस स्तुतौ। लुङ्। अडभावश्छांदसः। कीदृशमग्निं। दक्षसं दक्षते स्मद्वाथि समृद्धानो रस्तु।
स्तुत्ययः। दक्षते उत्सहते दक्षाः। तं उत्साहितं। यद्वा दक्षते इति बलनाम। अनंतरीतमनर्थ द्रष्टव्यम् दक्षसं बलवंतं। अमृतं।
अमरणधर्माणं। जातवेदसं। जातवेदो जातं धनं वा यस्मात्तं। प्रियं प्रीतिजनकं। नशब्द उपरिष्टादुपचारादुपमार्थीयः। ७६
मित्रं न। मित्रमिव। यथा कश्चित् प्रियं मित्रं स्तौति तद्वदग्निं स्तुमह इत्यास्महे १६

पाहि नः गर्भदृष्ण। हे अग्ने। हे ऊर्ज्जो नपात्। अस्तानां पालक। हे वसो। वामपतिः नः। यद्वा। त्वमस्मत्वं अर्थे द्रष्टव्यं। हे वसो। वस्र
मन् पवन् एकया गिरा। उत्तिपदस्यानुषंगः। एकया गिरा ऋक्लक्षणया। तृतीयानिर्देशान्स्तुतः सन्निति वाक्यशेषः
। नोऽस्मान् पाहि इत्यर्थः। उत अपि च द्वितीयया गिरा यजुर्लक्षणया स्तुतः सन् पाहि। तिसृभिर्गीर्भिः ऋग्यजुःसामलक्षणा
भिः स्तुतो नः पाहि। चतसृभिः। ऋग्यजुस्सामनिगदउक्ताभिः स्तुतो नः पाहि। चतसृभिः। ऋग्यजुस्सामनिगदउक्त
ाभिः स्तुतो नः पाहि गद्यपद्यकाव्यादिरूपा चतस्रो वा गीः। ऊर्ज्जो नपात्। यजमानोऽर्थ्यं प्रार्थयते। हे अग्ने। ऊर्ज्जो नपा
त् अग्ने पापोत्रा अग्निः सत्वं हि नाच्छिद्रा न शिवय हि गतो हृदयैः। स्वादिः। लोट्। उत्तमपुरुषैकवचनम्। ऊर्क शब्देन पय उच्यते। अन्नं वा तत्

पाहि नो अग्न एकया पाह्युत द्वितीयया पाहि गीर्भिस्तिसृभिरूर्जाम्पते पाहि चतसृभिर्वसो॥
सो॥४२॥ ऊर्ज्जो नपातं स हि नायमस्मयुर्दाशेम हव्यदातये भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनू
नाम् ४४

नपातं तेभ्योऽग्निरित्यं पापोत्राग्निः। एनोऽयमग्निः अस्मयुः अस्मानिच्छतीत्यस्मयुः। क्याच्छन्दसीत्युप्रत्ययः। अतो हव्यदा
तये हविर्दानाय दाशेम। संकल्पयामः। दाश्र दाने। अत्र संकल्पार्थः। यतो यं वाजेषु संग्रामेषु अविता रक्षिता भुवत्। भव
ति। वृधे वृद्धये च भुवत्। भवति। उत अपि च तनूनां शरीराणां त्राता रक्षिता भवति। वचनमाथर्वादिषु वीरत्वार्थमुपात्त
अग्निस्तनूनां रक्षिता वर्द्धयिता। तस्मात्कामयते। तं हविर्दानाय संकल्पयामः ८

संवत्सरोसि। अग्निर्देवतं य यजुः। अत्र यजुषि नव नव सदनानि। एको सहः ततः प्रानालत्राभिकृतिश्छन्दः। विन्याग्रेरभिमर्श
८० नेविनियोगः। पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिमिति। प्रासेयामि कमि चेद्याच्य। हे अग्ने त्वं संवत्सरोसि। परिवत्सरो।
ऽसि। इद्वावत्सरोसि। इद्वत्सरः स्थासि। वत्सरोसि निर्विशेषणः। पंचवत्सरात्मककयुगरूपोसौ न्यर्थः। युगं भवेद्वत्सरैः पं
चकैरेनेति ज्योतिः शास्त्रोक्तेः। तस्यैतेनवउषसः प्रातःकालादयः कालविशेषाः संगवमध्याह्नादयः। अहोरात्रा

संवत्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्सरोसि वत्सरोसि उषसस्ते कल्पन्तामहोरात्रास्ते कल्प
न्तामर्द्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ संवत्सरस्ते कल्पन्ताम् प्रे
त्याऽएत्यै सञ्चाञ्च प्रच सारय सुपर्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीद ४५ इति संहिता

(पाठे सप्तविंशाध्यायः १२

दिवसनिशाः। अर्द्धमासाः पक्षाः। मासाश्चैत्रादयः॥ ऋतवो वसन्तादयः
कल्पन्तां। अवयवैस्तत्तत्स्वरूपा भवन्तु। संवत्सरश्च उपलक्षणं संवत्सरादयः पंचापि कल्पन्तां। क्रियाहत्तिरादरार्था। किंच।
प्रेत्यै प्रगमनाय एत्यै आगमनाय च। समंच। संकुच। प्रसारय च। संकोचविकासौ कुर्विति भावः। किंच। सु
र्णाकारेण चितत्वात्सुपर्णचिदसि। तया देवतया वाचा सहितः सन् अंगिरस्वत् अंगिरसः इव प्राण इव ध्रुवः
स्थिरः सीदतिष्ठ १८ श्रीमन्महीधरकृते वेददीपे मनोहरे सप्तविंशोध्यायस्याग्निकोविरतोयुना २१ ८०

ऐंद्रमिडः सौत्रामणिकोऽध्याय इति कात्यायनोक्तेरयमध्यायः सौत्रामणीसंबंधी। सौत्रामण्यंगभूतयोरैंद्रवायोधायस्तयोरा
ध्यंतपरैषाः प्रयाजानुयाजप्रैषरूपः तत्र प्राजापत्याश्विसरस्वत्योऽध्यायस्य ऋषयः। आद्येऽनुवाके एकादशैंद्रपशोः
संबंधिन आप्रीदेवतास्समित्तनूनपादित्यादिदेवताकाः प्रयाजानां प्रैषाः। होतायक्षत्समिधेंद्रमित्यादयो यावदंतादिंद्र
मित्यंताः अथ मंत्रार्थः। होतायक्षत्। आद्या त्रिष्टुप्। दैव्यो होता। समिधा समिन् काष्ठेन हविर्भूतेन समिधाप्रीदेवत
या सहितेन वा इंद्रं यक्षत्। यजतु। यक्षद्रः। त्रिष्वस्थानेष्वसमिध्यते। दीप्यते। प्रथमे इडः पृथिव्याः पदे यज्ञनीये प्रदेशे

होतायक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्या अधि दिवो
वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ।

अग्न्यात्मना समिध्यते। दीप्यते। प्रथमं द्वितीये पृथिव्या नाभौ। पृथिवीशब्देनांतरिक्षं। अंतरिक्षस्य मध्ये विद्युदात्मना स
मिध्यते। अपि उपरि तृतीये दिवो वर्ष्मणि वर्षिष्ठप्रदेशे आदित्यात्मना समिध्यते। कीदृशः। चर्षणीसहां ओजिष्ठः चर्षणी
या मनुष्यास्तान्सहंते अभिभवंति चर्षणीसहोऽमनुष्या अभिभावुकास्तेषां मध्ये अत्यंतं ओजस्वितमः। अत्यंतं ओजिष्ठः। इष्ठनि परे
विन्मतोर्लुगिति विनो लुगिति विनो लुक्। टिलोपे ओजिष्ठ इति रूपं। संहितायां चर्षणीशब्दस्य दीर्घः। एवंविध इंद्र आज्य
स्य वेत्तु। पिबतु हे मनुष्य होतः त्वमपि यज।

८।

होतायक्षत्तनूनपातं अग्नीज्जगती। नराशंसेन देवेन पूतेन तनूनपातं इंद्रं देवं होता यजतु केः पथिभिः। पतंति गच्छंति स्वर्गाय यजमा
ना येस्ते पथ्या नो हवींषि तैः। कीदृशैः ऊतिभिः अवंति तर्पयंति ते ऊतयस्तैः। ऊतिसाते त्यादिनाक्तिन् इति निपातनः। तथा मन्युमत्तमैः
मन्युः मन्युस्वादो दीप्तिर्येषु ते मन्युमंतः। अतिशयेन मन्युमंतस्तमाः तैः। कीदृशं इंद्रं इति ताः शत्रूणां। शत्रूणाम् अपराजितेन। केनापि न पराभू
तं। स्वर्विदं स्वः स्वर्गं वेत्ति स्वीयज्ञानात्तिस्वर्वित् यद्वा। स्वः स्वर्गं विंदते स्वर्वित्। तं। विदस्मनायां। कीदृशेन नराशंसेन। तेजसा।
तेजस्विना। एवं देवहव्यमूनः इंद्र आज्यं वेतु। पूर्ववत्। अत्र तनूनपान्नराशंसावेकत्रप्रयाजे पठितौ विकल्पभयवानयप्रया
जः होः इडाभिरिंद्रं ब्राह्मी उष्णिक्। होता इडाभिः प्रयाजदेवताभिः सह इंद्रं यजतु कीदृशं इंद्रं। ईडितं। स्तुतिभिः स्तुतं।

होतायक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् इंद्रं देवं स्वर्विदं पथिभिर्मधुमत्तमैर्नराशंसेन ते
जसा वेत्वाज्यस्य होतर्यज २ होतायक्षदिडाभिरिंद्रमीडितमाजुह्वानममर्त्यम् देवो देवैः सवीर्यो व
ज्रहस्तः पुरंदरो वेत्वाज्यस्य होतर्यज ३ होतायक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् वसुभी
आजुह्वानं। आहूयमानं यजमानैः। देवानां ह्वयंतं वा। अमर्त्यं। ।।रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य। होतायक्ष
अमरणधर्माणं। ईदृशो देव इंद्र आज्यं वेतु। कीदृशो देवैः सवीर्यः
समानं वीर्यं यस्य सः। सर्वदेवेषु यादृशं वीर्यं तादृशं अस्मिन्निंद्रे इत्यर्थः। वज्रहस्तः। वज्रं हस्ते यस्य। पुरंदरः। पुरः शत्रूणां नगरं
दारयति पुरंदरः। उक्तमन्यत्। होः। बर्हिषीन्द्रं। आर्षी त्रिष्टुप्। बर्हिषि प्रयाजदेवतायां स्थितं इंद्रं होता यजतु। कीः इंद्रं। नि
षद्वरं निषीदंति निषद् उपवेष्टारः तेषां वरं श्रेष्ठं। वृषभं वर्षितारं। नर्यापसं। नरेभ्यो यजमानेभ्यो हितं नर्यं अपः कर्म य
स्य स नर्यापाः तं। नराणां हितकारिणं। स इंद्रो वसुभिः रुद्रैः आदित्यैः सवनत्रयदेवैः सहितः बर्हिः आसदत्। आसीद ८१

तासांक्षेत्रव कीदृशैर्वस्वादिभिः सघृणैः सह इंद्रजातैर्निमहद्दृग्जातैः
समानकोशैः २

होः दोः जोः ना। अतिजगती। नकारश्चार्थः। याहाः। अप्याजदेवाः इंद्रं इंद्रे ऊर्ता वीर्यं सहस्त्रावर्द्धयन्। अत्र इंद्रियं वलं। वीर्यं शारीरं वलं सहो मनोवलं। तान्हारो होतायजतु। ताश्च द्वारः इंद्रार्थं विश्रमंता विहृता भवंतु। अस्मिन्यज्ञे आज्यं व्यंतु पिवंतु च। कीदृश्यो द्वारः। सुप्रायणाः। सुखेन प्रक्रमणमयनं गमनं यासु ताः। विहृतत्वादित्यर्थः। ऋतवृधः। ऋतं यज्ञं वर्द्धयंति ऋतवृधः। संहितायां ऋतस्य शाकल्यस्य दीर्घः। इंद्राय कीदृशाय मीढुषे। मेहति मीढ्वान्। तस्मै सेक्त्रे। क्कसुंतो निपातः। होः। उषे। अर्धातित्रिष्टुप्। उषे अत्र पूर्वपदलोपः। होता उषे नक्ता यजतु। ते च तेजसा इंद्रं अवर्द्धतां। वर्द्धयतां। आज्यं वीतां पिवतां च। तत इंद्रं वर्द्ध

होतायक्षद्दुरओजोनवीर्यं सहोद्वारः इन्द्रमवर्द्धयन् सुप्रायणाः अस्मिन्यज्ञे विश्रयन्तामृतावृधः। द्वारः इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ५ होतायक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही सवातरौ न तेजसा वत्समिन्द्रमवर्द्धतां वीतामाज्यस्य होतर्यज ६ होतायक्षद्दैव्या होतारा भिषजा। सखाया हविषेन्द्रं भिषज्यतः कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ७

यतां। कीदृश्यौ उषे। इंद्रस्य धेनू पयिनुनक्ते धेन। प्रीणयित्र्यौ। सुदुघे। सुष्ठु दुग्धः सुदुघे। दुग्धं पयः याभ्यां। मातरा मातरौ। विभक्तेराकारः। मातृवत्पालिके। मही। मह्यौ। महत्यौ विभक्तिलोपः। होता दैव्या होतारा। अतिजगती। दैव्यौ होतारौ अयं चाग्निरसौ च मध्यमः तौ होता यजतु। यौ च हविषा इंद्रं भिषज्यतः चिकित्सतः। भिषज रुग्जये। कंड्वादिभ्यो यक्। इंद्राय इंद्रियं वीर्यं धत्तः। तौ आज्यं वीतां। कीदृशौ तौ। भिषजा भिषजौ। चिकित्साकुशलौ। सखाया। सखायौ। अन्योन्यस्तहवतौ। कवी। क्रांतदर्शिनौ। देवौ। दीप्यमानौ। प्रचेतसौ प्रकृष्टचेतनौ ज्ञानं ययोस्तौ ३

८२

होतस्तिस्रोदेवीः। ब्राह्मी अनुष्टुप्। भेषजं भेषजरूपा येत्रयो लोकास्तान् इडा सरस्वती भारती इति तिस्रो देवी अह्रे होतायजतु ता।
आज्यस्य व्यन्तु। न कार ऋार्थे। कीदृशास्त्रयः। त्रियातयः। त्रयो अग्निवायुसूर्या यातवो यानि येषां ते। अपसः। अपांसि व्यापिनः। कर्मवे
नः। श्रीतोत्सवा नवधादीति लोका नां कर्माणि। कीदृश्यपत्निस्रः। महीमहस्य। इंद्रपत्नीः। इन्द्रस्य पत्न्यः पालयित्र्यः। हवि
ष्मतीः हविर्विद्यते यासां ताः। हो। त्वष्टारमिंद्रं अजिनानी। होता त्वष्टारं प्रयाजदेवं तायजतु। कीदृशं त्वष्टारं इंद्रं इदि
परमैश्वर्ये ईश्वरं। प्रभुं। देवं दातारं। भिषजं रोगनिवर्तकं। सुयजं। सुष्टु इज्यते सम्यक् यजते। मायुपसृष्ट्या। हृतश्रियं। हृतेन

होतायक्षत्तिस्रोदेवीर्न भेषजन्त्रयस्त्रिधातवोपसऽइडा सरस्वती भारती महीः इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ६ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजं सुयजं घृतश्रियम् पुरुरूपं सु
रेतसम्मघोनमिन्द्राय त्वष्टादधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ७ होतायक्षद्वनस्पतिं शमि
तारं शतक्रतुं धियोजोष्टारमिन्द्रियम् मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञम्मधुना घृते

श्रीः शोभा यस्य तं। आज्यहविष्का हि प्रयाजाः। पुरुरूपं। पुरूणि बहूनि रूपाणि यस्य तं। सुरेतसं। शोभनं रेतो वीर्यं यस्य तं। मघो
नं। मघं धनं तद्वन्तं। स त्वष्टा इंद्राय इंद्रियाणि वीर्याणि दधत् सन् आज्यं वेतु। हो। वनस्पतिं। शाकरी। होता वनस्पतिं प्रयाजदेव
तायजतु। कीदृ। वनस्पतिं। शमितारं। उलावलादिरूपेण हविषां संस्कर्तारं। शतक्रतुं। शतक्रतवः कर्माणि यस्य। बहुकर्माणं
धियो जोष्टारं बुद्धेः सेवितारं। इन्द्रियं। इंद्रस्यात्मनो हितं वीर्यरूपं वा। स त्वष्टा मध्या मध्वा मधुरस्वादुना घृतेन समंजन् यज्ञं सं
स्वदयन् सन् सुगेभिः सुगैः सुगमनैः पथिभिः मार्गैः मधुना स्वादुना घृतेन यज्ञं तं यज्ञं स्वदाति देवान् प्रापयति। स्वदा।

नव्रेला ज्यस्य होतर्यज ९

नि: प्राणार्थः सप्तञ्जवेन्नगानेवेत्यसोव्रगाः सउर्वोपयिकरतमः
निगमईप्रसपः ४

८२

होतायक्षदग्निं। शक्वरी। होता इन्द्रं यजतु। स्वाहाकारेणाज्यस्य देवान्यजन्तु स्वाहाकारेण मेदसो देवान्यजन्तु स्वाहाकारेण
लोकानां सोमं विष्णुं देवान्यजन्तु। स्वाहाकारेण स्वाहाकृतीनां देवान्। स्वाहाकृतेः प्रयाजदेवता यक्षन्तु स्वाहाकारे
ण हव्यसूक्तीनां हव्यसं वधिस्तु वचनानां देवान्यजन्तु। स्वाहाकारेणाज्यपा देवाः प्रयाजभुग्घाणाः प्रीयमाणा भवन्तः स
नइन्द्रस्याज्यं व्यन्तु। पिबन्तु देवं बर्हिः एकादशोद्व्यप्रैषाः संबन्धिन एवानुयाजप्रैषाः देवता हिरण्ययः। अग्नित्रयमेतौ मे
त्रावरुणावदन्ति बर्हि देवं बर्हिः संतानुयाजदेवता इन्द्रं स्वर्वर्द्धयन् प्रशास्तिः किंभूतं बर्हिः। स्वदेव। सोमभता देवा
ममरुद्भ्यो दयाय व्रतनं तथा। देवैर्दात्रभिः स्वतिनिभिर्वै … वीरयन्ते। वेधासीणि आस्यादिति। वसो वह्निरिह ते
होतायक्षदिन्द्रं ० स्वाहाज्यस्य स्वाहा मेदसः स्वाहा लोकानां ० स्वाहा मैत्रा कामा मैत्रा ०
स्वाहा हव्यसूक्तीनाम् स्वाहा देवाः आज्यपा जुषाणाः इन्द्र आज्यस्य व्यन्तु होतर्यज ॥ दे
वं बर्हिरिन्द्रं ० सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्द्धयत् वस्तोर्वृतम्प्राक्तोर्भृतं ० रायाव
स्तंयावान्नाममेकार्थत्वात्। उक्तोर्वात्रौ प्रसृतं। प्रक र्हिष्मता न्यगाद्वसुवने वसुधेयस्य वेतु यज ॥
र्षणं प्रते। वस्तोरक्तोर्दिनप्रत्ययं क्रमादहर्निशावाचकौ। यत्नं बर्हिः। रायाहविर्लक्षणेन धनेन बर्हिष्मता बर्हिषा।
युक्तानामन्यान्। यागान्नत्यगात् अतिक्रम्यागात् संस्कारोत्कर्षात्। तद्बर्हिर्वसुवने वसुवननाय धनदानाय वसुधेया
य वसुनो धनाय तिथानाय यजमानगृहे निवेदनाय वेतु आज्यं पिबतु। वसुवने। वसुधेयस्येति सप्तमी षष्ठ्यो च
चतुर्थ्यर्थे। हेमनुष्यहोतः त्वमपि यज। एवमग्रेऽपि कंडिकाशेषो व्याख्येयः ५

देवीर्द्वारः। एकाधिकाराङ्करी। यत्ताः दृढद्वारो त्रेदेवताः। यच्छन्ति नियन्ता भवन्ति अस्मिन्नितो यत्रेति यामः। कर्म। यमेरनिण प्रत्ययोऽह
हि अस्मनम्पाल्कृ। यामनिकर्मीणा यां द्वारो देव्य इंद्रं अवर्द्धयन्। कीदृश्यो द्वारः। संयोनानादेहलीक पाटद्वार शाखार्गलादिस
मृदेमन्ति वीर्द्धीः वीयः दृढाः संयानं विनानद्वारं दृढत्वं स्यात्। ता द्वारो रोऽउककाटं अनुद्रिता। काटः कूपः। कलितः काटः
८३ कःकारः। रोऽउभिः कृत्वा ककाटः। रोऽउककाटस्मयत्युदंता निवर्तयन्तु। किमित्यतो विशेषणं कीदृशा कूपा वत्सनगोप
रेणा। तरुणेनककुमारेण वेश्याः। अभिमुखेन। सर्वाणि। अर्थिते गम्यते यत्रेत्सर्वा इतः। अत्यन्तं विन्यन्तो दृश्येपि दृश्यन्त

देवीर्द्वारो अस्कुर्ध्वं मख्यानेऽवीद्धीर्या मम त्वर्द्धयन्। अावत्सेन तरुणेन कुमारेण वमीवताधर्वाणं।
रोऽउककाटम्युद्‌दन्ता वसत्ववनेवसत्पेयमवान्तयज्ञ ५ देवी उषासानक्तेदुष्मंतंप्रयज्ञम्वेता
म देवीर्विशः आयामिष्ठः सप्रीतेसुयितेवसत्वनेवसत्पेयमवीतायज्ञ ६

इतिवतिपुप्रत्ययः। कीदृशेन। मीवतामीसुहिंसायां। मयनंमी। क्विप्। मीरस्यास्तिमीवान्। तेन। हिंसाशीलाः अचलाउत्तले
नोवत्सा कुमारास्थ्य पत्र पतंतितं कूपं। अपवृदेन्पर्थः। उपलक्षणमेतत्। यकृप्रजा विघ्नकराणि कूपादीनि मार्जनयं
निस्पाशायः। नावंतच। देवी उषासानक्ता। अग्निमेदुत्तिक। उषा अनक्ता स्वउषा सादेमः। अहोरात्राधिष्ठात्र्यौ देवी देवेत्याय
ते प्रयतिप्रवर्तमाने मतिइंद्रं अाहूत्नं। अाहूतवत्या। प्रेतिप्रयन् प्रस्पर्द्धादित्वाः शानं। येचदेवीः देवसंबंधिनीर्विशः प्र
जाः प्रायास्मिष्ठं। प्रगान्तवत्या। यातेर्लुङः। वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्याद्यो देवप्रजाः। ते च वीतां पिवन्तां। ८३
कीदृश्यो। सुप्रीते। अनिते। सुयिते। सुतर्पिहिते ६

देवी जोष्ट्री । एका यिका तिजगती । जोष्ट्री जुषते प्रीयते ते जोष्ट्र्यौ प्रीतियुक्ते देवी देव्यौ वसुधिती वसूनां धनस्य धितिर्यायां रणायाभ्यां ते या ।
वा एथि वैमावहोरात्रे वा सस्यं च समाचेति काठकाः । ते इंद्रं देवं अवर्द्धतां । अवर्द्धयतां । तयोर्मध्ये अन्या एका अया । अघानि पापानि द्वे
षांसि ते भाग्यानि च अपाविपुष्ट्याभावो दूरीकरोति । याते स्त्रिणा लकाव्यात्ययः । अन्या द्वितीया । वार्याणि वरणीयानि भोग
योग्यानि वसु वसूनि धनानि । आवक्षत् । आवहति । कीदृश्यौ ते । शिक्षिते । विदितवेद्ये । तत्त्वज्ञे ते वीतां २५ देवी ऊर्ज्जाहुती । वि
हृतिः । अयमत्र मंत्रो काठवना विकल्पः देवी देव्यौ एवं प्रेषाक्ते पयसा दुग्धेन शुद्धं अवर्द्धतां । अवर्द्धयतां । छेदस्तमयथेतिशय
आई यात्तकवाणि चेलोपः । कीदृश्यौ । ऊर्ज्जाहुती । ऊर्ज्जा विलक्षणयुक्ता आहुतिराह्वानं ययोस्ते उये । दुग्धस्ते दुघे । उदृक

देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्द्धताम् अयाव्यन्याघा द्वेषांस्यान्यावक्षद्वसु वार्याणि यजमानाय शिक्षिते ।
वसुवने वसुधेयस्य वीतां यज १५ देवी ऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धताम् इषमूर्जमन्यावक्षत्सग्धिं
ऽ-सपीतिमन्या नवेन पूर्व्वं दयमाने पुराणेन नवमधातामूर्ज्जमूर्ज्जाहुती ऽऊर्ज्जयमाने वसु वार्याणि यजमा
नाय शिक्षिते वसुधेयस्य वीतां यज १६

न्यघश्रेनिकपघाटेषामत्रादौ गच्छे । अनयोरन्नुसंभोगमिमाः सर्वाः प्रजा अनुसंभुजते इति श्रुतेः सुदुघे । साधुदोग्ध्र्यौ । तयोर्म
ध्ये अन्या एका इषमन्नं ऊर्जं दध्यादि च वक्षत् वहति । यजमानाय । अन्या द्वितीया सग्धिं सपीतिं च वक्षत् । समानाग्धिर्भोजनं
सग्धिः । समानापीतिः । पुत्रादिभिः सह पानभोजनं वहति । ये देव्यौ नवेनान्नेन पूर्वं कृतवन्त्यौ विपर्ययः । कीदृश्यौ दयमाने र
क्षन्त्यौ हृपयन्त्यौ वा । ऊर्ज्जाहुती ऊर्ज्जा प्रत्ना आहुतिर्ह्वानं ययोस्ते ऊर्ज्जं रसं ऊर्ज्जयन्त्यौ तेन वर्द्धयन्त्यौ । शिक्षिते । तत्त्वज्ञे । ते वीतां पि
बतां ७

देवो देव्या। अग्निर्जगति। एकः पार्थिवोऽग्निः। अग्नेर्मध्यमः। देवा। देवी देव्या। दैव्या होतारौ। इन्द्रं देवं अवर्द्धतां। यजमानाय वार्या
८४ णि। वसु। वसूनि च। आभार्ष्टां। आहृतवन्तौ। आङ्‌पूर्वाद् हरतेर्लुङ्। हस्य भः। कीदृशौ। हतो हृदशे सौ। अघं पापं शंसतीच्छन्ति
अघशंसः पापी। हतो। इत्यंशोपाभ्यां नौ। पापिनिवर्त्तकौ। नो वीतां। त्रिवीस्त्रिसः अग्निर्जगती। तिस्रो देवाः देव्यः पतिं पा
लकमिन्द्रं अवर्द्धयन्। आदरार्थे पुनरुक्तिः। नाराशाह। भारती दिवं स्वर्गमस्पृक्षत्। स्पृशन्ति भर्त्तौ रविकान्तिभिः। तो।
। सरस्वती रुद्रैर्यज्ञे अस्पृक्षत्। वसुमती वसुयुता इडा गृहान् अस्पृक्षत्। गृहशब्देन भूलोकः। पृथ्वीं तु। देव इन्द्रः। क्र

देवो दैव्या होतारा देवमिन्द्रमवर्द्धताम् हताघशंसावाभार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ वसुवने
वसुधेयस्य वीतां यज १० देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् अस्पृक्षद्भारती दिवं रुद्रैर्यज्ञं सर
स्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ११ देव इन्द्रो नराशंसस्त्रिवरूथस्त्रिबन्धुरो देवमि
न्द्रमवर्द्धयत् शतेन शितिपृष्ठानामाहितः सहस्रेण प्रवर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिः स्तो
त्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज १२

तिः। नराः अस्मिन्नासीनाः शंसन्ति नराशंसो यज्ञो देव इन्द्रो देवं अवर्द्धयत्। कीदृशो नराशंसः। इन्द्रः। इन्द्रतीतीन्द्रः ऐ
श्वर्यवान्। त्रिवरूथः। वरूथं गृहं। त्रीणि वरूथानि सदो हविर्द्धानाग्नीध्राणि यस्य सः। त्रिबन्धुरः। त्रीणि बन्धुराणि
ऋग्यजुःसामलक्षणानि बन्धनानि यस्य। स नराशंसः शितिपृष्ठानां शतेनाहितः सन् सहस्रेण गोसहस्रेण गोस
हस्रेण प्रवर्त्तते। शितिपृष्ठा मेचकपृष्ठा यासां ताः शितिपृष्ठा गावः। मित्रावरुणौ इत्। मित्रावरुणावेवास्य नराशंसस्य हो ८५
त्रमर्हतः। होतृकर्मणि योग्यौ भवतः। बृहस्पतिः स्तोत्रं ऋत्विजां त्रमर्हति। अश्विनौ। अस्याध्वर्यवमर्हतः। सेवेतु ८

देवोदेवैः अतिशयक्रतो। सूयत उच्यते। वनस्पतिर्द्देवोदेवैः सह इंद्रम् अवर्द्धयत् कीदृशः। हिरण्यपर्णः। हिरण्मयानि पर्णानि यस्य मधुशाखः। मधुर्मधुरा रसवती। शाखायस्य। सुपिप्पलः। शोभनानि पिप्पलानि फलानि यस्य। योवनस्पति रोणात्दिवंस्वर्गं अस्पृक्षत् तेनः। स्पृशतिः स्पृशेर्लुङि शलइगुपधादनिटः क्सः इति क्सप्रत्ययः। अंतरिक्षं मध्येनेति शेषः। आस्पृशन्ति। पृथिवीमु परेणेति शेषः। अदृंहीत्। दृढामकरोत्। सवेतु। देवंबर्हिः। आर्षीत्रिष्टुप्। बर्हिः अनुयाजदेवं इंद्रंदेवम् अवर्द्धयत् अन्याः। अ न्यानि बर्हींषि अभ्यभूत्। अभिभवति। तद्धेतुः। कीदृशीबर्हिः। वारितीनाम् ओषधीनां मध्ये देवं। दीप्यमानं अंहे। वारिजलेषु

देवोदेवैर्वनस्पतिर्हिरण्यपर्णोमधुशाखः सुपिप्पलोदेवमिन्द्रमवर्द्धयत्। दिवमग्रेणास्पृक्षदान्तरिक्षंपृथि वीमदृंहीद्वसुवनेवसुधेयस्यवेतुयज २० देवम्बर्हिर्वारितीनान्देवमिन्द्रमवर्द्धयत्। स्वासस्थमिन्द्रेणास न्नमन्याबर्हींष्यभ्यभूद्वसुवनेवसुधेयस्यवेतुयज २१ देवोऽअग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत्। स्विष्ट ङ्कुर्वन्त्स्विष्टमद्यकरोत्वनोवसुवनेवसुधेयस्यवेतुयज २२ अग्निमद्यहोतारमवृणीतायंयजमानःपच न्पक्तीःपचन्पुरोडाशंबध्नन्निन्द्रायछागम्। सूपस्थाऽअद्यदेवोवनस्पतिरभवदिन्द्रायछागेन। अघत्त म्मेदस्तःप्रतिपचताग्रभीदवीवृधत्पुरोडाशेन। त्वामद्यऽऋषे २३

निर्गनिर्यासेन। वारितयोजलाश्रिता ओषधयः। स्वासस्थम्। स्वावेनआसेनास्थेन स्थीयतेयत्र तत् स्वासस्थं। इंद्रेण आस न्नं। आश्रितं। देवोअग्निः। आर्षीत्रिष्टुप्। स्विष्टकृत् देवः अग्निः। इंद्रं देवम् अवर्द्धयत्। नोअस्माकं स्विष्टम् अद्य इष्टं करोतु। वे नच। कीदृशः। स्विष्टकुर्वन्। स्विष्टकृत नाम। शोभनम् इष्टकर्तव्यमिति तस्मात् क्रारः। अग्निमद्यात्रयं प्रती। कउभयत्रा पि। पेद्रपशुसंबंधीसूक्तवाकप्रैषः। त्वामद्यऋषे इत्ययं मंत्रउभयत्रापि पैद्रानुवाकेवायोपसानुवाकेचप्रतीकोक्तः।अ

दिमात्रेणोक्तः सकलोज्ञेयः। अग्निमद्यापकायिका प्रजापत्याजगती। सूपस्थाः। ब्राह्मीउष्णिक्। त्वामद्य। पकायिकविकृतिः। व्याख्यानः प्रैषः ४

होतायक्षत्समिधानं।एकादशवयोधायमेषयोऽप्रयाजप्रैषाः समित्तनूनपान्नाराशंसीदेवताः।अतिजगती।देवो होताऽग्निं
वायोधसमिंद्रं चयजतु।वयश्चायुर्दधातिवयोधायाः।तंआयुर्येदातारंयारयिन्तं।कीदृशमग्निः।समिधानं दीप्य
मानं।महद्यशः।सुपांसुलुगिति तृतीयैकवचनस्य सुआदेशः।महतायशसा।समिद्धं।दीप्तं।वरेण्यं।वरणीयं।किंकुर्व
न्यजतु गायत्रीछंदः।इंद्रियंमेवीर्यंअविंगावयःआयुस्तदन्नत्स्थापयन्।इंद्रेइतिशेषः।द्वादशमासात्मकः कालोऽवि।त्रयोऽ
वयाः।एषाः।सात्र्यविः।सोऽर्द्धसंवत्सरः।गौः।तांप्रयाजदेवतांउद्युक्ताः।आज्यंवेतु।हे मनुष्य होतस्त्वमपियज।एवम
ग्रेपि।होता।तनूनपातं।एकाधिकाजगती।होतानतनूनपातं।एकाधिकाजगती।होतानतनूनपातंप्रयाजदेवंवयोध

होतायक्षत्समिधानंमहद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् गायत्रींछन्द इन्द्रियं त्र्यविं गां व
योदधद्वेत्वाज्यस्य होतर्यज २४ होतायक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम्
उष्णिहंछन्द इन्द्रियं दित्यवाहं गां वयोदधद्वेत्वाज्यस्य होतर्यज २५ होतायक्षदीडेन्यमीडितं वृत्रहन्तम
मिडाभिरीड्यं सहः सोममिन्द्रं वयोधसम् अनुष्टुभंछन्द इन्द्रियं पञ्चाविं गां वयोदधद्वेत्वाज्यस्य होतर्यज

समिंद्रं चयजतु।अदितिर्यं गर्भं दध्येतमिंद्रमित्यर्थः।कीदृशंतनूनपातं।उद्भिदं।उद्भिनत्तिप्रकटयतिफलानिमित्युद्भि
त्।।न।एतत्फलानांउद्भेत्तारं।शुचिं।पवित्रं।किंकुर्वन्।उष्णिहंछंदः।इंद्रियंदित्यवाहंगांवयश्चइंद्रेदधन्।द्विवर्षो गौर्दित्य
वाट्।सर्वेऽङ्गवेतु।हे।ईडेन्यं।स्तुत्येनशोभनकरी।होता।इडाभिः।प्रयाजदेवताभिः सह वयोधसमिंद्रं यजतु।कीदृशंइंद्रं।ईडे
न्यं।ईडितुंयोग्यं।ईडेन्यः।ईडेरेन्यप्रत्ययः।ईडितं।ऋषिभिः स्तुतं।वृत्रहंतमं।अत्यंतंवृत्रहा।वृत्रहन्तमः।तं।नाद्घस्येतितुडा
गमः।इड्यंसर्वैःस्तुत्यं।सहः।सोमं।सहसावलेनसोमवदाह्लादकं।किंकुर्वन्।अनुष्टुभंछंदः।इंद्रियंपंचाविंगांवयश्चेंद्रेदधत्

ते।पंचवर्षोपयसः सामर्द्धिविकोः सर्वत्र १०

होस्तु बर्हिषं शङ्को। होता वयोधसमिंद्रं यजतु। कीदृशं स्वबर्हिषं। शोभनं बर्हिः प्रयाजदेवता यस्य तं। एषां स्थाल्लिएव
णपाल्लम्रदसा युक्तं। अमर्त्यं अमरणधर्माणं। प्रिये रुचिते। अमृता। अमृते अन्नस्थे बर्हिषि सीदंतं निषण्णं। किं कुर्वन्। बृ
हतीच्छंदः इंद्रियं त्रिवत्सं गां वयश्चेंद्रे दधत्। वत्सं संवत्सरः। त्रेधा वसाय स्मा। त्रिवत्सो गौः त्रिवर्षो वृषः सा वेत्तु। होव्यच
स्वतः। अग्निशाक्को। होता द्वारो देवीः ब्रह्माणमपि इहेंद्रं वयोधसमिंद्रं च यजतु। कीदृशीर्द्वारः। व्यचस्वतीः। व्यचो
व्यचनं गमनावकाशो विद्यते यासु ताः। अत एव सुप्रायणाः। शोभनेन प्रकर्षेण। यन्ते गमयंते यासु ताः। ऋतावृधः

होता यक्षत्स्वबर्हिषमूर्णम्रदसमर्त्यं ॰ सीदन्तम्बर्हिषि प्रियेमृतेन्द्रं वयोधसम् बृहतीञ्छन्द इन्द्रि
यन्त्रिवत्सङ्गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज २७ होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो
देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् पङ्क्तिञ्छन्द इहेन्द्रियन्तुर्यवाहङ्गां वयो दधद्व्यन्त्वा
ज्यस्य होतर्यज २८ होता यक्षत्सुपेशसा सुशिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं
वयोधसम् त्रिष्टुभञ्छन्द इहेन्द्रियम्पष्ठवाहङ्गां वयो दधद्वीतामाज्यस्य होतर्यज २९

सत्यस्य वर्धयित्रीः। हिरण्ययीः हिरण्मयोः दृढाः। किं कुर्वन्। पंक्तिच्छंदः इंद्रियं तुर्यवाहं गां वयश्च इह इंद्रे दधत्।
सार्द्धत्रिवर्षो गौः तुर्यवाट्। तं यं वत्सं चतुर्वर्षं वहतीति। होस्तु पेशसा। अग्निशाक्को। होता उभे। नक्तोषासौ विश्वंस
वीत्मकं वयोधसं इंद्रं च यजतु। नक्ता रात्रिः उषा रात्रेः परभागः नक्ता [illegible]ः। कीदृशे उभे नक्तोषसौ। सुपेशसौ।
पेशसौ। पेश इति रूपनाम शोभनं पेशो ययोस्ते। सुरूपे। सुशिल्पे यद्वै प्रतिरूपं तच्छिल्पमिति श्रुतेः सुष्ठु शिल्पं ययो

हो॰ प्रचेतसा। एकाधिका शक्करी। होता देव्या। होतारा। दैव्यो होतारौ वयोधसमिंद्रं च यजतु। अयं चाग्निरसौ च मसः यय इति हो
तारौ। कीदृशौ। प्रचेतसा। प्रकृष्टं चेतो ज्ञानं देवानां उत्तमं यशः। ऊर्जीकृतं देवयशो याभ्यां तौ। कवी। क्रांतदर्शिनौ। सयुजौ। सहयं
कौ तौ। सम्मानयोगौ। किं कुर्वन्तौ। जगती छंदः। इंद्रियमनड्वाहं गां वयः अश्वं दधत्। अनड्वान शकटवहनोत्पन्नड्वान्। शा
कटवमो वृषः। तौ वीतां। हो॰ पेशस्वतीः। एकाधिका शाक्करी। होता तिस्रो देवीः पतिं पालकं वयो धसमिंद्रं च यजतु।
कीदृश्यो तिस्रः। पेशस्वतीः। पेशो रूपमस्ति यासां ताः। रूपसमृद्धाः। हिरण्यपी हिरण्यपालकृतदेहाः। बृहतीः।

होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम्। जगती छन्दः इन्द्रियमनड्वा
हं गां वयो दधद्वीतामाज्यस्य होतर्यज ३० होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पति
मिन्द्रं वयोधसम्। विराजं छन्दः इहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ३१ होता यक्षत्सुरेत
समं त्वष्टारं पुष्टिवर्धनं रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम्। द्विपदं छन्दः इन्द्रियमुक्षाणं गां न वयो
दधद्वेत्वाज्यस्य होतर्यज
भा वेण्णा मही महतीः तेजसा। आदित्यैरिंद्राग्नि संबंधाना कान्ताः। भारती बहुवच
ने इडा इति सरस्वत्यादिभ्यः। इडा सरस्वती भारत्यस्तिस्रः। किं कुर्वन्त्यः। विराजं छंदः। इंद्रियं धेनुं गां वयश्च दे
दधतन्। नकार उपमार्थः। सेंद्राः सावंतु। हो॰ सुरेतसं। एकाधिका शक्करी। होता त्वष्टारं वयोधसमिंद्रं च यजतु। कीदृ
शं। नकारम् सुरेतसं। शोभनं रेतो यस्य तं। जगतीं च उपमार्थः सेंद्राः सावंतु। हो॰ सुरेतसं। एकाधिका शक्करी। होता त्व
ष्टारं वयोधसमिंद्रं च यजतु। कीदृशं त्वष्टारं। सुरेतसं। शोभनं रेतो यस्य तं। जगदुत्पादकत्वात् शोभनं रेतः। पुष्टिव

हो॰ वनस्पतिं। अन्वयः। होता वनस्पतिं वयोधसमिंद्रं च यजतु। कीं वनस्पतिं। शमितारं संस्कर्त्तारं हविषां। शतक्रतुं बहु-
कर्माणं। हिरण्यपर्णं। हिरण्मयानि पर्णानि यस्य तं। उक्थिनं। उक्थानि शास्त्राणि संत्यस्य। यत्तं वनेवा। रशनां रज्जुं बिभ्र-
तं। स्वभावानुवादः। यूपे हि पशुर्बध्यते। वशिं कांतं। भगं। भजनीयं। किं कुर्वंतं। ककुभं छंदः इंद्रियं वशां वंध्यां
वेहतं गर्भोपघातिनीं च गां वयः स्वर्द्दू इंद्रे स्थापयत्। सेंद्रो वनस्पतिर्वेतु। होता स्वाहाकृतीः। अग्निपक्षे री। होता स्वाहाकृतीः
प्रयाजदेवताः इंद्रं च यजतु। कीदृशमिंद्रं। अग्निं। अग्रगतोऽस्त्यग्निः। अग्रे गंतारं। पृथक् प्रत्येकं यज्ञेषु। गृहपतिं। गृहपतिं

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनां बिभ्रतं वशिं भगमिन्द्रं
वयोधसम् ककुभं छन्द इहेन्द्रियं वशां वेहतं गां वयो दधद्वेत्वाज्यस्य होतर्यज ३३ होता यक्षत्स्वाहा-
कृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् अतिछन्दसं छन्द इन्द्रियम्बृ-
हदृषभं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ३४ देवं बर्हिर्वयोधसं देवमिन्द्रमवर्द्धयत् गायत्र्या छन्द-
॥ सेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य

गृहस्य पालकं। वरुणं। व्रियते सो वरुणस्तं। क्षत्रिमि
वरणीयं। भेषजं। रोगनाशकं। कविं। क्रांतदर्शिनं। क्षत्रं। दत्तं क्षत्रस्य त्रातारं क्षत्रं वयोधसं। आयुषो दातारं। किं कुर्वंत
। अतिछंदसं छंदः इंद्रियं वीर्यं बृहद्महत्। ऋषभं वृषभं गां वयश्च इंद्रे दधत्। सेन्द्राः स्वाहाकृतय आज्यं पिबंतु। मनुष्य
होतस्त्वमपि यज। देवं बर्हिः। वायीयसे यज्ञावेवैकर्दशानुयाजानां प्रैषाः। बर्हिरादिदेवताः। एकादशिके का-
श्यपैस्त्रिष्टुभो हे। बर्हिर्देवं वयोधसं इंद्रं देवं अवर्द्धयत्। कीदृशं बर्हिः। गायत्र्या छंदसा कृत्वा चक्षुरिंद्रियं वय

८

देवीर्द्वारः। द्वारो देव्यः वयोधसं शुचिं पवित्रं इन्द्रं अवर्द्धयन्। कीदृशाः। उष्णिहा छन्दसा इन्द्रियं प्राणं इन्द्रे वयो दधत्यः। हे होतः त्वं यज। लिङ्गवचनव्यत्ययः। व्यन्तु। देवी उषासानक्ता। अहोरात्रे। उषासानक्ता। देवी देव्यौ वयोधसं इन्द्रं देवं अवर्द्धताम्। उषश्च नक्तं च उषासानक्ता। उषासोषसः इति उषः शब्दस्य। देवताद्वंद्वे उषासा आदेशः। कीदृशे। ... देवी दीप्यमाने। कीदृशं इन्द्रं देवं दीप्यमानं। एको देवी देवशब्दो दीप्तिवाचकः। अन्यो देवतावाचकः। अनुष्टुभा छन्दसा बलं इन्द्रियं वयः इन्द्रे दधत्यौ। लिङ्गवचनव्यत्ययो वा। व्यन्तां। देवी जोष्ट्री। देवी देव्यौ। दीप्यमाने देवी देव्यौ। यज देवते

देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रमवर्द्धयन् उष्णिहा छन्दसेन्द्रियम्प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ३६ देवी उषासानक्ता देवमिन्द्रं वयोधसं देवी देवमवर्द्धताम् अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ३७ देवी जोष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्द्धताम् बृहत्या छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ३८ देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्द्धताम् पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ३९ देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्द्धताम् त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेये

देवं दीप्तं वयोधसमिन्द्रं देवं अवर्द्धताम्। देवी देवशब्दौ पूर्ववत्। कीदृश्यौ। जोष्ट्री। जोषयित्र्यौ। प्रीतियुक्ते। उषा सत्त्वा वसुधिती वसूनां धापयित्र्यौ। बृहत्या छन्दसा श्रोत्रं इन्द्रियं वयः इन्द्रे दधत्यौ। देवी ऊर्जाहुती शाकरी। देवी दीप्ते ऊर्जाहुती ऊर्क् अन्नम् ... पयसा वयोधसं देवं इन्द्रं अवर्द्धतां। कीदृश्यौ। दुघे दोग्ध्र्यौ। सुदुघे सुष्ठु दोग्ध्र्यौ। पङ्क्त्या छन्दसा शुक्रं वीर्यं

९७

देवीस्तिस्रः एकाधिका ब्राह्मी अनुष्टुप्। तिस्रो देव्यो भारतीडासरस्वत्यः पतिं पालकं वयोधसमिंद्रं अवर्द्धयन्। अभ्यासमाद् गायत्र्यः कीदृ
दृश्यः। जगत्याछन्दसा मूषं बलमिंद्रियं वयश्च दधदः। देवी नराशंसः। अतिजगती देवो नराशंसोऽदेवोऽदेवदीमवर्धयत्
इंद्रं देवमवर्द्धयत्। कीदृशः। विराजाछन्दसा रूपमिंद्रियं वयश्च दधत् देवीवनस्पतिः। अतिजगती देवो वनस्पतिर्द्यु
देवं घातनं वयोधसमिंद्रं अवर्द्धयन्। कीदृशः। द्विपदाछन्दसा भगं सौभाग्यरूपमिंद्रियं वयश्च दधत्। देवं बर्हिः। ब्राह्मी बृ
हती बर्हिर्देव इंद्रमवर्द्धयत्। कीदृश इंद्रं। देवं दीप्यमानं वयोधा दातारं। कीदृशं बर्हिः। वारितीनां वा ओषधीनां सकाशात्। ३
देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्द्धयन् जगत्याछन्दसेन्द्रियं शूषमिन्द्रे वयो दधद्वसुवने वसुधे
यस्य व्यन्तु यज ४१ देवो नराशंसो देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत्। विराजाछन्दसेन्द्रियं रूपमि
न्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ४२ देवी वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत् द्विपदाछ
न्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ४३ देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं
देवमवर्द्धयत् ककुभाछन्दसेन्द्रियं यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ४४ देवो
अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत् अतिछन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसु
वने वसुधेयस्य वेतु यज ४५ अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशान् बध्नन्निन्द्राय वयो
धसे छागम् सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे छागेन
तिरुन्मतिर्वीसेनवाक्तिपत्यपयसा सामध्ये देवदीमें इन्द्रमित्यर्थः ककुभाछंदसा रूपमिंद्रियं वयश्च दधत्। देवो अ
ग्निः। ब्राह्मी बृहती। देवो दाता स्विष्टकृदग्निर्देवो वयोधसं देवदीममिंद्रं देवमवर्द्धयत्। कीदृशः अतिछन्दसा तत्त्वं दमात्रा रू
पमिंद्रियं वयश्च दधत्। सर्वस्तुवननाय वसुधानाय च वेतु हे होतः त्वमपि यज। अग्निमद्य। एकाधिका ब्राह्मी गायत्री
त्रपस्या। ब्राह्म्यनुष्टुप्। एते आख्याते। वामघप्रतीकोक्तः सर्वोपि पाठः। एकाधिका विकृतिः। अयमपि व्याख्यातः। ३६

यवयोधसे इति विशेषः ४६ श्रीमन्महीधरकृते वेददीपे मनोहरे अष्टाविंशो
यमध्यायोऽयमसौत्रामणीभव इति सौत्रामणीसंबंधि प्रयाजानुयाजप्रैष
निरूपणं नामाष्टाविंशोऽध्यायः २८

समिद्धो अञ्जन्। अश्वमेधिकोऽध्यायः। ततोऽस्य प्रजापतिरृषिः। आद्या एकादश त्रिष्टुभ आप्रीसंज्ञास्तत्र त्रयो वामदेवपुत्रे
ण बृहद्दु... न समुद्रपुत्रेण आश्वेन वा दृष्टाः समिद्धतनूनपादिडादिदेवताकाः। हे अग्ने हे जातवेदः जातप्रज्ञान त्वं देवानां
सधस्थं सह तिष्ठन्ति यत्रेति सहस्थानं प्रति प्रियं प्रीतिमापद्यिः आवह। देवान् ...ये न्यर्थः वहतेः शपो लुक्। किमथ्यमे
८६ कवचने रूपं। कीदृशस्त्वं। समिद्धः दीप्तः। प्रतीनां कृदरं वुद्धीनां उदरं गर्भं अञ्जन् व्यक्तीकुर्वन्। बुद्धिरहस्यं प्रकाशय
न्नित्यर्थः। मधुमत्। स्वादु घृतं पिन्वमानः देवेषु सिंचन् वाजी। वजगतौ। वजनं वाजी। वजगतौ। चलनवान्। वाजिनं हविः

समिद्धो अञ्जन्कृदरम्मतीनां घृतमग्ने मधुमत्पिन्वमानः वाजी वहन्वाजिनं जातवे
दो देवानां वक्षि प्रियमा सधस्थम् १ घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्यप्येतु दे
वान् अनु त्वा सप्ते प्रदिशः सचन्तां स्वधामस्मै यजमानाय धेहि २

वहन्। देवानापयन् सन् प्रीणय। घृतेनाञ्जन् वाजी अश्वो देवान् अप्येतु। गच्छतु। कीदृशः। घृतेन देवयानान् पथः
समञ्जन्। देवा यान्ति प्राप्यन्ते यैस्ते देवयानाः पन्थानो हवींषि उच्यन्ते प्रजानन्। देवानां हविरहमिति जानन्। एवं प
रोक्षमुक्त्वा प्रत्यक्षमाह। हे सप्ते अश्व प्रदिशो दिगा अयाणि भूतानि त्वा त्वाम् अनुसचन्तां सेवन्तां दशसु दिक्षु स्थितस्थानिक ८९
माणिं सेवयन्ते समस्तैः। किंच। अस्मै यजमानाय स्वधां अन्नं धेहि प्रयच्छ। अत्र घृतशब्दस्तनूनपाद्वाचः १

ईड्यश्च हे वाजिन् हे सप्ते मेध्य ईड्यः स्तुत्योऽसि वन्द्यो नमनीयोऽसि आशुः शीघ्रः। मेध्यः। मेधाया यज्ञाय योग्यः चकाराः समु
च्चयार्थाः। किंच जातवेदा अग्निः त्वां वहतु देवान्प्रापयतु। कीदृशेनाग्निः। वसुभिर्देवैः सजोषाः। जोषणं प्रीतिस्तया सहितः।
कीदृशं त्वां प्रीतं तुष्टं वह्निं हविषो वोढारं। स्तीर्णं बर्हिः। वयं बर्हिः सुष्टरीम। साधु स्तरीम। स्तरणम्। अदितिर्देवी स्तीर्णं
तद्बर्हिः सुविते सुष्ठु इते साधुगते स्वर्गलोके दधातु स्थापयतु। कीदृशी अदितिः सजोषाः। जोषणं प्रीत्या युक्ता। स्योनं कृ
ण्वाना। सुखं कुर्वती। जुषाणा प्रीयमाणा। कीदृशं बर्हिः। उरु। पृथु। पृथु। विस्तीर्णं। पृथिव्यां प्रथमानं विस्तीर्यमाणं दे

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं व
हतु जातवेदाः ३ स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् देवेभिर्यु
क्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ४ एता उ वः सुभगा विश्वरूपा वि प
क्षोभिः श्रयमाणा उदातैः ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ५

वेभिर्युक्तं। देवैः सहितं। एता उ वः। हे ऋत्विग्यजमाना वो युष्माकमेता द्वारो देवीः यज्ञगृहद्वारो देव्यः ईदृश्यो भवन्तु। सुप्राय
णाः। कीदृश्यः। सुभगाः शोभनं भगं श्रीर्यासां ताः। विश्वरूपाः। नानारूपचित्राः। पक्षशब्दः सान्तः पक्षवाची। पक्षैः प्र
वर्धमानैः कपाटैः विश्रयमाणाः। विस्तार्यमाणाः। कीदृशैः पक्षोभिः। उत् ऊर्ध्वं [गतैः]। आतैः। अतते विस्तार्यते आतताः। आत
सातत्यगमने। ऊर्ध्वप्रसरणैरित्यर्थः। पुनः। कीदृश्यो द्वारः ऋष्वाः। ऋषयन्ति गच्छन्ति ऋष्वाः। ऋषगतौ। उत सतो गमनशीलाः
महत्यः। सत्यसमीचीनाः। कवषः। कुशब्दे कवते शब्दं करोतीति कवषः। कवतेरसुन्प्रत्ययः। षत्वमार्षं। कपाटपिधानस

अन्तरा मित्रावरुणा। हे पत्नीयजमानौ वां युवयोः ऋतस्य यज्ञस्य योनौ इह उषासा उषासौ नक्तोषसौ सादयामि। स्थापयामि। हि-
रण्येन सह चारिण्यौ द्वितीया रात्रिः। कीदृश्यौ उषसौ। मित्रावरुणा। मित्रावरुणौ। अन्तरा। द्यावापृथिव्योर्मध्ये संचरन्तौ संचरन्तौ
८५ वर्तमाने। अयं वै लोको मित्रो। असौ वरुण इति श्रुतेर्मित्रवरुणशब्देन द्यावापृथिव्यौ अवगम्येते। यज्ञानां मुखं अग्निहोत्रहोमकालम-
भि संविदाने। कथयन्त्यौ। उदिते अनुदिते वा अग्निहोत्रहोमकाल इति प्राणं विप्रा वदन्तीति तदुपचर्यते। सुहिरण्ये सुहिरण्यमभू-
षणं भूतं ययोस्ते। सुशिल्पे। शोभनं शिल्पं प्रतिरूपं भवतीति वचनात्। प्रथमा वां। हे यजमानौ वां युवयोः प्रथ-

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने। उषासा वां सुहिरण्ये सुशिल्पे
ऋतस्य योनाविह सादयामि ९ प्रथमा वां सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि।
विश्वा अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता २

मौ। प्रथमौ मुख्यौ होतारौ। होतारौ अहं अपिप्रयं। प्रीणितवानस्मि। प्रीणातेर्णिजन्तस्य लुङि उत्तमैकवचनरूपं। अयं चाग्नि-
रसौ च मध्यम इति होतारौ। कीदृशौ। सरथिना। सरथिनौ। समानेन रथेन ययोस्तौ। एकरथारूढौ। सुवर्णा। सुवर्णौ। शोभनो
वर्णः द्युतिर्ययोस्तौ। देवौ। दीप्यमानौ। दातारौ। विश्वानि सर्वाणि भुवनानि पश्यन्तौ। वां युवयोः चोदना। चोदनानि कर्मा-
णि मिमाना। मिमानौ। निर्मिमाणौ। प्रदिशा प्रदेशेनाभिनयेन ज्योतिः दिशन्तौ। आहवनीयाख्यं ज्योतिर्यष्टव्यमिति
दर्शयन्तौ ३ ८६

आदित्यैर्नः। आदित्यैर्देवैः सह भारती नो ऽस्माकं यज्ञं वष्टु कामयतां। सरस्वती रुद्रैः सह नो ऽस्माकं यज्ञं आवीत्। अवतु। इडा वाच
तो। कीदृशी। उपहूता। कृतोपह्वाना। वसुभिर्देवैः सजोषाः। एवं परोक्षमभिधाय प्रत्यक्षमाह। हे देवीः देव्यो भारती सर
स्वतीडाः नो ऽस्माकं यज्ञं अमृतेषु देवेषु धत्त स्थापयत। त्वष्टा वीरं। त्वष्टा वीरं पुत्रं जजान जनयति। कीदृशं वीरं। देव
कामं। देवान् कामयते देवकामस्तं। यष्टारं। अत्र त्वष्टा यागकरणसमर्थमित्यर्थः। त्वष्टुः सकाशादर्वाऽश्वो जायते उत्पद्यते। की
दृशोऽश्वः। अर्वा। इयर्ति गच्छतीत्यर्वा। अन्येभ्योऽपि दृश्यन्त इति क्वनिप्। आशुः। अश्नुते दिशो व्याप्नोतीत्याशुः। अश्नोतेर्दय

आदित्यैर्नो भारती वष्टु यज्ञं सरस्वती सह रुद्रैर्न आवीत्। इडोपहूता वसुभिः सजोषा यज्ञं
नो देवीरमृतेषु धत्त ८ त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः। त्वष्टेदं वि
श्वं भुवनं जजान बहोः कर्त्तारमिह यक्षि होतः ९ अश्वो घृतेन त्मन्या समक्त उप देवाँ॥ऽ
ऋतुशः पाथ एतु वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् १०

नि वा आशुः। उण् प्रत्ययः। किंच त्वष्टा इदं विश्वं सर्वं भुवनं जातं जजान। उत्पादयत्। हे होतः एवं बहोः कार्यस्य कर्त्तारं त्वष्टा
रं इह यज्ञे यक्षि यज। यजतेर्लेटि शपि लुक्। रूपं। अश्वो घृतेन पाथ उप एतु नाम। अश्वोऽत्र छागरूपं हविः। ऋतुशः ऋतौ ऋ
तौ यज्ञकाले त्मन्या आत्मना स्वयं देवान् उप एतु। प्राप्नोतु। विभक्तेर्यादेशो मंत्रेष्वाङ्यादेरात्मन इत्या
लोपः। कीदृशोऽश्वः। घृतेन समक्तः पत्नीभिः संस्कृतः। किंच। वनस्पतिर्देवो हव्यानि हवींषि। वक्षत् वहतु। देवान् प्र
तीति। स्वदितानि स्वादूकृतानि। कीदृशो वनस्पतिः। देवलोकं प्रजानन्। विदन्। अग्निना एव वहतु। कीदृशानि हव्यानि।

ऋक्तानयोर्दितानि ऋक्ष्वादितानि। ऋक्षायामिष्टितानि ८

प्रजापतेस्तपसा। हे अग्ने त्वं यज्ञं दधिषे धारयसि। लडर्थे लिट्। कीदृशस्त्वं। प्रजापतेस्तपसा वावृधानः। वर्द्धमानः। सद्योजा
तः। अरणिपातु मन्त्रः। किंच। स्वाहाकृतेन स्वाहाकारं उच्चार्य दत्तेन हविषा सह पुरोगाः पुरो गच्छतीति अग्रगामी सन् याहि
५० देवान् गच्छ। तथि गतेसति देवाः हविः अदंतु। भक्षयन्तु। कीदृशं हविः साध्या॥ प्रियं॥ श्रेष्ठं। विभक्तेर्ड्या देशे टिलोपे हू
९० पं यदक्रन्दः। त्रयोदशाश्वस्तुतिरूपास्त्रिष्टुभो जमदग्निदृष्टास्तमाभ्यां दृष्टाः। अश्वस्तवनो वितियुक्ताः। हे अर्वन्। अश्व
त्वं यदा त्वं आक्रन्दः। क्रंदितवान् हेषारवमकार्षीः। तदा तेत्तव महिमानम्य उपस्तुत्यं स्तोतव्यं जातं। कथं त्वं जनिता दा

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने स्वाहाकृतेन हविषा पुरोगा याहि साध्या
हविरदन्तु देवाः॥ यदक्रन्दः प्रथमं जायमानः उद्यन्त्समुद्रादुत वा पुरीषात् श्येनस्य पक्षा ह
रिणस्य बाहू उपस्तुत्यम्महि जातन्ते अर्वन्॥ यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्य
तिष्ठत् गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट॥

। श्येनस्य पक्षौ हरिणस्य बाहू अनेन क्रंदनेन जितौ विजितौ येषौ। श्येनपक्षौ शौर्ये हरिणबाहू वेगे भजितौ विस्पष्टौ:
कीदृशस्त्वं समुद्राद् अंतरिक्षात्। उदयेर्वा प्रथमं जायमानः। उत वा अथवा पुरीषात्। पृषाः सकाशात्। उत्पद्यमानः। य
मेन दत्तं। वसवो गणा देवाः सूरादित्यमंडलाद्‌श्वं निरतष्टा। निःकृष्टवन्तः। तैस्तनेर्लङि मध्यमबहुवचने। ततः त्रि
तः त्रिस्थानो वायुः। यमेन दत्तं एनं अश्वं अयुनक् युक्तवान् युजे लङ। संहितायामटो दीर्घः। इन्द्र एनं प्रथमः।
अध्यतिष्ठत् आदावधिष्ठितवान् गन्धर्वो विश्वावसुरस्याश्वस्य रशनामगृभ्णात्। गृहीतवान्। यदीदृशस्त्वमसि ९०

असियमः हे अर्वन् त्वं यमोसि । आदित्यश्चासि । गुह्येन गोप्येन व्रतेन कर्मणा त्रितः त्रिस्थान इन्द्रोसि । सोमेन समया सह विपृक्तः सं
पृक्तः एकीभूतोसि । एवं यमादिभिः सायुज्यप्राप्तस्य तव दिवि नभसि आदित्यरूपेणावस्थितस्य त्रीणि बंधनानि बुधा आहुः । ऋ
ग्यजुःसामरूपाणि मंडलानि तत्सहस्रार्चींषि त्रीणि बंधनानि स्वरूपाणि । यदेतं मंडलं तपति तन्महदुक्थमित्यादिश्रुतेः
त्रीणि ते । हे अर्वन् यत्र तेन तव । परमं जनित्रं जन्म बुधा आहुः आदित्यरूपेण । तत्र तेन तव त्रीणि बंधनानि सर्वमंत्रोक्तान्याहुः । अ
प्सु उदके त्रीणि बंधनान्याहुः । अपांहि बीजमिति । अन्तः समुद्रे अन्तरिक्षमध्ये त्रीणि बंधनान्याहुः । मेघा विद्युत्स्तन

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि
दिवि बन्धनानि १४ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे उतेव मे वरु
णश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् १५ इमा ते वाजिन्नवमार्जनानीमा शफानां
सनितुर्निधाना अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः १६

यित्नुरिति । उतेव उतापि च वरुणो वरणात्मकस्त्वं मे मां छंत्सि । प्रशंससि । कर्मणि षष्ठी । छंदतीति रचनिकर्मा । अर्चनं प्रशंस
सि । कर्मणि षष्ठी । छंदसीति कर्मा । अर्चनं प्रशंसनं । इमानि हे वाजिन् ते तव इमत्ते गानि । अवमार्जनानि अङ्गे हे अपशर्पमी
। अवमार्ज्यन्ते यैस्तानि । अवमार्जनानि वनस्पटादीनि शफानां खुराणां सनितुः संभक्तुर्नियंतुः पादन्यासभूमा इमानि
नि धाना । निधानानि स्थानानि अपश्यं अत्र यज्ञे तेन तव रशनानां मध्ये बंधनरज्जुरपश्यं पाकी हृष्टा या रशना । भद्रा कल्याणी

५।
आत्मानं ते। एवमश्वं स्तुत्वा आम विघ्नकर्मिणा स्तौति। हे अश्व एतेन वा आत्मानं मनसा आरात् हृदि अहं ते ज्ञानेन जानामि। जानाति इति लिङ्गमत्र आत्मने
कवचनं। कीदृशम् आत्मानं। अव: अपथस्नान प्रदेशात् प्रदेशं दिवा नभो मार्गेण पतंगम् सूर्यं [illegible] तिपतयं तं। उत्पतन्तं पतन्तं पश्यंगतं आस्तुरा
दिवटनः। किंच ते शिरः सूर्यरूपं पश्यामि। कीदृशं शिरः। पथिभिर्नभोमार्गैः नेहमा [illegible] छन्नं। कीदृशैः पथिभिः स्तोमिः। स
गैः। स्तोवनगम्यते येषु तेषु स्तोगास्तैः। स्तुडोरापिकरणगमेर्डः। अरोगाभिः नास्ति रोगउपद्रवो येषु ते अरोगाः तैः। उपद्रवरहितैरित्य

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम्। शिरो अपश्यं पथिभिः सुगेभिरेरेणुभिः
जेहमानं पतत्रि ६ अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो
अनु भोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः १६ ॥

थैः। पुनः कीदृशं शिरः। पतत्रि। पतनशीलं। गन्तृ। अत्रा ते हे अश्व अत्र अस्मिन् गोः सूर्यस्य पदे मण्डले ते तव उत्तमं रूपम
हं आ हे अश्व पश्यं पश्यामि। गोर्नादिशि इषः बलीवर्दः इत्यभिधानात् अन्नाणि इषः। कीदृशं रूपं। इषः अन्नानि हवींषि।
जिगीषमाणं जेतुमिच्छन्तं। जयतेः सन्नन्तात् शानच्। सनलिटो जहातेश्च गः। किंच। मर्तो मनुष्यो यदा ते तव भोगं अनु आ
नट् अनुव्याप्नोति। हविरूपं भोगं समर्पयति आत् इत् अनन्तरमेव त्वं ओषधीः हवीरूपाः अजीगः। गरतिर्गरणे।
वसिमदत्यमि कीदृशस्त्वं। ग्रसिष्ठः। ग्रसनेन इति ग्रसिता अतिशयेन ग्रसिता ग्रसिष्ठः। अस्मिन्नं ते मर्तः पिता। इष्टं तिष्ठेवाल ५।

अनु त्वा। हे अर्वन् अश्व रथः त्वाम् अनुवर्तते इति शेषः। मर्याः मनुष्याः त्वाम् अनु। गावः त्वाम् अनु। कनीनां कन्यानां भगः सौभाग्यं त्वा
मनु। यत्र त्वं तत्र रथादयः सन्तीत्यर्थः। किंच व्रातासः व्राताः। मनुष्यसंघाः तव सख्यं मैत्रीम् अन्वीयुः प्राप्ताः। किं बहुना देवास्तव
वीर्यं सामर्थ्यम् अनु ममिरे। अनुमितवन्तः। हिरण्यशृङ्गः। यः प्रथमो मुख्यः अर्वन्तम् अश्वम् अध्यतिष्ठत् अधिष्ठितवान्। सोऽपि इं
द्रः अवरः इन्द्रादपेतो यागस्थान आसीत्। कीदृश इंद्रः। हिरण्यशृंगः हिरण्यशृंगी सिद्धिर्यस्य शृंगमिति ज्वलन्नामसु पठितं। अस्य अश्वस्य पादा
अयः। लोहं हिरण्यं वा अयोरूपाः पादा इत्यर्थः। कीदृशाः पादाः। मनोजवाः। मनोवत् जवो वेगो येषां ते। किंच देवा अस्य

अनु त्वा रथो ऽअनु मर्यो ऽअर्वन्ननु भगः कनीनाम् अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं
ते १९ हिरण्यशृङ्गो ऽयो ऽअस्य पादा मनोजवा ऽअवर ऽइन्द्र ऽआसीत् देवा ऽइदस्य हविरद्यमायन्यो ऽ
अर्वन्तं प्रथमो ऽअध्यतिष्ठत् २० ईर्मान्तासः सिलिकमध्यमासः सꣳ शूरणासो दिव्यासो ऽअ
त्याः हꣳसा ऽइव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः २१

अस्य हविरद्यम् आयन्। अत्तुं योग्यम् अद्यं हविः तदायं वह हविरद्यं। हविर्लब्धुम् अभक्ष्यं प्रत्यायन् आगच्छन् इत्यपवार्थः। अश्व
र्ये वा। ईर्मान्तासः। ईर्यास्वरूपेण आयमस्वः स्नयते। यत् यदा अश्वाः समरविरष्टुमस्य श्रेणिशः श्रेणीभूताः हंसा इव संयतन्ते
न। सम्यक् प्रयत्नं कुर्वन्ति। तदा दिव्यं दिविभवं अज्मं गमनं संग्रामं वा आक्षिषुः आ। मैष्ठिति। अश्नोतेर्व्याप्तौ लुङि रूपं। हंसा
यथा गगनाय पतन्ते तेन यथा अश्वा अपि। कीदृशा अश्वाः। ईर्मान्तासः। ईर्मान्ताः ईयते ईर् प्रेरणे मक्प्रत्ययः। ईर्मं प्रेरितम् अ
न्तः शरीरप्रान्तो येषां ते एणजवेनाकारान्तार्थः। सिलिकमध्यमासः। सिलिकः श्लिष्टः। संलग्नो मध्यमो मध्यप्रदेशो येषां ते सि

नवशारीरं। हेम्नर्वेतन्। नवमारीरं पतनिस्तुउत्पतनशीलं। नवविंतनयजीमान्गतिमानू वानद्ववावेगवत्त्मत्मार्थ्य। नाछनीनर्थः
नवशृंगाणिदीमयः मरोमपश्रुवनेपदावाग्निरूपेणाचरंति कीदृशानि शृंगाणि [illegible] रुहाणि। बहुधा विक्षिप्तानि। विविधं क्षिप्ता
५२ नि विधुद्धेद्वाकोगिषिस्थनानि। जर्भुराणि। जर्भुराणि। जंर्भमविकसने। विकसि[illegible]नि उपप्रागात्। अर्वा अश्वः। शसने
विशनस्थानं उपप्रागात्। आगतः। कीदृशोर्वा। वाजी। वजनिवा। गमनशीलः। अन्ववान्वा। देवद्रीवामनसा दीध्या

नवशारीरस्पतयिष्णुवर्चैतत्वविंतं ध्यानः श्ववद्रजीमान् नवश्रृङ्गाणिषिट्
नापुरुत्राअरण्येषुजर्भुराणाचरन्ति २२ उपप्रागाच्छसनंवाज्यर्वादेवद्री
वामनसादीध्यानः अजः पुरोनीयतेनाभिरस्यानुपश्चात्कवयोयन्तिरेभाः २३

नः देवान्प्रत्यंचतिदेवद्यकृतेन। विष्णुदेवयोश्चटेरुंचतौ अप्रत्ययेइतिदेवशब्दस्यटेरंचतौ अद्रयादेशः। दीयते दीध्यानः
। दीधीदीप्तिदेवनयोः शानच्प्रत्ययः। देवान्प्रतिगतेनचित्तेनदीप्यमानः किंच। अस्याश्वस्य पुरो अग्रे अजोनीयते स्थाप्यते
। तदुक्तं। छागस्त्रीवग्रामगेषोपाराट्पुरस्तोदिति। अस्यनाभिः। अजोनीयते। नाभौस्थाप्यते। तदुक्तं। सोमापौष्णः पश्यमाना ५२
ध्यामिति। अस्यानुपश्चात्कवयः ऋत्विजः अनुयंति। अनुपश्चाति। कीदृशाः कवयः रेभाः रिभन्तेनेरेभाः रिभशब्देस्तोता

उपप्रागात् परमंसधस्थंसवायजमानमाह अर्वान् अर्वाश्वः पितरंमातरंचअच्छद्यावापृथिव्यौअभिसमीपेपरमंउत्कृष्टंयत् स
धस्थंसहस्थानंतत् उपप्रागात् अर्वान्प्राप्नुसुतलोपाभावश्छान्दसः अश्वएवदेवलोकंगतेहेयजमानजुष्टतमः प्रीतेन
मः सन् अद्यत्वंदेवान्गम्याः देवलोकंगच्छेःगमेराशीर्लिङिमध्यमैकवचनेगम्याइतिरूपं अथैवंदेवत्वंगतायदाशुषेहवि
र्भवतेतुभ्यंवार्याणिवरणीयानिभोग्यवस्तूनिहित्वानेत्रआशास्तेदेवगणेभ्योवाददातीत्यर्थः अमिद्धोअद्य द्वादशाप्री

उपप्रागात्परमंयत्सधस्थमर्वाँ २ ॥ अच्छापितरम्मातरञ्च अद्यादेवाञ्जुष्टतमोहिगम्याऽ अथा२
शास्तेदाशुषेवार्याणि २४ समिद्धोऽअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवेदः आचवहमि
त्रमहश्चिकित्वान्त्वन्दूतःकविरसिप्रचेताः २५ ॥ ॥

संतास्त्रिष्टुभोगमदग्निदृष्टाः समिन्नरूनपातादयोदेवताः हेजातवेदः जातप्रज्ञ मनुषः मनुष्यस्ययजमानस्यदुरोणे
गृहेअद्यत्वंदेवान्यजसि कीदृशस्त्वं समिद्धः दीप्तः देवः दानादिगुणयुक्तः हेमित्रमहः मित्राणियजमानान्
महतिपूजयतीतिमित्रमहाः तत्संबुद्धौहेमित्रमहः आवहच देवानावह यज्ञमित्यर्थः यतः त्वंईदृशोसिकीदृशः चि
कित्वान् चेतनावान् दूतः कविःक्रान्तदर्शीप्रचेताः प्रकृष्टंचेतोयस्यसः एवंयज ९ ॥ ॥

५२ तनूनपात तनूनामपांनपात् योसावग्निः अद्भ्योद्भूताः जायंते तेभ्यो ऽग्निरित्यपांपोत्रत्वमग्नेः हेतनूनपात् अग्ने हे सुजिह्व शो-
भनाजिह्वा यस्यस सुजिह्वः नानादेवत्यानि हवींषि भक्षयत्र पिनोक्तिष्ठानि करोन्...तिवन्हेः शोभनजिह्वत्वे हे सुजिह्व ऋतस्य
पानान् पथः स्वदय रोचय भक्षयेत्यर्थः यायंते येयेषु वा ते पानास्तान् करणाधिक...योरिति ल्युट् प्रत्ययः ऋतेनायज्ञः तस्य ग-
मनसाधनमार्गा हवींषि तान् भक्षयेत्यर्थः हविर्भिर्यज्ञः प्रवर्तते इति यज्ञगमन...नो हवींषि किं कुर्वन् मध्वामगेजन्
मधुरसेन संस्वदयन् किंच नोऽस्माकं अध्वरं यज्ञं देवत्रा कृणुहि देवान् गमय करोति गत्यर्थः किं कुर्वन् धीभिर्बुद्धिभिः सह

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च

कृणुह्यध्वरं नः २९ नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ये सुक्रतवः शु-

चयो धियंधाः स्वदन्ति देवा उभयानि हव्या ३० ॥ ॥

मन्मानि ज्ञानानि उत अपि च यज्ञं यज्ञं ऋन्धयन् समर्द्धयन् अस्माकं ज्ञानं यज्ञं च वर्द्धयन् यज्ञं देवलोकं नयेत्यर्थः नराशंसस्य महिमा
नं नराअस्मिन्नाः शंसंतीति नराशंसोऽग्निः प्रजापतिर्वा नरैः प्रशंस्यो भवतीति वा नराशंसस्य प्रजापतेरग्नेर्वा महिमा-
नं महाभाग्यं एषां देवानां मध्ये वयं उपस्तोषाम उपस्तुमः स्तौतेर्लोटि उत्तमैकवचने सिबहुलं लेटीति सिप्रत्यये रूपं कीदृ
शस्य नराशंसस्य यज्ञैर्यजनस्य यजनीयस्य यजेरतच् प्रत्ययः एषां के ये देवा उभयानि हव्या हवींषि सोमम् इतराणि च स्व
दंति भक्षयंति कीदृशाः देवाः सुक्रतवः शोभनः क्रतुः कर्म येषां ते शुचयः शुद्धाः निःपापाः धियंधाः धियं बुद्धिं कर्म वा द-

४८

आवह्वानः हे अग्ने त्वं आयाहि आगच्छ कीदृशस्त्वं आवह्वानः आह्वयते आह्वयति देवानित्यावह्वानः ह्वयतेश्शायः स्त्रुः ह्वः सं-
प्रसारणमित्यभ्यासस्य संप्रसारणं न विद्यते ईड्यः स्तुत्यः वन्द्यः नमनीयः वसुभिर्देवैः सजोषाः समानप्रीतिः किंच हे यह्व महत्त्वं
त्वं देवानां होता आह्वाता असि स त्वं एनान् देवान् यक्षि यज कीदृशः त्वं इषितः प्रेषितः अभीष्टो वा यजीयान् यजतीति यष्टा
अत्यन्तं यष्टा यजीयान् ईयसुनि तुरिष्ठेमेयस्स्विति तृचो लोपः प्राचीनं बर्हिः अह्नादिना अग्रे पूर्वाह्णे बर्हिः प्राचीनं प्रागग्रं

आवह्वानः ईड्यो वन्द्य आ याह्यग्ने वसुभिः सजोषाः त्वं देवानामसि यह्व होता स एनान्यक्षीषितो य-
जीयान् २४ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् व्युप्रथते वित-
रं वरीयो देवेभ्यो अदितये स्योनम् २४ ॥ ॥

वृज्यते प्रस्तीर्यते प्रातर्यागकालस्य प्रशस्तत्वादह्नामग्रे इत्युक्तं किंस्विद्वृज्याने इत्याह प्रदिशा प्रागग्रं बर्हिः स्तृणातीति श्रुति-
वाक्येन प्रदिक् प्रदिश्यते श्रुतिवाक्ये अस्याः पृथिव्याः वेदेः वस्तोः वसितुं आच्छादयितुं वेदिमाच्छादयितुमित्यर्थः तत् बर्हिः
वृज्यमानं सत् विप्रथते विविधं विस्तीर्णं भवति उकारः पादपूरणः कीदृशं बर्हिः वितरं वरीयः अत्यन्तं विविततरं अति-
तरां वरीयः अत्यन्तं उरु वरीयः प्रियस्थिरेत्यादिना उरोर्वरादेशः देवेभ्यः अदितये च स्योनं सुखकरं २४ ॥ ॥

९४ व्यचस्वतीः द्वारो देवीः देव्यो विश्रयंतां विवृता भवंतु कीदृश्यो द्वारः उर्विया उरुत्वेन व्यचस्वती व्यंचनवत्यो गमनवत्यः कथ
मिव पतिभ्यो जनयो न जनयः स्त्रियः यथा जनयो जाया यथा पत्यर्थं उरु विश्रयंति तद्वत्परीतमेव गमनस्तमाह हे द्वारो देव्यो यूयं
देवेभ्यो देवार्थं सुप्रायणाः सुप्रगमना भवत कीदृश्यः बृहतीः बृहत्यः विश्वमिन्वाः विश्वं व्याप्नुवत्यः निगच्छंतिया सुताः एतैर्विशेषणैः
अलंकुर्मासः शुंभमानाः शोभमानाः उर्विया इति द्वा विशेषणे वा उरवो विशालाः व्यापित्वाच्च इयोरस्मेति विभक्तेरियादेशः
विनादंतोदात्तः आसुष्वयंती आनि पतयो सदतामिति संबंधः अधीत्यस्पदयाने इत्यनेन संबंधः उषासानक्ता अत्रोषोदेवतेयो

व्यचस्वतीरुर्वियाविश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो
भवत सुप्रायणाः १० आ सुष्वयन्ती यजते ऽ उपाके ऽ उषासानक्ता सदतान्नियोनौ दिव्ये योषणे बृ
हती सुरुक्मे ऽ अधि श्रियं ऽ शुक्रपिशन्दधाने ११ ॥ ॥

धि

नौ यज्ञगृहे आनिसीदतां सम्यक् उपविशतां कीदृश्यौ ते सुष्वयंती सयते: ...स्वयते वा सुष्टु सर्वस्य रूपं सुष्वयंतेमका
रस्य वकारश्छांदसः उत्तरपदे यकारस्य प्रकारः परस्परं हसंत्यौ साधुस्वयंत्यौ वा यजते यजनीये उपाके उप समीपं अक
नस्ते उपाके अक्रमतौ परस्परं समीपस्थिते दिव्ये दिवि भवे योषणे योषे स्त्रीरूपिण्यौ बृहते महत्यौ सुरुक्मे शोभनं रुक्मं
स्वर्णं ययोस्ते साभरणे इत्यर्थः शुक्रपिशं शुक्लं कपिशं श्रियं शोभां अधिदधाने अधिकं धारयंत्यौ शुक्लं महः कपिशं रात्रि ११

कं

९४

दैव्या होतारा दैव्यौ होतारौ ईदृशौ आसाते इति शेषः कीदृशौ प्रथमौ आद्यौ सुवाचौ शोभनवाक्प्रयोक्तारौ मनुषो मनुष्य
स्य यजध्यै यष्टुं यज्ञं मिमाना निर्मिमाणौ तुमर्थे शध्यैप्रत्ययः विदथेषु यज्ञेषु प्रचोदयन्ता प्रचोदयन्तौ ऋत्विजः प्रेरयन्तौ का
रू कारू तस्तोकारू उणादयो बहुलमिति णः स्वयं कर्तारौ प्राचीनं पूर्वदिक्संभवं ज्योतिराहवनीयाख्यं प्रदिशा अभिनयेन
कृतिवाक्ये दिशन्ता यष्टव्यमिति कथयन्तौ सर्वत्र विभक्तेराकारः आ नः भारती इडा सरस्वती च तिस्रः नोऽस्माकं यज्ञं तूयं क्षिप्रं आ एतु
आगच्छतु कीदृशी मनुष्यावत् इह कर्मणि चेतयन्ती ज्ञापयन्ती कर्म तानेवाययन्ती इदं तिसृणां विशेषणं पुनास्तिस्रो देवीः

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्यो
तिः प्रदिशा दिशन्ता ३२ आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती तिस्रो देवीर्बर्हि
रेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ३३ य इमे द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि
विश्वा तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ३४ ॥ ॥

देव्यः स्योनं सुखरूपं इदं बर्हिः आसदन्तु आसीदन्तु कीदृश्यः स्वपसः शोभनं अपः कर्म यासां ताः शुभकर्माणः अप इति
कर्मनाम पुनः हे होतः अद्य इषितः प्रेषितः सन् तं त्वष्टारं देवं इह यक्षि यजसि यज कीदृशः त्वं यजीयान् अतिशयेन यष्टा अवयवैर्विचित्रे
यष्टा यजिष्ठः ईयसुनि तृचो लोपः विद्वान् स्वाधिकारज्ञः तं कं यः त्वष्टा इमे द्यावापृथिवी यो वा भूमी रूपैः अपिंश
त् अवयवैर्विचित्रे अकरोत् पिश अवयवे तुदादिः लङि शे मुचादीनामिति नुम् विश्वा विश्वानि सर्वाणि भुवनानि भूतजाता
नि रूपैः अपिंशत् विविधरूपाणि अकरोत् कीदृश्यौ द्यावापृथिव्यौ जनित्री जनयतस्ते जनित्र्यौ प्रजोत्पादिके ३४ ॥ ॥

३५ उपावसृजेन त्मन्या यजमानो वदति हे होतः त्मन्या आत्मना हवींषि स्वकृत्या ऋतौ ऋतौ यज्ञकाले त्वं उपावसृज देहि किं कु-
र्वन् देवानां पाथः हविः मधुना मधुरसेन घृतेन समञ्जन् संमृतयन् देवानामिति कर्त्तानाह वनस्पतिः यूपः शमिता देवः
अग्निः एते त्रयो हव्यं होतारः समञ्जन्तु स्वदन्तु भक्षयन्तु आत्मनेपदस्य विभक्तेपदिशेमं वेक्षा स्यादेशात्मन ऽस्याकोरलोपः सद्योजातः
95 देवाः हविः स्वदन्तु भक्षयन्तु कीदृशं हविः अस्याग्नेः वाचि वागिन्द्रियोपलक्षिते तस्मिंस्वाहाकृते स्वाहाकारेण हुते कीदृश-
स्यास्य होतुः देवानामाह्वातुः प्रदिशि सर्वदिशिकृतस्य गतस्य ऋतगतौ आहवनीयात्मना स्थितस्य अस्य कस्य योऽग्निः सद्योजात

उपावसृजन्त्मन्या समञ्जन्देवानाम्पाथ ऽऋतुथा हवीꣳषि वनस्पतिः शमिता देवो ऽअग्निः स्वदन्तु
हव्यम्मधुना घृतेन ३५ सद्योजातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः अस्य होतुः प्रदिश्यृ-
तस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ३६ केतुं कृण्वन्नकेतवे पेशो मर्या ऽअपेशसे समुष-
द्भिरजायथाः ३७ ॥ ॥ ॥

उत्पन्नः सन् यज्ञं व्यमिमीत विशेषनिरमात् यश्च देवानां पुरोगाः अग्रगामी स्वामी अभवत् पुरो गच्छन्ति पुरोगाः विट्प्रत्यये विड्व-
नोरनुनासिकस्यादित्यस्याकारः केतुं कृण्वन् अग्निर्देवता गायत्री मधुच्छन्दोदृष्टा निरुक्ताः हे अग्ने त्वं उषद्भिः ऋत्विग्भिः जायथाः
उत्पन्नोऽसि जनेर्लिङि रूपं उत्पन्नो उपदाहे उषन्ति हविर्दहन्ति ते उषन्तः अग्निहोमकर्तारो यजमानाः कीदृशस्त्वं अकेतवे अज्ञा-
नाय मर्याः मर्त्याय मनुष्याय केतुं ज्ञानं कृण्वन् कुर्वन् विभक्तिव्यत्ययः नास्ति पेशः सुवर्णं यस्य स अपेशाः तस्मै अपेशसे मर्-
त्याय पेशः सुवर्णं कुर्वन् ३७ ॥ ॥

एवमभिंसृत्वा स्वरत्नगो योद्धनत्तुह्वोयकरणानि वक्ष्यंते जीमूतस्येवा भरद्वाजसुतपायुः संग्रामांगानि प्रत्यृचं स्तौति त्रिष्टुब्भिः व
र्मिस्तूयते यत् यदा वर्मकवचवान् समदां संग्रामाणामुपस्थे उत्संगे अग्रे याति तदा प्रतीकं सेनामुखं जीमूतस्य मेघस्येव भ
वति सहमायतिर्यो यायास्तुतः समदः संग्रामः मदेक्षिप् मेघस्य सर्वं विविधमुत्तनपि तुधाराभिर्यथा ऽस्य एवं इस्य सरथ
पादातास्तनालहृयेनादशरीरः सेनामुखमसंघं भवति वर्मधरेग्रे सरे सतीत्यर्थः अतोहं ब्रवीमि हे वर्मिन् अनाविद्धयास्त्र

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे अनाविद्धया तन्वा जय त्वं स त्वा वर्म
णो महिमा पिपर्तु १८ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम धनुः शत्रोर
पकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम १९ ॥ ॥

ननपा तन्वा शरीरेण त्वं जय शत्रून् हत्वा जयं प्राप्नुहि किंच सर्वमानाः आजिं मार्गं जयेम अजंति गच्छंति यस्मिन्नसावाजि
र्मार्गः तीव्राः उग्राः समदः संग्रामान् धन्वना जयेम धनुः शत्रोः अपकामं मनोरथाभावं कृणोति करोति कामस्याभावोऽ
पकामं अव्ययं विभक्त्यादिनार्थाभावे अव्ययीभावः किंच धन्वना सर्वाः प्रदिशोऽजयेम ईदृशो धनुः प्रभावः १९ ॥ ॥

वक्ष्यंतेवेत् स्यास्त्रयते इयं ज्याधन्वन् धन्वनि धनुषि अधिवितता उपरिविस्तारिता सती शिंक्ते अव्यक्तशब्दं करोति अव्यक्तेश
ब्दे अदादिः इदितो नुम् धातोरिति नुम् का इव योषेव यथा योषा कामिनी कामकरं ज्ञातायामव्यक्तं वदति एवमियमपि कीदृशी
ज्या समने संग्रामे पारयंती पारं तीरं कर्मसमाप्तिं अर्दनः संग्रामादुत्तारयंती विजयं प्रापयंतीत्यर्थः इयं का या ज्या कर्णमागनी
गंति आक्रुश्यमाणा सती योद्धुः कर्णसमीपमत्यर्थमागच्छति यङ्लुकि रूपमेतद्रूपं कीदृशी उच्यते वक्ष्यन्तीव वक्तुमिच्छन्तीव अन्योन्यमिव
कं मित्रं कर्णं प्रत्यागच्छति प्रियं सखायं इष्टं मित्रं वा एतद्रूपं परिषस्वजाना आलिंगन्ती स्वजेः शानचि शपः श्लौ सति हित्वा रम्या

वक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियꣳसखायम्परिषस्वजाना योषेवशिङ्क्ते वितताधिधन्वञ्ज्या ॰ इय
ꣳसमनेपारयन्ती ४ ते ॰ आचरन्तीसमनेवयोषामातेवपुत्रम्बिभृतामुपस्थे अपशत्रून्विध्यताꣳसंविदा
ने ॰ आर्त्नी ॰ इमेविष्फुरन्ती ॰ अमित्रान् ५ ॥ ॥

दृष्टान्तार्थः ते आचरंती धनुःकोटी स्तूयेते ते प्रसिद्धे इमे आर्त्नी आर्त्नी धनुःकोटी उपस्थे उत्संगे मध्यभागे विभृतां धारयतां श
त्रुमिति शेषः तत्र दृष्टान्तः माता पुत्रमिव यथा जननी पुत्रमुत्संगे बिभर्ति शत्रून् अपविध्यतां ताडयतां च कीदृश्यौ आर्त्नी आचरं
ती आचरंत्यौ आगच्छंत्यौ बाणक्षेपं प्रति तत्र दृष्टान्तः समना योषा इव वचनव्यत्ययः समना समानं एकं पतिं गतं मनो ययो
स्ते समनसौ विभक्तेर्डादेशः समवित्ते योषा योषे स्त्रियौ यथा कान्तमागच्छतः संविदाने समोगमीत्यादिना शानच् परस्परं
केतं कुर्वाणे अमित्रान् शत्रून् विस्फुरंती टंकारं कुर्वाणे ५ ॥ ॥ ॥

बह्वीनांपिता इषुधिरुच्यते यद्वा इषुधीस्तूणो बह्वीनां इषूणां पिता पालकः यतो बाणान् धारयति अस्येषुधेर्बहुः पुत्रः बाणसमूहः

पुत्रस्थानीयः पाल्यमानत्वात् पुरून् बहून् त्रायत इति पुत्रः स इषुधिः समनं संग्राममवगत्य गत्वा चिश्चाकृणोति चि-

श्चेति शब्दं करोति शब्दानुकरणमेतत् बाणेन तूणाद्विनिःक्रम्यमाणे विश्चेति शब्दो भवति च पुनः स इषुधिः पृष्ठे निन

द्धो बद्धोपि प्रसूतः अनुज्ञातः सन् सर्वाः पृतनाः जयति शत्रुसेनां पराभवति कीदृशीः पृतनाः संकाः संचतेः संपूर्वाद्वा किर

तेरिति यास्कोक्तेः सचतेः किरतेर्वा रूपं सचंते संबध्यंते संकीर्यंते वा इति वचनात् योधायाः पृतनाः संकाः विवादिकारकाणि भ

बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य । इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो

जयति प्रसूतः ५२ रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः अभीशूनाम्महि-

मानम्पनायत मनः पश्चादनुयच्छन्ति रश्मयः ५३ ॥ ॥ ॥

वेतीति वचनादिषुधेः कर्तृत्वे अर्द्धेन सारथिरर्द्धेन रश्मयः स्तूयंते जगती जगती इयं सुषारथिः सुसारथिः शोभनः कीदृशो रथे

तिष्ठन् तस्य मध्ये इति शेषः इदानीं रश्मयः स्तूयंते हे जनाः सारथिः यत्रयत्र प्रदेशे कामयते इच्छति मयात्र गंतव्यमिति तत्र

तत्र पुरो वर्तमानान् वाजिनो नयति प्रापयति अभीशूनां रश्मीनां महिमानं महाभाग्यं यूयं पनायत स्तुत ये रश्मयः पश्चा-

द्वर्तमानः संतः मनोऽश्वचित्तं अनुयच्छंति अनुगमयन्ति हस्तवशवर्तिनं कुर्वंतीत्यर्थः यतस्ततो रश्मीन् स्तुतेति पनायतेः स्तुतिकर्मणो यति-

भ्य आयप्रत्ययः प्रत्ययो तातप्तने लोट ५६ ॥

९० तीव्रान्घोषान् अस्वाः कृण्वंते वृषाअस्वाः कृण्वंते वृषाः अस्वाः पाणौ हस्ते येषां ते वृषपाणयोऽस्ववाराः तीव्रान्घोषान् जयज
येनि महान् कृण्वते कुर्वंति शत्रून् क्षिणंति कीदृशाः अस्वाः प्रपदैः पादाग्रैः खुरैः अमित्रान् विमृत्व वक्रामंतः अनपव्ययंतः
अपगतये अदंतस्वादिः अपव्ययंतितेऽपव्ययंतः अपअयंतोऽनपव्ययंतः अनश्यंतः समर्थाः वजगतो स्वार्थेणान् वाज
यंतः रथवाहनं शकटद्वारा रथः कृण्वते अस्मानसोरथवाहनं नाम रथं वहतीति रथवाहनं वाजपेयेऽनसिरथस्या

तीव्रान्घोषान्कृण्वते वृषपाणयोऽस्वा रथेभिः सह वाजयन्तः अवक्रामन्तः प्रपदैरमित्रान्क्षिणा
न्तिशत्रूं १ ॥ रनपव्ययन्तः ४४ रथवाहनꣳ हविरस्य नाम यत्रायुधन्निहितमस्य वर्म्म तत्रार
थमुपशग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ४५ ॥ ॥

रोप्यमाणत्वात् तथाऽस्य हविः हविर्द्धानामा पृषोदरादित्वाद्धनराद्धेलोपः यत्र नस्मिन्नस्य योद्धुर्वर्म आयुधं च निहितं स्था
पितं तत्रान् स्मिवं रथं उपदेसदेश उपसादयामः कीदृशं रथं शग्मं सुखकृत् कीदृशा वयं विश्वाहा सर्वदा सुमनस्यमा
नाः शोभनं मनो येषां ते सुमनसः असुमनसः सुमनसः भवंति सुमनस्यंते भृशादिभ्यो भुव्यच्वेर्लोपश्चेति क्यङ् ततः शा
नच् अनाकुलचित्ता इत्यर्थः तत्रेत्यस्य संहितायां निपातस्य चेति दीर्घः ४५ ॥ ॥

स्वादुषꣳसदः रथगोपान् ईदृशानदाग्रस्माकं रथगोप्तारो भवंत्विति शेषः कीदृशाः स्वादुसंसदः स्वादु स्वंवं यथा तथा सं
सीदंति ईदृशानराग्रस्माकं रथगोप्तारो भवंत्विति शेषः कीदृशाः स्वादुसंसदः स्वादु स्वंवं यथा तथा संसीदंति ते स्वादुसं
सदः पितरः पांति ते पितरः रक्षितारः वयोधाः वयोन्नं आयुर्वा दधति धारयंतीति वयोधाः कृच्छ्रे तिन इत्येकपदं कृच्छ्रे कष्टे
श्रीवंते सेव्यंते कृच्छ्रेश्रितः कर्मणि क्विप् अलुक् सप्तम्याः उत्वेमत्वाच्छ्रयणयोग्याः उत्वेना शोकत्वात् यद्वा सममोद्वितो
यार्थे कृच्छ्रे श्रयंति कृच्छ्रेश्रितः उत्वेप्राप्यापि स्वामिसेवनपराः शक्तिवंतः शक्तिसामर्थ्यमायुधं वा अस्ति येषां ते अप्यदृस्य

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः चित्रसेनाः इषुबलाः अमृध्राः सतो
वीराः उरवो व्रातसाहाः ४६ ॥ ॥

रश्मिमतीत्यादिशानि शाखसूत्रेण शक्तिर्यासां स्यदीर्घः गभीराः गंभीरबला गंभीरप्रज्ञाश्च चित्रसेनाः चित्रानानाविधा
सेना येषां ते इषुबलाः इषुभिर्बाणैर्बलं येषां ते अमृध्राः मृध्रा मृदवो न भवंत्यमृध्राः कठिना गाउग्रशासना वा सतोवीरा इ
त्येकं पदं सतोः समेधया जिनावीराः शूराः यद्वा सतो विद्यमानस्य बलस्य वीराः ... विविधमीरयंतीति वीराः षष्ठ्याश्च
लुक् उरवः विशालाः पृथुजघना रक्षार्थ इत्यर्थः व्रातसाहाः व्रातान् शत्रुसमूहान् सहंते अभिभवंति ते व्रातसहाः यच्चा
यच्च अभिमाति घ्नतनेत्यादिना सूत्रेण सहने रूपं यथादीर्घः २० ॥

९८ ब्राह्मणासः जगतीलिंगोक्तदेवता ब्राह्मणासो ब्राह्मणानोऽस्मान्पांतु त्वं च याज्ञिकस्यार्थवशाद्वचनव्यत्ययः कार्यः
पितरश्च पांतु कीदृशाः सोम्यासः सोम्याः सोमसंपादिनः सोमपानयोग्या वा तत्तयोर्विशेषणं द्यावापृथिवी द्यावाभू
मी नः पातां कीदृश्यौ शिवे कल्याणकारिण्यौ अनेहसौ नास्ति एहो अपराधो ययोस्ते अपराधनिवर्तिके किंच पूषा पूर्षो
नीति

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा पूषा नः पातु दुरितादृतावृधो रक्षा
माकिर्नोऽअघशंसऽईशत ४७ ॥ ॥

नोऽस्मान्दुरितात्पापात्पातु एवं परोदेनोक्ताः तत्पतमाह हे ऋतावृधः ऋतं सत्यं यज्ञं वा वर्धयंति ऋतावृधो देवाः हे हिता
यो ऋतस्पर्धौ रक्षत रक्षतात् वचनव्यत्ययः माकिः माकश्च न अघशंसः पापी नोऽस्माकं ईशत ऐश्वर्यं मा करोतु व
यं दुष्टवशा मा भूमेत्यर्थः अघं पापं शंसति वक्ति प्रकाशयति वा अघशंसः दुष्टः ईशातेति वचनव्यत्ययः २१ ॥ ॥

सुपर्णंवस्ते द्वाभ्यामिषुंस्तौति आद्यात्रिष्टुप्अन्त्यानुष्टुप् याइषुःसुपर्णंपतत्रिपिच्छंवस्ते परिदत्ते वस्त्रपरिधाने शोभनंपर्णं
पिच्छंयस्यससुपर्णःपक्षी तस्यविकारःसौपर्णं तत्रकृत्स्नवन्निगमाभवंतीतियास्कोक्तेःसुपर्णशब्देनतत्पिच्छंलक्ष्यतेबाणपु-
ङ्खेपिच्छस्यारोप्यमाणत्वात् किंच अस्याइषोर्दन्तःफलंमृगः मृगयतेःत्विष्यतिविशन्तंहन्तुमितिमृगः मृगमार्गणेचुरादि
रदन्तःपचाद्यच् मृगोमृगयतेरितियास्कः शल्यंहिवेध्यंमृगयते किंच याइषुः गोभिःगोविकारैःस्नायुभिःसंनद्धाबद्धा
प्रसूताधनुष्मताप्रेरितासतीपतन्तुइषवोबाणाः अस्मभ्यंशर्मसुखंयंसन् यच्छन्तु यमउपरमे निशात्रुबलंप्रतिगच्छन्ति किंच

सुपर्णंवस्तेमृगोअस्यादन्तोगोभिःसंनद्धापततिप्रसूता यत्रानरःसंचविचद्रवन्तितत्रास्मभ्य
मिषवःशर्मयंसन् ५द ऋजीतेपरिवृङ्धिनोश्माभवतुनस्तनूः सोमोअधिब्रवीतुनोदितिःश
र्मयच्छतु ५९ ॥ ॥

यत्रनरोयोद्धारःसंद्रवंतिचसम्यक्गच्छंतिविद्रवंतिच विविधंप्रसरंतिचोसमुच्चयेतत्ररणे लेडितिपदलोपेःयमेःसिबु
हुले लेटीतिसिपागमेयंसन्नितिरूपंसुखंददतु ऋजीतेःऋजुःसरलाईतिर्गतिर्यस्याःसाऋजीतिः इलोपआर्षः हेऋजी
तेऋजुगामिनिहेइषोनोऽस्मान्परिवृङ्धि परिवर्जय अस्मान्समापतन्त्वर्थः किंचनोऽस्माकंतनूःशरीरं अश्मापाषाणतुल्या
दृढाभवतु सोमोनोऽस्मानधिब्रवीतु अधिकावदतु अदितिर्देवमाताशर्मसुखंयच्छतुददातु १२ ॥ ॥
॥ ॥

आजंघंति अत्रष्टप्रकशास्तूयते अजगतोत्रेपणोच अश्वाः आजंघंतेताड्यंतेयया सा अश्वाजनी हे अश्वाजनिकशे समनस्तु
संग्रामेषु त्वं अश्वान् चोदय प्रेरय जयाय कीदृशानस्मान् प्रचेतसः प्रकृष्टं चेतो मनो येषां ते हे कशे यथा त्वया अश्व
वारण्येषां अश्वानां सा उत्साहान् निसाव त्वत्थानिमां सापवितो गानिआजयंति वचरणत्वयः आजंघितताड्यतिअश्वनात्वक
दिभागात् उपजिघ्नतेनिघ्नंतित्वं गोरोह्यायया अश्वान् ब्रयंति सा त्वमश्वान्प्रेरयेस्तोति अहिरिव हस्तघ्नः स्तूयते सम्प्रतिष्ठ
भः हस्तेस्थिते निहस्तघ्नः खेटकः यद्वा हस्तहंति शास्त्रीनि हस्तघ्नः प्रकोष्ठत्रमाः पुमांसं मां विश्वतः सर्वतः परिपातुरक्षतु

अजस्त्रानि सान्वेषाञ्जघना ३ं ॥८ उपजिघ्नते अश्वाजनि प्रचेतसोश्वान्त्समनत्सु चोदय ५ॱ अ
हिरिवभोगैः पर्येति बाहुं ज्याया हेतिम्परिबाधमानः हस्तघ्नो विश्वा वयुनानि विद्वान्पुमा
न्पुमांसं परिपातु विश्वतः ५१ ॥ ॥

किं भूतो हस्तघ्नः विश्वा विश्वानि सर्वाणि वयुनानि ज्ञानानि विद्वान् जानन् तथा पुमान् पुंस्त्वयुक्तः शूद इत्यर्थः यो हस्त
घ्नो भोगैस्वशरीरावयवैः कृत्वा बाहुं पर्येति हस्तं वेष्टयति कइव अहिरिव यथाहिः सर्पो भोगैः स्वदेहैः हस्तादिकं वे
ष्टयति कीदृशः ज्याया हेतिं बाणं शत्रुप्रेरितं परिबाधमानाः निवर्तयन् खेटकपक्षे प्रकोष्ठत्रापतंतं ज्याया हेतिं प्र
हारं निवारयन् ज्याघातस्य निवारकत्वात् २२ ॥ ॥

वनस्पते वीड्वंगः तिस्र ऋचो रथदेवताः हे वनस्पते वनस्पतिविकारकाष्ठमय रथ कस्त्वं वल्गिगमः त्वं वीड्वंगो दृढांगो भूयाः भववी
ड्वंगानि यस्य कीदृशः अस्मत्सखा अस्माकं मित्रभूतः प्रतरणः प्रतिरति संग्राममपारं गच्छति प्रतरणः सुवीरः शोभनो वीरो
रथी यत्र किंच हे रथ यतः त्वं गोभिः गोविकारैः चर्मभिः संनद्धो बद्धोसि अतो वीडयस्व आत्मानं दृढं भव किंच तेनावास्थाता
रोगारथी जेत्वानि जेतव्यानि रिपुधनानि जयतु दिपादहरणः दिवः पृथिव्याः हे अध्वर्यो त्वं हविषा कृत्वा रथं यजस्व कीदृशं र
थं दिवो द्युलोकात् पृथिव्याः भूमेः सकाशात् पर्युदृतं समुद्धृतं ओजः तेजः तथा वनस्पतिभ्यः आहृतेभ्यः पर्याभृतं समं
तात् आहृतं आनीतं सहः बलं तथा अपो जलानां ओजमानं तेजः सारभूतं ओजवलं तेन सारित्वियानो रनेभ्योपि दृष्टं तरणं

वनस्पते वीड्वंगो हि भूयाः अस्मत्सखा प्रतरणः सुवीरः गोभिः संनद्धो ऽसि वीडयस्वास्थाता ते॰
जयतु जेत्वानि ५२ दिवः पृथिव्याः पर्याभृतं॰ सहः अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं॰
हविषा रथं यज ५२ ॥

मनित् ओजं जयति बलिं करोतीत्योज्मा तं द्यावाभूमिहृतजलानां तेजस्वात् पृथ्येन निर्मितो न मित्यर्थः तथा गोभिः करणैः
पर्याहृतं वेष्टितं तेजो निर्मितत्वात् यद्वा गोभिर्गोचर्मभिर्वेष्टितं तथा इंद्रस्य वज्रं अंगो ज्ञाजानेरित्यर्थः इंद्रो यदा हत्वा यवज्र
प्रजहारस्तदा हत्र शरीरकाठिन्यात् प्रतिहतं वज्रं द्विज्ञाजाने स्ययःस्फः रथः यरथे यपतः खंगाः तत्र रूपस्फोविशेषर्दहीनो
रथशारौ न्तपैरिति श्रुतिकथानुसंधेया इंद्रो हय वृत्रहत्वाय वज्रं प्रजहारेत्युपक्रमत्वे यत्न तीयमित्यभिधाय रथेन च शारेण
चेति राजन्य वंशे वरति श्रुतेः ईदृशं रथं यजेत्यर्थः २५ ॥ ॥

१० इंद्रस्य वज्रः हे रथ हे देव स त्वं हव्याः हवींषि प्रतिगृभाय प्रतिगृहाण कीदृशः त्वं इंद्रस्य वज्रः वज्रोपमत्वात् मरुतामनी
कं मुखं अग्र्यः देवानां जयप्रापकत्वात् मित्रस्य देवस्य गर्भः गीयते स्तूयते गर्भः गृणातेर्भप्रत्ययः स्तूयमानः
वरुणस्य नाभिः नभ्यते हिंस्यते नेनेति नाभिः नभ हिंसायां करणे प्रत्ययः वरुणस्य हननसाधनं नोस्माकं इमां हव्यदातिं
हविषो दानं जुषाणः सेवमानः स इमां सिस्व सोविलापेत्याद करणमिति सिंस्तो गृभाय गृह्णाते र्हलः श्नः शानज्ञावि

इन्द्रस्य वज्रो मरुतामनीकम्मित्रस्य गर्भो वरुणस्य नाभिः सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्र
ति हव्या गृभाय ५४ उप श्वासय पृथिवीमुत द्याम्पुरुत्रा ते मनुतां विष्ठितञ्जगत् स दुन्दुभे स
जूरिन्द्रेण देवैर्दूराद्दवीयो ऽप सेध शत्रून् ५५ ॥ ॥

स त्वं हे दुन्दुभे श्वासय नयीति हेतौ परे श्वा पत्ययस्य शानजादेशाः हस्य भश्च उपश्वासय तिस्तत्रत्यो डं डुभि देवताः हे डुं
डुभे स त्वं पृथिवीमुत द्यां अंतरिक्षमपि उपश्वासय उपशब्दस्य स्वनैः शब्दार्थैः विष्ठितं विविधं स्थितं जगत् स्थावरं जं
गमात्मकं विश्वं पुरुत्रा बहुधा ते तामनुतां जानातु डुंडुभिनेदतीति स त्वं दूरात् दवीयः अतिदूरं शत्रून् अपसेध अ
पगमय अत्यंतं दूरं दवीयः स्थूलदूरेति रेफलोपश्च गुणो कीदृशा त्वं इंद्रेण देवैश्च सजूः प्रीतियुतः २५ ॥

आक्रंदय हे दुंदुभे त्वं बलं शत्रुसैन्यं आक्रंदय रोदय पलायध्वं मदीयाः सर्वे हता इत्यादि वीनरवं कारयेत्यर्थः नोऽस्माकं ओ
जस्तेजः आधाः आधेहि देहि दुरिता दुरितानि पापानि बाधमानो निराकुर्वन् सन् निष्टनिहि शब्दं कुरु स्तनशब्दे चुरादि
र्देतः किंच इतोऽस्मत्सेनायाः सकाशात् दुच्छुनः दुच्छुनः दुष्टाश्वते सान अश्वदुच्छुनः तान् दुष्टान् श्वनः श्वसदृशान् शत्रून् अप
सेधनाशय सेधतिर्नाशनार्थः यतः त्वं इंद्रस्य मुष्टिरसि वदं गन्तोसि अतो वीडयस्व आत्मानमस्मान्दृढय आमूःदेवं

आक्रन्दय बलमोजो न आधा निष्टनिहि दुरिता बाधमानः अपप्रोथ दुन्दुभे दुच्छुना इतः इन्द्रस्य
मुष्टिरसि वीडयस्व ५९ आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति समश्वपर्णाश्चरन्ति
नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ५७ ॥ ॥

अमूः शत्रुसेनाः त्वं आ अज आसमंतात्परिक्षिप अज गतिक्षेपणयोः पतो दुंदुभिः केतुमत् प्रज्ञावत् यथा तथा वावदीति अत्यं
तं नदति अत इमा अस्मत्सेनाः प्रत्यावर्तय जयं प्रापय्य प्रत्यानय किंच नोऽस्माकं [illegible]याः संचरंति निर्भयाः संचरंतु की
दृशा नरः अश्वपर्णाः अश्वस्येव पर्णं पतनं येषां ते किंच अस्माकं नरो योधाः [illegible]चरंति निर्भयाः संचरंतु कीदृशा नरः
अश्वपर्णाः अश्वस्येव पर्णं पतनं येषां ते किंच अस्माकं रथिनो रथस्था नरयंतु शत्रून् जयं प्राप्नुवंतु २९ ॥ ॥

९१ आग्नेयः कृष्णग्रीवः अश्वमेधे श्रुतिरस्ति द्वे वै ते एकादशिन्यावालभेतेति तयोरेकादशिन्योः पशवस्तद्देवताश्चैकेङ्गिका
हृदयेनाच्यते तेनेमानि ब्राह्मणवाक्यानि इदमादेवताप्रतिपादकानि न तु मन्त्राः कृष्णग्रीवायस्य स कृष्णग्रीवः पूर्वशा आग्नेयोऽ-
ग्निदेवत्यः १ मेषी सारस्वती सरस्वतीदेवताका २ बभ्रुः पिङ्गवर्णः पूषा सौम्यः सो[illegible]देवत्यः ३ श्यामकृष्णवर्णः पौष्णः पूषदे-
वत्यः ४ शितिपृष्ठः श्वेतपृष्ठो यस्य स शितिपृष्ठो बार्हस्पत्यः बृहस्पतिदेवत्यः ५ शि[illegible]विचित्रवर्णो वैश्वदेवः विश्वदेवदेवत्यः ८
अरुणो रक्तः ऐन्द्र इन्द्रदेवत्यः ७ कल्माषः कर्बुरो मारुतो मरुद्देवत्यः ८ संहितो[illegible]गपश्यामः इन्द्राग्निदेवत्यः ९ अधो-
रामोऽधोदेशे श्वेतः सावित्रः सवितृदेवत्यः १० एकः शितिः श्वेतः पादो यस्य स एकशितिपात् एकयादेश्वेनाऽस्य कृष्णः पे

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रो-
ऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ५८ अ-
ग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्मा-
ष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ५९ ॥ ॥

त्वः पतनशीलो वेगवान् पशुर्वारुणदेवत्यः ११ एवमेकादशाजातिः अग्नयेऽनीकवते द्वितीयैकादशिनी पशुदेवता-
ह रोहितो रक्तोऽञ्जिस्तिलकोऽयस्य सोऽनड्वान् वृषभोऽनीकवते अग्नये आलभ्यः अनीकं मुखं सैन्यं वा यस्य सोऽनीकवान् १
तस्मै १ अधोरामौ अधोभागश्वेतौ द्वौ पशू सावित्रौ सवितृदेवत्यौ २ रजतवर्णा नाभिर्ययोस्तौ रजतनाभी द्वौ पौष्णौ पूषदे-
वत्यौ ४ पिशङ्गौ पीतौ तूपरौ तिःशृङ्गौ वैश्वदेवौ विश्वदेवदेवत्यौ ७ कल्माषः कर्बुरो मारुतः ८ कृष्णः श्यामोऽजो मेषश्च आ-
ग्नेयोऽग्निदेवत्यः ९ मेषी सारस्वती १० पेत्वो वेगवान्वारुणो वरुणदेवत्यः एवमेकादश २७ ॥ ॥

अग्नयेमापन्नाय अथाग्नीषोमीयस्य पुरोडाशमनुदिशामवेष्टीर्निर्वपतीत्युपक्रम्य तदाह द्वे शाह विषमेतामिष्टिं निर्वपे
दिति अस्मादशाह विज्ञावेष्टिसंतेष्टिः कथितादेतस्या देवता हवींषि वाह इमान्यपि ब्राह्मणवाक्यानि नमंत्रः अग्नयेऽष्टाक
पालः पुरोडाशा कार्यः अष्टसु कपालेषु संस्कृतोऽष्टाकपालः तद्धितार्थोत्तरपदसमाहारे चेति समासः अष्टनः कपाले ह

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपालः ऽ इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशक॰
पालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्या
मेकवि॰ ऽ॰ शाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र ऽ औ॰
ष्णिहाय त्रयस्त्रि॰ ऽ॰ शाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वै
श्वानराय द्वादशकपालोऽनुमत्या ऽ अष्टाकपालः ९ इति संहितापाठे एकोनत्रिंशोऽध्याय २९

॥ ॥

अन॰
वौषिति अष्टन् शाह्वस्य दीर्घः कीदृशायाग्नये गायत्राय गायत्र्या स्तुताय त्रिवृता त्रिवृत्स्तोमेन स्तुताय राथंतराय र
थंतरसाम्ना स्तुताय २ इंद्राय एकादशाकपालः पुरोडाशः समासः पूर्ववत् कीदृशाय इंद्राय त्रैष्टुभाय त्रिष्टुभाय त्रिष्टु
भाय त्रिष्टुभा स्तुताय पंच ॥

१०२ 102 दशाय पंचदशस्तोमस्तुताय वार्हताय बृहत्सामस्तुताय २ विश्वेभ्योदेवेभ्योद्वादशकपालः पुरोडाशः कौहशेभ्यः
जागतेभ्यः जगत्याछंदसास्तुतेभ्यः वैरूपेभ्यः वैरूपसामस्तुतेभ्यः ३ मित्रावरुणाभ्यांपयस्यापयसिश्रितश्चरुः कौ
हशाभ्यां अनुष्टुभाभ्यां अनुष्टुभास्तुताभ्यां एकविंशाभ्यां एकविंशस्तोमस्तु...भ्यां वैराजाभ्यां ४ बृहस्पतयेचरुः
कौहशायपंक्ताय पंक्तिछंदसास्तुताय त्रिणवाय त्रिणवस्तोमस्तुताय शाक्वराय शाक्वरसामस्तुताय ५ सवि
त्रेद्वादशकपालः पुरोडाशः कौहशायसवित्रे औष्णिहाय उष्णिक्छंदसास्तुताय त्रयस्त्रिंशायत्रिंशस्तोमस्तु
ताय रैवतायरैवतसामस्तुताय ६ एवंछंदः स्तोमसामसहितान्षड्देवानभियायचतुरः केवलानादि प्रात्तायस्य
श्चरुः कार्यः ७ विष्णुपत्न्यैअदित्यैचरुर्देवाटम्वैश्वानराय वैश्वानरगुणविशिष्टायामयेद्वादशकपालः पुरोडाशः ९
अनुमत्यैदेवतायैअष्टकपालः पुरोडाशः कार्यः ९ दशाहविषावेष्टिर्देवताद्वीप्यपिश्रयमेयोपयोमित्वाडे
क्तानि सामिद्धोयंजन्वाश्वमेधिकोध्याय इतिकात्यायनोक्ते श्रीमन्महीधरकृतेवेददीपेमनोहरे शिष्टाश्व॰
मेधमंत्रोक्तिगीतो८ध्यायोकहंगमितः २९ ॥ ॥ ॥

इतउत्तरं पुरुषमेधो व्याख्यायते नारायणः पुरुषोऽपश्यत् ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भव
ति सर्वभूतान्यतिक्रम्य स्थानप्रतिष्ठा चैत्रशुक्लदशम्यामारम्भः अत्र त्रयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्चसु-
त्या इति चत्वारिंशद्दिनैः सिध्यति अत्र यूपैकादशिनी भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपम
यूपमेवायूपेयथेत्युक्तं इति योजनं आज्येन सप्ताहुतीर्जुहोति नेन देव सवितरिति प्रत्यृचं इति प्रत्याहवनीये जुहोति तत्र देव सवितः

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वा
चं नः स्वदतु १ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् २ विश्वानि दे-
व सवितर्दुरितानि परासुव यद्भद्रं तन्न आसुव ३ विभक्तारं हवामहे वसोश्चित्रस्य राध-
सः सवितारं नृचक्षसम् ४ ॥ ॥ ॥

तत्सवितुः इत्याख्याते २ विश्वानि देव हे देव सवितः विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय यत् भ
द्रं कल्याणं तत् नः अस्मान् प्रति आसुव आगमय विभक्तारं वयं सवितारं हवामहे आह्वयामः किंभूतं वसोर्वासयितु
श्चित्रस्य नानाविधस्य राधसो धनस्य विभक्तारं विभज्य दातारं नृचक्षसं नृणां द्रष्टारं यथायोग्यं १ ॥

१३ अतः परं पुरुषमेधकाः पशव आध्यायसमाप्तेः ततः प्रतियूपमेकैकमेकादशिनं नियुक्त ब्राह्मणादीनष्टचत्वारिंशत्संख्या
पुरुषान्स्वकामो वायोपमद्गमित्यनानामिष्टयूपे नियुनक्ति इतरेषु यूपेष्वेकादश पुरुषानुपंगांश्चानुरूपमित्यादीन्विनियुनक्ति ब्र
ह्मणे ब्रह्मणे नियुनक्ति अग्निष्ट ब्राह्मणं प्रथमे नियुनक्ति एवमग्रे सर्वेषां यूपे एवं प्रतिनचन्त्येन देवतापदे द्वितीयान्ते पुरुषाय
देवाय च १ क्षत्राय राजन्यं क्षत्रियं २ मरुद्भ्यो वैश्यं ३ तपसे शूद्रं ४ तमसे तस्करं चौरं ५ नारकाय वीरहणं नष्टाग्निं स्तेवा ६

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने ।
क्लीबमाक्रयाया अयोगूं कामाय पुंश्चलूमतिक्रुष्टाय मागधम् ५ नृत्ताय सूतं गीताय शैलूष
न्धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभं ६ हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारी
पुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ६ ॥ ॥

पाप्मने क्लीबं नपुंसकं ७ आक्रयायै अयोगूं अयसो गन्तारं ८ कामाय पुंश्चलूं व्यभिचारिणीं ९ अतिक्रुष्टाय मागधं मग
धदेशजं क्षत्रियायां वैश्यात्संभवाज्जातं वा १० नृत्ताय सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतः ११ गीताय शैलूषं नटं १२ धर्माय
सभाचरं सभायां चरतीति तं १३ नरिष्ठायै भीमलं भयंकरं १४ नर्माय रेभं शब्दकर्तारं वाचालं १५ हसाय कारिं युक्तकरणं
विशिष्टं १६ आनन्दाय स्त्रीषखं स्त्रियाः सखा १७ प्रमदे कुमारीपुत्रं कानीनं १८ मेधायै रथकारं सामाहिष्यां करण्यां जातं

तपसे कौलालं कुलालापत्यं २१ मायायै कर्मारं लोहकारं २२ रूपाय मणिकारं रत्नकर्तारं २३ शुभे शुभाय वपं यवीजं वप्तारं २४ शरव्यायै इषुकारं बाणकर्तारं २५ हेत्यै धनुःकारं चापकारिणं २६ कर्मणे ज्याकारं प्रत्यंचाकर्तारं २७ दिष्टाय रज्जुसर्जं रज्जोः स्रष्टारं निर्मातारं २८ मृत्यवे मृगयुं मृगहन्तारं २९ अन्तकाय श्वनिनं शुनो नेतारं ३० नदीभ्यः पौञ्जिष्ठं पुञ्जिष्ठाः त्यजः पुल्कसस्तदपत्यं ऋक्षीकाभ्यः नैषादं निषादपुत्रं ३२ पुरुषव्याघ्राय दुर्मदं उन्मत्तं ३३ गन्धर्वाप्सरोभ्यो व्रात्यं सावित्रीपतितं ३४ प्रयुग्भ्यः उन्मत्तं ३५ सर्पदेवजनेभ्यः प्रतिपद्यते जानातीति प्रतिपत् अनथाविधिं विकल्पमित्यर्थः ३६ अयेभ्यः कितवं द्यूतकारं ईर्यतायै

तपसे कौलालम्मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया इषुकारꣳ हेत्यै धनुष्कारङ्कर्म
णे ज्याकारन्दिष्टाय रज्जुसर्जम्मृत्यवे मृगयुमन्तकाय श्वनिनम् ७ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादम्पुरु
षव्याघ्राय दुर्मदङ्गन्धर्वाप्सरोभ्यो व्रात्यम्प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्य
ताया अकितवम्पिशाचेभ्यो विदलकारीँयातुधानेभ्यः कण्टकीकारीम् ८ सन्धये जारङ्गेहायोपपतिमार्त्यै
परिवित्तन्निर्ऋत्यै परिविविदानमराद्ध्या एदिधिषुः पतिन्निष्कृत्यै पेशस्कारीꣳ संज्ञानाय स्मरकारीम्प्र
कामोद्यायोपसदं वर्णायानुरुधम्बलायोपदाम् ९ ॥

अकितवं अद्यूतकृतं ३८ पिशाचेभ्यो विदलकारीं वंशविदारिणीं वंशपात्रकारिणीं ३९ यातुधानेभ्यः कंटकीकारीं कंटकीकार्मणाकर्मतत्कारिणीं ४० संधये जारं उपपतिं ४१ गेहाय उपपतिं व्यभिचारिणं ४२ आर्त्यै परिवित्तं ऊढे कनिष्ठे अनूढं ४३ निर्ऋत्यै परिविविदानं अनूढे ज्येष्ठे ऊढवन्तं ४४ आराध्यै एदिधिषुःपतिं ज्येष्ठायामनूढायामूढा दिधिषुस्तत्पतिं ४५ निष्कृत्यै पेशस्कारीं रूपकर्त्रीं ४६ संज्ञानाय स्मरकारीं कामदीप्तिकरं ४७ प्रकामोद्याय नर्मसंलापाय देवाय उपसदं उपसीदतीत्युपसत् समीपस्थितं तं ४८ सन्तानमिष्टे नियुनक्ति ९ अथ द्वितीये रूपे वर्णाय अनुरुधं अनुरुध्यते अनुसरतीत्यनुरुत् तं ९ बलाय उपदा

[illegible] ८ [illegible] ३९

१९४ उन्मादेभ्यः ऊन्नेऊन्नेवक्रांगेप्रमदे वामनेह्रस्वांगे ४ हार्भ्यः सार्द्धेसर्वदाजललक्तिन्नेत्रे ५ स्वप्नाय अंधे नेत्रहीने ६ अथमीयवः
धिरेकर्णेन्द्रियहीने ७ पविज्ञाभिघ्रे वैद्ये ८ प्रज्ञानायनन्तस्य्रदर्शी नतत्राणिदर्शयतिते गणके आशितायैप्रश्निनेप्रश्नवंतेप्र
ऊनादिप्रष्टारमित्यर्थः ९ उपशितायै अभिप्रश्निने अतिप्रश्नवंते ११ अथतृतीयमर्यादायैप्रश्नविवाके कृतानप्रश्नान्यो

उन्मादेभ्यः ऊन्नमप्रमदेवामनन्द्वार्द्धः स्नामध्ये स्वप्नायान्धमथर्मीयवधिरमपविज्ञायभिघ्रजप्रज्ञा
नायनतत्रदर्शमाशितायैप्रश्निनमर्यादायैप्रश्नविवाकम् ९ अर्मेभ्यो हस्तिपञ्जवाया
श्वपमपुष्ट्यैगोपालं वीर्यायाविपालन्तेजसेजपालमिरायैकीलाशङ्कीलालायसुराकारम्भ
द्राायगृहपध्ये श्रेयसेवित्तधमाध्यक्षायानुक्तारम् ११ ॥ ॥

विवितक्ति भूतेसप्रश्नविवाकस्ते १ अर्मेभ्यः हस्तिपंगजपालके २ जवाय अश्वपे गुणपालके ३ पुष्ट्यैगोपाले येनुपा
लके ४ वीर्यायअविपाले मेषपालके ५ तेजसेअजपाले ६ इरायैकीनाशकर्षके कीनाशः कर्षकेयमे ७ केलालायसुर
कारे मद्यकृते ८ भद्रायगृहपेगेहपालके ९ श्रेयसेवित्तयंविभेदयानीतिवित्तरक्षंयनयनीरे १० आपत्तापअनुक्ततार

अथ चतुर्थे यूपे भायै दार्वाहारं काष्ठानामहर्तारं १ प्रभायै अग्न्येधं अग्निमिन्धयतीति तं अग्नेर्वर्द्धकं २ ब्रध्नस्य विष्टपाय स्वर्गा
लोकाय अभिषेक्तारं अभिषेककर्तारं ३ वर्षिष्ठाय नाकाय उत्कृष्टस्वर्गाय परिवेष्टारं परिवेषणकर्तारं ४ देवलोकाय पेशि
तारं पिश अवयवे पिशतीति पेशिता तं प्रतिमाद्यवयवकर्तारं ५ मनुष्यलोकाय प्रकरितारं कॄ विक्षेपे विक्षेप्तारं ६ स
र्वेभ्यो लोकेभ्यः उपसेक्तारं उपासेचनकर्तारं ७ अवऋत्यै वधाय उपमन्थितारं उपमन्थनकर्तारं ८ मेधाय वासः पल्पू

भायै दार्वाहारम्प्रभाया अग्न्येधम्ब्रध्नस्य विष्टपायाभिषेक्तारंवर्षिष्ठाय नाकाय परिवेष्टारन्देवलोका
य पेशितारम्मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्य उपसेक्तारमव ऋत्यै वधायोपमन्थिता
रम्मेधाय वासःपल्पूलीम्प्रकामाय रजयित्रीम् ११ ऋतये स्तेनहृदयंवैरहत्याय पिशुनंविविक्त्यै
क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्ने परिष्कन्दम्प्रियाय प्रियवादिनमरिष्ट्या अश्व
सादꣳ स्वर्गाय लोकाय भागदुघंवर्षिष्ठाय नाकाय परिवेष्टारम् १२ ॥ ॥ ॥

लीं वाससो प्रक्षालनकर्त्री पल्पूल प्रक्षालनच्छेदनयोः ९ प्रकामाय रजयित्रीं वस्त्राणां रंगकारिणीं नारीं १० ऋतये स्तेनहृ
दयं स्तेनमेव हृदयं यस्य तं ११ अथ पंचमे यूपे वैरहत्याय पिशुनं परच्छिद्रसूचकं १ विविक्त्यै क्षत्तारं प्रतीहारं २ औपद्रष्ट्र्या
याय अनुक्षत्तारं प्रतिहारसेवकं ३ बलाय अनुचरं सेवकं ४ भूम्ने परिष्कन्दं परितः स्कन्दति रेतः सिंचति तं ५ प्रियाय प्रियवा
दिनं मधुरभाषिणं ६ अरिष्ट्यै अश्वसादं अश्वारोहं ७ स्वर्गाय लोकाय भागदुघं भागदुघो भागदुघस्ते विभागप्रदः ८ वर्षिष्ठाय
नाकाय परिवेष्टारं ९ ५

मन्येवे अपस्लापम् अपस्लापंलोहनापकर १० कोयापनिसरंनितरांमतीरे ११ अथषष्ठेरूपे योगापयोक्तारंयोगकुनीरं १ शोक
यथमिमृतीरेसेमत्विमागक्ेत २ तेमायविमोक्तारंविमावृनकरं ३ उल्कलेनिकलेअप्रविष्ठिनेविष्ठतिष्ठनीतिविष्ठीत विषादिष्ठ
स्थितेशीलवेनमित्यर्थः ४ वपुषे मानस्कनेदजायाअभिमावसवाकनीर सककाद्यः ५ शीलाय श्रोजनीकारी अजनाव
यकशी ६ निर्कतेकोशकारी त्वद्यावरणकोशस्तन्काविमोक्षिये ७ यमायअहे नसहेतसायसः तोवथा ८ यमाययम

ममवेयस्लापक्कोयायनिसरंयोगाययोक्तार ८० शोकायाभिसर्मोरहेमायविमोक्तारमत्कलनिक्
लेअविस्तिष्ठितेवपुषेमानस्कनेठ० शीलायोजनीकारीनिर्कतेमकोशकारीयमायास्म् १४ य
मायय मसहमर्थीर्वाओ वतीकाअं संवत्सराय पर्यायिणीम्परिवत्सरायाविजानानामिदावत्सराया
नीत्वरीमिहत्सरायातिष्कहरीवत्सरायविजर्जराअं संवत्सरायपलिक्नीमहमओजिनसन्य८०
सेहेवासवर्मीमन्वम् १५ ॥ ॥ ॥

से अमप्रसस्तविठी ८ अथर्वभ्यः अवनोकोनिरयत्वो ९० संवत्सरायपर्यायिणीयपयोयोः तकमस्तहतीयतकम ११ अथस
मेमपुषे परिवत्साय अविजानो अप्रसहतो एत्वावत्सराय अनीत्वरी अतंनेऊलटो उंस्त्रीऊलटेवरी २ इहत्सराय अति
ष्कदरी अतिस्कंदतिस्रवति इति अतिस्कहतीस्कंदेर्वनेतानडीपुरेफो ३ वत्सरायविजर्जरा शिथिलशरीरे ४ संवत्सराय
पलिक्नीश्वेतकेशा ५ अभुभ्यः अजिनसंयवमिमेयानार ६ साध्येभ्यः चर्मम्नचमाभ्यासकर ७ ८ ॥

सरोभ्यो धैवरं धैवरकैवर्त्तापत्यं ८ उपस्थावराभ्यः दाशं दाशसूदाने दातारं दाशो धीवरो वा ९ वैशन्ताभ्यः बैन्दं बिन्दोर्निषाद
दस्तदपत्यं १० नड्वलाभ्यः शौष्कलं मत्स्यजीविनं शुष्कला मत्स्यास्तैर्जीवतीति तं ११ अथाष्टमेऽनुवाके पाराय मार्गारं मृगारेः पुत्रं मार्गारं
गारस्तं १ अवाराय केवर्तं २ तीर्थेभ्यः आन्दं आन्दिबन्धने आन्दति आन्दस्तं बन्धनकर्त्तारं ३ विषमेभ्यः मैनालं मीनान् अलं वारयति मी-
नानलं निवारयति जालेन स मीनालस्तदपत्यं ४ स्वनेभ्यः पर्णकं भिल्लं गुहाभ्यः किरातं ६ सानुभ्यः जम्भकं जम्भितनाशं

सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय
केवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालं स्वनेभ्यः पर्णकं गुहाभ्यः किरातं सानुभ्यो जम्भ
कं पर्वतेभ्यः किम्पूरुषम् १६ बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादो
षाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्ध्या अ
पगल्भं संशराय प्रच्छिदम् १७ ॥ ॥ ॥

नेजं भयतीति तं हिंसकं ७ पर्वतेभ्यः किम्पूरुषं कुत्सितनरं ८ बीभत्सायै पौल्कसं पुल्कसापत्यं ९ वर्णाय हिरण्यकारं
स्वर्णनिष्पादकं १० तुलायै वाणिजं वणिगपत्यं ११ अथ नवमेऽनुवाके पश्चादोषाय ग्लाविनं ग्लायति हर्षं न यस्य तं १ विश्वेभ्यो
भूतेभ्यः सिध्मलं सिध्माख्यरोगवन्तं २ भूत्यै जागरणं जागरूकं ३ अभूत्यै स्वपनं शयालुं ४ आर्त्यै जनवादिनं जनं
वा नु वदतीति तं ५ व्यृद्ध्यै अपगल्भं ६ संशराय प्रच्छिदं प्रच्छेदनकर्त्तारं ७ ॥ ॥

१९ अत्तराजायकिंचकिंनवंधूर्ते ८ ह्रताय आदिनवदर्शी आदिनवोदोषस्तंपश्यतितथाभूते ९ त्रेतायैकल्पिते कल्पके १० द्वा
106 परायअधिकल्पिते अधिकल्पनाकर्तारं ११ अथद्दशमेरूपे आस्कंदायसभास्थाणेसभायांस्थिरं १ ह्रस्वेगोब्यक्केगाःप्र
तिगमनशीले २ श्वेनकायगोष्ठानेगवांहनारे ३ त्वयेयोगोविक्केतंतेभितमानउपतिष्ठति यःइमानुगोविक्केतंतंकिंदंतेभि
वमानोपावमानउपतिष्ठतितेयाचितारंत्वयेदंदैत्रालभेत ४ उः कृतायचरकावार्येवरकाणांगुरुं ५ पापनेस्विने ७ घोषा

अत्तराजायकितवकृतायादिनवदर्शीनेत्रेतायैकल्पिनन्द्वापरायाधिकल्पिनमास्कन्दायसभास्थाः
एउमृत्यवेगोब्यक्कमन्तकायगोघातन्क्षुधेयोगांविकृन्तन्तम्भिक्षमाणः उपतिष्ठतिदुष्कृतायचरका
चार्य्यम्पाप्मनेसैलगम् १५ प्रतिस्कन्कायाः अर्तनञ्घोषायभषमन्तायबहुवादिनमनन्तायमूक
८ शब्दायाडम्बराघातम्महसेवीणावादङ्क्रोशायतूणवध्ममवरस्पराय शङ्खध्मंवनायवन
यमन्यतोरण्यायदावपम् १९ ॥ ॥ ॥

यमषेनल्पकं ८ सैलगं सीलगोडष्टस्लदपतं ९ प्रतिस्कुन्कायअर्तनं प्रतिस्कुन्कायैअर्तनंउः अंतकायबहुवादिनं ९ अनंता
यमूकेवाग्विकले १० शब्दायआडंवराघाते आडंवरं आहंतितंकोलाहलकर्तारं ११ अथैकादशेरूपे महसेवीणावादंवीणावा
दनकर्तारं १ क्रोशायतूणवध्मं तूणवंवाद्यविशेषंयमतितथाविधंभूतं २ अवरस्परायशंखध्मं शंखवादकं ३ वनायवनपं
वनपालकं ४ अन्यतोरण्यायदावपं वनवह्निपालकं ५ ८ ॥ ॥

नर्माय पुंश्चलूम् पुंश्चलूं उच्छृङ्खलां नारीं हसाय कारिं करणशीलं १ यादसे शाबल्यां शबलः कर्बुरवर्णस्तदपत्यभूतां स्त्रियं २
ग्रामण्यं ग्रामनेतारं गणकं ज्योतिर्विदं अभिक्रोशकं निन्दकं तान् सर्वान् महसे उत्सवनिमित्तं जीनेकादशे यूपे आलभते ॥
एवं यूपमेकादशस्वेकादशान्नियुङ्क्ते यूपे ऽधिका अवशिष्टास्तान् समाप्तिपर्यंतान् द्वितीये छिते यूपे नियुनक्ति तोऽत्र वीणा
वादं पाणिघ्नमित्यादीन् रात्र्यै कृष्णं पिंगाक्षमित्यंतान् स्वन्दृष्टा ततोऽष्टैनान् षष्ठौ विभूपानित्यष्टाव माणयादीन् अन्तरः एवं ष-
ड्विंशतिर्द्वितीये यूपे एवं क्रियाः एकादश पवेसन्नविंशत् तानेवाह वीणावादं पाणिघ्नं हस्ततालवादकं तूणवध्मं तान्नृत्त

नर्म्माय पुंश्चलूं हंसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे वीणावा-
दं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् २० अग्नये पीवानं पृथिव्यै पीठसर्पिणं
वायवे चाण्डालमन्तरिक्षाय वंशनर्तिनं दिवे खलतिं सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं
चन्द्रमसे किलासमह्ने शुक्लं पिङ्गाक्षं रात्र्यै कृष्णं पिङ्गाक्षम् २१ ॥ ॥ ॥

नृत्ताय आलभते ३ आनंदाय तलवं वाणति गच्छति गंधयतयोः गंधनं हिंसा तलं हस्तादितलं वा निवाद्यमस्त्येवं हंति स तलवस्तं वाद्यवा-
दकं ४ अग्नये पीवानं पीवानं स्थूलं ५ पृथिव्यै पीठसर्पिणं पीठेनासनेन सर्पति गच्छतीति पीठसर्पी तं पंगुं ६ वायवे चाण्डालं च
ण्डालकर्माणं ७ अन्तरिक्षाय वंशनर्तिनं वंशेन नर्तनशीलं ८ दिवे खलतिं अलोमशिरस्कं खल्वाटमित्यर्थः ९ सूर्याय
हर्यक्षं हरितनेत्रं १० नक्षत्रेभ्यः किर्मिरं कर्बुरवर्णं ११ चन्द्रमसे किलासं सिध्मरोगवंतं १२ अह्ने शुक्लवर्णं पिंगाक्षं १४ १

९२ अथैतानष्टौ तत एतान्वक्ष्यमाणानष्टौ विरूपान्परस्परं विरुद्धरूपान्पशूनालभते तानाह अतिदीर्घं १ अतिह्रस्वं २ अतिस्थूलं ३
अतिकृशं ४ अतिशुक्लं ५ अतिकृष्णं ६ अतिकुल्वं रोमरहितं ७ अतिलोमशं सर्वाङ्गव्यापिरोमाणं ८ तेऽष्टौ अशूद्रा अ
ब्राह्मणाः शूद्रब्राह्मणव्यतिरिक्ताः पशवो भवन्ति तेऽष्टावपि प्राजापत्याः प्रजापतिदेवताः अष्टाउत्तमानालभते ऽपरा
ते वै प्राजापत्या भवन्तीति श्रुतेः अत्र जातिनियमात्सर्वेषु जातेरनियमः वीणावादादयश्च सर्वे अतिदीर्घादयोऽष्टौ एव

अथैतानष्टौ विरूपानालभतेतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं
चातिकुल्वं चातिलोमशं च अशूद्रा अब्राह्मणास्ते प्राजापत्याः मागधः पुंश्चली कितवः
क्लीबो ऽशूद्रा अब्राह्मणास्ते प्राजापत्याः २२ इति संहितायां त्रिंशोऽध्यायः ३० ॥ ॥

विंशतिः शेषाः तथा मागधः पुंश्चली कितवः क्लीबः एते चत्वारोऽपि शूद्रब्राह्मणव्यतिरिक्ताः प्रजापतिदेवताः पूर्वैः सह ते षु
ड्विंशतिः ते सर्वे द्वितीयोऽपि यूपे नियोज्याः सर्वेषां नियोगानन्तरं तान्निष्क्रान्पुरुषान्सहस्रशीर्षा पुरुष इति षोडशर्चेनानुवाके
न स्तुवीत उपविष्टो होता वदमिष्टोति होतवदिति प्रथमो ब्रह्मयोत्त्रिर्वचनेऽङ्गानां ब्रह्मणो वेन संस्थाने ९ ॥ ॥
॥

यथा सहस्रशीर्षापुरुषः गुलो २ पुरुषएवेदंशिरदनो ३ एवमभिष्टौति ततआलंभनक्रमेणयथादेवतंप्रोक्षणादि ब्रा
ह्मणादीनांपर्यग्निकरणानंतरमिदंब्राह्मणे इदंतत्रापेमेवंसर्वेषांयथास्वदेवतोद्देशेनत्यागः ततः सर्वान्ब्राह्म
णादीन्यूपेभ्योविमुच्योत्सृजंति ततोएकादशिनैः पशुभिः संज्ञपनादिप्रधानेयागांतेवनस्पतियागंकृत्वाप्राकस्वि
ष्टकृतः अथर्वशिरास्यसंस्कृत्यसक्तुमृद्दीतस्यमाज्येनदहीत्वाग्दहीत्वाउँमपुरुषदेवताभ्योब्रह्मादिभ्यश्चाहवनी
येजुहोति ॐब्रह्मणेस्वाहा १ क्षत्रायस्वाहा २ मरुद्भ्यः स्वाहा ३ तपसे ४ नमसे इत्याद्यध्यायोक्तसर्वदेवताभ्यः पंच
शतीस्तुत्तरशतसंख्याभ्यस्तावतीर्हुत्वाहुतीर्हुत्वास्विष्टकृदादिउदवसानीयांतेकर्मकृत्वातेयजमानः जघनेयोनि
रितिमंत्रेणात्मन्यग्नीन्समारोप्याज्ञः संभृत इतिषट्चेनानुवाकेनसूर्यमुपस्थायपश्चादनवलोकयन्नरण्यं
गत्वासन्यसेत् गार्हपत्येऽग्नावरणीमन्त्रशत्यमाहवनीयउत्तराणीमात्मन्यग्नीसमारोप्यारण्यंव्रजेदितिशाखा
यनोक्तेः यदिपुरुषमेधानंतरंग्राममवासेच्छातन्त्रोदवसानीयांतेसायमाहुतिंहुत्वारण्योरग्नीसमारोप्योत्तरना
रायणेनार्कमुपस्थायदेवयजनमादेष्यगृहंव्रजेत् गृहेआगत्यनिर्मथ्याग्निंस्थापयेत् यथेष्ठंयज्ञातपिकुर्या
त् अयमपिपत्नीकोस्ति नतुपुरुषमेधानंतरंसंन्यासएव श्रीमत्समरेश्वरकृतेवेददीपेमनोरमे त्रिंशोऽध्यायेप्र
कथिताःपशवोनरमेधिके इतिमंत्रदीपेत्रिंशोऽध्यायः ३ ॥ ॥

१०८ रमाकांतं गिरं नत्वा हेरंबं शिवमंबिकां एकत्रिंशोऽनुवाकस्यायं वेददीपो वितन्यते कान्यानि युक्तान्ब्राह्मणाभिषेक्ष्योतिहोत्रस्य दत्त्वा
केन सहस्रशीर्षेति अस्यार्थः नियुक्तान्ब्राह्मणेब्राह्मणमित्यादिपुरुषान्सहस्रशीर्षेत्यनुवाकेन षोडशर्चेन ब्रह्मा स्तौतीति होत
वहृतिः प्रथमोऽत्रिरुक्तमामित्याद्युक्तप्रकारेणेत्यर्थः अथात्मन्यग्नीन्समारोप्यात्मन्यग्नीन्समारोप्य पश्यात्पाङ्गः स प्रस्तरस्यन्तु
1086 वाकेनानपेक्षमाणः वनं गत्वा न शत्रवे पाङ्गामेवा विवत्स मरणाः अथानवीउदवसानो यष्टिः तदनेऽयनेयो निर्विशंसी
ग्रामान्मनि समारोप्यात्मनुष्याणमास्ये प्रवेशणाभ्यः सम्भृतश्च तिषद्धे चेन्नानुवाकेनुसूर्यमुपस्थायप्रत्यादयेश्परत्वनेगत्वा ग्रामेना
गच्छेत् वा न प्रश्या भुवेदित्यर्थः यद्वा ग्रामे वस्त्रमिक्षन्नरण्यारण्ये श्रीशारो प्याकीपस्याना नेतरग्रामे गत्वा यत्नानुकुर्यादिति
स्तुत्वार्थः प्रथमेत्यार्थः सहस्रशीर्षा नारायणपुरुषदृष्टा जगद्वीजपुरुषदेवत्याः षोडशर्चाः पंचदशानुष्टुभः षा॰

सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् १ ॥

त्रिष्टुप् ब्राह्मणेब्राह्मणमित्याद्याः पुरुषमेधरूपस्य परमात्मनोऽवयवाः सर्वाध्यायांते प्रोक्तास्तेषामवयवी पुरु
षोऽनेनस्तूयेत अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः पुरुषान्नपरं किंचिदित्यादिश्रुतिषु प्रसिद्धः सर्वप्राणिस
मष्टिरूपो ब्रह्माण्डदेहो विराडाख्योऽस्ति कीदृशः सहस्रशीर्षा सहस्रशब्दोबहुत्ववाची संख्यावाचकत्वे सहस्राक्ष इति
विरोधस्यात् नेत्रसहस्रद्वयेन भाव्यं ततः सहस्रमसंख्यानि शीर्षाणि शिरांसि यस्य सः शीर्षक्छंदसीति शीर्षशब्दः सहस्रशीर्ष
वादेशाः शिरोग्रहणं सर्वावयवोपलक्षणं यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहांतःपातित्वात्तस्यैवेति स॰
हस्रशीर्षत्वं एवमग्रेपि सहस्राक्षः सहस्रमक्षीणि यस्य सः अक्षिग्रहणं सर्वज्ञानेन्द्रियोपलक्षणार्थं १ ॥ ॥

सहस्रपात् सहस्रं पादा यस्य संख्यासुपूर्वस्येति पादस्यान्त्यलोपः पादग्रहणं कर्मेन्द्रियोपलक्षणं सः पुरुषो भूमिं ब्रह्मा-
ण्डलोकरूपां सर्वतस्तिर्यगूर्ध्वमधश्च स्पृत्वा व्याप्य स्पृणोतिर्व्याप्तिकर्मा यद्वा भूमिशब्दो भूतोपलक्षकः पंचभूतानि व्याप्य
दशांगुलपरिमितं देशं अत्यतिष्ठत् अतिक्रम्यावस्थितः दशांगुलमित्युपलक्षणं ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थि-
त इत्यर्थः यद्वा नाभेः सकाशाद्दशांगुलमतिक्रम्य हृदि स्थितः नाभित इति कुतो लभ्यते कतमस्यात्मेत्युपक्रम्य योऽ-
यं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरिति श्रुतेः विज्ञानात्मनो हृद्यवस्थानं कर्मफलोपभोगाय अन्तर्यामिणा नियन्तृ-
त्वेन तदुक्तं द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती-
ति स पुरुषो देवता तथा च श्रुतिः इमे वै लोकाः पूरयमेव पुरुषो यो यं पवते सोऽस्यां पुरि शेते तस्मात्पुरुष इति पुरुष एव

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् उतामृतत्वस्येशानो यदन्नेनातिरोहति २ ॥ ॥

वृ यत् इदं वर्तमानं जगत् तत्सर्वं पुरुष एव यत् भूतमतीतं जगत् भाव्यं भविष्यं जगत् तदपि पुरुष एव यथास्मिन्क-
ल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवास्तथैवातीतागामिनोरपि कल्पयोरिति द्रष्टव्यमिति भावः उतापि
च अमृतत्वस्य देवत्वस्य ईशानः स्वामी स पुरुषः यत् यस्मात् अन्नेन प्राणिनां भोग्येनान्नेन फलेन निमित्तभूतेनातिरोह-
ति स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्पुरुष एव प्राणिनां कर्मफलभोगाय जग-
दवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः यद्वा सर्वं पुरुषश्चेतनाद्दिपरिणामो न्याशंक्याह अमृतत्वस्यामरणधर्मस्ये-
शानः मृत्योरीशः यो हि मोक्षे स्वरो न्यासो म्रियते इत्यर्थः किंच यत् जीवजातं अन्नेनातिरोहति प्ररोहति उत यत् तेन
स्य सर्वस्येशानः ब्रह्मादिस्तम्बपर्यन्तो भूतग्राम उक्तः तस्मात्तेनैवावस्थितं इतः प्रदानाद्धि देवा उपजीवन्तीति श्रुतेः २

एतावानस्य अतीतानागतवर्तमानकालसंबद्धं जगद्यावदस्ति एतावान्सर्वोपि अस्यपुरुषस्यमहिमा स्वकीयसामर्थ्य
विशेषोविभूतिः नतुवास्तवंस्वरूपं वास्तवपुरुषस्तु अतो अस्मान्महिम्नोजगज्जालात्ज्यायोऽय अतिशयेनाधिकः एत
दुभयंस्पष्टीक्रियते अस्यपुरुषस्यविश्वासर्वाणिभूतानिकालत्रयवर्तीनिप्राणिजातानिपादश्चतुर्थोंशः अस्यपुरुष
स्यावशिष्टंत्रिपात्स्वरूपंअमृतंविनाशरहितंसत्दिविद्योतनात्मकेस्वप्रकाशस्वरूपेऽवतिष्ठते इतिशेषः यद्यपिसत्यंज्ञा
नमनंतंब्रह्मेत्याम्नातस्यपरब्रह्मणःइयत्तायाअभावात्पादचतुष्टयंनिरूपयितुमशक्यंतथापिजगदिदंब्रह्मस्वरूपापेक्ष
याल्पमितिविवक्षितत्वात्पादत्वोपन्यासः त्रिपादूर्ध्वः योयंत्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मस्वरूपः अयंऊर्ध्वउदैत

एतावानस्यमहिमातोज्यायाँश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३ त्रिपादू
र्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ततोविष्वङ्व्यक्रामत्साशनानशनेअभिः ४ ॥ ॥

अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्टउत्कर्षेणस्थितवान् तस्यास्यपादोलेशोजगद्रूपःइहसोयं
पुनरभवत् सृष्टिसंहाराभ्यांपुनरागच्छति सर्वस्यजगतः परमात्मलेशत्वंभगवताप्युक्तं विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थि
जगतइतिततोमायायामागत्यानंतरंविष्वङ् विश्वसर्वोंचतीतिविष्वङ् देवतिर्यगादिरूपेणविविधःसन्व्यक्रामत्व्या
प्तवान् किंकृत्वासाशनानशनेअभि अभिलक्ष्य अशनेनसहवर्तमानंसाशनं अशनादिव्यवहारोपेतंचेतनंप्राणिजातं
अनशनंतद्रहितमचेतनंगिरिनद्यादिकं तेअभिलक्ष्यस्वयमेवविविधोभूत्वाव्याप्तवानित्यर्थः ३ ॥

ततो विष्वङ् व्यक्रामदिति यदुक्तं तदेव प्रपंच्यते ततः तस्मादादिपुरुषात् विराड् ब्रह्माण्डदेहोऽजायत जातः विवि
धं राजन्ते वस्तून्यत्रेति विराट् विराजः अधि विराड्देहस्योपरि तमेव देहमरणं कृत्वा पुरुषस्तद्देहाभिमानी एक एव पु-
मानजायत सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी
देवतात्मा जीवोऽभवदित्यर्थः एतच्चाथर्वणा उत्तरतापनीये स्पष्टमुक्तं स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशां
श्च सृष्ट्वा तत्र प्रविष्ट इव विहरतीति किंच स जातो विराट्पुरुषोऽत्यरिच्यत अतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् प

ततो विराडजायत विराजोऽअधि पूरुषः स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ५ ॥

श्चाद्देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज पूर्यन्ते सप्तभिर्धातुभिरि
ति पुरः शरीराणि तस्माद्यज्ञात् सर्वं हूयते यस्मिन्स सर्वहुत् तस्मात्पुरुषमेधाख्यात् यज्ञात् पृषदाज्यं दधिमिश्रमा-
ज्यं संभृतं संपादितं दध्याज्यादिभ्योऽभोग्यजातं संपादितमित्यर्थः पुरुषेणेति शेषः तथा स पुरुषो वायव्यान् वायुदेव
ताकान् तान् प्रसिद्धान् पशून् चक्रे उत्पादितवान् अन्तरिक्षदेवत्याः खलु वै पशव इति श्रुतेः अन्तरिक्षस्य च वायुदेव
त्वात् पशूनां वायुदेवत्वं तान् कान् ये चारण्या अरण्यभवा हरिणादयः ये चा ग्रामभवा गवाश्वादयस्तान् पशूंश्चक्रे ४

तस्माद्यज्ञात् सर्वहुतस्तस्मात् यज्ञात् ऋचः सामानि जज्ञिरे उत्पन्नानि छंदांसि गायत्र्यादीनि जज्ञिरे तस्मात् यज्ञात् यजु
रप्यजायत ऋग्यजुःसामभिः वेदैर्भिश्च विना यज्ञा न सिध्यन्ति तस्मादश्वाः तस्मात् यज्ञात् अश्वा अजायन्त उत्पन्नाः
तथा ये के चास्यातिरिक्ता गर्दभादयो ऽश्वतराश्च उभयादतः ऊर्ध्वाधोभागयोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त
तथा हस्त्यादि तस्माद्यज्ञात् गावो जज्ञिरे किंच तस्माद्यज्ञात् अजावयः अजाः अवयश्च जाताः न हि पशुभिर्विना यज्ञः
सिध्येत् तं यज्ञं यज्ञसाधनं यज्ञशब्दः यज्ञ यज्ञसाधनभूतं तं पुरुषं पशुत्वभावात् यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रो

तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् पशूँस्ताँश्चक्रे वायव्यानारण्याग्ग्राम्याश्च्ये ६ तस्माद्य
ज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे छन्दाᳬंसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७ तस्मादश्वा
ऽअजायन्त ये के चोभयादतः गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ८ तं यज्ञं बर्हिषि प्रौ
क्षन्पुरुषं जातमग्रतः तेन देवा ऽअयजन्त साध्या ऋषयश्च ये ९ यत्पुरुषं व्यदधुः कतिधा व्य
कल्पयन् मुखं किमस्यासीत्किं बाहू किमूरू पादा ऽउच्येते १० ॥ ॥ ॥

क्षितवन्तः प्रोक्षणादिभिः संस्कारैः संस्कृतवन्तः कीदृशं अग्रतः सर्वस्मादादौ पुरुषं जातं पुरुषत्वेनोत्पन्नं एतच्च प्रागेवोक्तं तस्माद्वि
राडजायत विराजो अधि पुरुष इति तेन पुरुषरूपेण पशुना देवा अयजन्त मानसयागं निष्पादितवन्तः के ते देवा इत्यत आह ये
साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूला ऋषयो मन्त्रद्रष्टारः ते सर्वेऽप्ययजन्त यत्पुरुषं प्रश्नोत्तर
रूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते प्रजापतेः प्राणरूपा देवा यत् यदा पुरुषं व्यदधुः संकल्पेनोत्पादितवन्
तदा कतिधा कतिभिः प्रकारैर्व्यकल्पयन् विविधं कल्पितवन्तः अस्य पुरुषस्य मुखं किमासीत् किं बाहू के ऊरू पादौ का उच्येते

पूर्वोक्तप्रश्नोत्तराण्याह ब्राह्मणोऽस्य मुखमासीदिति ब्राह्मणो ब्राह्मणत्वजातिविशिष्टः पुरुषोऽस्य प्रजापतेर्मुखमासीत्
मुखादुत्पन्न इत्यर्थः राजन्यः क्षत्रियत्वजातिविशिष्टो बाहू ततः बाहुत्वेन निष्पादितः बाहुभ्यामुत्पादितः तत्तदा-
नीमस्य प्रजापतेः यत् यावूरू तद्रूपो वैश्यः संपन्नः ऊरुभ्यामुत्पादित इत्यर्थः तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजाति-
मान्पुरुषोऽअजायत उत्पन्नः यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदाः ब्राह्मणादयो मनुष्याश्च तस्मा-
दुत्पन्नाः एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह चन्द्रमा मनसः प्रजापतेर्मनसः सकाशाच्चन्द्रमा जातः चक्षोः

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत ॥ ११ ॥ च-

न्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२

नाभ्याऽआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ ॥

अकल्पयन् १३ ॥

चक्षोः सकाशात्सूर्यो अजायत वायुः प्राणश्च श्रोत्राच्च कर्णादजायत मुखादग्निः अजायत यथा प्रजापतेर्मनः
प्रभृतेः चन्द्रादीनकल्पयन् तथान्तरिक्षादिलोकानित्याह नाभ्येति प्रजापतेः नाभेः सकाशादन्तरिक्षमा-
सीत् शीर्ष्णः शिरसो द्यौः स्वर्गः समवर्तत उत्पन्ना अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना श्रोत्राद्दिश उत्पन्नाः तथान्ये-
नोक्तेन विधिना लोकान् भूरादीन् प्रजापतेः सकाशादकल्पयन् कल्पितवन्तः फलदानोत्सुकाः काला इति शेषः

१११

यत्पुरुषेण यत् यदा पूर्वोक्तक्रमेण देवशरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यानुत्पन्नत्वेन पुरुषस्वरू
पमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञमतन्वत अन्वतिष्ठन् तदानीमस्य यज्ञस्य वसन्त
ऋतुराज्यमासीत् आज्यत्वेन संकल्पितवन्त इत्यर्थः एवं ग्रीष्म इध्म आसीत् ग्रीष्ममेवेध्मत्वेन संकल्पितवन्तः तथा श
रद्धविरासीत् शरदमेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्तः पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः अनन्तरं वसं
तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यं अत्र कण्डिकाव्युत्क्रमोस्ति अस्मानन्तरं त्र्यस्ते ततः न साध्यत्वादि
ति निश्चः क्रमेणैव तेः सप्तास्यासन्निति क्रमोऽपेक्षितः सप्तास्यासन् यत् यदा देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्
वानाः मानसयज्ञं कुर्वाणाः पुरुषं पशुमबध्नन् विराट्पुरुषमेव पुरुषमेव पशुत्वेन भावितवन्तः एतदेवाभिप्रेत्योक्तं

यत्पुरुषेण हविषा देवा यज्ञमतन्वत वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः सप्तास्यासन्परि
धयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ।५ ॥ ॥ ॥

पुरुषेण हविषेत्युक्तं तदानीमस्य सांकल्पिकस्य यज्ञस्य सप्त गायत्र्यादीनि छन्दांसि परिधय आसन् ऐष्टिकस्याहवनीय
स्य त्रयः परिधयः औत्तरवेदिकास्त्रयः आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः तथा च श्रुतिः उपरिष्टादेवाग्नेः परिधयो
भवेत्तथैतत्तद्रूपमेव पुरस्ताज्ज्योतिष्कारं करोतीति ततएते आदित्यसहिताः सप्त परिधयोऽत्र सप्तछन्दोरूपाः त्रिः सप्त त्रिगु
णाः सप्त एकविंशतिसंख्याकाः समिधः कृताः द्वादश मासाः पञ्चर्तवः त्रय इमे लोका असावादित्य एकविंश इत्येकविंशति
दारुयुक्तेध्मत्वेन भाविताः यद्वा सप्त समुद्राः तारादयो अस्य यज्ञस्य परिधय आसन् भारतादि इत्यागा भवन्ति समन्त्राणा
परिधित्वे त्रिगुणाः सप्त कुलावर्गाः समिधः कृताः गायत्र्यादीनि सप्त अतिजगत्यादीनि सप्त कृत्यादीनि सप्तेति ७ ॥

यज्ञेन यज्ञं पूर्वं प्रपंचेनोक्तमर्थं संक्षिप्याह देवाः प्रजापतिरूपा यज्ञेन यथोक्तेन मानसेन संकल्पेन पूतेन यज्ञं यज्ञस्वरू-
पं प्रजापतिमयजन्त पूजितवन्तः तस्मात्पूजनात्तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्या-
नि भूतान्यासन् एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृह्यते यत्र यस्मिन् विराट्प्राप्तिरूपे नाके स्वर्गे साध्याः पु-
रातना विराडुपास्तिसाधका देवाः सन्ति तिष्ठन्ति तं नाकं विराट्प्राप्तिरूपं स्वर्गं सपवते महिमानः तदुपासका महात्मानः
सचन्ते समवयन्ति प्राप्नुवन्ति अत्र भावस्यार्थः स्पष्टः प्रवाहनित्यतां दर्शयति तदुक्तं सूर्याचन्द्रमसौ धाता यथापूर्वमक-
ल्पयदिति इति पुरुषसूक्तानुवाकः अद्भ्यः संभृत इत्युत्तरनारायणं नादित्यमपश्यापेति षट्कंडिका उत्तरनारायण-
उपांत्ये द्वे अनुष्टुभौ शेषास्त्रिष्टुभः आदित्यदेवताः पूर्वकल्पे पुरुषमेधयाजिनो आदित्यरूपप्राप्ताः स्तूयते अद्भ्यो जलात्

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे
साध्याः सन्ति देवाः ६ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे तस्य त्वष्टा
विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ७ ॥ पृथिव्याः सकाशाच्च पृथिव्यपोग्रहणं भूतपंचकोप-
लक्षकं भूतपंचकेभ्यो रसः संभृत पुष्टः तथा विश्वकर्मणः यस्य तस्य विश्वकर्मणः कालस्य रसात् प्रीतेः यो रसो अग्रे प्रथमं
समवर्तत समभवत् भूतपंचकस्य कालस्य सर्वप्रतिकारणत्वात् पुरुषमेधयाजिनो लिंगशरीरे पंचभूतानि तिष्ठन्ति
कालश्च ततस्तेभ्यस्तेभ्यः कृत्स्नद्रसविशेषफलरूप उत्तमजन्मप्रद उत्पन्न इत्यर्थः तस्य रसस्य रूपं विदधत् धारयन्
त्वष्टा आदित्य इति पति प्रत्यहमुदयं करोति अग्रे प्रथमं मर्त्यस्य मनुष्यस्य सतस्तस्य पुरुषमेधयाजिन आजानदेवत्वं मुख्यं
देवत्वं सूर्यरूपेण द्विविधा देवाः कर्मदेवा आजानदेवाश्च कर्मणा उत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः सृष्ट्यादावुत्पन्ना ३
आजानदेवास्ते कर्मदेवेभ्यः श्रेष्ठाः ये शतं कर्मदेवानामानंदाः स एक आजानदेवानामानंद इति श्रुतेः सूर्योदयमाजान हिं

वेदाहमेतं महान्तं सर्वोत्कृष्टं पुरुषं सूर्यमण्डलस्थं अहं वेद जानामि इति ऋषेर्वचनं कीदृशं आदित्यवर्णं आदित्यस्येव वर्णो
यस्य तं उपमानतोभावोन्त्वोपमं तथा तमसः परस्तात् दूरवर्तिनं तमोरहितमित्यर्थः तमः प्राहुरेनाविद्योच्यते तमेवादित्यं वि
दित्वा ज्ञात्वा मृत्युमत्येति अतिक्रामति परं ब्रह्म गच्छति अयनाय आश्रयाय अन्यः पन्था मार्गो न विद्यते सूर्यमण्डलान्तः पुरुषं ज्ञा
त्वा तद्रूपेणात्मत्वेनैव मुक्तिः प्रजापतिः यः सर्वात्मा प्रजापतिरन्तर्हृदि स्थितः सन् गर्भे चरति गर्भमध्ये प्रविशति यश्चाजायमा-
नो नित्यः सन् बहुधा कार्यकारणरूपेण जायते मायया प्रपञ्चरूपेणोत्पद्यते धीरा ब्रह्मविदस्तस्य प्रजापतेर्योनिस्थानं स्वरू

वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था
विद्यतेयनाय १८ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते तस्य योनिम्परिपश्य
न्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा १९ यो देवेभ्य आतपति यो देवानाम्पुरोहितः पूर्वो
यो देवेभ्यो जातो नमो रुचाय ब्राह्मये २० ॥ ॥

पं परिपश्यन्ति अहं ब्रह्मास्मीति जानन्ति विश्वानि सर्वाणि भुवनानि भूतजातानि तस्मिन्ह तस्मिन्नेव कारणात्मनि ब्रह्म
णि तस्थुः स्थितानि सर्वं तदात्मकमेवेत्यर्थः यो देवेभ्यः यः प्रजापतिरादित्यरूपो देवेभ्य आपातपति द्योततेतस्थुः स्थि
तानि सर्वं तदात्मकमेवेत्यर्थः यो देवेभ्यः यः प्रजापतिरादित्यरूपो देवेभ्य आ समन्तात्तपति द्योतते यश्च देवानां पुरोहितः
सर्वकार्येष्वग्रे नीतः यश्च देवेभ्यः सकाशात् पूर्वो जातः प्रथममुत्पन्नः तस्मै आदित्याय नमः कीदृशाय रुचाय रोचते असौ रु
चस्तस्मै दीप्यमानाय २० पर्येति कप्रत्ययः तथा ब्राह्मये ब्रह्मणोऽपत्यं ब्राह्मिः इमितीलोपः ब्रह्मावयवभूताय वा १९

रुचं ब्राह्मं देवा रोचमानाः ब्रह्मण रुचं शोभमानं ब्रह्मणः पुत्रं आदित्यं जनयन्तः उत्पादयन्तः सन्तः अग्रे प्रथमं तं नवं देवा अब्रुवन्
ऊचुः ब्राह्मेत्यानानाविनिनिपातः तत् किमत आह यो ब्राह्मणः हे आदित्य त्वां एवं उक्तविधिना त्वं विद्यात् जानीयात् तस्य
ब्राह्मणस्य देवा वशे आसन् वश्या भवन्ति आदित्योपासिना जगत् वश्यं भवतीत्यर्थः श्रीश्च इत्यादि आदित्यं स्तुत्वा प्रार्थयते हे आ
दित्य श्रीः लक्ष्मीश्च ते तव पत्न्यौ जायास्थानीये लक्ष्मीरूपे इत्यर्थः यया सर्वजनाश्रयणीयो भवति सा श्रीः श्रीपतेः तया श्रीः स
पदित्यर्थः यया लक्ष्यते रूपतेजनैः सा लक्ष्मीः सौन्दर्यमित्यर्थः अहोरात्रे तव पार्श्वे पार्श्वस्थानीये नक्षत्राणि गगनगामीनि ताव
त्तव रूपं तवैव तेजसा भासमानत्वात् तेन सा गोलकः सूर्यो नक्षत्राणि तु गोलका इति अस्यानि अश्विनौ द्यावापृ

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ श्रीश्च
ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणामुं म इषाण स
र्वलोकं म इषाण ॥ २२ इति संहितापाठे एकत्रिंशोऽध्यायः ३१ ॥ ॥ ॥

थिव्यौ तव व्यात्तं विकासितं मुखस्थानीये अश्विनावेव व्यात्तम् अश्विनौ अश्विनौ द्यावापृथिव्यौ इमे इदं सर्वं मम स्तु वा
वातामिति श्रुतेः यद्वा हे शाश्वत्ताष्पच्य इष्णन् कर्मफलं इच्छन् सन् इषाण इच्छ इषु इच्छायां विकरणव्यत्ययः यद्वा इष गतौ
तस्य रूपमादिः अयं च अर्थः किमिषाणेत्यत आह अमुं परलोकं मम इषाण मम परलोकः समीचीनोऽस्त्विति इच्छ अमुं च
कत्वान्वदिष्टं भवतीत्यर्थः सर्वलोकं मम इषाण सर्वलोकात्मकोऽहं भवेयमिति इच्छेत्यर्थः मुक्तो भवेयमित्यर्थः सर्वं ख
ल्विदं ब्रह्मेति सामश्रुतेः श्रीमन्महेश्वरकृते वेददीपे मनोहरे नरमेधोऽध्यायस्तथा एकत्रिंशोऽयमीरितः ॥ ३१ ॥

पुरुषसंज्ञा उक्ताः अथ सर्वे मेयसंज्ञा उच्यन्ते पूर्वापुमकेत्यस्मात् स्राक स्वयंभु ब्रह्महृदयः यान्मृदेत्याः सम्रे मेऽत्नि आमोधी
ममत्तिके सर्वे रोमविनिर्मुक्ताः आमोयमिः सममम्हृ मेवनीन्युपक्रम्य सर्वज्ञृद्दाति सर्वस्यास्यैव सर्वस्यावरुध्य इति
श्रुतेः तदेव हृद्यन्तुष्टमौ विज्ञानात्मा परेणात्मना विशिष्टः यस्मादृष्टिष्वात् प्रातत्वेनोपास्यत्वाभिधीयते अग्निः तदेव का
र्यारूपेण आदित्यस्तदेव वायुस्तदेव चन्द्रमास्तत् तदेव ग्रुपवार्थ शुक्रं शुक्रं तत्स्थितिर्ब्रह्मत्रयी लक्षणेन ब्रह्मैव॰
नाःप्रसिद्धाः आपो जलानि सम्प्रसिद्धः प्रजापतिरपि तदेव ब्रह्म सर्वे निमेषा निमेषादिकाष्ठादयः कालविशेषाः पुरुषा
द् अपि पुरुषसकाशाज्जज्ञिरे कीदृशात् पुरुषात् विद्युतः विशेषेण द्योतते विद्युत् तस्मात् किंच कश्चिदपि एनं उ

तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः १ सर्वे निमेषा
जज्ञिरे विद्युतः पुरुषादधि नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् २ न तस्य प्रतिमाऽस्ति यस्य
नाम महद्यशः हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः ३ ॥ ॥

रुर्ध्वं ऊर्ध्वं उपरिभागेन च उपरिभागेन परिजग्रभत् २ न तं परिगृह्णाति एवं तिर्यञ्चं न गृह्णाति न मध्ये देशान्तरे गृह्णा॰
त्यादित्वेन हृपं न एव स्य ऊर्ध्व पदागायत्रीत स्य पुरुषस्य प्रतिमानं उपमानं किंचिद्वस्तु नास्ति अत एव नामानि प्रसिद्ध
यह्द् यशो यस्यास्ति सर्वान्तरं तसे षा रत्र्यर्थः हिरण्यगर्भ इतिरायो न्वाकश्च ब्रवीचः हिरण्यगर्भः यः प्राणतः
एषमेय आत्म हा इति मामाहिंसीज्जनिता य एषाय स्मान्न जातः इत्यस्य समन्वाङ्गितिष्ठत्युच्योनुवाक एताः प्रतीकचोदिताः
सर्वे पठितव्या दादिमा ग्रणाप्युक्ता ब्रह्मयज्ञे जपे च सर्वा आध्येयाः एवं सर्वत्र । गेम यम मध्ये हे शोपितर्गहृति नादितो
प्रमत्तादीनां विषय इत्यर्थः सप्रत्नेतिनेपान्ता ऽग्रहेयान् गृह्यते इति श्रुतेः जग्रभत् टी॰ ३

एषोह चतस्त्रिष्टुभः हयमिदंएषदेवः सर्वाः प्रदिशः अनुतिष्ठति व्याप्यस्थितः हेजनाः अयमिदंएषएवः प्रथमोजातः अग
ग्नेः गर्भेअंतः गर्भमध्येसउसएवतिष्ठति जातोपिसएव जनिष्यमाणउत्पत्स्य मानोपिसएव प्रत्यङ् प्रतिपदार्थंमेवतिष्ठ
तु सर्वतोमुखः सर्वतोमुखोव्याप्यवयवायस्य अविंत्यशक्तिरित्यर्थः यस्माज्जातंयस्मात्पूर्वंपुरावीवेलकिमपिनजातमेव
यश्चविश्वाविश्वानिसर्वाणिभुवनानिआवभूवसमंतान्नावयामास अंतर्भूतोणर्थः सषोडशीषोडशावयवलिंगशरी
रीप्रजापतिः प्रजयासंरराणोरममाणः त्रीणिज्योतींषिरवीदुग्निरूपाणिसचतेसेवते येनद्यौ येनपुरुषेणद्यौः उग्राऽ
हर्णोवृष्टिदात्रुतेतिशेषः पृथिवीचयेनदृढाकृता सर्वप्राणिधारणेदृष्टिरदृढमात्रनिःपादनेतेतिभूमेदार्ढ्यंयेन

एषोहदेवः प्रदिशोनुसर्वाःपूर्वोहजातःसउगर्भेअंतः सएवजातःसजनिष्यमाणःप्रत्यङ्जनास्तिष्ठतिसर्व
तोमुखः ४ यस्माज्जातन्नपुराकिंचनैवयआवभूवभुवनानिविश्वा प्रजापतिःप्रजयासंरराणस्त्रीणिज्यो
तींषिसचतेसषोडशी ५ येनद्यौरुग्रापृथिवीचदृढायेनस्वस्तभितंयेननाकः योअंतरिक्षेरजसोवि
मानः कस्मैदेवायहविषाविधेम ६ यंक्रंदसीअवसातस्तभानेअभ्यैक्षेतांमनसारेजमाने यत्राधि
सूरउदितोविभातिकस्मैदेवायहविषाविधेम आपोहयद्बृहतीर्यश्चिदापः ७

नक्षत्रादिनामंडलेस्तभितंस्तभितंयेननाकःस्वर्गोपिस्तभितः योअंतरिक्षेनभसिरजसोजलस्यदृष्टिरूपस्यविमानः
विनिर्मेतेनिर्माताविहायकस्मैदेवायहविषाविधेमहविर्दद्मः नकस्मैविदित्यर्थः यंक्रंदसीक्रंदस्यौद्यावापृथिव्यौयउ
रुषंमनसाअभ्यैक्षेतांसाभुक्तमित्यपश्यतां कीदृश्यौक्रंदसी अवसाहविर्लक्षणेनान्नेनवृष्टिजनकेनतस्तभानेप्राणिना
नेस्तंभयंत्यौत्रायेनस्तंभेह्लादिन्येरेजमानेशोभमानेसूरःसूर्यःयत्रद्यावापृथिव्योरुदितःसन्अधिविभातिअधिकंशो
भतेविभासयतिवातंविहायकस्मैहविर्दद्मः आपोहरबृहतीः यश्चिदापः इतिप्रतीकोक्तेजपादावयवे २ ॥ ॥

वेनस्तत् वेनः पंडितो विदितवेदांतरहस्यः। तत् ब्रह्म पश्यन् पश्यति जानातीत्यर्थः कीदृशं तत् गुहा गुहायां रंतः स्थाने
निहितं स्थापितं इत्येयमित्यर्थः सत् नित्यं यत्र ब्रह्मणि विश्वं कार्यजातं एकनीडं भवति एकमेव नीडमाश्रयो यस्य तत् अविभ
क्तमविशेषकारणमेव भवतीत्यर्थः तस्मिन् ब्रह्मणि इदं सर्वभूतजातं समेति। एति गच्छति। संहारकाले एति च। निर्गच्छति स
र्गकाले स परमात्मा प्रजासु ओतः प्रोतश्च ऊर्ध्वं तंतुपटवच्छरीरभावेनोतः। तिर्यक् तंतुपटवच्छरीरभावेन प्रोतश्च।
कीदृशः। विभूः कार्यकारणरूपेण विविधं भवतीति विभूः सर्वं स एवेत्यर्थः प्र तत् गां वेदं धारयति विचारयति गांधर्वो।

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स
ओतः प्रोतश्च विभूः प्रजासु ८ प्र तद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत्
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पिता सत् ९

वेदांतवेत्ता विद्वान् पंडितो नु इति पदं अमृतं शाश्वतं तत् ब्रह्म प्रवोचेत् प्रब्रूयात् गुहा गुहायां सत् विद्यमानं धाम स्वरूपं वि
भक्तं विहृतं सर्गस्थितिप्रलयरूपैर्विभक्तं किं च अस्मात्तस्य त्रीणि पदानि स्वरूपाणि गुहा गुहायां निहितानि निहिता
नि पदानि सर्गस्थितिप्रलयाः वेदाः कालावा ब्रह्मांतर्यामिविज्ञानात्मानो वा। किं च यः तानि पदानि वेद। जानाति स।
पितुः ब्रह्मणोपि पिता परमात्मा असत् भवति परं ब्रह्मैव भवतीत्यर्थः ३

सनः सपरमात्मानोऽस्माकं बंधुः बंधुवन्मान्यः जनिता जनयिता जनितामंत्रे इति णिचोलोपः सचविधाता धारयिता सः विश्वा॰
नि सर्वाणि भुवनानि भूतजातानि धामानि स्थानानि वेद देवा अग्न्यादयः तृतीये धामन् धामनि स्थाने स्वर्गरूपे अध्यैरयं
त स्वेच्छया वर्तन्ते कीदृशा देवाः अमृतं मोक्षापकं तत्त्वं यत्र ब्रह्मणि आनशानाः व्याप्नुवानाः अश्नुवते आनशानाः
बहुलं छंदसीति अशोर्लुङि द्वित्वेन द्वित्वे णानो विश्व अभ्यासस्य नुगागमः ब्रह्मनिष्ठत्वेन प्राप्ताः सतः सर्वमेधयाजिनो उ॰
क्तिरुच्यते किंच सर्वमेधयाग्रे होपि न त्यागे प्रधाने ब्रह्मज्ञानवतो यजमानस्याग्निहोत्रादयोपि यत्ताः सर्वमेधायपर्वत्वाद॰

सनोबन्धुर्जनिता सविधाता धामानि वेद भुवनानि विश्वा यत्र देवा ऽअमृतमानशानास्तृती

येधामन्नध्यैरयन्त १० परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च उप॰

स्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ११ ॥ ॥ ॥

परीत्य भूतानीति कंडिकाभ्यां एवं जानन् सर्वमेधयाजी आत्मनाजीवरूपेण ऋतस्य यज्ञस्यात्मानं यज्ञाधिष्ठातारं पर
मात्मानं अभिसंविवेश प्रविशति ब्रह्मैव भवतीत्यर्थः किं कृत्वा भूतानि परीत्य ब्रह्मत्वेन विज्ञाय लोकान् भूरादीन्प
रीत्य ब्रह्मरूपान् ज्ञात्वा सर्वाः प्रदिशो विदिशो दिशश्च परीत्य तद्रूपा ज्ञात्वा प्रथमजां प्रथमोत्पन्नां त्रयीरूपां वा॰
चं उपस्थाय संसेव्य यज्ञादि कृत्वेत्यर्थः अपि हि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यतेति श्रुतेः प्रथमजा वा॰
क्वेदरूपा ४ ॥ ॥ ॥ ॥ ॥ ॥

१२ परियावा परीत्युपसर्गश्चेत्यनेन संबध्यते सर्वमेधयाजेतत् ब्रह्मअपश्यत् पश्यति तत् अभवत् भवति ततआसीत् व
११५ स्तुगस्मात्देवास्ति अज्ञाननिवृत्तिरेवदर्शनंचेतिभावः किंकृत्वा द्यावापृथिवीसद्यः परिइत्वापरीत्यतद्रूपेणज्ञात्वा लो
कान्परीत्य दिशःपरीत्य स्वरादित्यंचपरीत्यागुह्यंवस्तुपुनःपुनःकथितंविततमारोहतीतिशुनःकिः ऋतस्ययज्ञस्यतं
115 तुरितिकर्तनोविततंप्रसारितंयथातथाविचृत्यसमाप्य यत्नंकृत्वेत्यर्थः तदेवंसंततउद्भवामेतिश्रुतेः ब्रह्मैवसन्ब्रह्मा

परिद्यावापृथिवीसद्यऽइत्वापरिलोकान्परिदिशःपरिस्वः ऋतस्यतन्तुंविततंविचृत्य।
तदपश्यत्तदभवत्तदासीत् १२ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम् सनिम्मेधा।
मयासिषꣳस्वाहा १२

ध्येतिइतिश्रुतेःस्वब्रह्मरूपस्यजीवस्याज्ञाननिवृत्तिरेवब्रह्मासिरित्यर्थः ज्ञाउत्रस्पत्त्रकृथमेधायायाच्यते चतुर्थ्यादीधीर्या।
य्येत सदसाति प्रथमागायत्रीलिंगोक्तदेवता अग्निस्तनिद्भ्यदानमेधांवुद्धिंचअयासिषं पाचेह्निकर्मकःकोदशम।
त्रि सदसोयज्ञगृहस्यपतिपालकं अद्भुतं अचिन्त्यशक्तिं इंद्रस्यप्रियमित्रं काम्यंकमनीयंधनमेधाथिभिः ५ ॥

यांमेधां आग्नेयानुष्टुप् देवश्चेतयामेधयाग्नेमांमेधाविनंकुरु स्वाहा सुहुतमस्तु अस्मायामेधास्तुज्ञोविनि
त्तिविनिप्रत्ययः मेधासंगास्तिमेधावीतेनयाकया देवगणदेवसमूहाः पितरश्चयांमेधांउपासते पूजयंतिपिदे
वपितृमान्यात्तुद्धिरस्माकमस्तित्यर्थः मेधांमेलिंगोक्तदेवतानुष्टुप् वरुणोमेमह्यंमेधांददातु अग्निःप्रजापति
श्चमेमेधांददातु इंद्रश्चवायुश्चमेधांददातुस्वाहा सुहुतमस्तु इदंमेमंत्रोक्तदेवतानुष्टुप् श्रीकामोऽनयाश्रियेपा

याम्मेधान्देवगणाःपितरश्चोपासते तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा १४ मे

धाम्मेवरुणोददातुमेधामग्निःप्रजापतिः मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमे

स्वाहा १५ इदम्मेब्रह्मचक्षत्रञ्चोभेश्रियमश्नुताम् मयिदेवादधतुश्रियमुत्तमान्

तस्यैतेस्वाहा १६ इतिसंहितापाठेद्वात्रिंशोऽध्यायः ३२ ॥ ॥ ॥

चतेब्राह्मणजातिः तत्क्षत्रंक्षत्रियजातिः इदंब्रह्ममेउभेब्रह्मक्षत्रेमेममश्रियंअश्नुतां उपजीवतां देवामयिउत्तमां
श्रियंददतुस्थापयन्तु तस्यैप्रसिद्धायैतेतुभ्यंश्रियेस्वाहा सुहुतमस्तु चौसमस्तयार्थोऽश्रीमेधेविनायस्तासिद्धे
स्तुप्रार्थ्यते श्रीमन्महीधरकृतेवेददीपेमनोहरे सार्वमेधिकमंत्रोक्तित्रिंशोध्यायइरितः ९ ॥ ॥ ॥

११ सर्वमेधोऽग्निष्टोमसंस्थोऽग्निष्टुत्संस्थेत्प्रथमेऽहनि अस्माजरासः स्तोत्यायाममहोत्र ग्रेह्यस्येताः सप्तदशाक्षरोऽग्निदेवत्याः पुरोरुचो भवं
११६ ति पुरोरुक्शब्देन अ ग्रपाग्रहणमंत्राऽउच्यंते तयजुरूपाः अविद्यरुपुरोरुगितिश्रुतेः उच्चामहांवैश्वदेवयाश्रीवत् हारियो
जनेषुयजुरूपेग्रहणमंत्रेसत्यपि तेवा अपुरोरुक्केग्रहाणीतिश्रुतेः तत्र नदोषः अतएवाग्नेयोभिर्ऋचपवतिवर्त्स्यतेनोप
यामादीनि आग्नेदेपेंद्रवायवग्रहस्य पुरोरुचो। अस्माजरासः वत्सप्रीदृष्टाग्नेयीत्रिष्टुप् आवायावित्यस्याः स्थाने अस्य यज
मानस्याग्नयः ईदृशासंत कीदृशाः अजरासः नास्तिजरायेषांतेअजराः वार्द्धकहीनाः दमोगृहाणांअरित्राः रक्षकाः ताव।

अस्माजरासोदमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः श्वितीचयः श्वात्रासोभुरण्यवनर्ष
दोवायवोनसोमाः १

मिवकेनिपाताः अरित्रः अर्ययंते रित्राः यद्वादमांदमो तोदमनीयानारक्षसोऽरि
त्राः तारकाः विभक्तेर्लुङभावात्सवर्णदीर्घः अर्चद्धूमासः अर्चत् अर्चनीयः धूम्रनीयो धूमो धूमोपलक्षिताज्वाला येषांते
ऽर्चद्धूमाः पाचकाः शोधकाः श्वितीचयः श्विति श्वेतवर्णंचिन्वंतिश्वितीचयः चिनोतेः क्विप् अनित्यमागमशासन
मितितुगभावः श्वितिशब्दस्य छांदसोदीर्घः श्वेतवेऽज्ज्वलत्वं यजमानस्य वर्द्धयंतः श्वात्रासः श्वात्रशब्दःक्षिप्रवाचकः
श्वात्रासः क्षिप्रफलप्रदाः भुरण्यवः भरणकर्तारः वनर्षदः वनसदः वनेकाष्ठेसीदंतीतिवनसदः वनसदोवदोरेफेण।
ति प्रातिशाख्यसूत्रेणरेफागमः वायवोन वायवइवोद्दीपयितारः सोमाः सोमाइवयजमानेष्टदाः १

हरयः गायत्रीविश्वरूपदृष्टा इत्याह इत्यस्याः स्थाने अग्नयः पृथक्पृथक्नानाप्रकारेणद्यवि स्वर्गे उपवर्जंते स्वर्गं गंतुंयत्नं
कुर्वंति कीदृशाः हरयः हरितवर्णाः धूमकेतवः धूमएवकेतुर्ध्वजोयेषांतेधूमकेतवः धूमप्रज्ञाअग्निरितिप्रसिद्धेः वातजूताः वाते
नजूतंगमनेप्रसारोयेषांते यज्ञानोइत्याह इमे अनयोः स्थानेपरेइडुक्ते यज्ञानः गायत्रीगोतमदृष्टामैत्रावरुणस्य
पुरोरुक् अयंवामीत्यस्याः स्थानेहेअग्नेनोऽस्माकंमित्रावरुणौयज्ञ देवान्नृतंबृहन्तमृतंकृतेनयष्टुंयज्ञंस्वंदमंगदद
पतियज्ञयुत्क्वाह आश्विनग्रहस्यपुरोरुक्पावकाशोचिस्यस्याः स्थाने व्याख्यातयंदेविद्रूपेप्रैषत्र्यग्रहपुरोरुक् ऋक्दृष्टा

हरयोधूमकेतवोवातजूताःउपद्यवियतन्तेवृथगग्नयः २ यज्ञानोमित्रावरुणायज्ञादे
वां३॥ऽअग्नेरथीरिवनिहोतानाहवीः सदः ४ + ऋतंबृहत् अग्नेयक्षिस्वंदमम् १ पुत्र
त्वाहिदेवहूतमा ३॥ऽ अग्ना ३॥ऽ + देविद्रूपेचरतः स्वर्थे ऽअन्यान्यावत्समुपधापयेते
हरिरन्यस्यांभवतिस्वधावाञ्छुक्रोऽअन्यस्यांददृशेसुवर्चाः ५ ॥ ॥ ॥

त्रिष्टुप् तंप्रत्यधाः अस्यास्थाने द्वेरात्र्यहनेचरतः निरंतरंप्रवर्तते कीदृशेविद्रूपे विविधंरूपंययोस्तेकृष्णारात्रिःशु
क्लमहः स्वर्थेशोभनोऽर्थोपयास्ते कल्याणप्रयोजने अन्यान्या अन्या अन्याचवत्सं उपधापयेते क्षीरंपाययतः अन्याप
कारात्रिः वत्समग्निमुपधापयते रात्रावग्निदेवतामग्निहोत्रे अन्यादिवसरूपावत्समादित्यंधापयते अहिसूर्यदे
वत्यमग्निहोत्रंकिंचनदेवाह अन्यस्यांरात्रौहरिर्हरितवर्णोऽग्निः स्वधावान् अन्नवान्भवति अन्यस्यामहनिशुक्रःशुक्लः
आदित्यः सुवर्चाशोभनतेजाः ईदृशोदृश्यतेयद्वाहेद्यावापृथिव्यौ अग्निर्भूमौस्वधावान् रविर्दिविसुवर्चादृश्यते २॥

११ अयमिह मेथिग्रहस्पुरोरुक् अयंवेनश्चस्याख्याने व्याख्याता त्रीणीशता विश्वामित्रदृष्टा त्रिष्टुप् विश्वदेवदेवतस्याग्रय
१२ णग्रहस्यपुरोरुक् येदेवासइतिस्थाने त्रीणिशतानि त्रिणिशतानि त्री त्रीणिसहस्राणि त्रिंशत् नवचदेवाः यथा ११ सते
वसादिगणदेवा अग्निं असपर्यन् परिचरन्ति सपर्यतिपरिचरणकर्मा यद्वा गणोदेवाः नवैवाकाश्चिद्रुद्राः सूर्यदेवानां।
दशकैर्गणैः नेत्रब्रह्मविष्णुरुद्राणां शक्तीनां वाणीभेदनइति नेय ११११११११ एतावन्तोभवन्ति कथंपरिचरन्तिनदाहृत्तेघृतैः अ
ग्निं स्नातम् असिंचन् उत्सेचने लङ् अस्मैअग्नयेबर्हिः अस्तृणन् आच्छादयन् आत्इत् अनन्तरमेवहोतारंदेवाह्वातृ।

117

अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोऽध्वरेष्वीड्यः यमप्नवानोभृगवोविरुरुचुर्वनेषु
चित्रंविभ्वंविशेविशे ६ त्रीणिशतात्रीसहस्राण्यग्निंत्रिंशच्चदेवानवचासपर्यन् औक्षन्घृ
तैरस्तृणन्बर्हिरस्माऽआदिद्धोतारन्न्यसादयन्त ७ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानर
मृतऽआजातमग्निम् कविंसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ८ अ
ग्निर्वृत्राणिजङ्घनद्द्रविणस्युर्विपन्यया समिद्धः शुक्रआहुतः ९ कर्मणिन्यसादयन्त नियुक्तवन्तः
घृतमेवनवर्हिस्तरणंहोतृवरणमेवाग्निपरिचर्येतिभावः मूर्द्धानंदिवः प्रकृतिवदेवध्रुवग्रहस्पुरोरुक् व्याख्याता अ
ग्निर्वृत्राणि। गायत्रीभरद्वाजदृष्टाऐन्द्राग्नग्रहस्पुरोरुक् ऐन्द्राग्नीआगतमित्यस्याः स्थाने अग्निर्वृत्राणिपापानिजंघनत् अत्य
र्थंहन्ति यङ्लुगंत कया विपन्यया पनतिरर्चतिकर्मा विविधमापूजयापापंहंति कीदृशोऽग्निः द्रविणस्युः द्रविणंध।
नंरत्नंतिद्रविणस्यति स्वपआत्मनः क्यच् काङ्क्षतीति क्यजंतादुप्रत्ययः हविर्लक्षणंधनमिच्छन् समिद्धः दीप्तः शुक्रः

विश्वेभिः सोम्यं गायत्री मेधातिथिदृष्टा वैश्वदेवग्रहस्य पुरोरुक् अग्ना संबोधनी तस्याः स्थाने हे अग्ने विश्वेभिर्विश्वैर्देवैः इन्द्रेण
वायुना च सह सोम्यं सोममयं मधु पिब कीदृशस्त्वं मित्रस्य देवस्य धामभिर्नामभिः स्तुत इति शेषः त्वमग्ने वरुणो जायसे यत्
त्वं मित्रो भवसि समिद्ध इत्यादि इति श्रुतेः आ यत् त्रिष्टुप् पराशरदृष्टा मरुत्वतीयग्रहस्य पुरोरुक् इदं मरुत्व इत्यस्याः स्थाने आ उप
सर्गे आनट् इत्यनेन संबध्यते यत् यदा तेजः तेजसो हेतुभूतं हविः नृपतिं यजमानस्य पालकं अग्निं आनट् अश्नुत व्याप्नो
ति यदा सौ हविः हूयते इत्यर्थः तदा अग्निः रेतो जगद्बीजभूतं जलं द्यौः अभीके प्रथमा षष्ठ्यर्थे दिवः समीपे अन्तरिक्षे जनयति उ

विश्वेभिः सोम्यं मध्वग्नऽ इन्द्रेण वायुना। पिबा मित्रस्य धामभिः १० आ यदिषे नृप-
तिं तेजऽ आनट् शुचि रेतो निषिक्तं द्यौरभीके। अग्निः शर्द्धमनवद्यं युवानं स्वा-
ध्यं जनयत्सूदयच्च ११ ॥

स्वादयति मेघरूपेण च पुनः सूदयत् तं शुचिः मंत्रसंस्कृतं कीदृशं रेतः शर्द्धं बलहेतुभूतं अनवद्यं निर्दोषं अवद्य
पण्यवर्या गर्ह्यपणितव्यानिरोधेष्विति गर्ह्यार्थे वद्यमिति निपातितः न अवद्यमनवद्यं अगर्ह्यं प्रशस्यं युवानं युवत्-
त्वं परिपक्वरसे हठमित्यर्थः स्वाध्यं सुष्ठु आ समन्तात् ध्यायते चिन्त्यते इति स्वाध्यं चिन्तनीयं सर्वैः ऋषिभिः इच्छति हविषा
तर्पितोऽग्निरष्टमासे जलं तनिः पाश्चवर्षासु वर्षतीत्यर्थः व्यवहितपदो मंत्रः ४ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥

११ अग्ने शर्द्ध त्रिष्टुप् विश्ववारादृष्टा द्वितीयमहस्तृतीयपुरोरुक्‌ महत्त्वं तं गृहमभित्यस्याः स्थाने हे अग्ने त्वं शर्द्ध उत्सहस्व
११८ बलमाविःकुरु किमर्थं महते सौभगाय महते सौभाग्याय लोकस्थितिः उद्यच्छन्तस्तव द्युम्नानि उत्तमानि उत्कृष्टानि सं
तु द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः हविर्लक्षणान्यन्नानि यशांसि वा सन्तु किंच जास्पत्यं जायापत्यमित्यर्थे जास्प
त्यमिति पातः जायापत्योः पत्नीयजमानरूपं सुयमं सुनियतं जितेन्द्रियत्वेनान्योन्यावहरागं समाकृणुष्व कुरु सुष्ठुयम्यते
सुयमं ईषद्दुःसुषुइति खल्प्रत्ययः किंच शत्रूयतां शत्रुत्वमिच्छतां महांसि तेजांसि अभितिष्ठ आक्रमस्व अभिभव।

अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु सं जास्पत्यं सुयममा कृणुष्व श
त्रूयतामभितिष्ठा महांसि २ वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्य।
ग्ने इन्द्र त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ३

वां हि त्रिष्टुप् भरद्वाजदृष्टा माहेन्द्रग्रहपुरोरुक्‌ इंद्रोनवदित्यस्याः स्थाने हे अग्ने वयं त्वां ववृमहे वृतवन्तः कीदृशं
त्वां मन्द्रतमं अतिगंभीरं कैः अर्कशोकैः अर्कवत् शोचते दीप्यन्ते ते अर्कशोकाः मंत्राः तैः अविप्लुतब्रह्मचर्येण यथोक्त।
मधीता मंत्रा अर्कवद्दीप्यन्त इति भावः द्वियस्मात्त्वं नोऽस्माकं महि महत् स्तोत्रं श्रोषि विकरणव्यत्ययः किंच इत।
मायेत्तुष्यश्रेष्ठायायजूकः देवता देवता त्वां त्वां राधसा हविर्लक्षणेनान्नेन पृणन्ति देवताः शवसा त्वं पोल्लक कीदृशं त्वां श
वसा बलेन इन्द्रं इंद्रमिव वायुं वायुमिव वर्णयन्ते नरवार्थः उभयोः सव्यमन्ते ५

ते अग्ने हे ह्वदत्यौ आदित्यग्रहश्रुतौ कर्णौ आघ्यावसिद्धहष्टा अन्याप्रकाश्य हष्टाः कदाचन स्तरीरसि कदाचन प्रपृक्क सीत्यनयोः
स्थाने स्वहुरूपे ते स्वाहुतः हे स्वाहुत हे अग्ने जनानां मध्ये ये जनाः गोनां गवां संबंधिभिर्द्रव्यदधिदुग्धैः सहऊर्वन् अन्नविशेषा
न्पुरोडाशादीन्दयन्त ददति दयदानगतिहिंसादानेषु लङ् अडभावश्छान्दसः ते सूरयः पण्डिताः त्वेन त्वं प्रियासः सन्तु कीदृशास्ते
यन्तारः नियन्तारः इन्द्रियैः मघवानः धनवन्तः गोनामित्यत्र गोः पदान्त इति नुडागमः श्रुधि श्रुत्कर्ण श्रुण्वन्त इति श्रुतौ कि
श्रुतौ अथि वच श्रोतारौ कर्णौ यस्य स श्रुत्कर्णः हे श्रुत्कर्ण देवैः सह त्वं अध्वरं यज्ञं श्रुधि शृणु कीदृशैर्देवैः सह त्वं अध्वरेय
तं श्रुधि शृणु कीदृशैर्देवैः वह्निभिः हवींषि वहन्तीति वह्नयः तैः सयावभिः सह यान्तीति ते सयावानः तैः किंच मित्रः अर्यमा

त्वेऽग्ने स्वाहुत प्रियासः सन्तु सूरयः यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् १४ श्रु
धि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः आसीदन्तु बर्हिषि मित्रोऽर्यमा प्रातर्यावा
णोऽध्वरम् १५ विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् अग्नि
र्देवानामव आवृणानः सुमृडीको भवतु जातवेदाः १६ ॥ ॥ ॥

प्रातर्यावाणश्च देवा बर्हिषि आसीदन्तु उपविशन्तु प्रातर्यान्ति हविः प्राप्नुवन्ति प्रातर्यावाणः प्रातःसवने येषां हविः अग्निसे
इत्यर्थः विश्वेषामदितिः त्रिष्टुप् गौतम ऋष्यादित्य अग्ने देवाधिश्रयणे विनियुक्ता यज्ञीदेवानामित्यस्याः स्थाने अग्निः इह शोभ
वतु कीदृशः विश्वेषां सर्वेषां देवानां मध्ये अदितिः नास्ति दितिः खण्डनं यस्य अदीनः कीदृशानां देवानां मध्ये अ
दितिः नास्ति दितिः खण्डनं यस्य अदीनः कीदृशानां यज्ञियानां यज्ञार्हाणां तथा विश्वेषां मनुष्याणां नराणामतिथिः पू
ज्यः देवानां हवो हविर्लक्षणमन्नं आवृणानः समर्पयन् सुमृडीकः शोभनेन सुमृडीकेन सुखेन यस्मात् सुखकारी जातवेदाः जात

११ महे अग्नेः त्वष्टोधाना कहृष्टात्रिष्टुप् सावित्रग्रहपुरोरुक् वाममद्येत्यस्याः स्थाने देवानां ततअवः अग्नेर्हविर्लक्षणंअ।
११५ यवयं वृणीमहे संस्कर्मं कमसति सवितः सूर्यस्य सवीमनि सति आज्ञायां सत्यां देवस्य तासवितुः प्रसवइत्युक्तेः सवी
मा प्रशावोनुज्ञेतिकोशः कीदृशे सवीमनि श्रेष्ठे अस्मदेवात्ततः सूर्यात्तोकृष्टे तर्हिं येनात्वेन वयं स्वस्तये स्याम स्वस्ति
मन्तो भवेम कीदृशा वयं अग्नेः शर्मणिशरणो आश्रये मित्रे वरुणे च आनागाः अनागसः सूर्णा सूपरतिजसः स्व अग्नि।
मित्रवरुणे व्यपराधरहिताः कीदृशस्याग्नेः महः पूज्यस्य महतेः पूज्यतेमहतस्य महः प्रजायो किंच समिधानस्य दीपमा
नस्य इंद्रस्त्वउक्थो द्वितीयमहं भवति तस्मिंइन्द्राग्रहा भवंतेषु अः पुरोरुचः सर्वमिंद्रमसदितिसर्वमेयेक्ष्णतिः ततः इंद्रस्त्वत्से
ने उक्थ्यासंस्थे सर्वमेथस्य द्वितीयेः हनि आपश्चिदस्मा ते इत्येता द्वादश अर्चः ते प्रत्नथा अग्नेयवेनः महाः इंद्रः कदाचनस्त

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये श्रेष्ठे स्याम सवितुः सवीमनि तद्दे।
वानामवो अद्या वृणीमहे १७ आपश्चिपिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र या
हि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे विवाजान् १८

रीः कदाचनप्रयुच्छसीति पंच प्रतीको
क्ताः एवं समदशें इंद्रदेवत्या एंद्रवायवादि सावित्रांतानां ग्रहाणां ग्रहणमंत्राः आपश्चित् वसिष्ठदृष्टा त्रिष्टुप् ऐंद्रवायवस्य।
पुरोरुक् आ वामो इत्यस्याः स्थाने हे इंद्र जरितारः स्तोतारस्त्व त्वेजः तेन वक्षतेयतेन तत्र नक्षति व्याप्नुवंति ननति व्याप्तिक
र्मा लट्ः भावआर्षः आपः चित् आपोपिति आप्यारूपाः पिप्यु आप्यायपंति सोमंवर्द्धयंति अप्पायायामुक्तो लिटिप्यायः पी
आदेशः तत्र दृष्टांतः स्तर्यो गावइव स्तरणीतिस्रवंतियाभिताः स्तर्यः याभिः सोमः स्तर्यंते त्ता गावो वा चावेदरूपा इवताय ७
थासां मं आप्याययंतितथायोपिअत एवं स नो अस्मान् अच्छ अभिमुखं यादि आगच्छ वायुर्न वायुरिव वायुर्यथा नियुतः।
स्वान् अश्वान् अभियाति हियतः ते धीभिः बुद्धिभिः कर्मभिर्वाजान् अन्नानि विदयसे विविधं ददासि दयदानादो अतएवा।

गाव उपातिस्तोगायत्र: आद्याष्टकमीळाजमीदहष्टा पंक्त्रावायवस्सुद्दितीयाष्टुरोरुक इंद्रवाशुश्नस्सोस्याने गाव उच्यते हेगा
वः श्रवनेक्षूपेवात्वालक्षूपेश इतिरूपावत उपगक्छत दानार्थः चात्वालान्तरेणगवोमेचरन्ति श्रवन इतिक्षूपनामकाहेतत्रागा
मनेतत्राह महीमहत्यो द्यावापृथिव्यौयज्ञस्यरप्सुया रप्सुदेरस्मितिरूपनाम तनन्दत्तस्तरप्सुदेवते ते द्यावाभूमीयज्ञस्य
शोभोत्कृतनरतिरूपं उपागक्छत किंच उभाकर्णी भवतीनास्त्वभोकर्णौ हिरण्ययादिरण्मयौ अद्यसूरेसूर्येउदितेसति
मित्रः अर्यमासविताभगस्वयत्तवानिप्रेरयति तत्कर्मकुर्यादितिशेषः नास्तिआगोपराधोयस्यसोऽनागा इतिचतुर्णोवि

गावः उपावतावतम्महीयज्ञस्यरप्सुदा उभाकर्णाहिरण्यया १९ यदद्यसूरउदितेना
गामित्रोऽर्यमा सुवातिसविताभगः २० आसुतेसिंचतश्रियꣳरोदस्योरभि
श्रियम् तत्प्रत्नाथायेवेन २१ ॥ ॥ ॥ ॥

शेषणं आसुते सम्प्रीतिहष्टाश्विन तृतोरुक यावामित्रस्याः स्याने रसनादिरसनैः शाद्वकर्मण इतियास्कः रसानदीवृषभं
वर्षितारंसोमंदधीत पुष्णाति दधातेर्लिङ् नदीसमीपेहिसोमोत्पन्नेः तस्मिन्सोमेसुते अभिषुते सवृषभंवर्षितारंसति
आसिंचतचमसेष्विति शेषः ऋत्विजः प्रतिवचनमेतत् कीदृशं वृषभं रोदस्योः द्यावापृथिव्योः श्रियंश्रीयतेश्रीतं
आश्रयं सोमस्यजगदाधारत्वात् अभिश्रियं अभिसर्वतः श्रीशोभायस्यसोभिश्रीः तं तेप्रयत्नाथ्या अथर्वेनहेः
प्रतीकान्ते शुक्रामंथिनोः शाकतेष्टुरोरुचौ ५ ॥ ५ ५ ॥ ॥ ॥ ॥

११ आतिष्ठंत विश्वामित्रदृष्टात्रष्टगणाउरोहक् येदेवासः स्वस्थाः स्थाने इंद्रस्य वृष्टिकर्मोच्यते विश्वेदेवा आतिष्ठंतं समंतात्
१२० स्थितं इंद्रं पर्यभूषन् परिरक्षितवंतः स इंद्रः चरति सर्वत्र गच्छति कीदृशः श्रियो वसानः देवानां दीप्तीः आच्छादय
न् स्वरोचिः स्वरोचिर्यस्य सः अनन्याधीनदीप्तिः किंच विश्वं रूपयति निरूपयति विश्वरूपः इंद्रो यत् अमृतानि जलानि
आतस्थौ वृष्टये आश्रितवान् तस्मात् इंद्रस्य तन्महत् प्रसिद्धं नाम वासवो वृत्रहा वृषा कीदृशस्य वृष्णः असुरस्य अस
वो विश्वं नेयस्य सोऽसुरस्तस्य प्राणवतः सावधानस्य प्रज्ञावतः इत्यर्थः प्रवः सवीकट दृष्टात्रिष्टुप् श्रवउरोहक् मूर्द्धन्

आतिष्ठन्तम्परि विश्वे ऽअभूषञ्छ्रियो वसानश्चरति स्वरोचिः महत्तद्वृष्णो ऽसुरस्य ना।
मा विश्वरूपो ऽअमृतानि तस्थौ ११ प्रवो महे मन्दमानायान्धसोऽर्चा विश्वानराय वि।
श्वाभुवे इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ११

मित्यस्य स्थाने हे ऋत्विजो यूयं विश्वानराय विवचनव्यत्ययः इंद्रं पूजयत इत्यर्थः कीदृशाय महे महते वो युष्मा।
कं अंधसः अंधसा अन्नेन दृवी रूपेण मन्दमानाय मोदमानाय विश्वभुवे विश्वं भवति प्राप्नोति विश्वभूः तस्मै वो युष्मा
कं सर्वव्यापिने विश्वाभूर्यस्मादिति वा विश्वं भवति यस्मादिति वा संहितायां दीर्घः किंच रोदसी द्यावापृथिव्यौ यस्य
इंद्रस्य सतां मदार्थान् सपर्यतः पूजयतः कान् सुमखं शोभनं यज्ञं सहो बलं महि महत् श्रवः यशः नृम्णं धनं च द्या।
वाभूमी यस्य सत्वादीनि मानयतस्तं पूजयत इत्यर्थः ५

बृहन्निति त्रिशोकदृष्टा गायत्री ऐंद्रामपुरोरुक इंद्राग्नी इत्यस्यास्थाने युवासमर्थ इंद्रो येषां यजमानानां सखा सहायः एषां दध्मः
बृहन् इद् बृहन् महानेव भवति शस्तं शास्त्रं भूरि बहुः स्वरुः स्वरुः पृथुर्विशालः यत्र बाहुल्यमाशास्यते इत्यर्थः इंद्रेहि मधुछंदोदृ
ष्टा गायत्री वैश्वदेवपुरोरुक ओमास इत्यस्यास्थाने इंद्र आ इहि ओमासश्चेतिपररूपे हे इंद्र आ इहि आगच्छ आगत्य अंध
सः अंधसान्नेन हविर्लक्षणेन विश्वेभिः विश्वैः सर्वैः सोमपर्वभिः सोमांशुभिः सह त्वं मत्सि तृप्यस्व मदतृप्तौ शपो लुक कीदृ
शः त्वं ओजसा तेजसा महान् श्रेष्ठ अभिष्टिः अभीज्यते इत्यभिष्टिः अभियष्टव्यः पृषोदरादिः इंद्रो वृत्रं विश्वामित्रदृष्टा त्रि
ष्टुप् प्रथमं मरुत्वतीयपुरोरुक इंद्र मरुत्व आदिः ज्यादित्वाद्रूसः कर्मणि षष्ठी व्यंसं अहन् हंति अंसविभागो विभागो बुरादिर्देतः

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः येषामिन्द्रो युवा सखा २४ इन्द्रेहि मत्स्यन्धसो वि
श्वेभिः सोमपर्वभिः महाँ अभिष्टिरोजसा २५ इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिना
द्वर्पणीतिः अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् २६ ॥ ॥ ॥

र्वितिरित्यस्यास्थाने इंद्रः वृत्रं दैत्यं अवृणोत् यद्वा यदृणोति समापिते मायिनो दैत्यान् प्रामिणात् हिनस्ति मीञ् हिंसायां ॥ अंसमय
ति विभजति स्वात् परानिति व्यंसोऽसुरः तं उशग्वनेषु वनस्थान् हंतीत्यर्थः रमयंति देवान् ते राम्या यायज्ञकास्तेषां धेनाः स्तुतिरू
पा वाचः आविरकृणोत् आविःकरोति यजमानाः स्तुवंतीति देवेषु प्रकटयंतीत्यर्थः कीदृशः इंद्रः शर्धतीति शर्धः इति ब
लनाम शर्धेन बलेन नीतिर्यस्य सः वर्पणीति वर्प इति रूपनाम वर्पेण नानारूपेण नयति प्राप्नोतीति वर्पणीतिः नानारूप
धारी उशधक् उशन्ति कामयंते उशा आश्वा रात्मान्दहतीति उशधक् १० ॥ ॥ ॥ ॥ ॥

३३ कृतस्त्वं आगतस्त्वं दृष्टा त्रिपुष्प सखा त्वमकस्वती यशोरूपक मरुत्वं तमिमम्स्थाने इंद्रप्रतिमकृष्णाकां हे इंद्र हे सत्पते क्व निसृष्ट
मुक्ताचाररता: संत: ते वां पतेपालक त्वं एक: सन् कुतीयासि अस्महाय: क्व गच्छसि तेन वकिं रच्छा गमने को हेतु: किंच
१२१ योजने तथा हे तौ छंदसी ति रूदम: ग्यासत्यय: पतेतोरथ्या विति रूदमरदादेश: कीदृशस्त्वं माहिन: महिन: पूज्य: नि
१२१ शात स्पनत्वे धातोर्दृहि च्छांदसी यद्वा महउत्सवो स्यास्तीति मही मह्रीपएवमाहिन: स्वार्थेऽयाऽ इनएप तपत्य इति टि।
लोपाभाव: किंच समराणा: सम्यक् गच्छन् सन् शुभाने: शोभनै: वचैनत्वं संरछसे कतम पथा इति तोकाव रछ।

ऊतस्त्वमिन्द्रमाहिन: सन्नेको यासि सत्पते किन्तऽइत्था सम्पृच्छसे समराण: शुभानैर्वोचेस्
न्नो हरिवो यत्ते ऽअस्मे महाँ २ ॥ ऽइन्द्रो य ऽउँ जसा कदाचन स्तरीरसि कदाचन प्र युच्छसि २७ ॥

सि एकाकि त्वात शोभंते तानि शुभानि स्थानविशापित्वमेरूपं संपूर्वस्य त्वं: स्थानविशापि न्वमेसमराण इति हरयो स्या
स्य संतीति हरिवान् मतुवसो रु: संबुद्धो छंदसीति रु: दे हरिव: इंद्रैनोऽस्माकं वत्न एकाकिगमनकारणं वोचे: ब्रूहि।
यत् यतो हेतो: अस्मे वयं तेन तव त्वदीया वयमिति देज्जोर्वेक्यमित्यर्थ: तिस्र: प्रतीकोक्ता: तत्र महां इंद्रत इत्यस्मामा
हेंद्रग्रहणे विनियोग: त्वदित्यस्या: स्थाने कदाचनेति हयो रादित्यग्रहणे विनियोग: ॥

आतत्ते गौरीवितिहष्टात्रिष्टुप् आदित्यग्रहस्य दधिग्रयणेऽपि यज्ञोदेवानामित्युक्ताः स्थाने हे इंद्र आयवो मानुषाः ते तव तत्क-
र्म आपनंत स्तुवंतीति पनतिः स्तुतिकर्मा लङ् अडभावश्छांदसः ये आयवः ऊर्वं अन्नं सोमरूपं अभितितृत्सान् अभितितृत्संति
तर्हितुं हिंसितुमिच्छंतीति तितृत्संति उतृदिर् हिंसानादरयोः सनंतः अतश्चलोपः परस्मैपदेष्विति अंते इकारलोपः सोमं सो
तुमिच्छंतीत्यर्थः कीदृशं ऊर्वं गोमंतं गोकृदकमस्ति यस्मिन्स गोमान् तं निम्नाभ्यास तत्तोदकश्रुते नाभिषेचसोमः स्रुयते
किंच ये मनुष्या महीं भूमिं दुदुक्षन् दुग्धुमिच्छंति दोग्धुमिच्छंति दुहेः सनंतान्लङ् सर्ववदिकारलोपः ते पि तव कर्म आपनं

आतत्त॑ इन्द्रायवः पनन्ताभियऽऊर्वङ्गोमन्तन्तितृत्सान् सकृत्स्वंये
पुरुपुत्राम्महीं सहस्रधाराम्बृहतीन्दुदुक्षन् ४ ॥ ॥ ॥

ति स्तुवंति कीदृशीं महीं सकृत्स्वं सकृदेकवारमेव सूते हिरण्यधान्यादि ददातीति सकृत्स्वः तां पुरुपुत्रां बहुपुत्रां
सर्वे पदार्थाः पृथिवीत उत्पद्यंते सहस्रधारां सहस्रं धारा हिरण्यादयो यस्याः स्थाने बहुभोगदा यद्वा सहस्रम-
संख्यं प्राणिजातं धरंति सहस्रधारा तां बृहतीं महतीं ये विप्राः सोमाभिषवं कुर्वंति ये च तत्रिया भूमिं दुहंति पालयं
ति ददते इंद्रस्य वृत्रवधादिकर्म स्तुवंति नान्ये इद्मैथ स इत्यर्थः ५ ॥ ॥ ॥ ॥

११ इमानि । कुत्सदृष्टा जगती सावित्री पुरोरुक् वाममद्य सवितः । इमानि हे इंद्र इमां मा मकीं धियं बुद्धिं स्तुतिं वा कर्म वा तेन अंगं प्रत
१२२ रेभरे समर्पयामि कीदृशास्ते महः महतः पूज्यस्य कीदृशीं धियं मंही महती यत्र यस्मात् अस्य यजमानस्य धि
षणा बुद्धिर्वा गिरा स्तोत्रे क्रियमाणेन तव आनजे जो ऋनक्ति कर्मणि षष्ठी अंजेर्लिट् नलोपश्छान्दसः किंच देवासः दे
वाः ते इंद्रं अनु अमदन् अनुमदंति स्तुवंति छंदसि परेपीति अनोपसर्गप्रयोगः कं स्तुवंति उत्सवे अभ्युदये प्रसवे गर्वा।
वत्तुज्ञातायो सप्तो यहां प्रसवे पुत्रा धुत्पतिरूपे उत्सवे इंद्रं स्तुवंति कीदृशं इंद्रं शवसा बलेन सासहिं सहते सासहिं शत्रू
णाम् अभिभवितारं चौ सप्तजवेयं इंद्रस्तत्संतेहिती महः समासे अयत्ततीय महः सूर्यस्तत् तथा वस्तुकृतिः सूर्यस्तु इत्यसत्
तीय महः भवति तस्य सौर्या ग्रहा भवंति सौर्यः पुरोरुचः सर्वं सौर्यमसदिति चन्द्रई शपुरोरुचस्तिस्रः प्रतीकोक्तपवेस।

इमा नु ते धियं प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः श
वसामदन्ननु २९ विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् वातजूतो यो अभि
रक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ३० उदु त्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वा

मृदृशस्तुचः सूर्यस्तत्संज्ञेय उच्यमंबंध सर्वमेधतृतीयेः हनिर्पंड्वायवादि सा विज्ञेता नां ग्रहाणां ॥ य सूर्यम् ३१
ऋवीकर्कमेण ग्रहणमंत्रा वोध्याः विभ्राड् विभ्राड्दृष्टा जगती पंड्वायक पुरोरुक् विविधं भ्राजते विभ्राट् सूर्यः सोम्यं सोम मरु
पदविः पिबतु कीदृशं सोम्यं बृहत् महत् मधुमधुरस्वादं यः सूर्यः त्मना आत्मना प्रजा अभिरक्षति पालयति पुपोष पुष्णा
ति च पुरुधा बहुधा विराजति च शोभते कीदृशः यज्ञपतौ यजमाने अविह्रुतम् अकुटिलं आयुर्दधात् स्थापयत् वातजूतः।
वातेन प्रेरितः वातेन प्रेरितो रविमंडले भ्रमतीति प्रसिद्धिः त्मना मंत्रेष्वाप्यादेरात्मनस्त्विति आकारलोपः हृको दिस्येक्द हूते।
छंदसीति ऊ आदेशः उदु त्यं पंड्वायव द्वितीया पुरोरुक् व्याख्याता ३२

येनापावकप्रस्करावहस्गायत्रीमैत्रावरुणपुरोरुक्सर्वमेधेयत्नाकारेणाभिश्रीयनेतद्रूपमात्मानंसंपाद्यभ्रजिमाप्नोतितद
त्रयाप्यते देपावकशोधकयेनचक्षसादर्शने तत्वंभुरण्यंतंजनानुपश्यसि विश्वानिपत्तोभुरण्यः भुरण्यमात्मानंकरोति
भुरण्यति भुरण्यतीतिभुरण्यन् तंक्विवंताशतृप्रत्ययः सर्वमेधयाजिनंभुरण्यपदितद्रूपमात्मानंकृत्वास्वर्गंगच्छंतंयेनच
क्षसात्वंपश्यसीत्यर्थः तेनचक्षसाजनानस्तानपिभुरण्यतः हेवरुणत्वंपश्य वरुणः सूर्यः देवावद्यचु आश्विनपुरोरु
क्गायत्री देवानोमिमौदेवौ हेदेवा अद्य हे आश्विनौयुवांरथेनआगत आगच्छतं शंपोल्लुक कीदृशेनरथेनसूर्यत्वचा
सूर्यस्येवत्वक्कांतिर्यस्यतेनरानमध्वामधुरेणहविषासोमपुरोडाशदध्यादिनायुक्तेसमंजाथ युवांसंमदयेते वह्निदेवौ
विकृतमित्यर्थः तेप्रलया अर्यवेनः चित्रंदेवानां तिस्रः प्रतीकोक्ताः मैत्रपुरोरुक् स्तोत्रीयाग्रयणस्य आनः अगस्त्य.

येनापावकचक्षसाभुरण्यन्तञ्जनाꣳ॥ अनुत्वंवरुणपश्यसि ३१ देवावद्यसूर्यꣳ आगत ८ रथेनसूर्यत्वचाम

ध्वायज्ञꣳ समञ्जाथे तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ३२ आनइडाभिर्विदथेसुशस्तिविश्वानरः सवितादे

वꣳएतु अपियथायुवानोमत्सथानोविश्वञ्जगदभिपित्वेमनीषा ३४ ॥ ॥ ॥

इत्यात्रिष्टुप् भुवपुरोरुक् विश्वानरोविश्वनहितकारी सवितादेवोनोस्माकंविदथेयज्ञगृहेआएतु आगच्छतुकथंइडा
भिःसुशस्तियथास्यात्तथा इडाभक्षणेन शोभनाशस्तिः शंसनं प्रशंसायस्याक्रियायोतथा यथासर्वेइडांभक्षयंतितथाइ
त्यर्थः यद्वा सुशस्तिविभक्तिलोपः कीदृशीयज्ञगृहेदोत्सोस्ता इडाभिःशोभनप्रशंसायुक्ते एवंसूर्यमुक्त्वादेवानाहे
युवानोजरारहितादेवा अपिनिश्चितंअभिपित्वे अभिपतंते आगमनकालेयथायेनप्रकारेणयूयंमत्सथ मदत्तमोद
न्तथ तथानोस्माकंविश्वंसर्वंजगत्जंगमंपुत्रगवादिकंमनीषामनीषयाबुध्यामत्सथ अंतर्भूतण्यर्थः तर्पयथा
भवद्भिस्तृप्तिःक्रियतेतथास्मत्सजाम्तर्पणीयाइत्यर्थः १४ ॥ ॥ ॥

११ यदद्य ऋक् तस्य सुकक्ष ऋषिः गायत्री छन्दः इन्द्रो देवता । वृत्रो मेघे रिपौ ध्वान्ते दानवे वासवे गिराविति कोशात् वृत्रं ग्रन्थकारं
सार्वं हन्तीति वृत्रहा रविः हे वृत्रहन् हे सूर्य हे इन्द्र ऐश्वर्ययुक्त अद्य यत् कच्च यत्र क्वचित् त्वं अभि उदगाः अभ्युदेषि तत्सर्वं तेन
१११ वशे स्थितीति शेषः यद्वा उदगा अत्र पुरुषव्यत्ययः यत्किंचित् प्राणिजातं उदेति तत्सर्वं तव वशे सर्वस्येशिता त्वमेवेत्यर्थः त
रणिः प्रस्कण्व ऋषिः गायत्री वैश्वदेवं पुरोरुक् हे सूर्य त्वं ज्योतिष्कृत् तेजसः कर्तासि विश्वं आभासि प्रकाशयसि च अपि
विद्युन्नक्षत्रचन्द्राग्न्यादितारकादिषु यद्दीप्यते तेजः तत्सर्वं त्वदधीनमित्यर्थः कीदृशं विश्वं रोचने दीप्यमाने त्वत्प्रकाशेनेति भावः कीदृशस्त्वं तर।
णिः तरत्यतिक्रामति नभोवर्त्मेति तरणिः अशावह्म्याः निरितिनितरोतरनिप्रत्ययः विश्वदर्शनो दर्शनीयः दृशेरतच् न।

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य्य सर्वं तदिन्द्र ते वशे १५ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि
सूर्य्य विश्वमाभासि रोचनम् १६ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततं सञ्जभा।
र यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै १७

सूर्यस्य कुत्स ऋषिः त्रिष्टुप् सौम
रूपवती योयोऽपुरोरुचौ सूर्यस्य तत् देवत्वं देवतानुभावः तच्च महित्वं महाभाग्यं ऐश्वर्यं तत् किं कर्तोः इक्षोरतो मुक्त।
स्तनाविति करोतेस्तोसुन्प्रत्ययः कार्यश्रेष्ठस्य जगद्रूपस्य मध्या मध्ये विततं विस्तारितं रश्मिजालं संजभार संजहार संहर
ति नश्यत्पतामृशमे रश्मिजाले प्रसारयितुं संहर्तुं वा शक्नोतीत्यर्थः किंच यदा इत् यदेव हरितो हरितवर्णान् अश्वान् अयुक्त आ
त्मनि आरोपयति सधस्थात् सह तिष्ठन्त्यश्वा यत्र तत्सधस्थं व्योममण्डलं सधमादस्य योक्तुं दसीति सहस्य सधादेशः सन्ध्याका
लेपीतवर्णान् अश्वान् व्योममण्डलात् विमोचयति आत् अनन्तरमेव रात्री निशा सिमस्मै सर्वस्मै वासस्तनुते सर्ववस्तु तमसाच्छा
दयतीत्यर्थः सूर्यास्तादनन्तरं रात्रिसद्भावात् सिमशब्दः सर्वपर्यायः १५ १११

123

तन्मित्रस्य। सूर्यो द्योरुपस्थे लोकस्योपरिष्टात् संगे मित्रस्य वरुणस्य च तद्रूपं कृणुते करोति। येन रूपेण जगदात्मा अभिचष्टे। अभिचष्टे
पश्यति। मित्ररूपेण सत्कृतिनोऽनुगृह्णाति। वरुणरूपेण दुष्कृतिनो निगृह्णातीत्यर्थः। अस्य सूर्यस्य अन्यत् एकं पाजो रू
पम् अनन्तं कालतो देशतश्चापरिच्छेद्यं रुशत् शुक्लं दीप्यमानं विज्ञानघनानन्दं ब्रह्मैव अन्यत् कृष्णं द्वैतलक्षणं रूपं हरि
तो दिश इन्द्रियवृत्तयो वा संभरन्ति धारयन्ति। इन्द्रियग्राह्यं द्वैतरूपमेकं। एकं शुद्धं चैतन्यमद्वैतमिति द्वे रूपे। सूर्यस्य सगु
णं निर्गुणं ब्रह्म सूर्य एवेत्यर्थः। पाजः इति बलनाम। इह रूपमुच्यते। पिबतेरसुन् कृशान्त्रे णादिके। इति प्रत्यये पकारस्य

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे। अनन्तमन्यद्रुशद
स्य पाजः कृष्णमन्यद्धरितः संभरन्ति ३५ बण्महाँ असि सूर्य बडादित्य म
हाँ असि महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ३६

आकारो गुणाभावश्छान्दसः पात्यते। यद्वा। रूपादिं मायया। कृष्यर्थे वर्तमानादस्मात् लटः शतृ तदि रुशदिति रूपं। बण्महाँ
। जमदग्निरृषिः बृहती सतो बृहत्यौ। आद्या माहेन्द्री द्वितीया सौरी। बडित्यव्ययं सत्यार्थे। हे सूर्य सवति प्रेरयति कार्येषु
जगदिति सूर्यः राजसूर्यसूर्य इत्यादिना क्यबन्तो निपातनः। बट् सत्यं त्वं महानसि। श्रेष्ठोऽसि। आदत्ते सूर्यरश्मीन् इत्यादित्यः। हे आदि
त्य बट् त्वं महानसि। किंच। महो महतः सतो नित्यस्य ते। तव महिमा पनस्यते। लोकैः स्तूयते। हे देव दीप्यमान अद्धा सत्य

त्वं महा निसि। अभ्यो सेमूर्यो समर्थ मभं नर निपुन कृकिराद
राध्यः १८

वट्सूर्य।आदित्ययद्वप्रथमग्रहणं।हेसूर्यवट्सत्यंश्रवसायशसात्वंमहानसि।हेदेवसत्रासत्यंत्वंमहानसि
।देवानांमध्येश्रेष्ठोसि।केनमन्हामहत्वेन।कीदृशस्त्वं।असुर्यः।असवःप्राणास्तेभ्योहिताइतितेअसुराः।तेषांमध्ये प्राणि
१२८ नः।तेभ्योहितोऽसुर्यः प्राणिनांहितः।पुरोहितःपुरोऽग्रेहितःस्थापितः।सर्वकार्यप्रधानःप्रमुखःसर्वदेवानांम
124 ध्येदानानंतरमेवप्रज्ञाधिकारवान्।विभुव्यापकंअदाभ्यंअनुपहिंस्यंज्योतिस्तेजस्त्वमेवतेजोरूपइत्यर्थः
।आयनेत्र्यवाक्यमेवपदच्छेदकृतौ।आदित्यस्यपुनर्ग्रहणं अयंतइतिआयतः।श्रि।जमेवायाश्रवःशान्तविश
पिशुणेप्रामेव्यायेनवृद्धिः।इत्यर्थः।सूर्यअयंतस्याअयंतःसर्वार्थाद्यस्यपश्चादस्यविश्वा इत्तविश्वाति

वट्सूर्यश्रवसामहाँ२ऽअसिसत्रादेवमहाँ२ऽअसि मन्हादेवानामसुर्यः पुरोहितोविभुज्योति
तिरदाभ्यम् ५० आयन्तइवसूर्यंविश्वेदिन्द्रस्यभक्षतवसूनिजातेजनमानओजसाप्रतिभाग
((न्नदीधिम ५१

सर्वाण्यपिवसूनियानिहविर्धानानिःयत्पातीनिभक्तन।अभक्षन्तेभजंतेविभजंते।
प्राणिभ्योविभज्यददातीत्यर्थः।भक्षभागसेवयोः।अस्यलुङि।लङि।प्रथमबहुवचनेरूपं अडभावश्छान्दसः
आत्मनेपदेऽप्यतनइतिमस्यादादेशः।सूर्यकिरणाःइन्द्रदत्ताहवींषिभूमौविभजंतीत्यर्थः।किंच।वयंतान्येव
वसूनिजातेउत्पन्नेजनमानेउत्पद्यमानेचओजसातेजसामहदतिदीधिम धारयामःस्थापयामेत्यर्थः।कि
मिव।भागंनभागमिव।यथास्वभागंपुत्रादिधारयामस्तथेत्यर्थः।पितृभ्यो।लडुत्तमस्यमनसापयः स्तुःहवि।
नदादित्वात्स्वमसदीर्घः ।२ १२८

अद्यादेवाः। कुत्सदृष्टा त्रिष्टुप् दशादित्यदैवत्यं प्रयोगो विनियोगः। द्योतंते दीप्यंते इति देवाः रश्मयः। हे देवा नोऽस्मानंहसः
पापान्निः पिपृता निर्मुचत। अवद्यात् दुर्यशसोऽपि निःपिपृत॥ द्योतंते दीप्यंते इति देवाः रश्मयः। हे देवा नोऽस्मानंह
सः पापान्निः पिपृत निर्मुचत। अवद्यात् दुर्यशसोऽपि निःपिपृत। पृथक् कुरुत अस्माकं पापान्निदुर्यशसो मोचनाय प्रयतेत्
त्यर्थः। क्व। अद्यास्मिन् दिने सूर्यस्य उदिता उदिते उदये। अद्य सूर्योदये अस्मान् शुद्धान् कुरुतेत्यर्थः। अद्येत्यत्र संचोन
लिङ्‌नि पातस्य च इति दीर्घः। अन्येषामपि दृश्यते इति दीर्घः पिपृतेत्यत्र। किंच मित्रादयः तन्नस्मद्वचनं मम

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् तन्नो मित्रो वरुणो मामा
हन्तामदितिः सिन्धुः पृथिवी उत द्यौः ५२ आकृष्णेन रजसा वर्तमानो निवे
शयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ५३

हन्तां पूजयंतु। अंगीकुर्वंतु इत्यर्थः। के। मित्रः। वरुणः अदितिर्देवमाता सिंधुः समुद्रो नदी वा। पृथिवी उत अपि च द्यौः
स्वर्गः। आकृष्णेन। हिरण्यस्तूपदृष्टा त्रिष्टुप्। सावित्र्युपरोरुक्। सविता देवो हिरण्ययेन रथेन आयाति आगच्छति। किं
कुर्वन्। कृष्णेन रजसा रात्रिलक्षणेन सह आवर्तमानः पुनः पुनर्भ्रमणं कुर्वन्। अमृतं देवादिकं मर्त्यं मनुष्यादि
कं च निवेशयन्। स्वस्वप्रदेशेषु स्थापयन्। भुवनानि पश्यन्। कानि साध्यकुर्वन्ति। कान्यसाध्यानि विचारयन् १८

तृतीयं सूक्तं तु व्यमहः समाप्तं। अथ चतुर्थमहः। वैश्वदेवस्तु तत्तथा च श्रुतिः वैश्वदेवस्तु चतुर्थमहर्भवति वैश्वदेवाः ग्र
हाः भवति। वैश्वदेवः प्रउग इति। वैश्वदेवत्वं ति चतुर्थः होत्रकादप्रउगश्च। षट्‌ प्रतिकोऽत्र इति समस्तृचेऽद्र वाय
वादिश्चविश्वान्त ग्रहाणां प्रउगश्च ग्रहाणां मन्त्राः। प्रवावृजे। वसिष्ठ दृष्टा त्रिष्टुप्। ऐन्द्रप्रउगस्य। एषां यजमानानां स्वस्तये
१२५ कल्याणाय वीरिटं नरिक्षं वनेमानौ वायुः पूषा चाश्व आइयाते आगच्छतः। इत्थं समसनगति व्याप्योः। अन्त्ययेन इः। कीदृ
125 शौ वायुः। नियुत्वान्। नियुतो ... पुत्रस्त्वाश्वाः सन्त्यस्य नियुतो वायोरिश्वकेः। कस्मिन्काले। अक्तोः रात्रेः उषसो दि
नस्य पूर्वहूतौ पूर्वाचासौ हूतिश्च पूर्वहूतिस्तस्यां प्रथमहोमकाले। अग्निहोत्रहोमकाले इत्यर्थः। उषसः पूर्वाह्णे
पूषा रविरायाति रात्रौ वायुः वायुना वायुसत्त्ववादग्निर्लिप्यते। रात्रिहोमस्याग्निदेवत्वात्। तत्र दृष्टान्तः। का इव।

प्रवावृजे सुप्रया बर्हिरेषामाविश्पतीव बीरिट इयाते विशाम
क्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ५५

विश्पतीव। प्रजा विशां पतीद्वौ राजानौ विशं वीरिटमनुष्याणां गणं आगच्छतस्तद्वत्। तावपि नेषां स्वस्तये इमा ते।
पषां केषां। येषां बर्हिः प्रवावृजे। प्रवृज्यते। प्रस्तीर्यते। वृजी वृजी त्यागयोः। लिट्। अभ्यासदीर्घः संहितायां। कीदृशं ब
र्हिः सुप्रयाः। प्रयो अन्नं प्रयः प्रगमनं प्रस्तरणं यस्य तत्सुप्रयः। दीर्घः छान्दसः। सस्य कविधिनप्रस्तीर्णमित्यर्थः। वीरि
टशब्दो गणवाचकः। तथा च यास्कः। प्रवृज्यते सुप्रयाणं बर्हिरेषामियाते सर्वस्य पातारौ वा पालयितारौ वा वीरिटमं १२५
तरिक्षं भियो वा भासो वा ततिरिति। गणाभिधानं वा स्यात्तेषां पिपीततनो भासस्ततनयस्त्र। अंतरिक्षे नियवनेन तं प
मासो न तत्र गणो न न नमं। गणमपि दृष्टेपोद्वारो। विश्पति नियोवी आदेशनन्तो नेरिट इति ॥ १९

इंद्रवायू मे यानि षिदृष्टे इंद्रे माय ओ। आर्येद्रकयुवस्य पुनर्ग्रहणो। द्वितीयामैत्रावरुणग्रहणो। इंद्रवायू बृहस्पति मित्रामित्र
विमके एकारः। अग्निं पूषणं। भगं। आदित्यान्। मारुतं। मरुतंवं यिनं गणं। एतान् हूयामि ४५ वरुणः वरुणो मित्र अवि
षाभिः सर्वाभिः ऊतिभिरवनैरवत्त्राणप्रकारैः। आविता। प्रकर्षेण रक्षकः। भुवत्। भवतु। भवतेर्लिङ्मध्यमेन तदादित्वान् श
प्रत्ययः। इतश्च लोप इति तिपः इलोपः। यो नो रुववतु। किं च मित्रावरुणौ नोऽस्मान् सुराधसः शोभनधनान् करतां।
कुरुतां। शोभनं राधो येषां। अश्विनः। कुसीदिष्टत्रोगाय आश्विन पुरोरुक्। हे इंद्र। हे विष्णो। हे मरुतः। हे अश्विना। अ

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् आदित्यान्मारुतं गणम् ४५ वरुणः प्राविता भुवन्मित्रो
विश्वाभिरूतिभिः करतां नः सुराधसः ४६ अधि न इन्द्रैषां विष्णो सजात्यानाम् इता मरुतो अ
श्विना तं प्रत्नथायं वेनो ये देवासः आ न इहा विश्वेभिः सोमपीतये गन्त ४७
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो उभा नासत्या रुद्रो अध ग्नाः पूषा भगः

श्विनौ। नोऽस्माकं एषां सजातानां समानजातीयानां मध्ये अधि उपरि इत। आगच्छत। अथ प्रतीकोक्ताः ते
प्रत्नथा। शुक्रग्रहे १ अयं वेनः। मंथिग्रहणे २ ये देवासः। आग्रयणस्य। ३ आ न इहाभिः। ध्रुवस्य ४। विश्वेभिः
सोमं। पेंद्राग्रस्य ५ अमासः वैश्वदेवस्य ग्रहे ६ अग्न इन्द्रः। प्रतिष्ठा द्रष्टा त्रिष्टुप् मरुत्वतीयपुरोरुक्। हे अग्ने। हे
इंद्र। हे वरुण। हे मित्र। हे देवाः। हे मारुतं मरुद्गण। उत अपि। हे विष्णो। शर्धं बलं प्रयंत प्रयच्छत। दत्त। यमेः प्र
पालुक्। एवं प्रत्यक्षकृता परोक्षमाह। उभा नासत्या। उभौ नासत्यावश्विनौ रुद्राः। अध अथ। ग्नाः देवपत्न्यः। पूषा। भगः।

इंद्राग्नी। वत्सार हृणत्रगातीस शास्त्रमरुत्वतीयमरुक्। इंद्राग्नी। मित्रावरुणौ। अदितिं स्वः आदित्या पृथिवीं। यां। द्युलोके
। मरुतः पर्वतान्। अपः विष्णुम् पूषणं। ब्रह्मणस्पतिं। भगं। शंसमस्त्वष्टारं सवितारं पतान् तुहिषुक्रुतः येऽस्तनाया हरूवं। आ
१२९ हूयामि। अमे रुद्राः पंच त्रिष्टुभः। आपमसाय्हृणोमाहेंद्रपुरोरुक्। येनरः शंसते। शास्त्रा। गाशंसंति। स्तुव
ते। स्त्रैमतिलाक्षाणि। प्रकर्षेणोर्जयति। यजत्रः परितनयन सनयापि दूयाति हवींषि। तानस्मांस्त्वयजमाना

इंद्राग्नी मित्रावरुणादितिं स्वः पृथिवीन्द्यां मरुतः पर्वताँ ॥ऽ अपः हुवे विष्णुम् पूषणं ब्रह्मण
स्पतिं भगन्नु शंसं सवितारमूतये ४९ अमे रुद्रा मेहना पर्वतासो वृत्रहत्ये भर
हूतौ सजोषाः यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ ॥ऽ अवन्तु देवाः ५०

वः देवा अवंतु पांतु वः वः एते रुद्रादयः कीदृशो देवाः। अमे अस्मात्। मेहना। जलस्य आकारः। मेहंति सिंचति
मेहनाः। यनादि सेकारः। वोऽद्यतिशत्रूनिति रुद्राः पर्वतासः पर्वाणि उत्सवा विद्यंते येषां ते पर्वताः। उत्सव
वंतः। पर्वमरुद्ग्रीवविति तन्मयः। वृत्रे हत्ये वृत्रास्तवधाय मरद्दूता। भरे संग्रामे हूतिराह्वानं तत्र सजोषः
। समानजोषा प्रीतिर्येषां ते। एकमतय इत्यर्थः। इंद्रज्येष्ठा येषां ते। ईदृशा देवाः नः वंतु २२ १३९

र्वाञ्चः । कर्मदृष्टादित्यग्यप्रथमपोरफक । यज्ञं तत्रायेते यजत्राः । यष्टव्या वा । हे यजत्रा देवा अद्य यूयं अर्वाञ्चः अस्म
दभिमुखा भवत । दीर्घो संहितायां । पतो भयमानो भिवभ्यद्धे वो युष्माकं हार्दि हृदि भवं मनः आव्ययेयं आगम
येयं अभिमुखं विसंपादयेयमित्यर्थः । व्ययगतौ । निजुरः भिन्नो व्ययेन पापिभयमानः । किंच । हे यजत्रा देवाः नो अस्मा
न् वृकस्य वृकात् त्राध्वं पालयत । कर्तात् । कूपात् त्राध्वं । कीदृशात् वृकात् । निजुरः जूरी वधे । नितरां जूर्यते हिनस्ति

अर्वाञ्चोऽद्या भवता यजत्रा ऽ आ वो हार्दि भयमानो व्ययेयम् त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्ता
दवपदो यजत्राः ५१ विश्वे ऽद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः विश्वे
नो देवा ऽ अवसा गमन्तु विश्वमस्तु द्रविणं वाजो ऽ अस्मे ५२ विश्वे देवाः शृणुतेमं ह
वं मे ये ऽ अन्तरिक्षे य ऽ उप द्यवि ष्ठ ये ऽ अग्निजिह्वा ऽ उत वा यजत्रा ऽ आसद्यास्मिन् बर्हिषि माद
यध्वम् ५३

निजुः । क्विप् । तस्मान्निजुरः हिंसकात् । कीदृशात् कर्तात् । अवपदः अवाचीना निपादा यस्मात् यत्र सः अवपातः त
स्माद् अवपदः सोपानैर्विवर्जितः भवति तं शकात् त्रध्यधि: ।। विश्वे अग्न्यात्पश्चात् दृष्टादित्यपुत्रगृहे ऽणो आग्नेयं । विश्वेदेवाः
स्त्रिष्टुप् दृष्टादित्यग्रहस्मद्भाश्रयणाविंहे विश्वेदेवा ये यूयं अन्तरिक्षे ये उपद्यवि । उपसर्गात् समीपे स्थाये वाग्नि
जिह्वाः । वन्हिमुखाः । उत वा अपि च । यजत्रा यजनीयाः । ते सर्वे यूयं मे मम हवं च मा ह्वानं स्मरणं शृणुता

देवेभ्यः। वामस्य वरुणा जगतो माविनय ग्रहस्य पुरोहकः। हे सवितः। हि निश्चितं प्रथमं उदयसमये यज्ञियेभ्यो यज्ञार्हेभ्यो देवेभ्यः
१२ हेउत्तमं भागं अग्निहोत्रहोमरूपं सुवसि। प्रेरयसि। सूर्येणोत्तदादिः। अभ्यनुजानासीत्यर्थः। कीदृशं भागं। अमृतत्वमम-
मृतप्रदमित्यर्थः। कीदृक्कारणो यावभेदेन निर्देशः। आत्। अनन्तरमेव चदयानंतरं दानं। ददाति प्रकाशमिति दा-
मानं पितमस्मद्दृः तं व्यूर्णुषे। विवृणोषि। विस्तारयसि। ततो मानुषेभ्यो जीविताजीवितानि जीवनहेतूनि कर्माणि अ-
र्णुषे। सूर्योदयानंतरं मनुष्याणां कर्मसु प्रवृत्तेः। कीदृशानि जीवितानि अनूचीनानि अनुस्यूतं तानि अनूचीना-
नि। दिसमनूहानुगतानि। तमसि ननिदभावात्। लौकिकवैदिकव्यवहारप्रवर्तयितारमेवेत्यर्थः। इति वैश्वदेव

देवेभ्यो हि प्रथमं यज्ञियेभ्यो मृतत्वं सुवसि भागमुत्तमम् आदिद्दामानं सवितर्व्यूर्णुषे नूचीना जीवि-
ता मानुषेभ्यः ५४ प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् द्युतद्यामा नियुतः पत्यमा-
नः कविः कविमियक्षसि प्रयज्यो ५५

स्तवस्तृष्णमहः। समामोयमर्थमेव। अथ पंचदशपंचदश्योर्
श्चविश्वयोः तु वाकाः। पुरोरुचोः नारभ्याधीताः श्रौतकर्मणि विनियुक्ता बलयज्ञा होआदिसयाज्ञवल्काहि
ष्टाः। पितृमेधपर्यंतं। प्रयाणेऽयं। हे जिष्णु हरणात्रिवृत्प्रवायुदेवतया प्रकर्षेण यजति प्रत्यक्षः हे प्रयज्यो अच्छ यां वृहती
। मनीषा महती स्तुतिर्वायुं अभिमुखं गच्छति। तं त्वं कविः प्रकर्षेण यष्टुमिच्छसि। कीदृशः। त्वं कविः ज्ञा-
नी। कीदृशं वायुं। बृहद्रयिं। बृहद्धनं। प्रियं यस्य तं। महाधनं। विश्ववारं। विश्वेन व्रियते। तं। सर्वस्य वरणीयं। विश्वं वृणोती-
ति वा। सर्वव्यापकं। रथप्रां। रथप्रान्तिपूरयतिरथप्राः। तं। यजमानानां यदा तं यज्ञे रथैः पूरयति। द्युतद्यामा। द्युतद्यामः
द्युतद्यामा दीप्यमानेन यामा यमनं नियमनं यस्य तं। नियुतः पत्यमानः। उभयत्र विभक्तिव्यत्ययः। नियुद्भि १२७

इंद्रवायू। आ आगतं। मित्रं हुवे। द्वे मधुछंदोदृष्टे गायत्र्यौ। आद्यालिंगोक्तदेवत्या। मित्रं वरुणं। चाहं हुवे आह्वयामि। की
दृशं। पूतदक्षं। पूतेन पवित्रं सदाचारं दक्षं यस्य। पूतपुत्रादिभिर्वर्द्धयति पूतदक्षं यस्तं। दक्षं के पक्षेद्या वित्पसमा णिजंता
कर्मणे पणं। रिशादसं रिशंति हिंसंति रिशाः दुष्टास्तानसमंता हृत्स्यति नाशयति। रिशादसमस्तं। रिशां हिंसायां। दस
स उपक्षये। द्वयोर्विशेषणं। कीदृशावुभौ। धियं कर्मसाधयंता साधयंतौ। कीदृशीं धियं घृताचीं। घृतमच्यते द्रवयते य
त्रेन। दस्रा युवाकवः। आश्विनौ। द्वयोरश्विनोरेकस्य दस्र इति नामापरस्य नासत्य इति। हे दस्रौ दर्शनीयौ। हे नासत्यौ।

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ५६ मित्रं हुवे
पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता ५७ दस्रा युवाकवः
सुता नासत्या वृक्तबर्हिषः। आ यातं रुद्रवर्तनी नस्माकमथायं देवेनः ५८

नासत्यौ

सत्यवादिनावित्यर्थः। युवां आयातं। आगच्छतं। यतः सुताः अभिषुताः सोमाः इति शेषः। कीदृशाः सोमाः युवा
कवः। युवां कामयंते ते युवाकवः। मां पिबतमिति वांछंते। यद्वा युवंति मिश्रा भवंति। युवाकवः। कटिकापि
ष्पां काकु इति बहुलग्रहणात् काकु प्रत्ययः। वृक्तबर्हिषः। वृक्तं लूनं बर्हिः पवित्रं ते। कीदृशौ युवां। रुद्रवर्तनी।
रुद्रैः स्ववर्तनिः पंथा ययोस्तौ। रुद्रवद्गमनशीलौ। ते प्रसिद्धा। अयं देवेनः पते हे अनीकोके २४

विदद्यदि। कुशीकदृष्टा त्रिष्टुबिंद्रदेवत्या। सहरमंनेत्येवा विप्रावायंस्मा मारमावाक्। प्रथमाग्राघ्या सरमा त्रयीलवणावाक्। सख्य
यत्राभिमुखं विगात्। आगछति। यत्तं प्रतिपादयतीत्यर्थः। कीदृशी सरमा। सुपदी। शोभनपदानां निस्ताभिरेः नानियद्यांस्मा। अ
१२८ क्षराणामकारादीनां सर्वेषां शब्दानां नेतृत्वापयंती। अग्रनयत्पूर्वकाणिजर्थः। तां सरमां यदि चेत्। विदत् जानीयात्यष्टुः। तर्हि पाथः
सोमत्वदतं एणस्र त्वेकः। कुर्यात्। वेदानभिदत्पसे सोमकंडनानयिकागात्। कीदृशं पाथः। अद्रेः रुग्णां। विभक्तिव्यत्ययः। आ
द्रिणा सोमाभिषवग्रावणा रुग्णं अभिषुतं। महि। महत्। पूर्व्यं। पूर्वैरगृहीतं उपांस्वतर्यामेंद्रवायवादिपात्रेषु। सध्र
क्। सहांचति। सहस्पसध्रिः। सहैव वनायाछत्। अग्रनयत्। अग्रमुख्यं यजमानं प्रापयत्। यज्ञेन यजमानेषु मुख्यो
भवतिः। एवमथियज्ञं मेत्रेष्वाख्यातः बहूचानां संवादसूक्तमिदं। तत्र पणिभिरसुरैर्देवगोपनैः पद्मनेइंद्रेणादेवशुनी

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः। अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जान(
((तीगात् ५९

नदीत्येप्रेरितानदृभिप्रायेण ख्यायते। सरमा देवशुनी इंद्रेण गवान्वेषणाय प्रहिता सती यदि।
यदा। अद्रेर्गिरेः रुग्णां भग्नद्वारं विदत्। अविदत्। अलभत्। उदाहः। माथः। हविर्लक्षः। अकार्यन्। नैस्पर्त्तवान्। ततः
सुपदी शोभनपादयुक्ता सा सरमा अक्षराणां अक्षरणेन नाशेन रहितानामनुपहुतानां गवां अग्रं प्रातेनेन यत्। अनयत्। प्राप्ता
ना प्रथमा। प्रथरवं गवां हंभारवं भी जानती सती अच्छ गवामभिमुखं विगात्। अगात्। जगाम। कीदृशं पाथः। महि महत्
त्। पूर्व्यं। सर्वे प्रथमकाले। अनादिनी ते प्रजंकोरिष्यामी नि प्रतिज्ञातं। सध्र्यक्। सध्रीचीनं। तेनैरपि सह भोज्यं। विदत्
विद्लृ लाभे पुषादीन्यादिना त्रे रङादेशः। अडभावश्चार्घः। सरमा। सृ गतौ। अत्रणादिको ऽमप्रत्ययः। तस्या सरणीरि
ति यास्कः। रुग्णां। रुजो भंगे। निष्ठायामादिनश्चेति नत्वं। पाथः। पातीति। पारतोणा। अस्त्रे वेसुन्नप्रत्ययस्मसुडागमः।

नहि स्पशं। विश्वामित्रदृष्टा त्रिष्टुप् वैश्वानरी। देवा अस्माद्वैश्वानरात् विश्वेभ्यो नरेभ्यो हितात् अग्नेः अन्यं स्पशं स्पष्टारं पुर
एतारं सर्वकार्येषु पुरःसरं च। नहि अविदन् नालभन्त। नहि शब्दो निषेधवाची। स्पशः प्रणिधिरुच्यते। प्रणि
धिर्गच्छति प्रस्थापनात्। आ ई। निपातौ। अर्थार्थौ। प्रथा गत्वा देवाः एनं वैश्वानरं अवृधन्। अवर्द्धयन्। कीदृशं अग्निं अ
मृतं। अमरणधर्माणं। किमर्थं अवृधन् क्षैत्रजित्याय। क्षेत्रमेव क्षैत्रं तस्य जितिः जयत्यस्मै। यजमानस्य क्षेत्राभि
उग्रा विघनिना। भरद्वाजदृष्टा ऐन्द्राग्नी हवामहे। आह्वयामः। कीदृशौ इन्द्राग्नी उग्रौ उद्गूर्णबलौ घातयतस्तौ वि

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं
क्षैत्रजित्याय देवाः ६० उग्रा विघनिना मृध इन्द्राग्नी हवामहे ता नो मृडात ईदृशे ६१
उपास्मै गायता नरः पवमानायेन्दवे अभि देवाँ इयक्षते ६२

घनिनौ। हन्तेर्घः। ता तौ आह्वयामः। इन्द्राग्नी नः अस्मान् ईदृशे भयानके संग्रामे कर्मणि वा मृडातः। मृडयतः सुख
यतः। उपास्मै। देवलदृष्टा सौम्यदेवत्या गायत्री। हे नरः यज्ञनेतारः ऋत्विजः। अस्मै इन्दवे सोमाय उपगायत। उ
द्गातृशब्दमनुष्यस्तोपशंसयत। स्तोत्रं कुरुतेत्यर्थः। कीदृशाय इन्दवे। पवमानाय। पवगतौ। पवते दशापवि
त्रान् द्रोणकलशं गच्छति पवमानः तस्मै। देवान् अभि अस्मानभिमुखं इयक्षते। यष्टुमिच्छते। यजेः सनि छान्दसो
अभ्यासयकारलोपः २६

येन्वा। विश्वामित्र दृष्टाद्या द्वे त्रिष्टुभौ। इंद्र देवत्या स्त्रिस्तः। हे मघवन् मघवन् ये मरुतो गणा देवा अहिहत्ये वृत्रहनने वृ-
१२५ त्रकर्मणि त्वामवर्द्धन्। ज्ञाह्वीर्य ये शंबरस्य दिवोदासेन सह युद्धमकुर्वन्। हे हरिवः। हरिनामकाश्वयुक्त। शांबरे २
129 शंबरसंबंधिनि युद्धे ये त्वामवर्द्धन् ये च मरुतो गविष्टौ गवां पणिभिरपहृतानामिष्टौ अन्वेषणे अवस्थाय त्वामव-
र्द्धन्। ये च विप्रा मेधाविनो मरुतो नूनं निश्चितं त्वामनुमदंति। उत्कर्षयंति। न पिबंति वा अनुमदंति वा। हे इंद्र
तैर्मरुद्भिः सगणः गणसहितः सन् सोमं पिब। मरुत्वतीयादि ग्रहं पिबेत्यर्थः। अहिहत्ये। हंतेर्भावे हननम्

ये त्वाहिहत्ये मघवन्नवर्द्धन्ये शांबरे हरिवो ये गविष्टौ ये त्वा नूनमनुमदंति विप्राः पिबेंद्र सोमं म०२
सगणो मरुद्भिः॥ ४२ जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः अवर्द्धन्निंद्रं मरुत
वेति कपालं तुन्नपदसमासः। अवर्द्धन्। के सार्वधातुकत्वे॥ श्चिदत्र माता यद्वीरं दधनद्धनिष्ठा॥ ६४
पिबेदस्मिन् पद्यति शाईधातवे गोलोपः। यद्वृत्तयोगान्निघाताभावः। गवामिष्टिर्यस्मिन्नौ ग। इतिवहुव्रीहौ पू-
र्वपदप्रकृतिस्वरः। अनुमदंति। के लसार्वधातुकानुदात्तत्वे धातुस्वरः। तिङ्ङ्चोदात्तवतीति गते-
र्निघातः। जनिष्ठा उग्रः। गौरीवीति दृष्टा। हे इंद्र त्वं सहसे बलाय निष्ठाः। अजनिष्ठाः। अजनिष्ठाः। जनेर्लुङि। लुङ्-
। अडभावः। कीदृशाय सहसे तुराय। त्वरमाणाय वेगवते। कीदृशः त्वं। उग्रः। उद्गूर्णः। मंद्रः स्तुत्यः। ओजिष्ठः।
अतिशयेन ओजस्वी ओजिष्ठः। विन्मतोर्लुगिति विनो लुक्। बहुलाभिमानः। सर्वं जगन्मोहं मत्तुमिति वितिमपिमाभिमा-
ना। अत्र वृत्रवधे दृशमिंद्रं मरुतश्चित्। मरुतोपि अवर्द्धन्। स्तुतिसहायाभ्यामिति शेषः। इदं चेंद्रं सोमार्थं १२५

आतू। वामदेवदृष्टा। गायत्री। उ३ इति निपातः क्षिप्रवचनः। ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति तस्य संहितायां
दीर्घः। हे वृत्राणामावरकाणां पाप्मनां हन्तः हे वृत्रहन्। हे वृत्रहन देव इन्द्र त्वं नोऽस्मान् क्षिप्रमागच्छेत्यर्थः। आगत्य
चास्माकमर्द्धं अस्मन्निवासदेशमागहि। देवयजनदेशं प्राप्नुहीत्यर्थः। कीदृशस्त्वं महीभिः महतीभिरूतिभिरव
नैः रक्षाभिर्महान्। येनं रक्षति स महान् उच्यते। तमिन्द्रं अन्नमेथ दृष्टेऽर्द्धे पेयोपध्याहृहतीमसतोदृष्टैः महस्त्वात्

आतूनऽइन्द्रवृत्रहन्नस्माकमर्द्धमागहि महान्महीभिरूतिभिः ९५ त्वमिन्द्रप्रतूर्तिष्वभि।
विश्वाऽअसिस्पृधः अशस्तिहाजनिताविश्वतूरसित्वन्तूर्य्यतरुष्यतः ९६

त्रिरिन्द्र। सायेषां पूर्ववत्। प्रतूर्तयः शत्रवः संग्रामा वा। तेषु प्रतूर्तिषु हे इन्द्र त्वं विश्वाः सर्वाः स्पृधः स्पर्द्धमानाः शत्रुसे।
नाः अभि असि अभिभवसि। किं च यतः त्वं विश्वतूः असि। विश्वान् सर्वान् तिरति हिनस्ति तूर्यते हिनस्तीति विश्वतूः। ततः त
रुष्यतः हिंसतः शत्रून् तूर्य जहि। मारय। कीदृशः त्वम्। अशस्तिहा। नास्ति शंसा प्रशस्तिर्येषां ते अशस्तयः
दुष्टास्तान् हन्तीत्यशस्तिहा। जनिता। जयिता। स्वपक्षप्रशंसोत्पादकः ९६

अनु नो हे इंद्र। क्षोणी द्यावापृथिव्यौ ते तव शुष्मं बलम् अन्वीयतुः। अनुगच्छतः। द्यावापृथिवी स्त्रीलोकाः त्वद्बलं वधूमयं मन्यंते इति भा
१३० वः। कीदृशं शुष्मं तुरयंतं। शत्रून् त्वरमाणान् कुर्वंतं। अनुगमने दृष्टांतः। मातरा मातापितरौ शिशुं न शिशुमिव। यथा पितरौ बा
लमनुगच्छतः। यस्य बलाद् द्यावापृथिव्यावप्यबिभीतामिति यास्कः। नन्वेवं प्रपंचयति। किंच हे इंद्र। विश्वाः सर्वाः स्पृधः स्पर्द्धमा
नाः शत्रुसेनाः ते तव मन्यवे। पंचम्यर्थे चतुर्थी। तव क्रोधात् श्नथयंत। अश्नथयंत। श्नथिताः शिथिला भवंति। तव क्रोधादर्शना
दुद्विजंत इत्यर्थः। युक्तमेतत्। यद्यस्मात् हे इंद्र त्वं वृत्रं देवावरकं पाप्मानं तूर्वसि हंसि। तूर्वतिर्हिंसार्थः। यज्ञो देवानां। कुत्सदृष्टा
त्रिष्टुप्। आ नो व्याख्याता। अदब्धेति। भरद्वाजदृष्टा जगती सवितृदेवत्या। हे सवितः सर्वस्य प्रसवितः। पायुभिः पालनैः। नोऽस्मा

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा। विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि
६७ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवो
वित्तरासत् ६८ अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् हिरण्यजिह्वः सुविताय

के गयं गृहं धनं वा। अपत्यं परिपाहि। रक्ष। भायात् तु ऽर इति गृहनामसु गी ((नव्यसे रक्षा माकिर्नो अघशंस ईशत ६९
तं गय इति धननामस्वपि पठितं गृहधनयोर्गयशब्दः। कीदृशैः पायुभिः। अदब्धेभिः अदब्धैरनुपहिंसितैः। शिवेभिः शि
वैः। शांतैः। सुविताय। कीदृशस्त्वं। हिरण्यजिह्वः। हिरण्यवद्विचला जिह्वा यस्य। सत्यवाक्। यद्वा। हिरण्याद्धितरमणीया
जिह्वा ज्वाला यस्येति वा। हिरण्यं कस्मादिति हितरमणीयं भवतीति वै निरुक्तकाः। किंच। नव्यसे नवीयसे नवीयसे न
वतराय सुविताय सुष्ठु इतायत्वा यागानां तदः पालय। माकिः। माकश्च नोऽघशंसः पापशंसमानः शत्रुः नोऽस्माकमीशत।
ऐश्वर्यं कुर्यात् वयमस्मादानापोऽस्माकमीशिता माभूदित्यर्थः। ईशत। लङ्। बहुलं छंदसीति शपो लुगभावः। आडभावश्च १३०

प्रवीरया। वसिष्ठ ऋषिः। त्रिष्टुप्। वायुर्देवत्या पंचदश ऋचः। हे प्रतीकोके। एवं सप्तदशकः पुरो रुचां सप्तरूहः त्वामिति
द्विवचनं पत्नीयजमानविषयं। हे पत्नीयजमानौ वां युवयोः सम्भृताः सोमाः दद्रिवे विदीर्णाः। चूर्णीभूता। हविदीवे
। कर्मकर्तारौ लिट्। कीदृशाः। प्रवीरया। प्रकृष्टवीरजातेन। रुद्रटा ऋत्विजा येषां सोमानां ते प्रवीराः। स्तुपास्तलुप्तिनिज
सो याज्या देशः। शुचयः। निर्मलाः। अध्वर्युभिः सुतासः सुताः। अभिषुता। अभिषवयर्मणा ग्रावभिः। द्रवीभाव

प्रवीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः। वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्ध
सो मदाय २० गावः उपावतावतं मही यज्ञस्य रप्सुदा उभा कर्णा हिरण्यया २१

मायादिना। अभिषुतं वेति चत्वारः पर्युपवेशनसामर्थ्यादिति कात्यायनस्मरणाद् अध्वर्युभिरिति बहुवचनं॥
अध्वर्यवेनेहृभिः ऋत्विग्विशेषैः सुताः इत्यर्थः। मधुमन्तः। मधुनि ग्राम्या रूपमुदकं। तदेतनः एवं पूर्वार्द्धे पत्नीयजमा
नौ संबोध्य वायुमाह। यात्रि सर्वत्र गच्छतीति वायुः। देवयानि युतोश्वान् त्वं वह। देवयज्ञं नदेशं प्रापय। अच्छ यादि। आ
भिमुख्ये। आप्नुमिति वा। सोमाभिमुखं सोमसमीपं वा याहीत्यर्थः। यात्वा च मदायान्न मयमनन्ना यैवा सुतस्याभिषु
तस्यान्धसः सोमस्य स्वयमंशं पिब। गावउपा। व्याख्याता ३०

काव्ययोः। इहेन्द्रवरुणा गायत्री मित्रावरुणौ। कवीनां क्रान्तदर्शिनां ज्ञानसमुच्चयकारिणां हितौ काव्यौ तयोः। रिशो
।३। तिहिंसन्ति रिपवः। तान् आ समन्तात् नष्टस्पृतो नाशयतः तौ रिशादसौ। द्विवचनं मित्रावरुणविषये। हे रिशादसौ
23। प्रत्नूपद्ध्यितारौ मित्रावरुणौ यजमानस्य समर्थस्य देवमनुष्याणां सहस्रा मयानस्थाने एवं आ आगच्छतं। की
दृशस्य यजमानस्य काव्ययोः कविहितयोः युवयोः आ जाने शुआ समन्तात् जनमसहस्रा मयपनार्थमाविर्भूतम्।

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे रिशादसा सधस्थ आ ॥२॥ दैव्यावध्व
र्यू आ गतं रथेन सूर्यत्वचा मध्वा यज्ञं समञ्जाथे तं प्रत्नथायं वेनः ॥३॥

मित्र देवयजनादि शुद्धे दुरोणे यज्ञगृहे च क्रत्वा क्रतुना यज्ञकर्मणा क्रत्वा दक्षस्य उत्साहवतः। यज्ञं समर्द्धयत
इत्यर्थः। दक्षस्येति विशेषणं यजमानपदमध्याहर्तव्यं आ इत्युपसर्गाणां गच्छतमिति क्रियाध्याहारः। दैव्याव ।३।
ध्वर्यू व्याख्यातौ। तं प्रत्नथा। अयं वेन इति द्वे प्रतीके ॥३॥

तिरश्चीनः। प्रजापतिरिष्टात्रिवृत्प्रभावभूतदेवत्या। भावेषु पदार्थेषु तत्र स्थितो भावभूतः परमात्मा सोमो या देवता। आग्रयणाग्र
हणाविनियोगः क्रमपाठाल्लभ्यते। ते तोऽपि यज्ञतावद्व्यास्यायते। आधवनीयात्तु द्रेता निग्राभ्याम्या सिंचलितः पवित्रे
यजमानस्तोत्रग्रहग्रहणमायुर्वादिनिकान्यायतेनोक्तं। तदभिप्रायेणोच्यते। एवं पवमानसोमानां रश्मिः समन्तात्त
जोषादिकल्कनियामकोदशापवित्रलक्षणस्तिरश्चीनः तिर्यक् ततो विततो विस्तारितः। उद्गातृभिरिति शेषः। तस्मि
न्दशापवित्रे सोमः प्रवितः सन्दशापवित्राद्धस्च आसीत्। किन्नशब्दो वार्थे। उपरि स्विदासीदितीकारः प्लुतः। कि

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्। रेतोधाः
आसन्महिमान आसन्स्वधा अवस्तात्प्रयतिः परस्तात् १ ५

वा न चैके पदार्थाः अधश्च माधवनीयद्रोणकलशादयो रेतोधा आसन्। रेतो जगदुत्पत्तिबीजं सोमं दधति धारयन्तीति
रेतोधाः सोमाधारभूता आसन्। यस्माद्धि प्रजाः प्रजायन्त इति श्रुतेर्जगद्बीजं सोमरसरूपां तच्चाधेयाः। ते तो महिमानो
महान्त उत्कृष्टा आसन्। आसन्। आधाराधेयभावेन सर्वो यज्ञस्तत्रैव स्थित इति भावः। स्वधा परिणामवस्तुहविरिति स्मर।
तेः। किं च स्वधान्नरूपः सोमः अवस्तात्। अवरोहमाणमाकुलीच आसीत्। प्रयतिः। प्रयतेन प्रयतिः। प्रयतत्वात्तु रो
मानन्तरमारव्ययफलकः सन परस्तात् परत उत्कृष्ट आसीत् ३२

अथापि दैवतं व्याख्या। एषां प्रसिद्धानां सूर्यरश्मीनां मध्ये एकः सुषुम्णाख्यो रश्मिः तिरश्चीनो विततो विस्तृतः सन् किं
द्युलोकादधः स्विदासीत्। उतोपरि स्विदासीत्। अन्यथैनैकवचनं न तथा च श्रुतिः। सूर्यस्य ह वा एको रश्मिर्दैः स्वि
१३२ ता नाम येनेमाः सर्वाः प्रजा बिभर्तीति। अस्य रश्मेर्ये महिमानो माहात्म्याद्यापकास्य सन् विश्वप्रकाशनेन। किं
132 चाप्यान्तरिक्ष्यात्कः स एव रश्मिः स्ववशात्स्वरोमभ्यमिसुवेः। प्रयतिः प्रयतात्मोर्ध्वं सुवेः सम्परस्तात् ॥ उ
क्रोष्टदर्शनमात्रेणादेवानां तृप्तिदः। तेषां कं छादीगपश्चुतो अस्तोवाक्यादित्यादिस्वमख्यितसुपक्रमणं न चैव देवाश्च
श्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्तीति अथाध्यात्मपदे व्याख्या नासदासीदिति समस्तैर्ध्यात्मप्रतिपाद
के सूक्ते बहूनां चार्थानां संचयकं तत्र नासदासीदिति निरस्तसमस्तप्रपञ्चप्रलयावस्थामनूद्य विश्वबीजमविद्या
का। कामस्तदग्रे समवर्ततेति पादेन च काम उक्तः सतत्स्मेरितः प्रथमं यदासीदिति पादेन प्राणात्मकं कर्मोक्तं।
एवमविद्याकामकर्माणि सृष्टिहेतुभूतानि तेषां स्वकार्यजनने शैघ्र्यमाह। तिरश्चीन इति। एषामविद्याकाम
कर्मणां रश्मिरिव रश्मिः कार्यवर्गो विषयादिर्विततो विस्तृतः सन् तिरश्चीनः तिर्यगवस्थितो मध्ये स्थितः अध
स्वासीत्। उपरि वासीत्। सूर्यरश्मिवद्युगपत्सर्वं व्याप्नोतीत्यर्थः। तदेव विभजते। रेतोधा इति। सृष्टे कार्यवर्गे केचन रे
तोधाः रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवा आसन्। अन्ये महिमानो महान्तो वियदादि वि
कारा भोग्या आसन्। महिमान इति स्वार्थे इमनिच्। एवं मायावी ईश्वरः सर्वं जगत्सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृ
भोग्यरूपेण विभागं कृतवानित्यर्थः तयोर्भोक्तृभोग्ययोर्मध्ये स्वधा अन्नं भोग्यप्रपञ्चो ऽवस्तादवरो निकृष्ट आसी
त्। प्रयतिः प्रयतिता भोक्ता परस्तात्पर उत्कृष्टः भोक्तृप्रपञ्चार्थीनो भोग्यप्रपञ्चः कृतवान् इत्यर्थः विभागः परावराभ्यां

तमेवं वैश्वानरात्मभोक्तारं परमात्मानं स्तौति। आरोदसी इति विश्वामित्रदृष्टा जगती वैश्वानरदेवता यत्पदजातं अपृणीत उत्प
न्नमात्रेण वैश्वानरो अपसोऽपचितः कर्मवेतायजमानाऽधारयत्। कर्मणि स्थापितवन्तः तदा स रोदसी अभ्रं तं स्वः प्रन(
विदितं आपृणात् सूर्यात्मना त्रिलोकं जाठरात्मना पूरितमित्यर्थः। गार्हपत्यादीनां लोकत्वं श्रुत्युक्तं। अयं वै लोको गार्हप(
त्यो द्यौराहवनीय इति। उक्तार्थमेव विकरोति सरति स्माग्निरध्वराय यागाय परिणीयते। सर्वतो निप्राणीतो ग्रीष्मीयादि

आरोदसी अपृणादा स्वर्महज्जातं यदेनमपसोऽअधारयत् सोऽ
अध्वराय परिणीयते कविरत्यो न वाजसातये चनोहितः १५

यिस्थ्यादिषु प्रकर्षेण प्रापयन्ते। नयने हृष्टान्तः। अत्यो न। अश्व इव यथाश्वो वाजसातये अन्नलाभाय सर्वतो नीयते। राजाश्व
वान् भोगजातं लभ्यते यथा। तद्वद् द्विप्रो अग्निः एवमानो ब्रह्मलोकान् भोगान् इति भावः। कीदृशोऽग्निः कविः सर्वज्ञः चनोहि
तः। चन इत्यन्ननामसु निपाठः। चनसे अन्नाय भोगाय हितः। सर्वभोगसंपादक इत्यर्थः ३३

उक्थेभिः । वसिष्ठदृष्टेन्द्राग्निदेवत्या गायत्रीभ्यां । या । इन्द्राग्नी आसृथैः गाथायैः वित् लौकिकवाक्यैरपि स्तुतौ ।
आ । आगतं । नः । ॐ ग्रहणे लामस्माकं चाघोषयन्ति या स्तुतः । ता । उक्थेभिः । उक्थैः शस्त्रैः गिरा स्तोत्रात्मिकया स्तुत्या आविवास
१३३ तः । आविवासतेः परिचरणे यजमानैर्विनिशेषः । अन्ययेन कर्तरि लिट् । विवासन्तिः परिचार्याया मितियास्कः । की

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा आङ्गूषैराविवासतः १९
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये सुमृडीका भवन्तु नः २०

दृशौ तौ । वृत्रहन्तमा । वृत्राणामावरकाणां पापानां हन्तृतमौ । नाद्वेसनितुम । मंदानौ । मोदमानौ स्वभावतः । सर्व
त्र विभक्तेर्डादेशः । उप नः । स्तवेहोत्र दृष्टा वैश्वदेवी गायत्री । ये अमृतस्यामरणाद्धीनस्य प्रजापतेः सूनवः पुत्राः विश्वे
देवास्ते नोऽस्माकं गिरः स्तुतीः उपशृण्वन्तु समीपगन्ता वधारयन्तु । श्रुत्वा च नोऽस्माकं सुमृडीकाः सुखकरा भवन्तु । १३३
शोभनं मृडीकं सुखं येभ्यस्ते ३०

ब्रह्माणि मे। निस्त्रिस्त्रिष्टुभः। हिं इन्द्रमरुत्संवादे। इंद्रमरुद्देवत्या। आद्ये गमस्तृचे। इंद्रो मरुतः सहचरानाह। हे मरुतः ब्रह्मा।
णि मंत्रवाक्यात्मकानि स्तुतिवचांसि हवींषि वा सोमाज्यादीनि मम सवभूतानि। चोदनावाक्येऽग्न्यादिदेवतान्तरसंबं
धेन प्रनीयमानान्यपि सर्वदेवतानां प्राणात्मने मम मे इंद्रस्यैव भवन्तीनि भावः। मतयो मननयुक्ताः स्तुतयोऽपि शं मम सुखा।
त्मिकाः। अनेन यज्ञेन गन्तव्यमिति भावः। किं च। मे मया प्रभृतः प्रकर्षेण आहृतः अद्रिः वज्रः इयर्ति गच्छत्येव तस्य प्रति।
न प्रतिहन्यते इत्यर्थः। कीदृशः। शुष्मः। शोषयति शत्रूनिति शुष्मः। अत एव गमनेऽरातेः समायुपद्रवो नास्तीत्यर्थः।
न केवलं हविरादीनां मदीयत्वेन गन्तव्यम्। अपि तु। आशासते प्रार्थयन्ते यजमाना मां। उक्था। उक्थानि शस्त्राणि तानि मा च

ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अ
द्रिः आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ १८

शस्त्राणि मां प्रति हर्यन्ति। कामयन्ते। हर्यतिः प्रेप्साकर्मेति यास्कः। किं च नोऽस्माकं इमा इमौ हरी अश्वौ। अच्छ यज्ञा।
भिमुखं वहतः। तः मां प्रापयतः। अत एवास्माभिर्गन्तव्यमिति भावः। यद्वार्थान्तरं। ब्रह्माणि मननयः स्तुताः सोमा मां प्रहृतः।
अद्रिः सोमाभिषवग्रावा शुष्मः स्वस्वरूपः। एतत्सर्वं मम संस्कारायेयर्ति अर्पयति। उक्थमयानि गीर्णजं तत् मर्मूत्नः समानम
न्यत्। शुष्मः। अवि सि विशुषिभ्यः किदिति मक्प्रत्ययः। कित्वाद्गुणाभावः। नित्वादाद्युदात्तः। अतिमहयति विशृणति
त्यद्रिः। अदिशदिभूशुभिभ्यः क्रिनिति क्रिन्प्रत्ययः। आद्युदात्तः। २५

अनुत्तमा ते । एवमिन्द्रेणोक्ता मरुतः प्रत्याहुः । नुद प्रेरणे । अस्मान्निष्ठायां नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्द
सीति अनुत्तमिति निपात्यते । आ इति स्मरणे । एतत् तवं तेनावयहे मघवन् । यत्त्वन्निदूनेन वा अनुत्तं । न केनापि त
१३४ 134 तेनाश्रितं महाभाग्यमिति शेषः । नु निश्चये । न किः न कोपि त्वन्महाभाग्यनाशक इति शेषः । न केवलं त्वत्स्वसदृश
यमात्रं किंतु सर्वज्ञमपीत्याह । न त्वावान् । त्वत्सदृशः । त्वावान् त्वत्सदृशो विदानो विद्वान्देवता देवो ना

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः न जाय
मानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ९

त्ता । स्वार्थे तल् । विदेः शानन् नित्वादाद्युदात्तः । किंच । हे प्रवृद्ध प्रकर्षेण वृद्ध परिपूर्ण महिमा यानि कर्माणि हे इन्द्र त्वया ।
दीनि त्वं कृणुहि करोषि । व्यत्ययेन लोट् तानि कर्माणि जायमानो वर्तमानः । जातो भूतः एवंभूत देव मनुष्यपुक
श्चिन्न नशते । न व्याप्नोति । न करोतीत्यर्थः । नशतिर्व्याप्तिकर्मा न करिष्यति । न च करिष्यति । उत्पत्स्यमान इति शेषः ॐ
तिलोपो दीर्घश्छान्दसः । कालत्रयेपि त्वत्सदृशो नास्तीत्यर्थः । अनेनायत्तेषु स्त्व ९

तदिन।हृद्हदिवहृष्टामादर्शीकिंभुवनेषुभूतजातेषुननद्रत।तदेवज्येष्ठंश्रेष्ठमास।वभूव।छंदसमयथेतिलिटः।सार्व
धातुकादेसभूतावान।सर्वोत्कृष्टंब्रह्मवासीत् यतोज्येष्ठान्उग्रउत्कृष्टइंद्रोजज्ञे।जातः।कीदृशः।त्वेषनृम्णः।त्वेष।
कांतिः नृम्णंधनंयस्यासौतेजोधनः।कार्यदृष्टाकरणमदृष्टंकल्पने।किंचायइंद्रोजज्ञानोजायमानएवसद्यस्तदानीमेवश
त्रून्निरिणातिनिःशेषंहंति।रीवधे।क्र्यादिः।क्र्यादिभ्यश्नाः।किंचविश्वेसर्वेदेवाः यमिंद्रमनुमदंति।अनुहृष्यंति।अनु
लक्षणेइतिद्वितीया।यद्वानानिरूपमितिमदंतोऽस्यत्रनियोजनेन।कीदृशाविश्वे।ऊमाः।अवंतिरक्षंतीतिऊमाः।रक्षकाः

तदिदासभुवनेषुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णः सद्योजज्ञानोनिरिणातिशत्रून
नुयंविश्वेमदन्त्यूमाः ८० इमाउत्वापुरूवसोगिरोवर्द्धन्तुयामम पावकवर्णाः
शुचयोविपश्चितोभिस्तोमैरनूषत ८१

।अवतेर्मन्प्रत्ययः।छंदस्युडिमौट्। इमाउत्वामेधातिथिदृष्टमार्द्येस्यदेवतेद्वेवृहत्सौ।पुरूवसुरूवसुधनंयस्यसपुरू
वसुः।संहितायांछांदसोदीर्घः।पुरुशब्दस्यादेपुरूवसो।वहुधनानाहितत्वायाममगिरः शस्त्ररूपावाचःइमाःत्वा
मावर्द्धंतु।वर्द्धयंतु।विपश्चितोविद्वांसः तवस्वरूपानिज्ञाउद्गातारःस्तोमैःस्तोत्रैर्बहिःपवमानादिभिःत्वामच
नूषत।अस्तुवन्।नूस्तुतौ।लङः।कुटादित्वाद्गुणाभावः।कीदृशाविपश्चितः।पावकवर्णाः।अग्नितुल्यतेजसः
ब्रह्मवर्चसवंतोऽतएवशुचयः।शुद्धागाणाःस्तोत्रशस्त्ररूपागिरस्त्वांस्तुवंतीत्यर्थः २१

यस्यायं। हे आदित्य यस्य तवायं विश्वः सर्वोपि आर्यो वर्णाश्रमविहितकर्मानुष्ठाता सन् दासः। दासवत्सर्वदा स्तवणीयः
। शेवधिपाः निधिरक्षकः कृपणो यस्य तवारिः शत्रुः। निधिः शेवधिरिति यास्कः। किंचैवंविधे कृपणे अर्ये यत्न स्वामि
१३५ निवेशेपवानि रश्चित्। तिरः तर्हि। विदर्थे। अन्तर्हितेऽस्मिन् गर्ते दानिहितोऽपि तस्य रयिर्धनानि वयः उभयत्र। सलोप
श्छान्दसः तुभ्यमेव तदर्थमेवाज्यते व्यक्तो भवति। कर्मकर्तरि यक्। कृपणास्थायनं तदर्थमेवोपयुज्यते यत्तद्धरणादि
ना नक्तु कृपणाभोगाय भवतीत्यर्थः। कीदृशेऽर्ये। रुशमे। रुशतिर्हिंसाकर्मा। कृणादिको मप्रत्ययः। रुशति हिन
स्तीति रुशमः। तस्मिन्। यतो यद्धरणात् हिंसके। अतिष्यादितिरस्कारेणाम्नापि हिंसके। पवीरवि। पविः शल्यम

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः। तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः॥
८२ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे। सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु
॥विप्रराज्ये ८३

स्मान्निति पवीरमायुधं। वोप मत्वर्थीयः। पवीरं वा निगच्छतीति पवीरवाः तस्मिन् यत्न वत्तदर्थमायु
यथा के। तथा यास्कः। पविः शल्यो भवति यद्विपुनाति कायं तद्वत्पवीरमायुधं तद्वानिन्द्रः पवीरवानिति। यतिनातिपते
नर्णम मपि यन्नेतन आक्षिप्य तेऽपि स्मिन्नायं ददासीति भावः। अयं सहस्रमेयातिथिदृष्टादित्यदेवत्या सतो बृहती।
अयमादित्यरूप इन्द्रः समुद्र इव उदधिवत्प्रपथे। प्रथितो विस्तीर्णव्यापको भूत्। कीदृशोऽयं। ऋषिभिर्मेदीयाद्य
दृषिभिः सहस्कृतः। सहसा बलेन युक्तः कृतः स्तुत्या हि देवता बलेन वर्द्धते। किंच। अस्यादित्यस्य महिमा सत्योऽ
वितथ्यः। शवो बलं च सत्यं। यज्ञेषु विप्रराज्ये। विप्राणां राज्ये स्तोत्रप्रशस्त्रसंघे गृणे स्तोताहं तं महिमानं स्तुति

अदब्धेति। व्याख्याता। षष्ठः प्रगोहगणः समाप्तः इतोध्यायसमाप्तं तत्र त्रयोदश ऋचः प्रतीकोक्तास्वनस्येति ऐंद्रवायवादि
सावित्रान्तानां ग्रहाणां ग्रहणे मंत्राः सर्वे वन्ता आनः। जमदग्निर्दृष्टा वायुदेवत्या। बृहत्या। आद्या नवहांदशी च दशमेकादशी त्र
योदश्यः सतोबृहत्याः। हे वायो नोऽस्माकं यज्ञं आयाहि। आगच्छ। कीदृशं यज्ञं। दिविस्पृशं। द्युलोकव्यापिकं। अतिशयेन मा
नवेदुष्याहुतीनां संपन्नत्वात् स्वर्गोपि स्पृशमानामित्यर्थः। आगतस्य किं फलमित आह। अंतरिति। अंतः। पात्रमध्यस्थ
पवित्रे दशापवित्रस्योपरि श्रीणानः। श्रयमाणो हे त्वं चमसेन निषिच्यमानोऽयं शुक्रः शुद्धः ऋजीषकल्करहितः सो(

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम् हिरण्यजिह्वः सुविताय नव्यसे र
क्षा माकिर्नो अघशंस ईशत ८४ आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः अन्तः
पवित्र उपरि श्रीणानोऽयं शुक्रो अयामि ते ८५ इन्द्रवायू सुसन्दृशा सुहवेह हवामहे
यथा नः सर्व इज्जनोऽनमीवः सङ्गमे सुमना असत् ८६

मो। अस्मान्मातेनुभ्यं तदर्थं। अयामि। नियतः त्वदीयभागत्वेन मया संस्थितः। यस्मात् परमे कर्मणि विणः। इंद्रवायू तावप सह
ऐंद्रवायवी। इह यज्ञे वयं इंद्रवायू हवामहे। आह्वयामः। उभयत्र वायोः प्रतिषेधः इत्याहनु दुःभावः। कीदृशौ। सुसंदृशा।
सुसंदृशौ। सुतरां पापम्यक् पश्यन्तौ। सुहवौ शोभनाह्वानौ। तथा हवामहे यथा नोऽस्माकं सर्व इज्जनः सर्वः पुत्रपौत्रा
दिः कीदृशः। असन्। भवेत्। अमीवा रोगः। कीदृशः। अनमीवः। व्याधिरहितः। संगमे धनप्राप्तौ बन्धूनां समागमे
वा सुमनाः। शोभनचित्तः। उदारो वक्ता चेत्यर्थः ३६

ऋष्यगिरः । जमदग्निर्हृणीमे त्रावरुणौ । नूनं निश्चितं यो मनुष्यो मित्रावरुणोस्मावके । आकृणुते । गंयनावदेयोगान्यादिना
१३६ करोति । सेवनार्थं आत्मने पदं । किमर्थं । अभिष्टये । अभिष्टये । अभिमतलाभाय । एषोदोदिवादिलोपः । हव्यदात्यै । द
विधादानाय च सः । इच्छा । अनेन द्वेतनाः सेवनरूपेणाशामे । शाम्यति । यमनियमशमदमादियुक्तो भवती त्यर्थः । की
दृक्सः । देवतानयो देवस्य कर्म देवतानिः तस्मै । यत्नाय यत्नयकृ । समृद्धिमान् । यज्ञं सपति द्वसपनादः सनूशतो भवती
त्यर्थः वदृश्वत सत्राः । इच्छेति निर्यंहको विदेति नियातः । सत्यवचनो वासंयमाशाम्यति एवाभ्यां सत्यो भावस्यार्थः श

ऋष्यगिस्या सम्प्यः शशमेदेवतातये यो नूनं मित्रावरुणावभिष्टय आवके हव्यदातये ९७ आ
यातमुपभूषतं मध्वः पिबतमश्विना दुग्धं पयो वृषणा जेन्यावसू मानो मर्धिष्टमागतम् ९८

शमेत्र आयातं । वसिष्ठहृष्णास्विदेवत्या । हे अश्विना । अश्विनौ युवां आयातं यज्ञं प्रत्यागच्छतं । आगत्य च उपभूषतं अलं
कुरुतं यज्ञं । मध्वः । मधुरं सोमं पिबतं । कर्मणि षष्ठी । नुमभावश्छान्दसः । किंच । हे वृषणा हे वर्षणौ वर्षकौ । यज्ञफलस्य से
कारौ । हे जेन्यावसू । जेन्यं जेतव्यं जितं च आसमंतात् वसु धनं याभ्यां ते जेन्यावसू वशीकृत धनौ । नाहयेयुवां पयो दुग्धं १३६
दुग्धं दुग्धं । अन्तरिक्षात्मना यन्तेऽदेलौ सम थ्येमेकवचनं उग्यमिति । किंच नो अस्मान्मा मर्धिष्टं । मा हिंस्तं । मृधिर्हिंसा
र्थः । लुङ् । किं वहुनायुवां आगतं । आगतं दार्ढ्य पुनर्वचनं ५

136

प्रैतु । कां वा बृहस्पतेर्देवी । ब्रह्मणो वेदस्य पतिर्हिरण्यगर्भः नोऽस्माकं यज्ञं प्रकृयज्ञो निमुख्यं प्रैतु प्रकर्षेण गच्छतु ब्रह्मणस्पति
ब्राह्मणः पाता पालयिता वेति यास्कः तथा देवी देवता स्मा सूनृता प्रियसत्यरूपा नमैव वाक् त्रयीरूपा यज्ञं प्रैतु । किं च देवाय
ष्ठमा नोऽस्माकं यज्ञं नयंतु प्रापयंतु । आपयंतु । यज्ञं कारयंत्वित्यर्थः । कीदृशं यज्ञं । वीरं । विशेषेण रयति वीरयते शत्रूणां वि
शेषेण कम्पयितारं । वीरो वीरयत्यमित्रानिति यास्कः । नर्यं । नरेभ्यो मनुष्येभ्यो हितं । उग्रवादिभ्य इति यत् । पंक्तिराध

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयन्तु नः १९

नेन्द्रस्य पुरोडाशः । हर्योर्धानाः । सरस्वत्याः करंभः । सरस्वत्यै पेटयिमित्रावरुणयोः पयस्या । एषा हविः पंक्तिः । द्विनाराशंसं प्रा
तः सवनं । द्विनाराशंसं माध्यंदिनं सवनं सकृन्नाराशंसं तृतीयसवनं । एषा नाराशंसपंक्तिः । त्रीणि सवनानि । पशुरुप
वसथ्याः पशुरनुबंध्यः । एषा सवनपंक्तिः । एताभिः पंक्तिभिराधः समृद्धिर्यस्य । पंक्तयो राध्यंते यत्रेति वा पंक्तिराधाः
। ते ब्रह्मणस्पत्यादय उद्दिष्टा यज्ञमस्माभिः कारयंत्विति सर्वार्थः ५

चंद्रमाः। त्रितदृष्टा हुतिपरिणामवादी सैंद्री। आहुतेर्द्रोमसंज्ञस्य परिणामो हि पर्जन्य एव पृथिवी पुरुषयोषात्मकपंचाग्निः
क्रमेण परिपाकः। अनितु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति श्रुत्यर्थः। तं वदत्येष छांदस्कः। अपि यतं तात्व
१३७ दृर्थः चंद्रं देवानामाह्लादं निर्मीते करोतीति चंद्रमा लुप्ताह्लादवः सोमोऽभिषुतः सन् तस्तु वनीवशीतिग्राम्यादिजलेषु
सृतं स्थितेः समरूपेण। स्थितः अग्नौ हुतः सन् तस्तु वर्णागाहडाहुतिः सायुपतनो भूत्वा दिवि अन्तरा धावते। शीघ्रं ग
च्छति। सुगतानां विन्यस्यशीघ्रगतो धावादेशः। तृतीयस्मात् स्थितो दिवि सोमस्त्रासीदिति श्रुतेः हरिः सोमो हरित

चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि रयिं पिशङ्गं बहुलं पुरुस्पृहं हरिरेति कनिक्रदत्
१०

वा। अनियामको ऽकेहरीः पूर्वोक्तः सोम एव दिवं गतः पर्जन्यरूपमाप्य अपो दकदानद्वारेण रयिं पिपर्ति। रयिरन्नियन्ता।
मेति यास्कः। यात्र भावं प्राप्नोति। व्रीहियवाद्यन्नरूपो भवतीत्यर्थः। कीदृशं रयिं। पिशंगं परिपाकेन व्रीहियवादि
के यात्पीतवर्णो भवति। बहुलं प्रभूतम्। चतुर्विधभूतग्रामजीवनपर्याप्तमित्यर्थः। पुरुस्पृहं पुरुषाणां ब। १३७
हूनामपि स्पृहालिसापतितं। बहवोऽपि यद्वांछंतीति नद्रूपो भवतीत्यर्थः। कीदृशो हरिः कनिक्रदत्। पर्जन्य
रूपात्संवृत्स्तनितं कुर्वन्। दाघर्त्तिदर्धर्तीत्यादिना निपातनः ५२

देवंदेवं। मन्त्रदृष्टा वैश्वदेवी। वीश्वार्षेण्याभ्यामः। यावेतौ देवालात्तो युष्मान् वयं स्वनाय पालनाय वयं हुवेम। आह्वयामः। अभि
ष्टये ऽभिलषितमलाभे देवंदेवं हुवेम। वाजसातये ऽन्नलाभाय देवंदेवं हुवेम। अभ्यासे भूयांसमर्थं मन्यते इति यास्कः
। कीदृशा वयं दिव्या देवनाया याभ्यां नृमं यान वरया पिबुष्मा रणा नः स्तुवन्तः पद्मा। देवाश्वरा दिसेष्टये दीप्यमान यापि
पास्तुन्या रणा नः। दिविपृष्टः। मिय दृष्टा वैश्वानरी। यो ऽग्निः दिवि द्युलोके पृष्टः सिक्तः आदित्यात्मना स्थितः सन् अरोच

देवन्देवं वो ऽवसे देवन्देवमभिष्टये देवन्देवꣳ हुवेम वाजसातये गृणन्तो देव्या धिया ९१ दिविपृ
ष्टो ऽअरोचता ऽग्निर्वैश्वानरो बृहत् क्ष्मया वृधान ऽओजसा चनोहितो ज्योतिषा बाधते तम
९२

ता। दीप्यते। पृष्ठे सेके। निष्ठितः। सेकः स्थितिर्वा। कीदृशो ऽग्निः। वैश्वानरः। विश्वेषां नराणां हितः। बृहन् महान्। किं
च सो ऽग्निः ज्योतिषा स्वप्रकाशेन तमो नैवं संबाधते। लोकानुग्रहार्थं पकारं निवर्तयति। कीदृशः। क्ष्मया वृधानः क्ष्मा
पृथिवी तया तस्यां मत्र्यां उपलक्ष्यते। सेवाः कोशानीति वनम्। मृत्स्वैर्वर्णाश्रमितिनिर्दहेन हविषा वर्धमानः। अत
एव ओजसा चनोहितः। अर्थपिपाकत्वमेण तेजसा चनसे त्वमहितः। चन इत्यन्ननाम। सर्वान्नानि पाचक इत्यर्थः ९२

इंद्राग्नी। अपानत्। सहोत्रहष्टा। इंद्राग्निदेवत्या। प्रवह्लिका। हे इंद्राग्नी अपानत् स्वयं पादवर्हिता पिदुपेंदुपाः पद्वतीभ्यः पाद
युक्ताभ्यः स्तुमाभ्यः प्रजाभ्यः पूर्वा प्रथमभाविनी सती आ अगात्। आगच्छति। भावना सा प्रजानां शिरो हित्वा निद्रामा
१३८ जेन न प्रवपित्री। यद्वा शिरो हित्वा तत्काशब्दमपि रसिका सती जिह्वया प्राणिनां वागिंद्रियेण वावदत्। यत्नु
138 गतं। भृशं शब्दं कुर्वती सती चरत्। अचरत्। चरति प्रसरति। अत्र भावः। एवं चरंती उषा एकस्मिन् दिने त्रिंशत्संख्यानि।
पदा। पदानि गमनसाधनभूतानि मुहूर्तान् निरक्रमीत्। नितरां क्रमते। अहोरात्रेण त्रिंशन्मुहूर्तान् क्रामतीत्यर्थः।
यद्वा वाक्संदेहोर्थः। इंद्रः प्राणः। अग्निः पुरुषः। हे इंद्राग्नी युवयोरेवैनत्कर्म। यत् अपात् पादरहितेयं गद्यात्मिका त्र
यलत्दाण्यं वाक् पूर्वा प्रथमभाविनी सती आ अगात् आगाता। पद्वतीभ्यः पादयुक्ताभ्यो रामायणभारतादिश्लो

इंद्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः हित्वा शिरो जिह्वया वावदच्चरत्त्रिंशत्पदान्यक्रमीत् ५३

कात्मकवाल्मीकिव्यासादिवाणीभ्यः सकाशात्। वेदवाचः प्राथम्यं श्रुत्योक्तं। तेनोक्तैव प्रथमस्र
ष्टेत्येति। एवं प्रथमजाया वाचोऽविकृतत्वेनानित्यमस्तु व्याख्या वाचो विकृतत्वमाह। हित्वा शिरः सरति। शेरते उति प्राप्य
माराम्यानपदं सुच्यते। अभ्याजगाठं ठेन शुक्लो। गाठं ठेनाभ्याजेत्येवं लो। किंवा वाचः पदप्रयोगानियमाभावा
त्। शिरः शिरःस्थानीयमाख्यानपदं हित्वा सका जिह्वया विडयेवा वागिंद्रियेण वावदत् नितरां वदंती सती चरति। १३९
प्रकाशीभवति। एवं चरंती सा त्रिंशत्पदानि न्यक्रमीत् क्रमति। अत्र पदशब्दोऽङ्गुलवचनः मूलाधारादाधार।
भ्य मुखपर्यंतं त्रिंशदंगुलानि क्रामति। एवं वा विवयार्थः ५४

देवासो हि । मनुः हस्तौ वैश्वदेवी । द्विसैतौ निपातौ । प्रसिद्ध्यतिशयार्थौ । हे देवासः पनद्दीप्तौ । ते प्रसिद्धा विश्वे देवाः सख्य यत्र वर्तमान
कालेनास्माकं साकं सहैव वरिवोविदो भवन्तु । वरिवो धनं वेदयन्ति लंभयन्तीति वरिवोविदः । एकीभूय धनप्रापकाः भवन्तु तु
पुनः अपरं भविष्यत्कालेनास्माकं तुचे अपत्याय पुत्रपौत्रादिकाय वरिवोविदो भवन्तु । तुगित्यपत्यनाम । कीदृशा
स्ते । मनवे । मनस्वः । मातुनामकाय मनुनये मन्त्रदर्शिने मह्यं समाना मनसेदीप्तिर्येषां ते । मन्युर्मन्यतेर्दीप्तिकर्मण उत्तियास्कः
। महद्दीप्तिमेकमन्यु प्राप्तः । यद्वा मन्युना क्रोधेन सह वर्तमानाः । अस्मच्छत्रुहननाय क्रोधयुक्ता इत्यर्थः । तथा सरातयः राति
र्दानं तेन सहिताः दाता र इत्यर्थः । अपायमन्नान्नमेघहस्तेहमहत्वद्गुणाविशिष्टे इसैव सा हृदं तोग द्देनो भानवो रीमया

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोवि
दः १४ अपाय मदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् देवास्त इन्द्र सख्याय येमिरे बृहद्भानो
॥ मरुद्गण १५
यस्य सहदक्षतुः । मरुतां गणा यस्य स मरुद्गणः । हे बृहद्भानो हे मरुद्गण हे इन्द्र देवा वसू रु
द्रादित्याः स्तेन्तव सख्याय येमिरे । कथं नु नामै स्मान्मा हि भावा पहृणीते इत्यभिप्रायाः प्रत्नमानं सं पतं हृत वेन
इत्यर्थः । स भवान् अभिशस्तीः अभिशापान् शत्रुप्रयुक्तान् अपवादान् पायसन् । अपगमयन् निवर्तयन्ति । यमतिर्गति
कर्मेति यास्कः । अथ पश्चात्प्रस्तौ अन्नवान् । यशस्वी वा अग्रभवत् । सर्वेनापन्नवान्भवति । कीदृशो भवान् । अशस्तिहा
। शंसनं शस्तिः प्रशंसा । सा नास्ति येषां ते अशस्तयः । निंद्यास्तु रागान् हन्तीत्यशस्तिहा । शिंसनं प्राप्ति प्रशंसा सा नास्ति
येषां ते अशस्त्रबिंदः । पश्यं यवान । इदं तीतिंद्रः । यात्रु एण हन्तामिशापनाणाकोपशस्तोनेजस्वी वद्युम्नत्यमेत्यामस्यसत्यो या
स्येयं तेन इतिपुत्र्ककमिति भावः ५५

प्र वो हे मरुतः वो युष्माकं स्वामिने इन्द्राय बृहते ब्रह्म स्तवं दे माम हृदपेक्षं त्रैप्रार्चत । प्रोच्चारयत । कीदृशायेन्द्राय । वृत्रहते महते ।
नतो वृत्रं हत्रमा मनुष्य स्यपाफनोवा हिनस्ते दो वृत्रं हन्ति । हेतु । वृत्रं कले खेल्सीति लुघोलुगभावः । केन वज्रेण । स्वायुधेन
१३५ कीदृशेन वज्रेण शतपर्वणा । शतसंख्याकानि पर्वाणि ग्रंथयो वा यस्य स शतपर्वा । तेन कीदृशाः वृत्रहत्या । शतक्रे
तवो यस्य । बहु कर्मा । बहुप्रज्ञो वा । अस्मिन् । मेधातिथि दृष्टा माहेन्द्री शंसनो बृहतो । इन्द्रः स्य इत् । अस्यैव यजमानस्य इदं
139 स्मश वस्तु वावृधे वर्द्धयाणि जननं वीर्यं । वर्धितिमि चमतिष्ठमानेन स्तंहि हुष्मं । वीर्याय अस्मन्येषु उपयालोपः । शावावले ।
क्मतिः मन्तनस्याभिमतन्न स्य सोम स्य मदे सति । कीदृशो मदे । विलस्विता वेवेष्टि व्याप्नोति विश्वानि सर्वशरीरव्यापके

प्र वः इन्द्राय बृहते मरुतो ब्रह्मार्चत वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ९६ अस्ये
दिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि अद्या तमस्य महिमानमायवोऽनुष्टुवन्ति पूर्वथा ।
इमा उ त्वा यस्यायमयꣳ सहस्रमूर्द्ध ऊ षु णः ९७ इति संहितापाठे त्रयस्त्रिंशोऽध्यायः ३३

सप्तम्येकवचने छेदसीतीति गुणः । वाद्यस्य । यद्वा विसवि विसैापज्ञे भिधुन्नमेमिति संबंधः । यज्ञो वै विष्णुरिति श्रुतेः । सोमपा
नेन मत्त इन्द्रो यजमानस्य महतां सुवलं च वर्द्धयतीत्यर्थः । किंच । अस्येन्द्रस्य तं उक्तं यज्ञेनो वीर्यादिवर्द्धनरूपं महिमानं
अद्याऽस्मिन्काले पि आयवो मनुष्या अनुष्टुवन्ति । आनुपूर्व्येण स्तुवन्ति । तत्र दृष्टान्तः । पूर्वथा इव । यथा पूर्वे महर्षयः स्त
वन्नेव मितस्तीमपि नराः स्तुवन्तीत्यर्थः । प्रत्नपूर्वविश्वमा प्रत्नवत्सेति पूर्वशब्दात् इवार्थे थाल्प्रत्ययः । इमा उ त्वा १३५
१ यस्यायं २ अयꣳ सहस्रं ३ ऊर्ध्व ऊ षु णः एताः प्रतीकोक्ताः श्रीमन्महीधरकृते वेददीपे मनोहरे त्रयस्त्रिंशोऽध्यायो
ध्यायो मनाय सार्वमेधिकः ३३

यज्जायतः । अनारभ्याधीतेः प्यायस्यापितृमेधान् । आदित्ययाज्ञवल्क्यदृष्टा मंत्राः । पाठे विनियोगः । षड्वस्तिष्टुभो मनोदे
वत्याः शिवसंकल्पदृष्टाः । अथ षिर्वदति तन्मे मनः शिवसंकल्पमस्तु । शिवः कल्याणकारी धर्मविषयः संकल्पो यस्य १५
तत्तादृशं भवतु । मम मनसि सदा धर्म एव भवतु न कदाचित्पापमित्यर्थः । तत्किं । यत्मनो जाग्रत मनो जाग्रतः पुरु
षस्य दूरं उदैति । उद्गच्छति चक्षुराद्यपेक्षया मनो दूरंगामीत्यर्थः यच्च दैवं दीव्यति प्रकाशते दैवो विज्ञानात्मा तत्र भवं
दैवं । आत्मग्राहकमित्यर्थः । मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमिति श्रुतेः । तत् उ पदः स्यात् तत्र छन्दः । उकारश्चार्थः

यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्क
ल्पमस्तु १ ॥

यच्च मनः सुप्तस्य पुंसः तथैवैति । यथा गतं तथैव पुनरागच्छति । स्वापकाले सुषुप्तावस्थायां पुनरागच्छति । य
च्च दूरंगमं । दूरं गच्छतीति दूरंगमं । सर्वत्र प्रत्ययः । अतीतानागतवर्तमानविप्रकृष्टव्यवहितपदार्थानां ग्राहकमित्य
१० र्थः । यच्च ज्योतिषां प्रकाशकानां श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्तकमित्यर्थः । मनः प्रवर्तिता
न्येव श्रोत्रादीन्द्रियाणि स्वस्वविषये प्रवर्तन्ते । आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेनेति न्यायात् । मनः संवे
पमंत्रदानेनैषाम प्रवृत्तेः । तादृशं मे मनः शान्तसंकल्पमस्तु १

येन कर्माणि । मनीषिणो मेधाविनो यज्ञे येन मनसा सत्कर्माणि कृण्वंति । कुर्वंति । कृञ् करणे धातुः । मनः साध्यपि नाकर्मा

१४० प्रवृत्तेः । केषु सत्सु । विदथेषु ज्ञानेषु सत्सु । विद्यंते ज्ञायंते नानाविधविद्या नितेषु विदेरौणादिकोऽथ प्रत्ययः । प्रत्ययोदा

त्तत्वेन मध्योदात्तं पदं प्रत्ययस्वरः । आद्युदात्तश्चेति पाणिनिसूत्रेः । यत्तु सर्वं वेधिनाद्ध विदादिपदार्थानां ज्ञानेषु सत्स्विव

140 त्यर्थः । कीदृशा मनीषिणः । अपसः । अप इति कर्मनाम । आपो विद्यते येषां ते । अपस्विनः । कर्मवंतः । असायामेधा

सृजो विनिवृत्तिविस्रम्यः । वित्तनोर्लिगिनीष्ठाद्यभावे पिच्छादसो विनोलुक् । समदानिष्ठा इत्यर्थः । नद्या धीराः । धीमं

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु २

तः । धीर्विद्यते येषां ते धीराः । मत्वर्थो रप्रत्ययः । यद्वा धियं बुद्धिं ईरयंतीति कर्मसु प्रेरयंतीति धीराः । कर्माणि । पच्च मनः अपू

र्वं । न विद्यते पूर्वं मिंद्रियं यस्मात्तदपूर्वं । इंद्रियेभ्यः पूर्वं मनः सृष्टेः । यद्वा अपूर्वं मनः पावाद्यामित्युक्तेः पूर्वमात्मरूपमि

त्यर्थः । यक्ष पदं । यक्षं पूज्यं दत्तं । यजतेरौणादिकः सप्रत्ययः । स्त्रिनादित्यामित्याद्युदात्तं पदं । यच्च । यच्च प्रजायंते इति प्रजा

१४० नां सप्राणिमात्राणां संतः शरीरमध्ये आस्ते इति इंद्रियाणां बहिष्ठानि । मनस्त्वंतरिंद्रियमित्यर्थः । तन्मा दृशं मे मनः

शिवसंकल्पमस्त्विति व्याख्यातं २ ॥

यत्प्रज्ञानं। यत् मनः प्रज्ञानं विशेषज्ञानजनकं। प्रकर्षेण ज्ञाप्यते येन तत् प्रज्ञानं। करणाधिकरणयोश्चेति करणे ल्युट् प्रत्ययः
। उत अपि च यत् मनः चेतः। चेतयति सम्यक् ज्ञापयति तत् चेतः। चिती संज्ञाने अस्मात् ण्यन्तात् असुन् प्रत्ययः। सामान्यविशेष
ज्ञानजनकमित्यर्थः। यच्च मनो धृतिर्धैर्यरूपं। मनस एव धैर्यमुच्यते मनसि धैर्यमुपचर्यते कार्यकारणयोरभेदात्। यच्च
मनः। प्रजासु जनेषु अन्तर्वर्तमानं अमृतं ज्योतिः प्रकाशकं सर्वेन्द्रियाणां। उक्तमपि पुनरुच्यते। आदरार्थं। अभ्यासे
भूयांसमर्थं मन्यन्त इति यास्कोक्तेः। यच्चामृतं अमरणधर्मि आत्मस्वरूपत्वात्। यस्मात् मनसः ऋते यस्मान्मनो विना किंचन
किमपि कर्म न क्रियते जनैः। सर्वकर्मसु प्राणिनां मनः पूर्वं प्रवर्तते मनःस्वास्थ्याविना कर्माभावादित्यर्थः। अध्यास्म

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु यस्मान्न ऋते किंचन कर्म क्रियते तन्मे
मनः शिवसङ्कल्पमस्तु ३ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वं येन यज्ञस्ता
यते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ४ ॥

दित रते इत्यादिना यस्मादिति ऋते योगे पंचमी। तन्मे मन इति व्याख्यातं। येनेदं। येन मनसा इदं सर्वं परिगृहीतं परि
तः सर्वतो ज्ञातं इदं किं। भूतं भूतकालसंबंधि वस्तु। भुवनं। भवतीति भुवनं। भवतेः क्युन् प्रत्ययः वर्तमानकालसंबं
धि। भविष्यत्। भविष्यतीति भविष्यत्। लृटः सद्वेति शतृप्रत्ययः। तौ सदित्युक्तेः। त्रिकालसंबद्धवस्तु यन्मनः
प्रवर्तत इत्यर्थः। श्रोत्रादीनि प्रत्यक्षमेव गृह्णन्ति। कीदृशेन येन। अमृतेन शाश्वतेन मुक्तिपर्यन्तं श्रोत्रादीनि तदुपतिम
नस्थन स्थायमित्यर्थः। येन च मनसा यज्ञो अग्निष्टोमादिः तायते विस्तार्यते। तनोतेर्यकि आकारः। कीदृशो यज्ञः सप्तहोता। सप्त
होतारो देवानामाह्वातारो होतृमैत्रावरुणादयो यत्र स सप्तहोता। अग्निष्टोमे सप्त होतारो भवन्ति। तन्मे मन इति व्याख्यातं ३

यस्मिन्नृचः। यस्मिन्न मनसि ऋचः प्रतिष्ठिताः। यस्मिन्सामसामानि प्रतिष्ठितानि। यस्मिन्यजूंषि प्रतिष्ठितानि। मनस स्वा
१५१ ध्याय एव वेदत्रयी स्मृतेर्मनसि शब्दमात्रस्य प्रतिष्ठितत्वं। अन्नमयं हि सोम्य मन इति छांदोग्ये मनस एव स्वाध्याये वेदोच्चारण
शक्तिः प्रतिपादिता। तत्र दृष्टान्तः रथनाभावरा गा इव। यथा अरा रथचक्रस्य नाभौ मध्ये प्रतिष्ठिताः तान दृढबद्धा लेमन
सि। किंच प्रजानां सर्वं चित्तं ज्ञानं सर्वपदार्थविषयं ज्ञानं यस्मिन्मनसि ओतं निहितं। तंतुसंततिः पटे इव सर्वं ज्ञानं
मनसि निहितं मनः स्वाध्याय एव ज्ञानोत्पत्तेर्मनोवैयग्र्ये ज्ञानाभावः। तन्मे मनः शिवसंकल्पशालमस्तु। सुषा
रथिः। यन्मनो मनुष्यान्नेनीयते। अत्यर्थं इतस्ततो नयति। नयतेः क्रियासमभिहारे यङ्। मनःप्रेरिता एव

यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः यस्मिंश्चित्तं सर्वमोतं प्रजा
नां तन्मे मनः शिवसंकल्पमस्तु ५ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीशुभिर्वाजि
न इव हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ६

प्राणिनः प्रवर्तन्ते। मनुष्यग्रहणं प्राणिमात्रोपलक्षकं। तत्र दृष्टान्तः सुषारथिरश्वानिव। शोभनः सारथिर्यन्ता यथा क
शया अश्वान्नेनीयते द्वितीयो दृष्टान्तः। अभीशुभिर्वाजिन इव। यथा सुसारथिरभीशुभिः प्रग्रहैर्वाजिनोऽश्वान्नेनीयते।
इत्यनुषंगः। रश्मिभिर्नियच्छतीत्यर्थः। हृत्प्रतिष्ठं हृदि प्रतिष्ठा स्थितिर्यस्य तत्। हृद्येव मनउपमानं। प्रथमायां नय
ने द्वितीयायां नियमनं। तथा मनः प्रवर्तयति यद्वलि च जनानां इत्यर्थः। यच्च मनः हृत्प्रतिष्ठं। हृदि प्रतिष्ठा स्थितिर्य
स्य तत्। हृद्येव मन उपलभ्यते। यच्च मनः अजिरं जरारहितं बाल्ययौवनस्थाविरेषु मनस स्तत्त्वस्यावस्थानात्। यच्च ज १५१
विष्ठं अतिशयेन जववत् वेगवत्तरं जविष्ठं। नचैव ततः किंचनाशीयोऽस्ति मनसः किंचनाशीयोऽस्तीति श्रुतेः। तन्म इत्युक्तं ६

पितुं नु। ऽस्तिक्। अन्नस्तुतिः। तं पितुमन्नं स्तोषं स्तौमि किं भूतं। महः महतः। नविधोनविश्वा वलस्य धर्माणं धारयितारं। नवि
धोत्तवलनाम। विभक्तिव्यत्ययः। आत्रेनैव वलोऽन्यते तेनैकं। यस्य पितोरोजसेव वलेन त्रितः त्रिस्थान इन्द्रः। वृत्रं देवेभ्यो वि
पर्व विगतसंधिं यथा तथा विअर्दयत्। विवियमर्दितवान्। इन्द्रेणाहं वृत्रोऽन्नवलेनैव हत इत्यर्थः। स्तोषं स्तोते र्लिङि पिइतनश्च
लोपः परस्मैपदेष्विति इकारलोपे लेटोऽडाटाविल्यडागमो सबहुलं लेटीति सिप् प्रत्ययो गुणो वहुपं। महः। महत्त्वा भूस
ङ् सिंलोपात्पितस्लोपः। धर्माणं धारयितारं। मनं विपर्वं विगता। निपर्वाणि यस्मात् तद्वप्रत्ययेयस्टिलोपः। अर्द्दयत्। बहुलं छन्द २

पितुन्नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्। १ अन्विद्वनुमते
त्वमन्यासै शन्नश्च कृधि। क्रत्वे दक्षाय नो हिनु प्रण आयूंषि तारिषः ८

स्यमाङ्योगेऽपीत्यडभावः। अन्वहितादिति वेरूपसर्गसमवयायानं। अन्विन् चनस्तोऽनुमः। द्वयोरनुमतिर्देवता।
इत्निपातो नर्थकः हे अनुमतेत्वमनुमन्यासे अनुमन्यासास्मदुक्तं त्वं वुध्यस्व नोऽस्माकं शं च सेवस्व एवमेव कृधि
कुरु। च पुनः नोऽस्माकं। क्रत्वे कर्मणे संकल्पाय दक्षाय नम्सर्द्धयेसंकल्पसिद्धये च नोऽस्मान् हिनु गमय नोऽस्मा
कमायूंषि प्रतारिषः प्रतारयवर्द्धय। मन्यासे लेटोऽडाटाविल्याट्। वैतोऽन्यत्रेत्यैकारः। कृधि श्रुणोति एकवचनस्यच्छन्द
सीति हेर्धिः। बहुलं छन्दसीति शपो लुक्। क्रत्वे गुणाभावे यणादेशः। तारिषः सिपि बहुलं छन्दसीति हल्सार्थतिइ ८५

अनुनः।अनुमतिरद्यनोस्माकंयज्ञंदेवेषुअनुमन्यतां।अग्निश्चयज्ञंदेवेषुअनुमन्यतां।किंभूतोग्निः हव्यवाहनः।ह
विषांवोढा।किंच।दाशुषेहवींषिदत्तवतेयजमानायमयः सुखरूपोऽनुमत्यग्नीभवतं।भवतामितिपुरुषव्यत्ययः।ह
१४२ व्यंवहतीतिहव्यवाहनः।हव्येऽनंतःपादमितिवहेर्ण्युट्।दाश्वान्साह्वानितिसाधुः।सिनीवालि।सिनीवालीदेवता
।हेसिनीवालि।हेपृथुष्टुके।स्तुकंकेशभारःस्तुतिःकामोवा।हेपृथुकेशभारे।महास्तुतेवा।पृथुकामेवा।यात्वंदे

142

अनुनोद्यानुमतिर्यज्ञन्देवेषुमन्यताम् अग्निश्चहव्यवाहनोभवतन्दाशुषेमयः ॥१॥ पञ्च
नद्यःसरस्वतीमपियन्तिसस्रोतसः सरस्वतीतुपञ्चधासोदेशेऽभवत्सरित् ॥४॥ सिनीवा।
लिपृथुष्टुकेयादेवानामसिस्वसा जुषस्वहव्यमाहुतम्प्रजान्देविदिदिड्ढिनः

वानांस्वसाअसिभगिनीभवसिसात्वंआहुतंहव्यंजुषस्वप्रीत्यासेवस्व।हेदेविनोस्मभ्यंप्रजांचदिदिड्ढिनिशदेहि।व
द्धौलेलोट्छंदसीतिद्वित्वं।शपःश्लुः।नतोह्निवाहिपंचनद्यः।सरस्वतीनदीदेवता।याःदृषद्वत्याद्याःपंचनद्यःसरस्वती
अपियंतिगच्छंति।किंभूताः।सस्रोतसः।समानंस्रोतःप्रवाहोयासांताः।तुरवधारणे।सा।उ।सैवसरस्वत्येवपंचधादे १४२
शेसरिन्नदीअभवत्।पंचापिस्वनाम्नानित्यकासरस्वत्यावाभवत् ६

त्वमग्ने। चतस्र आग्नेय्यः। हे जगतो। अग्नेत्रिष्टुबनुष्टुभौ हे अग्ने त्वं देवानां प्रथमः सखा अभवः। भूतोसि आद्यो मित्रभूतो देवा
नां त्वमेवेत्यर्थः। किंभूतस्त्वं अंगिराः। अंगानां रसः। यद्वा अंगिभ्य आत्मभ्यो यजमानेभ्यो गतिं ददासीत्यंगिराः। ऋषिर्द्र
ष्टा देवो द्योतमानः। शिवः कल्याणः। किंच तव व्रते कर्मणि वर्तमाना मरुतः ईदृशा अजायंत कीदृशाः कवयः। क्रांत
दर्शिनः। विद्मनापसः। अप इति कर्मनाम। विद्मना विदितानि अपांसि कर्माणि येषां ते विद्मनापसः। विदितकर्माणः।
भ्राजदृष्टयः शोभमाना ऋष्टय आयुधानि येषां ते तथा। शत्रुघातकत्वात्। विद्मनेति वेत्तेः कर्मणि मनिन् प्रत्ययः। बहु

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा। तव व्रते कवयो विद्मनापसो
ऽजायन्त मरुतो भ्राजदृष्टयः ॥१॥ त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोक
स्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥१३॥

लग्रहणात्। ततो विभक्तेराकारः। तस्य वालुक्। विद्मनापसः। अजायंत। जनेर्लङ्। जादेशः अपश्यन्। त्वं त्रः रक्षणार्थी
मंत्रः हे अग्ने। हे देव मघोनमानदेवं यस्त्वं। तव व्रते कर्मणि वर्तमानान् मघोनः धनवतो यजमानान् रक्षपालय। तो
स्माकं तन्वः शरीराणि च रक्षाकैः तव पायुभिः। त्वदीयैः पालनैः। यतस्त्वं अनिमेषं सावधानं रक्षमाणः पालयन्सन् तो
कस्य पुत्रस्य तनये। विभक्तिव्यत्ययः। तनयस्य पौत्रस्य गवां त्राता रक्षकोसि १

उत्तानायां । यः इडायः पृथिव्याः पुत्रोऽग्निर्वयुने प्रज्ञाने कर्तव्ये अजनिष्ट जातः । किंभूतः । अरुषस्तूपः । रुषवर्णधेयोघनेरूपः
अरुषः । हि स्मकः । रक्तो योऽग्नेर्ज्वालाख्यो यो यस्य मनस्था । एवं उक्तो योऽस्याग्नेः रुशत् दीप्यमानं बलं उत्तानायां अरण्यां अवभर । अ
१८३ 143 वाचीनं हर । अध्वर्यो चानतः इति दीर्घः । चिकितवान् अरणौ बलं जानन् । किं बलमिति चेत् । पारगाः प्रवीता । कामितवन्तो वृष

उत्तानायामव भरा चिकित्वान्सद्यः प्रवीता वृषणं जजान अरुषस्तूपो रुशदस्य पाज इडाया
स्पुत्रो वयुनेऽजनिष्ट । ५ इडायास्त्वा पदे वयं नाभा पृथिव्या अधि जातवेदो नि धीमह्यग्ने हव्या
याय वोळ्हवे । ५

णे सेकारम अग्निं सद्यः तत्काले जज्ञान । जनयति । छंदसि लुङ्लङ्लिटः इति लिट् । सोऽग्निर्जात इति । उत्ति । इडायास्त्वा । हे जात
वेदः । जातप्रज्ञान । हे अग्ने इडायाः पृथिव्याः पदे स्थाने देवयजने वयं पृथिव्या नाभौ अधि उत्तरवेद्यां मध्ये एव वयं त्वां नि
धीमहि । स्थापयामः । किमर्थं हव्याय वोढवे हव्यं वोढुं । विभक्तिव्यत्ययः । वहतेस्तुमर्थे से सेन इति तवे प्रत्ययः सहि १८३
वहोरित्योकारः ८

प्रमन्महे। चतस्त्रएकादश्यस्त्रिष्टुभः नयमिंद्रयज्ञार्थेऽस्यसूक्तस्यालामंत्रिष्टुद्वादिकं प्रमन्महे जानीमः। किंभूतं स्तोमं। सुखं बलहेतुं। आ
र्कमंत्रं च स्मर्चाम। उच्चारयाम। याचनानामनेकार्थत्वात् चेति हृच्चारणार्थः। अंगिरस्वत्। अंगिरस इव। तैर्यथा स्तोमो दातो मंत्र
स्य पठितस्तस्मैतद्वत्। किंभूताय इन्द्राय। शवसानाय। शवो बलमात्मन इच्छति। शवस्यति। एवं शवस्यतीति शवसानः। तस्मै। व
लमभिलषमाणाय। स्वपस्त्वात्मनः। काज्जितिकाच। नदेनाचान्नचकारस्य वहुलं छंदसीति नचलुक्। छंदस्युभयथेति
तस्य शानच्। आर्धधातुकत्वात् कारस्य विभाषेति कवचो लोपः। शवसान इति सिध्यति। पुनः कीदृशाय। गिर्वणसे। गी
रास्तुत्या वनपतिं संभाजयति आत्मानं अभिलषितदानात् तेनोत्पत्यत इति गिर्वणाः। गीःशब्दोपपदाद्वनोतेर्णिपजाद

प्रमन्महे शवसानाय शूषमाङ्गूषङ्गिर्वणसे अङ्गिरस्वत्
सुवृक्तिभिस्तुवतः ऋग्मियायार्चामार्कन्नरे विश्रुताय १

सुत्विवनेर्घटादित्वेन मित्संज्ञत्वात् ह्रस्वत्वं णिचो लोपः गीर्वणा इति प्राप्ते दीर्घाभावश्छांदसः। यद्वा साधर्थेऽणि च। गीर्भिर्दे
वं। देवा भजन्ति गिर्वणाः तस्मै। गीर्वाणशब्देन समार्थो गिर्वणःशब्दः। पुनः किंभूताय। सुवृक्तिभिः। शोभनाभिः स्तु
तिभिः स्तुवते। स्तोतृन् स्तुवन् तस्मै। यजमानान् इति शेषः। तदुक्तं। त्वमंग प्रशंसिषो देवः शविष्ठ मर्त्यमिति। पुनः की
दृशाय। ऋग्मियाय। ऋग्मयाय वेदमयाय। मयट् छांदसो मियट्। यद्वा ऋक्शस्तुतनाविनयसाद्भावे ऋग्मिणादिकामक।
नरत्वं। ऋचामः स्तुतिः। तमर्हतीति ऋग्मियः। अर्हार्थे घः। घच भत्वात् इति यागाय। पुनः कीदृशाय नरे नरत्वेपायन्रशब्द
स्य डे परे छांदसो गुणः। पुनः कीदृ। विश्रुताय। शौर्यदानबलादिभिर्विख्यायते १

१४४ प्रवोमहे। महे महते। शवसानाय बलमभिलषमाणाय इंद्राय महि महत् नमो ऽन्नं वः। यूयं प्रभरध्वं प्रहरत। समर्पयत। यूय
मिन्द्रार्थं च आंगूष्यं। मुनीनां घुष्टं दीप्तिप्रतिवचः। आंगूष्यं। आंगूषाय हितं साम पञ्चविधं साम च प्रभरध्वं उच्चारयत। नः अस्माकं
पूर्वे पितरः अंगिरसः येनाम्नेन साम्ना अर्चन्तः स्तुवंतः संतः गाः सूर्यकिरणान् अविंदन् लेभिरे। स हि सामन्तो लोकः। न
त्ताम प्रभरध्वं। कीदृशाः। अंगिरसः। पदज्ञाः पदमात्मस्वरूपं जानन्तीति पदज्ञाः। इत्थं तिष्ठ्या हेतुदर्शनात्। वनः स
काशान्न कस्मात्। वनशब्दोप्यर्थः। कैंपिलोकोत्तरः प्रकेतः प्रकृष्टेज्ञानविशेषः आसमन्तात् हियते भवति। अतः स
144

प्रवोमहेमहिनमोभरध्वमाङ्गूष्यंशवसानायसाम येनानःपूर्वेपितरःपदज्ञाअर्चन्तो
ऽअङ्गिरसोगाऽअविन्दन् १७ इच्छन्तित्वासोम्यासःसखायःसुन्वन्तिसोमन्दधतिप्र
यांसि। तितिक्षन्तेअभिशस्तिञ्जनानामिन्द्रत्वदाकश्चनहिप्रकेतः १८

विषो विप्राः त्वां इच्छन्ति। अथ यज्ञकाले गाः शुभ्रवंशान् सोमानु वानाः सोम मत्तुमस्य इन्द्रस्य कृते विप्राणां देवानां च सखित्वं। किं
भूताः सखायः। सोम्यासः। सोमसंपादिनः। इच्छन्तीति कथं ज्ञातं तत्राह। यत ते सोमं सुन्वन्ति। अभिषुण्वन्ति। प्रयांसि
अन्नानि दधति स्था। प्रय इत्यन्ननाम। हवींषि धारयन्ति। किंच। जनानां अभिशस्तिं दुर्वचनं तितिक्षन्ते सहन्ते। मनो वा र
क्षायसंयता दान्तिपरा इत्यर्थः १८ १४४

नेने हूरे। हे हरिवः। हरी अश्वाविषेते यस्य स हरिवान। तस्य संबोधनं। मत्स्वेमाविति सत्वं। हेहरिवः। स्थिराय वृष्णे सकृद्दायक
से मे के तस्मिं इमा। सवना। कृत। इमानि सवनानि प्रातः सवनादीनि कृतानि। कृ सन्ति अग्नौ समिधाने प्रज्वलिते सामग्र्या नेस
ति। जोष्ट्रेसा पके ल्लक्। ग्रावाणा युक्ताः योजिताः। अभिषवकर्मणि। तथा वेहि हवर्थो। अग्नौ हतोः हविर्ग्रामग्र्यां। अप्र
माद्दि। आगच्छ। न तस्य गाकथमत्रि हूरे पयागं तवामित्यनश्राहृ। परमायामा गौ। हूरदेशस्थानि रजांसि स्थानानि तत्वह्
रेनचिन। हूरेन संति। चित्तशाहो न्यर्थो। अतिदूरमपि ते किमत्र अत्यायाहीत्यर्थः। अ पाटे पूक्तु। चन तुः सोमदेवव्याख्रि
ष्टु भः हे सोमतां सं पेतं उक्तं षेणा वर्तमाने अनुदृष्टाव पुंमदेनमलुपः सोम। किं भूतं त्वां युक्त। चतत्र पाठं। अस्य हनमन
नेनेहूरे परमा चिहूजाः ॐ स्यात्सूयाहिहरिवो हरिम्याम्। स्थिराय वृष्णे सवनाकृतेमा युक्ता ग्रावाणः स
मिधाने अग्नौ ॥९॥ अथाटं छुन्सुएतनास्तुपब्रिशे। स्वर्षा मप्सुं वृजनस्य गोपाम्। भरेषुजां सुक्षितिं सु
भिभूतं। पुनः कौ। एतनासु सेनासु पब्रिं पालयितारं। स्वर्षा। स्वर्हिवं ॥ तस्य प्रवसज्ज यन्त्वा मत्समदे मसोम र
सेनाति सभवजं तसम्वर्धाः। तं। अश्वं सा। अयोज लानि सेनाति त्यपाः। तं। वृजनस्य बलस्य गोपां। रक्षकं। भरेषुजां। संग्रा
मेषु जेतारं। सुक्षितिं। सुनिवासं। सुश्रवसं। गोमनं श्रवः कीर्तिर्यस्य स सुश्रवाः तं। अस्माठं। सघते सोसाव्यः। तस्माठं अ
साठं सा। सदेः क्तः। हत्वाय तं तहुत्वं। ठेठोलोपः। दूलोपे पूर्वस्य दीर्घोणः। वाहुलकात्सहिते दोषाठ् वर्णे स्य त्वस्मात्प्र
वृत्तिः षत्वं ढुत्वाटं सं। पब्रिः पृपालन पूरणयोः आदृगमनेति किः। हित्वादि। स्वर्षा। खः पूर्वा संसनोतेर्विट्। विड्वनोर
नुनासिकस्यात्। पवमप्सा। गोपा पत्नीति गोपाः। क्विप्। अतो लोपः। पलोपः। भरेषुजां। भरेषु संग्रामेषु जयति शत्रु
त्रूनिति भरेषुजाः। हलदंतात्सप्तम्याः संज्ञायामलुक। जयतेर्डो। टिलोपः। प्रत्ययः। भरेम। मरीहरूघालितृ अप्येतनशान

सोमो धेनुं। यो यजमानोऽस्मै सोमाय ददाशत्। ददाति हविः। तस्मै सोमो धेनुं ददाति। आशुं शीघ्रं सर्वत्रगमनं च सोमो द
दाति। सोम एव तस्मै वीरं पुत्रं ददाति। कीदृशं वीरं। कर्मण्यं। कर्मणि साधुं। सादन्यं। सदने गृहे साधुं गृहकार्यकुश
१४५ लं। विदथ्यं। विदथे यज्ञे तत्र साधुं। सभेयं। पितृश्रवणं। यः पितरं श्रोणोति। पितृश्रवणं। पितरं श्रोणोति। पितृश्रव
145 णः। पितुराज्ञाकारिणं विनीतमित्यर्थः। कर्मण्यप्रभृतीनि तत्र साधुरिति यत्। सभेयं। ढश्छन्दसीति समायाः सा
ति समायाः साध्वर्थे ढप्रत्ययः। तस्यापादेशः। ददाशत्। दाशृ दाने। बहुलं छन्दसीति शपः श्लुः। द्विर्वचन

सोमो धेनुं सोमो ऽअर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥२२॥ त्वमिमा ऽओषधीः सोम विश्वास्त्वमपो ऽअजनयस्त्वं गाः त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥

अलोपः। परस्मैपदेष्वितिनिपद्लोपः। लेटोऽडाटावित्यडागमः। त्वमिमाः विश्वाः सर्वाः ओषधीः। अपो ज
लानि। गाः धेनूः अजनयः। जनितवानसि। त्वं उरु विस्तीर्णं महत् इदं अन्तरिक्षं आततन्थ विस्तारितवानसि। त्वं ज्योत्या।
ति पातेन सा तमोपकारं विववर्थ विवृणोषि। आदित्यात्मना सर्वं तमोपनयसीति सर्वात्मा त्वमित्यर्थः। व १४५
भूथाततन्थजगृभ्मववर्थेति निगमे इति निपातो ॥१२॥

देवेन न। दैव्देवा सोम देव सहसावन्। बलवन्। देवेन मनसा देवसंबंधिना मनसा रायो धनस्य भागं नोऽस्मभ्यं अभियुध्य।
युध्यतिर्गतिकर्मा। अंतर्भावितण्यर्थः। अभिगमय। देहीत्यर्थः। एवं दानप्रवृत्तं त्वां कश्चिदपि मा आतनत्। मा त्वा।
मा आतनोतु। मा प्रतिबध्नातु। तनोतिः। प्रतिबंधार्थः। कुतस्त्वमेव मुख्यमस्य इति चेत्। यतस्त्वं वीर्यस्य ईशिषे। वीरक
र्मण ईश्वरो भवसि। अधीगर्थदयेशामिति कर्मणि षष्ठी। किंच। गविष्टौ गोः स्वर्गस्य इष्टौ इच्छायां स्वर्गप्राप्त्यां वि

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य। मा
त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ २३ ॥

षयभूतायां सत्यां उभयेभ्यः प्रचिकित्स। उभयलोकप्राप्त्यर्थं चिकित्सां कुरु। आपदपगमं कुरु। उभयलोकप्रतिबंध
कं विघ्नं निवर्तयेत्यर्थः। दैवं मः प्राप्य लब्धधना अरोगा श्च सत्कर्म कुर्वाणा यथा स्वर्गं यास्याम तथा कुर्विति वाक्या
र्थः। देवेन। देवानामिदं दैवं। तद्धितप्रत्ययलोपः। सहसावन्। प्रथमार्थे तृतीया। सहसा महो बलमस्यास्तीति स
हसावान्। अलुक्। तनत्। तनोतेः परस्मैलेटोऽडागमः इलोपश्च। चिकित्स। गुप्तिज्किद्भ्यः सन्। अन्येषामपि दृश्यत

अष्टौ व्यख्यात्। वत्सः सावित्रः। द्वितीया जगती। त्रिष्टुभोऽन्याः। हिरण्यस्तूप ऋषिः। सविता देव आगात् आगच्छतु। इणो
गा लुङीति गादेशः। किं कुर्वन्। दाशुषे हवींषि दत्तवते यजमानाय वार्याणि वरणीयानि रत्नानि दधत् प्रा
१४६ 146 पयन्। कीदृशः। हिरण्याक्षः। हिरण्मयचक्षुरिन्द्रियके अक्षिणी यस्य स हिरण्याक्षः। अस्मन्नहर्पिवीमकः। यः सविता पृ
थिव्याः संबन्धिनीः अष्टौ ककुभो दिशः व्यख्यत् प्रकाशितवान्। यश्च त्री। त्रीणि। धन्व। धन्वानि लोकान् व्यख्यत्। धन्वे
त्यन्तरिक्षनाम। तेन तदुपलक्षितान् त्रीनेव पिलोकौ लक्ष्यते। छत्रिणि गाढं नीतिवत्। योजना। यश्च योजनानि। योजन
यश्च योजनानि। योजनगव्यूतिक्रोशादीन् परिमाणविशेषान् व्यख्यत्। यश्च सप्त सिन्धून् सप्त समुद्रान् नदो रोदायान् व्य

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ १८

ख्यात्। उपलक्षणमेतत् सर्वजगत्प्रकाशकः सविता रत्नानि ददान आयात्वित्यर्थः। अख्यत्। यश्च सप्त सिन्धून् स।
मुद्रान् नदो रोदायान् व्यख्यम्। उपलक्षणमेतत्। सर्वजगत्प्रकाशकः सविता रत्नानि ददान आयात्वित्यर्थः। अख्यते
। ख्या प्रकथने। अस्यति वक्ति ख्यातिभ्यो ऽङ् इति च्लेरङ्। आलोपश्च। यात् नामनेकार्थत्वात् अत्र प्रकाशनार्थो ग्राह्यः
। त्री। योजनगामृत्युपंसकलिङ्गस्यादिना एवं सर्वाणि दीर्घो विभक्तेः। धन्व। सुपो लुक्। रत्ना। सुपश्चाकारः। दाशुषे। १०६
दाश्वान् साह्वान् मीढ्वांश्चेति निपातनः। वार्याणि। ऋहलोर्ण्यदिति वृणातेर्ण्यत् १५

हिरण्यपाणिः । सविता सर्वस्य सविता सूर्यः सूर्यः । विभक्तिव्यत्ययः । उभे उभयोः द्यावापृथिवी । द्यावापृथिव्योः अन्तर्मध्ये ई
यते आ गच्छति यदा । तदा अमीवां व्याधिं अपबाधते । अंधकारलक्षणं रोगं निवर्तयति । अथ च यदा वेति आस्तमयसमये
गच्छति तदा कृष्णेन रजसा अंधकारलक्षणेन द्यां केऽभिकृणोति । अभिकृणोति । अभिव्याप्नोति । कीदृशः सूर्यः
हिरण्यपाणिः सुवर्णपाणिः विचर्षणिः । विविधं द्रष्टा कृतस्य अकृतस्य प्रत्यवेक्षकः । उभे द्यावापृथिवी । षष्ठ्यर्थे द्वि
तीया । अन्तर्याति गच्छति । ईयते ईङ् गतौ दिवादिः । हिरण्यहस्तः । यो देवो रविः रक्षसो राक्षसान् यातुधानानस्त्र
सुरवकरांश्च अपसेधन् । अपगमयन् सन् अस्थात् । उदस्थात् । उदेति । स देवः अर्वाङ् । अर्वागंचनः अस्मदभिमुखः

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते अपामीवां बाधते वेति सूर्यमभि
कृष्णेन रजसा द्यामृणोति २५ हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववां यात्वर्वाङ्
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः २६

यातु । आयात्वित्यर्थः । कीदृशो देवः हिरण्यहस्तः । हिरण्यं प्रदानार्थं हस्ते यस्य स तथोक्तः । रूपेण वा स्तुतिः । अ
सुरः असून् प्राणान् राति ददातीत्यसुरः । सुनीथः नीथा स्तुतिः कल्याणस्तुतिः । सुमृडीकः । साधु सुखयि
ता । स्ववान् धनवान् । प्रतिदोषं प्रतिजनं यो दोषः प्रतिदोषः तं श्रुतिस्मृतिविहितधर्मपरास्तु वा नैयावेतो दोषा
स्तावतः गृणान् । उच्चारयन् । उपभोगार्थ्यमित्यभिप्रायः स्ववाजयात्वित्यत्र दीर्घादटि समानपाद इति नत्वं रुत्वे । भो
भगो अघो अपूर्वस्य योऽशि इति नस्य रो यादेशः । हलि सर्वेषामिति नस्य लोपः । रक्तस्य शाकल्यस्य येन कीवतं २५

ये ते पंथ्याः । हे सवितः । हे देव ये ते तव पंथाः । पंथानो मार्गाः अंतरिक्षे सुकृताः साधुतमाः । यात्रावर्त्तने । कीदृशास्ते । पूर्व्यासः
पूर्वस्मिन्काले भवाः । पूर्व्याः । अरेणवः । नास्ति रेणुर्यत्र । अपंसवः । तेभिः । तैः पथिभिर्मार्गैः नोऽस्मान् अद्य नयेति शेषः । च पु
१४१ नः गच्छतो नोऽस्मान् । अधि ब्रूहि च । अधि अस्मीत्यनुब्रूहि । एते मदीया इति । यद्वा अधिब्रूहि । उपदिश अस्माकं यद्वितं प
147 थ्यं तत् । यद्वा अधि अधिकं वद । एतं महायात्रिकादानमित्यादि । किंभूतैः पथिभिः । सुगेभिः सुगैः सुखेन गम्यते
येषु ते सुगास्तैः । अन्नपानप्रभूतैरित्यर्थः । अधिकरणे गच्छतेर्डप्रत्ययः । पूर्व्यासः पूर्वैः कृताः पूर्वैः कृतमिनयौ वे

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे तेभिर्नोऽ
अद्य पथिभिः सुगेभी रक्षा च नोऽअधि च ब्रूहि देव ११ उभा पिबत
मश्विनोभा नः शर्म्म यच्छतम् अविद्रियाभिरूतिभिः २८

तियप्रत्ययः । उभा पिबतं । आश्विन्यास्तिस्रः । एका गायत्री । द्वे अनुष्टुभौ । हे अश्विनौ उभा उभौ द्वावपि युवां पिबतं
सोमामिति शेषः । उभा । द्वौ युवां नोऽस्मभ्यं शर्म शरणं । सुखं वा यच्छतं । दत्तं । काभिः सह । अविद्रियाभिरविदीर्णाभि
रखंडिताभिरूतिभिरवनैः पालनैः सह । सुखं दत्तं पालयतं चेत्यर्थः । उभा अश्विना । विभक्तेराकारः । विभेदीर्य्येनीति १४२
विद्रियाः । हविदारे रीणादिक इमक्प्रत्ययः १९

अप्नस्वतां हेअश्विना। अश्विनौ। हेदस्रा। दर्शनीयौ। हेवृषणा। वर्षितारौसेक्तारौएवातौ। अस्मेअस्माकंवाचंअप्नस्वतींक
र्मवतीं युवांकृतंकुरुतं तथानोस्माकंमनीषांमननस्तुतिंअप्नस्वतीमेवकुरुतं। मननसाधवचसाचपर्याप्तंकुर्मतलयाकुरुत
मित्यर्थः। यत्तोऽहंवां युवांनिह्वये। आह्वयामि। किंनिमित्तं। अद्यूते समतात्मागगते अवसे अन्ने अत्रनिमित्तं तद्दानाय मि
त्यर्थः। द्यूतात् द्यवानां। द्यूतेभवंवाद्यूत्यं। नद्यूत्यंअद्यूत्यं। तस्मिन्। द्यूतनादागतंकर्मापिनभवतीत्येवमुच्यते। द्यूतमत्या।
धामस्पन्यायपनागमानासुपलक्षतकं। किंच। वाजसातौ। वाजानामन्नानां सातिः संभजनं यस्मिन्सवाजसातिः। तस्मि
न्यज्ञेनोऽस्माकंवृधेवर्धनायभवतं। अस्मे। विभक्तेः शेआदेशः। कृतं। करोतेर्लङि बहुलंछन्दसीति शपोलुक् मेलोपामध्यमद्विव

अप्नस्वतीमश्विनावाचमस्मेकृतंनोदस्रावृषणामनीषाम्। अद्यूत्येवसेनिह्वयेवांवृधेचनोभवतंवाज
सातौ २४ द्युभिरक्तुभिःपरिपातमस्मानरिष्टेभिरश्विनासौभगेभिः तन्नोमित्रोवरुणोमामहन्ताम
।।अदितिःसिन्धुःपृथिवीउतद्यौः २५ २

वचनेरूपं। वृषणा। वृषणौ। वाषपूर्वस्यनिगमे इति उपधादीर्घाभा
वः। वृधेर्वर्धनंवृत्। संपदादित्वात्भावेक्विप्। द्युभिरक्तुभिः। हेअश्विना। अश्विनौ। द्युभिः रात्रिभिः। सप्तम्यर्थेतृती
या। दिवसेरात्रिषुच। अहोरात्रंअस्मान्परिपातंसर्वतोरक्षतंकैः। सौभगेभिः। सौभगैः। भगइतिधननाम। शोभनैः धनैः
। किंभूतैः। अरिष्टेभिः। अनुपहिंसितैः। आंवड्डितैर्धनैरस्मान्तत्तनमित्यर्थः। किंच। मित्रवरुणाः। अदितिः सिंधुः स
मुद्रः। उतापिचद्यौः। एतेनोस्माकंतत्भवत्कृतंरक्षणं मामहंतां। पूजयंतां। अनुमन्यंतामित्यर्थः। ह्वरिति अह्वाना
म। अक्तुरितिरात्रेः। मामहंतां। महपूजायां। बहुलंछन्दसीति शपः श्लुः श्लाविति द्वित्वं। अजादेर्दीर्घोभ्यासस्य

आकृष्णेन। आ। कृष्णेन। आ रात्रि। रात्रिदेवत्या पथ्या। बृहती। हे रात्रि पितुः पार्थिवं रजः पृथिवीसंबंधी लोकः पि-
तुः मध्यमलोकस्य धामभिः स्थानैः सह आ अप्रापि। समंतात् सूर्येण। या च त्वं दिवो द्युलोकस्य सदांसि स्थानानि बृहती
१८८ महती वितिष्ठसे आक्रमसे। व्याप्नोषि। तस्मात् त्वत्त आवर्तते तत्रापि प्रवर्तते। किंभूतं तमः त्वेषं दीप्तं महत्
प्रागभावमित्यर्थः। रजः शब्दो लोकवचनः। अप्रापि। आपूरणे। कर्मणि। लुङि। चिणि रूपं। उषस्तत्। उषो देवत्या परो-
ष्णिक्। हे उषः देवाहूतौ वति अन्नवति अस्मभ्यं तत् प्रसिद्धं चित्रं चायनीयं आस्पृह्यं कारि महनीयं धनं आभर।

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि प-
श्यन् ३१ आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः दिवः सदाꣳसि बृहती वितिष्ठस आ त्वेषं वर्त-
ते तमः ३२ उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति येन तोकं च तनयं च धामहे ३३ प्रातरग्निं प्रातरि-
न्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रु-
द्रꣳ हुवेम ३४

आहराद्देहि। येन धनेन वयं तोकं पुत्रं तनयं पौत्रं च सर्वसंतानवर्गं धामहे दधामहे पुष्णीमः। धामहे दधातेश्छपो
लुकि रूपं। प्रातरग्निं। जगती बहुदेवत्या। प्रातः शब्दो वीप्सावचनः। वयं प्रातः प्रातः पुनः पुनः एतान् देवान् हवा-
महे। आह्वयामः इति प्रत्येकं संबध्यते। कान्। अग्निं। इंद्रं। मित्रावरुणौ। अश्विनौ। भगं। पूषणं। ब्रह्मणस्पतिं। सो- १८८
मं। उत अपि च रुद्रं हुवेम। आह्वयाम। हवामहे। हुवेम। ह्वयतेः संप्रसारणे रूपद्वयं १८

प्रातर्जितं । पंचभगवदैश्वर्यादिगुणभः । वयं तं भगं आदितेः हुवेम । आह्वयाम । किंभूतं । प्रातर्जितं । प्रातर्जयतीति प्रातर्जित् तं
प्रातर्जयनशीलं । उग्रं उत्कृष्टं उद्गूर्णं दानं वा । अदितेः पुत्रं तनयं तं कं । यो विधर्ता । जगतो धारयिता पंचस्वाध्रश्चित् । चि
च्छेद्यो ध्वंस्यः । तथापि तारियेत्तस्मै । न तत्यति मन्द्रायः । न जो दीर्घ स्यादेतः । यद्वा आसमन्तादध्य आध्रः । यद्वा आध्र एवाध्रः ।
स्वार्थेन हितः । आध्रः अल्पमतः बुभुक्षितो दरिद्रो वा पि यं भगं भक्ति भजन स्वार्था उदयमित्याह । किं कुर्वन् । मन्यमानः पूज
यन् स्वार्थसिद्ध्यं । मन्यतिरर्चतिकर्मा । सहि स्तुर्योदय्येभितादिना किंचल्लभते । न तु उदयं वांछति । तुरश्चित् अस्तुरेपि
यं भगं समानाभक्ति उदयं भजेत्याह । त्विषेतनम्रत्वात्यात् । रोगिणी रात्रिः कष्टेन याति । यद्वा तुरो यमः । सहि

प्रातर्जितम्भगमुग्रं हुवेमवयम्पुत्रमदितेर्योविधर्ता आध्रश्चिद्यम्मन्यमान
स्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ३५ भगप्रणेतर्भगसत्यराधोभगेमान्धियमुदवा
ददन्नः भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवन्तःस्याम ३६

मारणाय इत्यति गच्छति । राजा चित् । राजापि यं भगं भक्ति । इत्याह । तु दयेहिरत्नं अवहारदर्शनादि । न सर्वं इह सिद्धि
। भवति भजतेः शपि लुप्ते लङि मध्यमे रूपं । भगप्रणेतः । हे भग । हे प्रणेतः । प्रकर्षेण नयति प्रापयतीति प्रणेति प्रणे
ता । तस्य संबोधने हे प्रणेतः । आदेशाद्युतः संबोधनं । हे भग । हे सत्यराधः । सत्यं अल्प सबंराधोधनं यस्य स सत्यराधाः । ते
स्य संबुद्धौ हे सत्यराधः हे भग । त्वं । ददत् धनं प्रयच्छन् नोस्माकमिमां धियं प्रज्ञां कर्म वा उद्व । उद्गमय यथा सत्कार्या स्यात्
मतायात् कुर्विति भावः । किं च । हे भग नो स्माना भिः । अश्वैः प्रजनय मुंवर्द्धय । गाः अश्वां अश्व हून देहीत्यर्थः । हे भग वयं नृ

उतेदानीं। हे मघवन् धनवन्। विद्युत्सम्पिन्व वयमिदानीं भगवंतः धनवंतो भगवंतो वा स्याम भवेम। उतापि च पूर्वस्य प्रा
पित्वे प्रपतने अस्तमये भगवंतः स्याम। उत अह्नाम् मध्ये मध्यंदिने भगवंतः स्याम। उत सूर्यस्य उदिता। उदिते उदयसमये भगा
१४९ वंतः स्याम किं बहुना सर्वदा अस्माकं धनवत्ता। भवत्वित्यर्थः। किंच। देवानां सुमतौ कल्याण्यां बुद्धौ वयं स्याम। देवा अस्मा
149 सु शोभनामनुग्रहविषयां बुद्धिं दधत्वित्यर्थः। भग एव। हे देवाः भग एव भगवान् धनवानस्तु। किमस्मादात्तमिधि नि
मित्ते वै विति भावः। तेन भगदत्तेन धनेन वयं भगवंतः स्याम। एवं देवानुक्त्वाथ भगमाह। हे भग सर्वो जन सर्व एव जनः

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्। उतोदिता मघवन् सूर्यस्य वयं देवा-
नां सुमतौ स्याम ४ भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम। तं त्वा भग स-
र्व इज्जोहवीति स नो भग पुरएता भवेह ५ समध्वरायोषसो नमन्त दधिक्रावेव शुचये प-
दाय। अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ६

ते प्रसिद्धं त्वां जोहवीति। अत्यंतमाह्वयति। उ इत्यवधारणे। हे भग स त्वं इह नोऽस्माकं कर्मणि पुरएता। पुरोगंता नेता वा
नाग्रयायी भव। अग्रेसरो भूत्वा सर्वकार्याणि साधयेत्यर्थः। समध्वराय। उषसः। प्रातःकालाधिष्ठातारो देवाः। अ-
ध्वराय यज्ञाय संनमन्त। संनमंते नम्रीभवंति। कथमिव। दधिक्रावा अश्व इव। यथा अश्वः शुचये पदाय गन्तव्याय स्था-
नार्थं शुचिपदं। वसूनि धनानि विंदतीति वसुविदः ऋगुपथ्येनिकः। यथा वाजिनो वा अश्वा रथमावहंति तद्वत् ६
रामराम

१४५

अश्वावतीः उषोदेवमात्रिष्टुप् । उषसः सर्वं सदा कालेनास्मान् उच्छन्तु । अज्ञानलक्षणात् पाशं मोचयन्तु । उच्छी विवासे । किंभू
ता उषसः । अश्वावतीः । अश्ववत्यः । गोमतीः । गोमत्यः । वीरवतीः । वीरवत्यः । भद्राः । भन्दनीयाः । कल्याणरूपा । घृतेन अ
वश्यायजपाद्ध । हे उषसः यूयं स्वस्तिभिः अविनाशैः सदा नोऽस्मान् पात पालयत एधेन वाहैयो संपाणायत्री त्रिष्टुभो
हे ऋषन । नवप्रेतेकर्माणी वर्तमाना वयं कदाचन कदापि न रिष्याम न विनश्येम । किंच । इन्द्रक मणिने न वर्णितार:
स्तुतिकर्तारः स्मसि भवामः । इन्द्रेतोमसि पथस्पथः । पथस्पथः अर्कं देवमभ्यानट् । अभिव्याप्नोति । किंभूतः । कामेन का
म्यते इति कामं । तेन वांछितेन वचसा वेदरूपेण कृतः अभिमुखीकृतः । किंभूतं अर्कं । पथस्पथः मार्गस्य मार्गस्य

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्ति
भिः सदा नः ॥ ७ ॥ एषेन्नवप्रेतेवयं न रिष्येम कदाचन स्तोतारस्तऽइह स्मसि ॥ ८ ॥ पथस्पथः परिप
तिं वचस्या कामेन कृतो अभ्यानळर्कम् स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा १

सर्वेषां मार्गाणां परिपतिं स्वामिनं । सः पूषा नो किं रासत् शुरुधः । शुचं रुधन्तीति शुरुधः वर्णनाशाः एतेषां दस्य दिवा
न । शोकनाशकानि साधनानि रासत् ददातु । लिङ् व्यत्ययः । किंभूताः शुरुधः चन्द्राग्राः । चन्द्रमाल्हादकमग्रं
यासां ताः । साधने कृते न आल्हादो भवति । पुनः पूषा धियंधियं । कर्माणि सर्वाणि प्रसाधयति । प्रकर्षेण साधयतु
पथस्पथः । धियंधियां मतिनि न्यवीपत्ययादि तिद्दितं । वचस्या । विभक्तेर्याटेशः । आनट् व्याप्तिकर्मसु दशमस्त्वं अयंपठि
ताः स्पृश्याति । साधयंतसिधो । साधनस्तुः स्कारसः । हिवां लेटोऽडाटौ । तुजादीनां दीर्घो । भ्यासस्य मुपयाहुलकं छादसः २

त्रीणि पदा। वैस्नव्यौ गायत्र्यौ। द्वयोर्दृचोरेकवाक्यं। यो विस्नुः यत्रः त्रीणि। पदानि विचक्रमे। विक्रान्तवान्। अग्निवाय्वादि
स्थानेषु पदानि न्यासवान्। किं भूतो विस्नुः गोपाः जगतो रक्षकः। अदाभ्यः। अहिंस्यः। किं कुर्वन्। अतः अस्मात् देवयज
१५० नात् धर्माणि पुण्यानि कर्माणि धारयन्। धर्ममस्त्रियां। तद्विप्रासः। तस्य विस्नोर्यत् परमं पदं ब्रह्मलक्षणं त
त्विप्रासः विप्रा ब्राह्मणाः समिन्धते। णिलोपः। सामिन्ध्यं निर्दोषयंति उपासते इत्यर्थः। किं भूताः। विप्राः। विपन्य
वः। विगतः पणुः संसारव्यवहारो येभ्यः। निःकामाः। जागृवांसः। जागरणशीलः। अप्रमत्ताः ज्ञानकर्मसमुच्च

त्रीणि पदा वि चक्रमे विस्नुर्गोपा अदाभ्यः अतो धर्माणि धारयन् ४३ तद्विप्रासो विपन्यवो जागृ
वांसः समिन्धते विस्नोर्यत्परमम्पदम् ४४ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे
सुपेशसा द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ४५

यकारिण इत्यर्थः। घृतवती। जगती। द्यावापृथिवी देवते। या। वा पृथिवी द्यावापृथिव्यौ। वरुणस्यादित्यस्ये
स्य धर्मणा धारणेन धरणशक्त्या विष्कभिते। स्तम्भिते। स्कम्भाति हि लोकरणार्थः। वरुणेन स्वशक्त्या दृढीकृते
इत्यर्थः। किं भूते। घृतवती। उदकवत्यौ। घृतमित्युदकनाम। भुवनानां भूतजातानां अभिश्रिया। अभिश्रियौ। आ
श्रयणीये। अभिश्रीयेते। अभिश्रियौ। कर्मणि क्विप्। विभक्तेराकारः। उर्वी उर्व्यौ। विस्तीर्णे। पृथ्वी। पृथ्व्यौ। पृथु १५०
ले। आयामविस्ताराभ्यां महत्त्वं विपाणाहृपेनोक्ते। मधुदुघे। मधु उदकं तस्य दोग्ध्र्यौ। सुपेशसा। सुरूपा। अजरे
जरारहिते। भूरिरेतसा। भूरि रेतो पयो ययोस्ते भूरिरेतसे। बहुरेतस्के। सर्वभूतानां हितेनाभिनाभ्यामेवाशस्यंते २२

150

येनः जगतीलिंगोक्तदेवता येनोऽस्माकं शत्रवः ते अपभवंतु अपगच्छंतु वीर्यानिरुद्धा मा भवंतु पराभवं यांत्वित्यर्थः यतो वयं तान्
सपत्नान् इंद्राग्निभ्यां त्वा अवबाधामहे इंद्राग्निबलेन नाशयामः किंच वसवोऽष्टौ रुद्रा एकादश आदित्या द्वादश एते मां
एतादृशं अक्रन् कुर्वंतु कीदृशं उपरिस्पृशं उपरि स्पृशतीति उपरिस्पृक् तं उच्चस्थानस्थितं उग्रं उत्कृष्टं चेत्तारं ज्ञातारं तेषां अधि
राजं अधिकश्चासौ राजा च अधिराजस्तं अधिपतिमीश्वरं कुर्वंत्वित्यर्थः आ नासत्या जगती अश्विदेवत्या हे नासत्यौ नासत्यौ हे अ
श्विनौ त्रिभिः एकादशैः त्रिगुणैरेकादशभिस्त्रयस्त्रिंशत्संख्याकैः देवेभिः देवैः इह स्थाने मधुपेयं सोमपानं प्रति आयातां आग

येनः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् वसवो रुद्रा आदित्या उपरि॰
स्पृशं मोग्रं चेत्तारमधिराजमक्रन् ४६ आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यात॰
म्मधुपेयमश्विना प्रायुस्तारिष्टं नीरपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभु
वा ४७ ॥

च्छतं मधु सोमस्तस्य पेयं पानं किंच आयुः प्रतारिष्टं वर्द्धयतमित्यर्थः प्रवर्द्धयतं रपांसि पापानि निर्मृक्षतं निःशेषं शोधयतं तेना
शयतमित्यर्थः द्वेषः दौर्भाग्यं सेधतं षधु गत्यां गमयतं नाशयतं सचाभुवा भवतं सचा इत्यव्ययं सदार्थे सचा सह भवतस्तौ
सचाभुवौ क्विप् कार्यं च संयुक्तौ भवतं अष्टौ वसव इत्यादिना त्रयस्त्रिंशद्देवा गणिताः तारिष्टं तरतेर्लुङि मध्यमद्विवचनं
बहुलं छंदसि माङ्योगेऽपीति अडभावः मृक्षतं मृज्ज्व शुद्धौ लेट्यजटौ सिप् बहुलं लेटीति सिप् तस्य सिब्बहुलमिति व्य
त्ययेन घसः तमादेशः २३

१५१ 151 एषव मारुतीत्रिष्टुप् हेमरुतः कारोकर्तुर्यजमानस्यएषः स्तोमः इयंचगीः सत्याचवोयुष्मभ्यं युष्मदर्थंवर्ततइतिशेषः किं
भूतस्यकारोः मांदार्यस्य मोममेतिस्वस्वामिसेवंयंदारयतिइतिमांदार्यः तस्यवीतरागस्येत्यर्थः यद्वा मांदारयतीत्येवंयः शत्रू
णांप्रत्ययमादयातिसमांदार्यः यद्वा मंदारुःकल्पवृक्षः तत्तुल्योमांदार्यः तस्यअर्थिकामपूरकस्येत्यर्थः मान्यस्य मानार्ह
स्य किंच हेमरुतः यूयंइषा अन्नेननिमित्तेन आयासीष्टआगच्छत किमर्थं वयां वयसे आमिति लोपश्चार्षः वान्ययो॰

एषवस्तोमोमरुतऽइयङ्गीर्मान्दार्यस्यमान्यस्यकारोः
एषायासीष्टतन्वेवयांविद्यामेषंवृजनञ्जीरदानुम् ५५

वनस्याविराणेवयसांसंबंधिनेतन्वेशरीराय सर्वदाशरीरस्वास्थ्यर्थः अस्मच्छरीरंदृढं कर्तुमितिभावः किंच इषंअन्नंवृ॰
जनंचबलंचवयंविद्यामलभेमहि किंभूतं इषं वृजनं च जीरदानुं जीरयतीतिजीरदानुस्तं जीवेरोणादिकारदानुप्रत्ययः
लोपाव्योर्वलीतिवलोपः जीवितदानंबलंअन्नंचवयंप्राप्नुयामेतिप्रार्थना २५ ॥

सहस्तोमाः ऋचिस्तुष्टिशतिपादिका त्रिष्टुप् दैव्याः सप्तऋषयस्य देवस्य प्रजापतेः इमे दैव्याः प्रजापतिप्राणाः अभिमानिनः सप्त ऋषयः भर
द्वाजकश्यपगोतमात्रिवसिष्ठविश्वामित्रजमदग्निसंज्ञाः अन्वालेभिरे स्पृष्टवंतः सृष्टियज्ञमितिशेषः किं कृत्वा पूर्वेषां पंथां पंथानं अनु
दृश्य अथस्तनकल्पोत्पन्नानामवसिताधिकाराणां मार्गं विलोक्य पूर्वकल्पोत्पन्नैः ऋषिभिर्यथा स्पृष्टं तथा स्पृष्टवंत इत्यर्थः सूर्या
चंद्रमसौ धाता यथापूर्वमकल्पयदित्युक्तेः कथमिव रथ्यो न रश्मीन् नकार उपमार्थः रथे साधुः रथ्यः सारथी रथ्यो यथा इष्टदेशप्राप्त्य
र्थं प्रथमं रश्मीन् प्रग्रहान् आलभते स्पृशति सृजति वा तथा तेपि सृष्टियज्ञं स्पृष्टवंतः किंभूता ऋषयः सहस्तोमाः स्तोमसहिताः

सहस्तोमाः सहछन्दसः आवृतः सहप्रमाः ऋषयः सप्त दैव्याः पूर्वेषाम्पन्थामनुदृश्य
धीराः अन्वालेभिरे रथ्यो न रश्मीन् ४९ आयुष्यं वर्चस्यँ रायस्पोषमौद्भिदम्
इदँ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ५० ॥ ॥

सहछंदसः छंदोभिर्गायत्र्यादिभिः सहिताः आवृतः अत्रापि सहशब्दाध्याहारः आवृच्छब्देन कर्मोच्यते सहावृतः कर्मसहिताः
ऋह्यामतत्वप्रयोगानां कर्मणामनुष्ठातारः सहप्रमाः प्रमाणं प्रमाः तत्सहिताः शब्दप्रमाणपरीक्षणतत्पराः धीराः धीमंतः आयु
ष्यं तिस्र उष्णिक्पारी त्रिष्टुभः दक्षदृष्टाः हिरण्यस्तुतिः इदं हिरण्यं कनकं जैत्राय जयाय मा मां उ मामेवाविशतात् आविशतु
मयि तिष्ठतु कीदृशं आयुष्यं आयुषे हितं वर्चस्यं वर्चसे तेजसे हितं रायो धनस्य पोषः पोषयितृ वर्द्धकं औद्भिदं उद्भिनत्तीति उ
द्भित् उद्भिदो वा औद्भिदं उद्धृतं धनस्य च स्वर्गस्य वा प्रकाशकं वर्चस्वत् अन्नसंयुक्तं ५० ॥ ॥ ॥

१५२ नतत् रक्षांसिपिशाचाश्चतरन्ति हिरण्यंनतरंतिनहिंसंति हियस्मात्एतत्हिरण्यंदेवानांप्रथमजंओजः प्रथमोत्पन्नंदेवानांतेजएवेदं
अतएवयोहिरण्यंदाक्षायणंबिभर्ति अलंकारत्वेनधारयति दाक्षायणशब्दालेकारोधिः सदेवेषुदेवलोकेषुदीर्घमायुःकृणुतेकु॰
रुते देवलोकेचिरंवसतीत्यर्थः सचमनुष्येषुदेवलोकेषुस्वमायुर्दीर्घंकृणुते मनुष्यायुरतिक्रम्यजीवति यदाबध्नन् दाक्षायणा
152 दक्षस्यापत्यानि नक्षत्रादित्वात्फक् दक्षवंशोत्पन्नाब्राह्मणायत्हिरण्यंशतानीकायजराजेआबध्नन् बबंधुः शतंबहूनिअनीकानि
निसैन्यानियस्यसशतानीकस्तस्मैकिंभूताः दा॰ सुमनस्यमानाः मनसिशोभनंध्यायंतः शोभनेमनःकुर्वंतेसुमनस्यंते सुमनस्यंते

नतद्रक्षांसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳ ह्येतत् योबिभर्तिदाक्षाय
णꣳ सदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः ५१ यदाबध्नन्दा
क्षायणाहिरण्यꣳ शतानीकायसुमनस्यमानाः तन्मऽआबध्नामिशतशारदा॰
यायुष्माञ्जरदष्टिर्यथासम् ५२ उतनोहिर्बुध्न्यः शृणोत्वजःएकपात्पृथिवीस॰
मुद्रः विश्वेदेवाऽऋतावृधोहुवानास्तुतामन्त्राःकविशस्ताऽअवन्तु ५३ ॥

तेसुमनस्यमानाः तत्हिरण्यंमेमयिआबध्नामि किमर्थंशतशारदाजीवनाय यथायेनप्रकारेणहिरण्यबंधनाख्येनअहंआयुष्मा
न्दीर्घजीवीजरदष्टिश्चआसंभूयासं तथाआबध्नामि जरत्जराअष्टुतेव्याप्नोतिजरदष्टिः यद्वाजरतीजराप्राप्ताअष्टिःशरीरंयस्य
सजरदष्टिः उतनः बहुदेवत्यात्रिष्टुप् उतअपिचअहिर्बुध्न्यरुद्रविशेषः शृणोतु नःअस्माकंवचांसीतिशेषः अजएकपात्रुद्रःप्रा
णोवाशृणोतु पृथिवीचशृणोतिसमुद्रश्चशृणोतु विश्वेदेवाश्चशृण्वन्तु ऋतावृधः ऋतंयज्ञंसत्यंवावर्धयंतिऋतावृधः किंभू
तास्तेऋतावृधः सत्यस्ययोवाहुवानाआह्वयमानाः मंत्राःमंत्रैरितिविभक्तिव्यत्ययः स्तुताःकविशस्ताःमेधाविभिःशंसिताः २६ ॥

इमांगिरः आदित्यदेवत्यात्रिष्टुप् इमांगिरोवाचः जुह्वास्रुवाकृत्वाआदित्येभ्योजुहोमि स्तुतिलक्षणावाणीबुद्धिरूपयास्रुवादित्येभ्यः
समर्पयामीत्यर्थः किंभूतागिरः घृतस्नूः घृतंस्नुवंतिस्नुवंतिताः घृतस्नवः ताघृतस्नूः नगभावश्चार्षः घृतप्रसारिणीघृतहोमसदृ
वरितावा किंभूतेभ्यआदित्येभ्यः सनात्चिरकालेराजभ्यः ताः स्रुवाहूयमानागिरानोऽस्माकंगिरः शृणोतु कः मित्रः अर्यमाभग
श्च तुविजातोवहुजातः तुष्टावातोवासदिवहुशाः प्रजापते वरुणः दक्षः अंशश्च एतेसूर्यविशेषाः सप्तऋषयः अध्यात्मवादिनो

इमांगिरःऽआदित्येभ्योघृतस्नूः सनाद्राजभ्योजुह्वाजुहोमि शृणोतुमित्रोऽअर्यमाभगोनस्तु
विजातोवरुणोदक्षोऽअंशः ५४ सप्तऽऋषयः प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्र
मादम् सप्तापः स्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ५५ ॥ ॥

जगतीसप्तर्षयः प्राणात्वक्चक्षुः श्रवणरसनाघ्राणमनोबुद्धिलक्षणाः शरीरेप्रतिहिताः व्यवस्थिताः तएवसप्तसदंसदाकालंअप्र
मादंसावधानेयथातथाशरीरंरक्षंति तेसप्तस्वपतोनरस्यलोकमात्मानंईयुः प्राप्नुवंति लोकशब्देनविज्ञानात्मात्हृदयाकाशप्रति
ष्ठउच्यते किंभूताः सप्तआपः आप्नुवंतिदेहमित्याप व्यापनाः तत्रतस्याऋषीणांलोकगमनावस्थायांदेवौदीप्यमानौप्राणापानौ
जागृतः जागरणंकुर्वीते कीदृशौ अस्वप्नजौ नस्वप्नोनिद्राजायतेययोस्तौअस्वप्नजौ तथासत्रसदौ सतांजीवानांत्राणंसत्रंतत्र

३५४

१५२

153

उत्तिष्ठ त्वचो ब्रह्मणस्पतिर्देवतः हे ब्रह्मदृष्टा तृतीया त्रिष्टुप् हे ब्रह्मणो वेदस्य पते पालक उत्तिष्ठ ऊर्ध्वः आरब्धकार्यो भव यतो वयं
देवयन्तो देवान् कामयमानाः त्वा त्वां ईमहे याचामहे आगच्छेति मरुतः भवन्ते आगच्छन्तु उप समीपे प्रयन्तु आगच्छन्तु किम्भूता मरु
तः सुदानवः शोभनं ददातीति सुदानवः हे इन्द्र त्वमपि सचा सहगमनाय प्राशूः प्रकर्षेण शीघ्रो भवति देवान्कामयन्ते देवयन्ति
तत्र शतृप्रत्ययः सुप आत्मनः क्यच् न छन्दस्यपुत्रस्येति निषेधात् क्यचि नित्याभावः अस्वायस्यादित्यस्यायोरेवाद्दीर्घोपि नस्या

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा स
चा ५९ प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् यस्मिन्निन्द्रो व
रुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ५

त ईमहे याचतिकर्मसु पठितः ईङ्गतो दिवादित्वादागतस्य शपन् श्लुक् छान्दसो लोपः सुदानवः दाभ्याम्भ्यान्तः यास्कः आतृशः
ह्वो दीर्घश्छान्दसः भवा संहितायां द्व्यचोतस्तिङ इति दीर्घः प्र नूनं ब्रह्मणस्पतिः नूनं निश्चितं उक्थ्यं शास्त्रयोग्यं मन्त्रं प्रवदति प्र
कर्षेणोच्चारयति यस्मिन्मन्त्रे इन्द्रः वरुणः मित्रः अर्यमा अन्ये च देवा ओकांसि निवासान् चक्रिरे कृतवन्तः सर्वे देवा या
रम्भन्ते शस्त्रे वपठनीयं मन्त्रं मवदति त्यर्थः २५ ((कार्यविधानादस्तास्त्वं यान्तकयोरिति))

ब्रह्मणस्पते हे ब्रह्मणस्पते त्वं यन्तोस्य जगतो यन्ता नियन्ता अतः प्रार्थ्यते सूक्तस्यास्मदुक्तस्य साधुवचनस्य कर्मणि षष्ठी सूक्तं बोधि बुध्यस्व अस्मदुक्ता स्तुतिर्भवता ज्ञायतामित्यर्थः तनयं च अस्मदपत्यानि जिन्व प्रीणीहि जिन्वतिः प्रीतिकर्मा देवा यत् भद्रं कल्याणं अवन्ति पालयन्ति तत् विश्वं सर्वं भद्रं अस्माकमस्त्विति शेषः किंच सुवीराः कल्याणपुत्राः सन्तो वयं विदथे यज्ञे बृहत् वदेम दीयतां भुज्यतामित्यादि उच्चारयेम अथवा तस्य कण्डिकाः प्रतीकोक्ताः य इमा विश्वा भुवनानि जुह्वत् विश्वकर्मा विमनाः यो नः पिता इ अन्नपतेन्नस्य नो देहि इति च ४ ता ब्रह्मयज्ञे ज्ञेयाः श्रीमन्महीधरकृते वेददीपे मनोहरे चतुस्त्रिंशोऽयमध्यायो ब्रह्मयज्ञार्थकोऽगमत् ३४ चतुस्त्रिंशाध्याये सर्वमेधसंबंधिनः कियन्तो मंत्रानुक्त्वा प्रभ्याधीतान्मंत्रानुक्त्वा प्रवाप्यमके त्वारभ्यानारभ्याधीतान्मंत्रानुक्त्वा चतुस्त्रिंशाध्याये

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः य इमा विश्वा विश्वकर्मा यो नः पितान्नपतेन्नस्य नो देहि ५८ इति संहितापाठे चतुस्त्रिंशोऽध्यायः ३४ ॥ ॥

चतानेव समाप्येदानीं पंचत्रिंशोऽध्याये पितृमेधसंबंधिनो मंत्रा उच्यन्ते स च पितृमेधो मृतस्य वर्षास्मरणे भवति वर्षे स्मृतेतु विषमवर्षेषु भवति एकतारके नक्षत्रे चित्रादौ दर्शे वा ग्रीष्मे शरदि माघे भवति पितृमेधं करिष्यता द्विजेन कुंभेऽस्थिसंचयः कार्यः मृतस्य वपावन्तो मान्य पुत्रपौत्राः स्नातवन्तः कुंभाः कर्मदिने आनेयाः कुंभेभ्योधिकानि छत्राणि च ततोऽरण्ये कुंभे कृतमस्थिसंचयनं ग्रामसमीपे समानीय शाख्यायां कुंभस्थापनादूतं वस्त्रैकदेशेन संवेष्टा लोढ्मप वादित्रेषु वाद्यमानेषु वीणायां च वाद्यमानायां मृतस्य पुत्रपौत्रा उत्तरीयैर्व्यजनेनास्थि कुंभे वीजयन्तस्त्रिः प्रदक्षिणं परयंति स्त्रियो पीति केचित् रात्रेः पूर्वमध्या.

१५४ त्य गीतवादित्राणि च कारयेति आस्यिकुंभमायान्तमुपदद्यंतीति च ततउपस्थानं दस्युकुंभसहिताः पूर्वोक्तानकुंभान् छत्राणि चादाय ग्रा
मादक्षिणस्यां वहिर्गच्छेत्युः यजमानामात्याः स्मशानोत्तेकर्मकुर्वतो यथा विरूढं स्युः तथा राजा वा रक्षेत् तत्र वने गत्वा ग्रामा
न्मार्गो स्वच्छ्रितिनिशाहेतिदुर्मूहूर्तं कर्तृ विभीतकश्लेष्मातककोविदारादिभ्यः स्मशाने स्यन्यहत्तगुल्मादिदुष्टे तेजोवक्राद्वोदकानुवणोद
क्षिणाप्रवणे समेवा स्वकाशिणिरम्य वृनादुदकाग्वा पूर्वभागेउत्तरभागे वा वर्तमाने गर्ते वर्तिवीरेणतृणवर्तिप्रदेशे शप्ते स्मशाना
र्थे दिक्कोणेषु पुरुषप्रमाणे तेत्रेमिमीत येत्ह्यो हि पुरुषे समचतुरस्रं कृत्वा कुर्याणीमध्ये पुरोकवः समाधिरिति स्फिक्त्वाक्रविधिना
तच्चतुरस्रमन्तरतः पश्चाच्च पृष्ठं भवति तत्रसाधनप्रकारः पूर्वदक्षिणपार्श्वयोर्नवांगुलानि स्वत्रयोदशांशेनांगुलचतुर्थभाग
सहितानि पुरुषप्रमाणमध्ये न्यूनानि कार्याणि ११ पश्चिमोत्तरपार्श्वयोस्तावंति पुरुषप्रमाणादधिकानि १२१ पुरुषमात्रे तत्र
स्यात्स्यायां प्राचीं कृत्वा तत्प्रांतयोः शंकू निखाय सार्द्धीष्टादशांगुलदीनां पुरुषद्वयप्रमाणमनुभयतः पाशां रज्जुमध्यप्रदेशे स
लक्षणं कृत्वा पूर्वापरयोः शंक्वोस्तस्याः पाशौ प्रतिमुच्य माध्यलक्षणेन दक्षिणतश्चापसृद्दक्षिणकोणः साधनीयः ततः सा
र्द्धाष्टादशांगुलाधिकां पुरुषद्वयप्रमाणां रज्जुमनुभयतः पाशां मध्यलक्षणयुतां कृत्वा शंक्वोः २ पाशौ प्रतिमुच्य मध्यलक्षणे
नोत्तरतश्चायम्योत्तरकोणः साध्यः इति ततः पूर्वादिकोणेषु पालाशशामीवाणास्म मपार्श्वन्तारः शंकरोति निखेयाः एतत्कर्म
तोनिकोकश्चिद्यजमानपुरुषस्तृणपूलकमच्छित्त्वा धारयेत् कर्मसमाप्तोत्स्रदमागत्य तेमदेषुच्छेयत्स्वनाह्वेथे इत्यादिवोक्ये
कात्यायनः अपसलविसृष्टयारज्ज्वा परितन्त्यापेतो यन्तिवितिपलाशशाखया मृदहतीति अपसलविअप्रादक्षिणेन त्रिष्वादि
तया रज्ज्वा नदेत्रं समन्तादप्रदक्षिणं संवेष्ट्या पेतो यन्तिलिति मंत्रेणदेत्रमध्यपतिततृणपर्णादिकं पलाशशाखया कृत्वा देत्राद्
हिर्निःकाशयतीति सूत्रार्थः ॥ ॥ ॥

अपेतः अस्याध्यायस्य पितरो देवता आदित्या ऋषयो देवा वा आद्या गायत्री पणीनिति परस्मैपदं वदन्तीति पणयोऽसुरा इतोऽपयन्तु अ
पगच्छन्तु व्यवहिताश्चेति उपसर्गस्य यन्त्विति क्रियापदेन संबन्धः किंभूताः पणयः असुम्नाः सुम्नमिति सुखनाम नास्ति सुम्नं
येभ्यस्ते असुखकराः तथा देवपीयवः पीयतिर्हिंसाकर्मा देवान्पीयन्ति हिंसन्तीति देवपीयवः देवद्विषः किमित्यसुराणाम-
पगमोऽर्थ्यते तत्राह अस्य लोकः अस्य यजमानस्याग्निभूतस्यायं लोकः स्थानं किंभूतस्यास्य सुतवतः सोमाभिषवं कृतवतः सु
षावेति सुतवान् नकारे दीर्घः द्युभिरहोभिरिति यज्ञः यमोऽस्मै यजमानायावसानं ददातु अवस्यत्यस्मिन्नित्यवसानं ददातु

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः अस्य लोकः सुतावतः द्युभिरहो
भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥१॥

अवस्यत्यस्मिन्नित्यवसानं स्थानं किंभूतं द्युभिरहर्भिरहोभिर्दिवसैरक्तुभिः रात्रिभिश्च व्यक्तं स्पष्टीकृतं द्युशब्देन ऋतवोऽक्तवक्ताः
तदेनमृतुभिश्चाहोरात्रैश्च समलोकं करोतीति श्रुतेः कृत्वा यमिष्टान्तदेवभिः प्रकटितं स्थानमस्मै यमो ददात्वित्यर्थः ॥१॥

१५५ कात्यायनः ॥ देवस्य सोउत्तरतो वाघड्वेयुज्यमाने युक्तेति संप्रेष्य सविता त इति जपतीति ततो ऽध्वर्युस्तोपलाशशाखां दक्षिणस्या-
ति परिश्रिद्भिर्वेष्टयित्वा नते त्रस्य दक्षिणत उत्तरतो वाघड्भिरनुडुद्भिः सीरं युनक्ति: तस्मिन्युज्यमाने यजमानो युक्तेति संप्रेष्य सवि
तेति मंत्रं जपति सविता ते गायत्री छेयजमान सविता सूर्यः तेन त्व शरीरेभ्यः शरीराणां विभक्तिव्यत्ययः पृथिव्या लोके स्थाने
इच्छन् सवितृत्वत्तो वितानकेनापि स्थाने शक्यते द्वितीयं वाक्यमाह तस्मै इति तस्मै सवित्रा दत्ताय देवाय संस्कारार्थं उस्रिया अनड्वा
हौ युज्यंतां युक्ता भवंतु कात्यायनः अनवज्जुचतस्रः सीता कृषति वायुः पुनात्विति प्रतिमंत्रं स्तनतरतः प्रतीचीं प्रथमामिति अध्वर्युः
परितो वेष्टितोरज्जुमनुं वलती कृत्य वायुः पुनात्विति प्रतिमंत्रं पादेन वतस्रः सीता अप्रदक्षिणं कृषति तत्र प्रथमां सीतां उत्तरपार्श्वे

सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु तस्मै युज्यन्तामुस्रियाः २ वायुः पु
नातु सविता पुनातु अग्नेर्भ्राजसा सूर्यस्य वर्चसा विमुच्यन्तामुस्रियाः ३ ॥

प्रतीचीं कृषति दक्षिणतः सीरयोजनपदे पितत्सीरमप्रदक्षिणमुत्तरत आनीय प्रथममन्तरतप एव कृषति तदपसलविपर्यांद
यो तरसः प्रतीचीं प्रथमां सीतां कृषति वायुः पुनात्विति सविता पुनात्विति जयमन्तरप एव कृषति तदपसलविपर्यासियोत्तरतः प्र
तीचीं प्रथमां सीतां कृषति वायुः पुनात्विति सविता पुनात्विति जयना द्वैन दक्षिणामग्ने र्भ्राजदोति दक्षिणार्द्धेन प्राचीं सूर्यस्य वर्चसे
त्यग्रेणोदीचीमिति श्रुतेः वायुः पुनातु चत्वारयन्त्रपिलिंगोक्तदेवतानि देह पृथिवायुः तां पुनातु विदारयतु सविता सूर्यः तां पुना
तु अग्नेर्भ्राजसा दीप्त्या सूर्यस्य वर्चसा तेजसा चत्वा विदारयतु का॰ अनडुहो विमुच्य विमुच्यंतामिति एवं पूर्वीक्तं चतुर्मंत्रपार्श्वं चतु
श्चेकर्षणं कृत्वा मध्येपि सर्वदेतेत्र यथा कृष्टं भवति तथा परिमिताः सीताः कृत्वा वृषभान्सीराद्विमुंचति विमुच्यंता यजुः हृषदेवते

उत्तरयोः तदपसलविपर्यासियोत्तरतः प्रतीचीं प्रथमामिति कृषति २

का० दक्षिणासीरं निरस्याः स्त्रकेव इति सर्वौषधं वपतीति हलं दक्षिणादिशि तत्सीरं प्रति अङ्गुष्ठदेशे मध्ये सर्वौषधं वपति अङ्गुष्ठे:
यः अनुष्टुप् व्याख्याता का० समिता त इति शरीराग्रणीनि वपति मध्ये इति तस्य पुरुषमात्रस्याङ्गुष्ठस्य देशस्य मध्ये शरीराणि
सृतस्यास्थीनि राशीकरोति एतच्च सूर्योदयसमकालं कर्तव्यं यथा ऊर्ध्वं तावदुदियादिति ऋक्तेः सविता ते गायत्री सवितृदेवत्या
हे यजमान सविता सूर्यः ते तव शरीराणि अस्थीनि मातुः पृथिव्या उपस्थ उत्सङ्गे आवपतु स्थापयतु हे पृथिवी अस्मै तस्मै सवित्रे ओषधि

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता गोभाजः इत्किलासथ यत्सनव
थ पूरुषम् ४ सविता ते शरीराणि मातुरुपस्थः आवपतु तस्मै पृथि
वि शम्भव ५ प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ अ
अप नः शोशुचदघम् ६

व्यास्थिरूपयाय यजमानाय शं भव सुखरूपा भव प्रजापतौ त्वा उष्णिक् प्रजापतिदेवत्या अस्थीनि वापे एव विनियुक्ता असाविति
नामग्रहणं अनुदात्तत्वात् आमन्त्रितं हे देवदत्त उपोदके उपसमीपे उदकं यस्य स उपोदकस्तस्मिन् उदकसमीपवर्तिनि लोके स्थाने
प्रजापतौ देवतायां त्वां निदधामि स्थापयामि स प्रजापतिर्नः अस्माकं अघं पापं अपशोशुचत् अत्यर्थं दहतु शुचि शोके यङ्
लुगन्तं रूपं ३ ॥

१५६ 156 का॰ प्रत्यागतेपरंमृत्यवितिजपतीति दक्षिणांगत्वावृक्षमूलकुंभंप्रक्षिप्यैहीतिकश्चिद्द्विजः प्रेषितोस्तितस्मिन्कुंभंक्षिप्त्वाप्रत्यागतेस
तियजमानोऽध्वर्युर्वाजपति परंमृत्यो मृत्युदेवत्यात्रिष्टुप्संकसुकदृष्टा हेमृत्योपरा पराङ्मुखोभूत्वापरं अन्यंयथापंथानंमार्गं
अनुविदिम्यअनुगच्छ तमेवदर्शयति यस्तेतवस्वकीयः पंथादेवयानात्पथइतरःभिन्नः अन्यःपितृयानाख्यः देवयांतियस्मिन्सदे
वयानः किंच चक्षुष्मतेज्ञानिनेशृण्वतेचतेतुभ्यंमृत्योकिंचिद्ब्रवीमिवदामि आदरार्थंवचनं नहितस्यादृष्टमश्रुतंवास्ति पृष्टार्थं
चतचक्षुष्मतःशृण्वतस्तववदामि किं हेमृत्योनोऽस्माकंप्रजामपत्यानिवंशपरंपरामारीरिषः माहिंसीः रिषवधे स्वार्थेणिजं॰

परंमृत्योऽअनुपरेहिपन्थांयस्तेऽअन्यऽइतरोदेवयानात् चक्षुष्म
तेशृण्वतेतेब्रवीमिमानः प्रजाꣳरीरिषोमोतवीरान् ७ शंवातः
शꣳहितेघृणिः शन्तेभवन्त्वग्नयःपार्थिवासोमात्वाभिशूशुचन् ८

तस्मात्तङिरूपं उत अपि च वीरान्पुत्रान्माहिंसीः का॰ शंवातइतियथांगंकल्पयित्वैकेष्टकांनिदधातिमध्येतूष्णीमिति शंवातइति
मंत्रद्वयेनतानिमध्येतूष्णीमस्थीनियथांगंकल्पयित्वायदस्थियस्यांगस्यतेनास्थ्नातदंगकल्पनयाप्राक्शिरसंपुरुषाकृतिंकृत्वा
तन्मध्येपादमात्रीमिष्टिकामेकांतूष्णींनिदधाति शंवातइतः हे ऋचाववनुष्टुप्बृहत्यौदृष्टौविश्वदेवदेवते हेयजमानवातोवायुस्ते॰
तवशंसुखरूपोभवतु हिपुनःघृणिःसूर्यकिरणस्तेतवशंसुखरूपोस्तु इष्टकामध्येप्रतिदिशंचतस्रःप्रदिशास्तेतवशंसु
खरूपाभवंतु अग्नयेश्चितेशंभवंतुपार्थिवाःपृथिव्यांभवाश्चाग्नयःत्वात्वांमाअभिशुशुचन्माशोचयंतुअभितापयंतु॰ ८ ॥

किंच कल्पंतां ते दिशस्तुभ्यं त्वदर्थं कल्पंतां क्षमा भवंतु आपो जलानि तुभ्यं शिवतमाः कल्याणकारिण्यो भवंतु सिंधवः समु
द्राश्च शिवतमास्तुभ्यं भवंतु अंतरिक्षमाकाशं तुभ्यं शिवं कल्याणकारि भवतु सर्वा दिशस्ते तुभ्यं कल्पंतां आदरार्थं कात्स्न्यार्थं
वा पुनर्वचनं का॰ अथ यदि गच्छंत्यश्मन्वतीरिति गच्छन्तोऽनूद्दमानीयं पूर्ववज्जुहोति दिग्भ्यः ऋक्ष्यावानूदमानीयं ततः अश्मन्वानेन विश्वस्य
सुत्वमिति तत्र स्योरोमिते स्त्रियाभगमिते स्मूदस्य जानुमिते स्त्रियाभगमिते स्मूदस्य जानुमिते स्मूदा कटत्वा शैलैः कृशोश्वप्रभृकाः
यंतहस्तिना तो गच्छेत् वालादीरादकाभ्यां संपूर्य अश्मगानो तु रेसम्यगतांस्तु वालादतिणा त्तराजलेन संपूर्यानिरगतेभ्य अथ युय

कल्पन्तान्ते दिशस्तुभ्यमापः शिवतमास्तुभ्यम्भवन्तु सिन्धवः अन्तरिक्षं शिव
न्तुभ्यङ्कल्पन्तान्ते दिशः सर्वाः ९ अश्मन्वती रीयते सं रभद्ध्वमुत्तिष्ठत प्रतरता स
खायः अत्रा जहीमो अशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान् १० ॥ ॥

जमानानामात्मा स्तीस्तीन्या पाषाणान्वदितिप्पा अश्मन्वतीरिति मंत्रेण तन्नौ परिगच्छंति अश्मन्वती विश्वदेवदेवत्या त्रिष्टुप् सुत्वी कह
ष्टा हे सखायो मित्राणि एषा अश्मन्वती पाषाणवती नदी रीयते गच्छति रीङ् गतौ दिवादिः नदीतरस्यात्मनेपदी अतो यूयं संरभ
ध्वं उत्तरणाय प्रतत्ध्वं उत्तिष्ठत अभिमुखा भवत प्रतरत प्रकर्षेण तां नदीं तरत किमिति यतोऽत्र प्रदेशे अशिवा अशोता ड्ष्टा
रात्समाद्यः असन्नासुः तान्वयं जहीमः परित्यजामः ते पुत्रके पुशिवान् सुखकरान्वाजानन्नविशेषान्वयं अस्तु तरेम प्राप्नु
याम ५ ॥

३५
१५२
157

का॰ अपाघमित्यपामार्गैरपमृजते इति तेऽमात्यायज्ञोपवीतिनोभूत्वायउपस्पृशपहस्तगृहीतैरपामार्गैः स्वशरीरंशोधयन्ते
अपामार्गवीजैरुद्वर्तयन्तीतिकेचित् अपाघे लिंगोक्तदेवतानुष्टुप्शुनःशेपदृष्टा दुःस्वप्ननाशनी हे अपामार्ग त्वं अस्मत्
अस्मतः सकाशात् अघंमानसंपापं अपसुव प्रेरय अपगमयेत्यर्थः किल्बिषं कीर्तिभेदकं कायिकं च पापमपसुव कृत्यां
परकृतमभिचारमपसुव अप उ रपः रपो विप्रमितिपापनामनी भवत इति यास्कः रपः पापं वाचिकं च अपसुव उच्चार्य दुः
स्वप्नदृष्टः स्वप्नजः स्वप्नः तत्रभवं दुःस्वप्न्यं दुःस्वप्नोद्भवं पापफलं चास्मत्तोऽपसुव का॰ सुमित्रियानस्नात्वा हतवाससोऽन्त

अपाघमपकिल्बिषमपकृत्यामपोरपः अपामार्गत्वमस्म
दपदुःष्वप्न्यं सुव ११ सुमित्रियानऽआपऽओषधयः सन्तु
दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः १२

दुपुच्छमन्वारभ्यानड्वाहमित्युद्वयमित्यागच्छन्तीति सुमित्रियाइतिमन्त्रेणस्नात्वान्यानवस्त्राणिपरिदितवंतो नड्वाहमितिमं
त्रेणवृषपुच्छमन्वारभ्यनड्वाहमित्युद्वयमित्यागच्छन्तीति सुमित्रियाइति उद्वयंतमितिमन्त्रेणयजमानामात्याग्नीमागच्छे
ति यद्यप्यत्र सुमित्रियाइतिमन्त्रेणस्नानमुक्तं तथापि सुमित्रियाइतियाऽञ्जलिनादाय दुर्मित्रियाइति द्वेष्यं परिषिंचतीति द्वेष्ये
विषेये दुर्मित्रियाऽस्म इति यामस्यदिशं द्वेष्यः स्यात्तो दिशं परासिंचेत् तेनैवतं पराभावयतीति श्रुतेः तत्र सुमित्रियाइति व्याख्याता ९

अनड्वाहं अनष्टवन्तमुद्देवता उत्तरोऽर्द्धर्चः प्रत्यक्षकृतः ततः सर्वेनाग्रोथ्याहारेणसामर्थ्यं वयंयमनड्वाहमन्वारभामहेश्माल
भेमहेस्पृशामः किंभूतं सौरभेयं सुरभ्या अपत्यं स्त्रीभ्योवगितिठक् किमर्थंस्वस्तये अविनाशायाहे अनड्वन् सत्वंनोऽस्मा
कंसंतारणस्तारकोऽडुः त्वनाशकोभाकि त्वं वह्निः देवानांवोग तत्रदृष्टांतः देवेभ्यइंद्रइव इंद्रोयथादेवार्थतारकोभवति
उद्वयंतमितिग्राममागच्छेतिव्याख्याता कां ग्रामश्मशानांतरेमर्यादालोष्टंमेहमरे निदधातीमंजीवेभ्यइति स्वनिवासग्रामं
श्मशानस्यचमध्येमार्यादालोष्टमदतरंमृतवेउअर्धर्चेवनिदधाति इमंजीवेभ्यः मन्युदेवत्यात्रिष्टुप् संकसुकदृष्टा जीवे
भ्योविद्यमानजंतुभ्यर्थंइमंपरिधिंमर्यादांदधामिस्थापयामि कथमितिचेत् एषांजीवानांमध्येअपरः कश्चिन्नगतिप्रवेदाकादा

अनड्वाहमन्वारभामहेसौरभेयꣳस्वस्तये सनःइन्द्रःइवदेवेभ्योवह्निःसन्तारणोभव १३ उद्वयन्तमसस्परिस्वःप
श्यन्तःउत्तरम् देवन्देवत्रासूर्यमगन्मज्योतिरुत्तमम् १४ इमञ्जीवेभ्यःपरिधिन्दधामिमैषान्नुगादपरोऽअर्थमेत
त् शतञ्जीवन्तुशरदःपुरूचीरन्तर्मृत्युन्दधताम्पर्वतेन १५ अग्नऽआयूꣳषिपवसऽआसुवोर्जमिषञ्चनःआरे
बाधस्वदुच्छुनाम् १६
पुरुषोऽवीक् एतदर्थेपितृलोकगमनलक्षणंकार्यमहिश्यमागच्छेत एतेजीवाःशतंशरदः
जीवंतुशतवर्षायुषोभवंतुकिंशरदःपुरूचीःपुरुबहुअंचंतीतिपुरूचाच्यः दानाध्ययनयागान्त्रुकुलाः किंच पर्वतेनलोष्टेन
वमृत्युंअंतर्हितंकुर्वंतु एतेजीवाः काः आजनेभ्यंजनेकृत्वोपादानेपरिस्तीर्यवारणान्परिस्तीर्यवारणान्परि
धीन्परिधायवारणेनस्रुवेणकामाहुतिंजहोत्ययग्न आयूंषिआयुष्यानमइतिकजलादिनानेत्राञ्जनंआजनं तैलेनपादाजनमभ्यं
जनेन तैलेनपादाजनमभ्यंजनेनहुत्वाअथोपासनंकुर्वन्त्येवसच्याभिर्दर्भैः परिस्तीर्यवारणोत्थावयवोध्मतत्रः परिधी
श्चतद्दीर्घतन्तूस्त्रीमेवपरिधायवारणेनस्रुवेणकामाहुतिंजुहोति स्वरहयेनअथोपासनः प्रतस्यैव तस्यैवहारेणानिरस्तनीप
स्यादितिहरिस्वामिनः कर्तरेवोपासनेहोमस्तस्यैकादेशान्तिरमनमितिकर्कोदयः आयआयूंषि व्याख्याता ७ ॥ ॥

आयुष्मानग्ने अग्निदेवत्या त्रिष्टुप् वैखानसदृष्टा हे अग्ने त्वं एवंभूतः एधि भव किंभूतः आयुष्मान् चिरंजीवी तथा हविषा वृधानः
वर्द्धते सो वृधानः वर्द्धमानः वृधु लेच्छंदसीति शानच् विशेषो लुक् तथा घृतप्रतीकः घृतं प्रतीकं मुखं यस्य घृतयोनिः घृतं यो
निरुत्पत्तिस्थानं यस्य उत्तरवेद्याधारणाभिप्रायमेतत् स त्वं गव्यं गोसंबंधि घृतं पीत्वा इमान् जीवान् अभिरक्षतात् अभिरक्ष
तहोस्तातङ्ङाशिष्यन्यतरस्यामिति हेस्तातङादेशः तत्र दृष्टान्तः पितापुत्रमिव यथा पिता पुत्रं रक्षति किंभूतं घृतं मधु मधुरं चारु
रुचिरं स्वाहा सुहुतमस्तु का । अथैषां परिदीं वदति परीमे गामनेषतेति अथ यजमानामात्मानां परिदीं परिदारक्षणं ततः तत्र

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि घृतं पीत्वा
मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान्त्स्वाहा ७ परीमे गामने
षत पर्यग्निमहृषत देवेष्वक्रत श्रवः कऽ इमाँ२ आदधर्षति ८

मंत्रं वदति देहपालने परिदीयते समंतात् दत्यते नेनेति परिदिः रक्षणं ते परीमे इंद्रदेवत्यानुष्टुप् भरद्वाजात्मजशिरिंबिठदृष्टा इमे
जीवा वर्गं अनड्वाहं पर्यनेषात परिणीतवंतः अनुरुसुखं कालेमनाभिप्राये नयते लुङि तङि सिचि प्रथम बहुवचनेन रूपं व्यवहिताश्चे
ति परेर्व्यवधानेन क्रियापदेन इमे जीवा अग्निं च पर्यहृषत परिहृतवंतः यस्मिन् प्रावेतनं कर्म कृतं परिजहुः अह्नानारेणोपास्य तं निर
स्यती त्येतदभिप्रायं इमे देवेषु दीव्यंति क्रीडंतीति देवा ऋत्विजः तेषु श्रवो यशनं ददति पालनलक्षणं श्रवणं अकृतवंतः अकृषतेति प्रा
प्ते मि चोलोपे अक्रतेति रूपं अतः एतैः कर्मभिः कृतकृत्यानिमान् जीवान् को नाम आदधर्षति अथ धर्षयितुं परो भविता शक्नुयात् अशक्य

प्रतिष्ठाकामयाज्यास्विष्टिः ८ ॥

का॰ अहार्येणोपासनेनेनिरस्यति क्रव्यादमिति आहुतिहोमानंतरं यत्रहुतं तस्योपासनस्यैकदेशं निरस्यति प्रेतस्यैवोपास॰
मइतिपदस्य सर्वमपि निरस्यति क्रव्यादं अग्निदेवत्यात्रिष्टुप् दमनहृष्टा येन पुरुषो दह्यते स क्रव्यात् तं क्रव्यादं अग्निं अहं दूरं अमु
तरागमनाय प्रहिणोमि प्रेषयामि स हितः क्रव्यादग्निर्यमराज्यं गच्छतु यमस्य राज्यं प्रतिव्रजतु किंभूतः रिप्रवाहः रिप्रमिति
पापनाम रिप्रं पापं वहति नाशयतीति रिप्रवाहः का॰ इहैवायमिति जयति यजमानो जयति अयमितरः क्रव्यादादन्यो जातवेदा जातप्रज्ञानो
ऽग्निः इहैव अग्निमित्रेव गृहे सदने देवेभ्यो ऽर्थाय हव्यं हविः वहतु प्रापयतु किं कुर्वन् प्रजानन् स्वाधिकारं जानान इति पितृमेधा समाप्तः
उपदानासंदीहृदभयवान् ओणान् तदा तेणामीत दद्यात् इक्षुन्मेमाद्यपि दद्यात् वह वपां जातवेदो देवत्यात्रिष्टुप् अस्य विनियोगः

क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः इहैवायमितरो जातवेदा देवेभ्यो ह
व्यं वहतु प्रजानन् १९ वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके मेदसः
कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्नमन्तां स्वाहा २० ॥ ॐ रामजें

श्रोत्रस्य तेनास्ति यद्यस्य तेऽस्ति तथापि मध्यमभागवानस्यैव वपां जुहोति वह वपां जातवेदः पितृभ्य इति अस्यार्थः मध्यमाष्टकायां पशुना
कार्या तस्या येनो वपां जुहोति वह वपामिति मंत्रेणेत्यर्थः अथ मंत्रार्थः हे जातवेदः जाते वेदो धनं यस्मात्स जातवेदाः तत्संबोधने हे जात॰
वेदः पितृभ्योऽर्थाय त्वं वपां ये तु संवेपि नीचमं विशेषत्वं वह प्रापय पराके पराक्रान्ते दूरेऽपि यत्र यस्मिन्देशे निहितान् स्थापितान् प
तान् पितॄन् त्वं वेत्थ जानासि तत्र वहेत्यर्थः तस्या वपायाः निःस्यन्दमेध सोधा तु विशेषस्य कुल्याः नद्यः तान्पितॄन् प्रति उपस्रवंतु॰
प्रसरंतु किंच एषां दातॄणां आशिषो मनोरथाः सत्याः अवितथाः सं समन्तो प्रह्वी भवंतु यजमानः सत्यमनोरथाः संत्वित्यर्थः
स्वाहा सुहुतमस्तु स्वाहेति ऋगभिमन्त्रयजुः ५ ॥ ॥ ॥

३५
१५९ स्योना पृथिवी पृथिवी देवत्या गायत्री मेधातिथिदृष्टा यजुरन्ता अस्या अपि श्रौते विनियोगो नास्ति स्मार्ते तु स्तराः रोहणे शयने विनि
159 योगः तथाहि स्योनापृथिविनोभवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्तीति हे पृथिवि त्वं नो ऽस्माकं स्योना सुखरूपा भव किं
भूता त्वं अनृक्षरा ऋक्षराः कंटकाः ऋच्छन्ति कंटकाः कंटयोपाकंटते वा ऋच्छतेर्वी स्याद् इति कर्मपाः इति यास्कः तद्रहिता चौरदा
यादादि दुःखदनिवृत्त्यर्थं तत्सतिकृक्षराः कंटकाः दुःखदायिनो यस्यां सा अनृक्षरा तथा निवेशनीति विशंति जना यस्यां सा
निवेशनी साधुप्रतिष्ठाना करणाधिकरणयोश्चेति ल्युट् तथा सप्रथाः प्रथः प्रथः विस्तारः प्रथसा सह वर्तमाना सप्रथाः स
र्वतः पृथुः किंच नो ऽस्मभ्यं शर्म शरणं यच्छ देहि अतः परं यजुः अपनः नास्ति नियोगो न्यस्यसूत्रे ऽसंवेष्य मरणनिमित्तेन स्नाने जला

स्योनापृथिविनोभवान्नृक्षरानिवेशनी यच्छानः शर्म्मसप्रथाः अपनः शोशुचदघम् ११
अस्मात्त्वमधिजातोसित्वद्यञ्जायतांपुनः असौस्वर्गाय
लोकायस्वाहा १२ इतिसंहितापाठेपंचत्रिंशोध्यायः ३५

यनोदने तथाहि सद्यस्नानामिकपापनोद्यापनः शोशुचदघमिति इदं जले ऽनो ऽस्माकं अघं पापं अपशोशुचत् अपशोचयतु का
आहुतिरुक्तेति पुत्रो भ्राता अन्यो वा ब्राह्मणो ऽस्मात्त्वमधिजातो सीति सायिकस्य पात्रप्रतिपत्तौ तेदाहात् पूर्वं आज्याहुतिं जुहुयादित्युक्ते है
ति अस्मात्त्वे अग्निदेवत्या गायत्री अनिरुक्ता हे अग्ने त्वं अस्मात् यजमानात् आधानकाले अधिजातोसि उत्पन्नोसि अतो ऽयं यज
मानः पुनः त्वत् त्वत्तः जायतां उत्पद्यतां असौ इति विशेषणमासवचने तथाहि देवदत्तः स्वर्गीयलोकाय स्वर्गलोकप्राप्त्यर्थं त्वत्तो जा
यतां त्वद्रूप एव भवत्विति भावः स्वाहा सुहुतमस्तु श्रीमन्महीधरकृते वेददीपे मनोहरे पंचत्रिंशोऽयमध्यायः पितृमेधाभियोगमत्
१५९

ऋचं वाचं पंचाध्याये आथर्वणेन दधीचा दृष्टा दध्यङ् ह्याथर्वण एतं शुक्रमेतं यत्तं विदांचकारेति श्रुतेः उग्रश्चेत्याग्निको मंत्रः अग्निः
दैये नेत्याद्यध्यायसमाप्तिपर्यंतं आश्वमेधिकं तद्द्वयं वर्जयित्वा कात्यायनः शांतिकरणमाह एतयोः ऋचं वाचमित्यध्यायेन शांतिकर
णं कार्यं स्वाध्याये मंत्रपाठे प्रवार्यमंत्रादावस्याः ध्यायस्य दर्शनात् अथ मंत्रार्थः ऋचं वाचं पंचयजुर्लिंगोक्तदेवतानि ऋचं ऋ
ग्रूपां वाचमहं प्रपद्ये ते प्रविशामि शरणं व्रजामि यजुः यजूरूपं मनः प्रपद्यते प्राणं प्राणरूपे साम प्रपद्यते चक्षुरिंद्रियं श्रोत्रेंद्रि
यं च प्रपद्ये वागादिग्रहणं सप्तदशावयवोपलक्षणं सप्तदशावयवं प्रजापतेर्लिंगं प्रपद्ये तदित्यर्थः त्रयीविद्या लिंगशरीरं च प्रप

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये
वागोजः सहौजो मयि प्राणापानौ १ यन्मे छिद्रं चक्षुषो हृदयस्य
मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु शन्नो भवतु भुवनस्य यस्पतिः २

द्ये प्रवर्ग्येण नाशयेदिति भावः तथा वागिंद्रियं ओजो मानसं बलं याभ्यां पुनरोजो ग्रहणात् शरीरं बलं प्राणापानौ उच्छ्वासनिश्वासवायू
च एते सहैकीभूताः संतो मम अपि वर्तेते अतोपि प्रवर्ग्यैः नश्यात् दधातीति भावः यन्मे बृहस्पतिदेवत्या पंक्तिः मे मम चक्षुषश्चक्षुरि
द्रियस्य यत् छिद्रं अप्रवृत्तं न्यूनं जातं प्रवर्ग्याचरणेन हृदयस्य बुद्धेर्वा यत् छिद्रं जातं मनसो वा यत् अतितृण्णं अतिहिंसितं प्रवर्ग्याचर
णेन यच्च चक्षुर्बुद्धिर्मनसां व्याकुलत्वं जातं बृहस्पतिर्देवगुरुर्मे मम तत् छिद्रं अतितृण्णं वद्धातु संदधातु छिद्रं निवर्तयतु भुवनस्य भू
तजातस्य यः पतिः अधिपतिः प्रवर्ग्यरूपो यज्ञः स नोस्माकं शंसुखरूपो भवतु बृहस्पतिना छिद्राच्छादनाकरणात् प्रवर्ग्यः कल्याणरूपोस्त्वित्यर्थः १

२६

१६ भूर्भुवः स्वः त्रीणि यजूंषि तत्सवितुः कयानः कस्त्वा अभीषुणः पञ्च मन्त्राः ऋचो व्याख्याताः अभीषुण इत्यस्यां ऋचि शतं भवासू-
16° तिभिरिति बहुवचने पूर्व ऊतय इत्येव याः ऊतिभिरवने दैत्याभिः शतमसंख्यरूपो भवसीत्यर्थः कया त्व इंद्र देवत्या गायत्री अ-
निरुक्तैः यद्दीना आद्यपादे वृष्णहव्ये हेवृषन् वर्षतीति वृषा हे सेक्तः इंद्र वासवो मन्दा हर्षेत्यभिधाने कया ऊत्या केन तर्प-
णेन हविर्दानेन नोऽस्मान् अभिप्रमंदसे अभिमोदयसि यदि स्वपतेनाद्येमदेमा देव तो गतो लट्‌ कया वऊत्या तस्या स्तोतृभ्यः
स्तुतिकर्तृभ्यो यजमानेभ्य आभर आहर आदा सियन दातमिति शेषः न हयेन नत्था वयं ऊर्मे इति भावः आ स वेति लक्ष्यर्थे लोट्‌
इंद्रो विश्वस्य द्विपदा विराट् इंद्र देवत्या विशान्त्य तरा द्विपदा विराट्‌ कथ्यते विश्वस्य सर्वस्य जगत इंद्रः इदि परमैश्वर्ये इदंतीति इंद्रः

भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्‌ १ कया नश्चित्र आ भुवदूती सदा दू
वृधः सखा कया शचिष्ठया वृता ४ कस्त्वा सत्यो मदानाम्मंहिष्ठो मत्सदन्धसः दृढा चिदारुजे वसु ५ अभी-
षुणः सखीनामविता जरितॄणाम् शतम्भवास्यूतिभिः ६ कयात्वन्न ऊत्याभिप्रमन्दसे वृषन् कया स्तोतृभ्य
आभर ७ इन्द्रो विश्वस्य राजति शन्नो अस्तु द्विपदे शञ्चतुष्पदे ८ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा-
शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ९ ॥ १

परमेश्वरो महावीर आदित्यो वा यो राजति देवीप्यति इत्येवा सनोऽस्माकं द्विपदे विभक्तिव्यत्ययः द्विपदां पुत्रादीनां शं सुखरूपो- शान्तिविधि
स्तु चतुः पदे चतुः पदां गवादीनां च शं सुखरूपोऽस्तु शंनो मित्रः हे अनुष्टुभौ मित्र वरुणादयो देवताः मित्रो देवो नोऽस्माकं
शं सुखरूपो भवतु महावीर प्रसादात्‌ मेयति भक्तं पुत्रि स्ववतीति मित्रः वरुणः शं सुखरूपो भवतु वृणोत्यगा करोतिमुक्त-
मिति वरुणः अर्यमाणो नोऽस्माकं शं भवतु इयर्ति गच्छति भक्तं प्रतीत्यर्यमा इंद्रो देवेशो नोऽस्माकं शं भवतु बृहस्पति देव
गुरुर्नः शं भवतु बृहतां वेदानां वेदानां पतिः पालकः उरुक विस्तीर्णः क्रमपादो न्यासो यस्य स विस्तीर्णोऽस्माकं शं भवतु वेवेष्टि व्या-

१६

शंनोवातः वातोवायुर्नोऽस्माकं शंसुखकारी अपकृषः अव्याधिजनकश्च पवतां वहतु यद्वागतोलोट् भवति जनानां स्वस्वव्यापारेषु प्रेरयति सूर्यः शंसुखरूपोऽनः तपन् नो भेषजरूपश्च नोऽस्माकं तपतु किरणान्प्रसारयतु पर्जन्यः पिपर्ति पूरयति जनमिति पर्जन्यः परोऽभः परोजन्यते तेनेनवा पर्जन्योऽरसदवृष्टा वित्यभिधानं पर्जन्यो गर्जितेषाद्देवः नोऽस्माकं शं सुखकरकाशनितारहितं यथातथा अभिवर्षतु सिंचतु कीदृशः कनिक्रदत् अत्यंतं क्रंदतीति शब्दं कुर्वन् दाधर्तिदर्धर्तीत्यादिनायङ्लुगंते निपातः अहानिशं द्विपदागायत्री अहानिरात्रयश्च देवताः अहानिदिनानि नोऽस्माकं शं सुखरूपाणि भवंतु रात्रीः शं सुखरूपं अस्माभ्यं प्रतिधीय

शन्नोव्वातः पवताᳬं शन्नस्तपतु सूर्यः शन्नः कनिक्रदद्देवः पर्जन्योऽअभिवर्षतु १
अहानि शम्भवन्तु नः शᳬं रात्रीः प्रतिधीयताम् शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंय्योः

तां प्रतिदधातु महावीर इति शेषः कर्तव्यक छंदसः शंन इंद्राग्नी त्रिष्टुप् इंद्राग्नी इंद्रावरुणौ इंद्रापूषणौ इंद्रासोमौ देवतेनः शं भवतो वाजसातौ वाजस्यान्नस्य सातौ दाने निमित्तभूते इंद्रापूषणा इंद्रपूषसंज्ञौ देवौ नोऽस्माकं सुखरूपौ भवतां इंद्राग्नी॥ तौ इंद्राग्नी अवोभिः पालनैः कृत्वा नोऽस्माकं शं सुखरूपौ भवतां एते दत्ते हव्यं ययोस्तौ रातहव्यौ ॥ इंद्रावरुणौ॥ सोमा इंद्रासोमौ देवौ शं सुखरूपौ भवतां किमर्थं सुविताय सुष्ठु इतं सुवितं सायुगमनाय साधुप्रसवाय वा तथा शं रोगाणां शमनाय योः यावनाय पृथक्करणाय च भयानां रोगं भयं च निवर्त्य सुखरूपौ भवतामित्यर्थः देवता द्वंद्वे च निसर्वेत्र सर्वपदस्य दीर्घः २ ॥

शोनः अहेवत्यागायत्री देवीः देव्योदीप्यमाना आपो नोऽस्माकं अभिष्टये अभिषेकाया भीष्टाय वापीतये पानाय च शोत्सवरूपा भवंतु
अस्माकं स्नाने पाने चापः स्रवपितो भवंतु आपः शंयोः रोगाणां शमनं भयानां पवनं पृथक्करणं चाभिस्रवंतु नोऽस्माकं भय॰
रोगनाशं कुर्वंत्वित्यर्थः स्योना पृथिवि व्याख्याता आपो हि ष्ठा त्र्चो व्याख्याताः १६ द्यौः शांतिः यजुर्वेदे दशिनी व्यासभि
संतानि द्यौः शांतिः एकाधिकाशङ्करी द्यौः द्युलोकरूपाया शांतिः अंतरिक्षरूपा च या शांति पृथिवी भूलोकरूपाया शां
तिः आपो जलरूपाया शांतिः ओषधय ओषधिरूपाया शांतिः वनस्पतयो वृक्षरूपाया शांतिः विश्वेदेवाः सर्वदेवरूपा

शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः १२ स्योना पृथिवि नो भ
वानृक्षरा निवेशनी यच्छा नः शर्म्म सप्रथाः १३ आपो हि ष्ठा मयो भुवस्ता न ऊर्जे
दधातन महे रणाय चक्षसे १४ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशती
रिव मातरः १५ तस्मा अरङ्ग माम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः
द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्प

तिः सा मा शान्तिरेधि ८

तयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः

या शांतिः ब्रह्मत्रयीलक्षणं परं वा तद्रूपाया शांतिः सर्वं सर्वजगद्रूपाया शांतिः शांतिरेव शांतिः या स्वरूपतः शांतिः सा शांतिः
मामा प्रतिपधि अस्तु प्रकृष्यमन्वयः महावीरप्रसादात्सर्वं शांतिरूपे मां प्रसक्तिवत्यर्थः यद्वा द्यौरित्यादिषु विभक्तिव्यत्ययः सप्त
म्यर्थे प्रथमा दिव्यंतरिक्षे पृथिव्यामप्स्वोषधिषु वनस्पतिषु विश्वदेवेषु ब्रह्मणि सर्वस्मिंश्च या शांतिः सा मा प्राप्नोत्वित्यर्थः ८ ॥

हतेदृंह हतेहविदारे विदीर्णेजराजर्जरितेविशीर्णेहेमहावीरमामांत्वंदृंहदृढीकुरु यद्वाहतेविदीर्णेकर्मणिमांदृंहदाअक्लिं-
इकर्मकुरु यद्वासमस्तुषिरत्वात्सच्छिद्रत्वाच्चुदभिशब्देनमहावीरः हेहतेहेमहावीरमांदृंह दृढंकुरु कथंदार्ढ्यंनदाह सर्वाणि
भूतानिप्राणिनोमांमामित्रस्यचक्षुषासमीक्षन्तांसम्यकपश्यन्तु मित्रदृष्ट्यासर्वेमांपश्यन्तनारिदृष्ट्या सर्वेषांप्रियोभूयासमित्यर्थः
किंच अहमपिसर्वाणिभूतानिमित्रस्यचक्षुषासमीक्षेपश्यामि सर्वेमेप्रियाःसंतु मित्रचक्षुःशान्तंभवति मित्रःकंचननहन्ति-
मित्रेचकश्चिन्नहन्तिएवंपरस्पराद्रोहेणसर्वान् अविद्वेषेतोमित्रस्यचक्षुषावयंसमदृष्ट्यामहेपश्यामः १८ हतेदृंह दृंहतेवी-

हतेदृं० हमामित्रस्यमाचक्षुषासर्वाणिभूतानिसमीक्षन्ताम् मित्रस्याहञ्चक्षुषासर्वा-
णिभूतानिसमीक्षेमित्रस्यचक्षुषासमीक्षामहे १८ हतेदृं० हमाज्योक्तेसन्दृशिजीव्या-
सञ्ज्योक्तेसन्दृशिजीव्यासम् १९ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे अन्यांस्तेऽअ-
स्मत्तपन्तुहेतयःपावकोऽअस्मभ्यं० शिवोभव २० नमस्तेऽअस्तुविद्युतेनमस्तेस्तन-
यित्नवे नमस्तेभगवन्नस्तुयतःस्वःसमीहसे २१ ॥ ॥ ॥

रमांदृंह आदर्थ्येपुनर्वचनं हेमहावीरतेतवसंदृशिसंदर्शनेअहंज्योक्चिरंजीव्यासं जीवेयंजीवशब्दागलिङि रूपं ज्योगिति
निपातश्चिरार्थे पुनरुक्तिरादरार्थाया तेसंदृशिज्योकजीव्यासं १९ नमस्ते व्याख्याता २० नमस्तेहेअन्तरिक्षभो विद्युत्स्तनयित्न
रूपभगवद्देवते हेभगवन्महावीरविद्युतेविद्युद्रूपायतेतुभ्यंनमोस्तुस्तनयित्नवेस्तनयित्नुगर्जितं तद्रूपायतेनमोस्तु-
यतःकारणात्स्वःस्वर्गगन्तुंत्वंसमीहसेचेष्टसेअतस्तेतुभ्यंनमोस्तु ५ ॥ ॥

यतोयतः हेमहावीरयतोयतोयस्माद्यस्माद्ऽग्निवितात्त्वंसमीहसेयस्मात्त्वपकर्तुं चेष्टसे ततस्ततोनोऽस्माकममभयंकुरु किं
च नोऽस्माकंप्रजाभ्यः शन्त्वंकुरु नोऽस्माकंपशुभ्यश्चाभयंभीत्यभावंकुरु २२ सुमित्रियानः यजुः व्याख्याते २३ तच्चक्षुः सूर्यदे
वत्याब्राह्मीत्रिष्टुप् यत्तैर्मैत्रैर्योमहावीरोऽस्माभिस्तुततः तच्चक्षुर्जगतांनेत्रभूतंमादित्यरूपंपुरस्तात्पूर्वस्यांदिशिउच्चर
त् उच्चरति उदेति इतश्चलोपः परस्मैपदेष्विति इकारलोपः कीदृशंतत् देवहितंदेवैर्हितं निहितंस्थापितं यद्वा देवानांहि

यतोयतः समीहसेततोनोऽभयङ्कुरु शन्नः कुरुप्रजाभ्योऽभयन्नः पशुभ्यः २२ सुमित्रियान
ऽआपः ऽओषधयः सन्तुदुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयन्द्विष्मः २३ तच्च
क्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुया
मशरदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात्
२४ इतिसंहितापाठेषट्त्रिंशोऽध्यायः ३६ ॥ ॥

तंप्रियं शुक्रंशुक्लं पापसंस्पर्शशोधिष्मद्वा तस्यप्रसादात्शतंशरदोवर्षाणिवयंपश्येम शतवर्षपर्यन्तमव्या शतवर्षपर्यन्तमव्याहृ
तचक्षुरिन्द्रियाभवेम प्रार्थनायांलिङ् । अत्रान्तसंयोगेद्वितीया शतंशरदोजीवेम अपराधीनजीवनाभवेशरदः शतंशृणुयाम
स्पष्टश्रोत्रेन्द्रियाभवेम शरदः शतंप्रब्रवाम अस्खलितवागिन्द्रियाभवेम शतंशरदः अदीनाः स्यामनकस्याप्यग्रेदैन्यंकुर्याम
शतात्शरदः शतवर्षपर्यभिभूयश्चबहुकालपश्येमादियोज्यं २४ श्रीमन्महीधरकृतेवेददीपेमनोहरे अध्यायः
शान्तिपाठार्थः षट्त्रिंशोयंप्रकाशितः ३६ ॥ ॥

कात्यायनः देवस्य त्वेत्यभ्रिमादायादेवरीवैकंकरीवारत्निमात्रीं सर्वे कृत्वा दक्षिणेनालभ्य जपति युंजत इति उद्देवरत्नस्छोवि
केतनत्सछोवाहस्तप्रमाणे अभ्रिं देवस्य त्वा नारिरसीति मंत्रेणादाय वामहस्ते तोऽस्त्वा दक्षिणहस्तेन स्पृष्ट्वा युंजते मन इति मंत्रे
न पमीति सूत्रार्थः देवस्य त्वा अभ्रिदेवत्यं यजुः अग्ने सवितुर्देवस्याज्ञानं योऽस्थितोऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वामाददे ट॰
ह्णामि त्वे वनारिरसि स्त्रीनाम्नी भवति १ युंजते व्याख्याता २ देवी द्यावापृथिवी द्यावापृथिवि देवत्यं यजुः ब्राह्मी गायत्री कात्या
यनः मृदमादत्ते पिंड्वरं देवी द्यावापृथिवी इति अयर्थुरेवीति मंत्रेण विक्रणं मतपिंडमादत्ते पिंड वदति पाणिभ्यां गृह्णाति द

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् आददे नारिरसि १ युञ्ज॰
ते मनः उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः वि होत्रा दधे वयुनाविदेक
इन्मही देवस्य सवितुः परिष्टुतिः २ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं दे॰
वयजने पृथिव्याः मखाय त्वा मखस्य त्वा शीर्ष्णे ३ ॥ ॥

क्षिणः साभ्रिरिति लभ्यते इति सूत्रार्थः मंत्रार्थस्तु हे देवी देवौ दीप्यमाने द्यावापृथिवी द्यावापृथिव्यौ अद्यास्मिन् दिने पृथिव्याः
देवयजने देवा इज्यन्ते अत्रेति देवयजनं तस्मिन् मखस्य यज्ञस्य शिरो राध्यासं साधयेयं राधयसाधयसंसिद्धौ महावीरो यज्ञशिरः किं
कृत्वा वां युवां द्यावापृथिव्यौ आदायेति शेषः दिवोंऽशो जलं पृथिव्यंशो मृदमादायेत्यर्थः एवं द्यावापृथिव्यौ सांश्यं मृदमाद
मखाय हे मृत यज्ञाय त्वां गृह्णामि एवं सामान्येनोक्त्वा विशेषमाह मखस्य यज्ञस्य शीर्ष्णे शिरसे महावीराय त्वां गृह्णामीति
शेषः तं मृत्पिंडमन्तरस्यापि तेकृष्णाजिने निदध्यात् १ ॥ ॥ ॥

१९२ का॰ उत्तरतो देव्यो वम्र्य इति वल्मीकवपां उपदीक्ष्य ततो मृत्स्नां च यो वल्मीकस्तस्य वपेव वपा तां मध्यस्थं लोष्टमादाय कृष्णाजिने मृत्पिं

जाडं तरेण तूष्णीं निदध्यादिति सूत्रार्थः देव्यो वम्र्यः वल्मीकवपा देवता आर्षी पंक्तिः हे देव्यो दीप्यमानाः वम्र्यः उपजिह्विका वो युष्मा

नादाय पृथिव्या देवयजने मखस्य शिरो महावीरं यज्ञवराध्यासं संपादयेयं मखाय त्वामाददे मखस्य शीर्ष्णे त्वामाददे इति व्या॰

ख्याते किंभूता वम्र्यः भूतस्य प्राणिजातस्य प्रथमजाः प्रथमोत्पन्नाः पृथिवी जलं वा प्रथमजा तत्स्था वेयाह्वम्र्यापि प्रथमजा उ

च्यते का॰ इयत्यग्र इति वराहविहितं वराहो खातमृत्तमृदमादाय तूष्णीं कृष्णाजिने वल्मीकवपान्तरे निदध्यादिति सूत्रार्थः

इयत्यग्र वराहविहतदेवतं यजुः ब्राह्मी गायत्री हे पृथिवी भवती अग्रे आदौ वराहोद्धरणसमये इयती प्रादेशमात्राभिनयेन

देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः मख॰

स्य त्वा शीर्ष्णे ४ इयत्यग्र आसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः

मखाय त्वा मखस्य त्वा शीर्ष्णे ५ ॥ ॥

प्रदर्श्यमाना परिमाणा आसीत् इयती ह वा इयमग्रे पृथिव्यास प्रादेशमात्रीत्यादि वराह उद्धर्यानेन विस्फुरन्तः ते इति द्वितीयार्थे श्रु॰

ष्टी तां त्वामादाय पृथिव्या देवयजने च मखस्य शिरो राध्यासं मखायेति व्याख्यात का॰ इंद्रस्यौज स्थेति सृतीकान् हुति॰

कान् रोहिषतृणान्यादाय तूष्णीं कृष्णाजिने वरविहतोत्तरे निदध्यादिति सूत्रार्थः इंद्रस्यौजः यद्राव देवत्यं ऋचकं त्रिष्टुप् हे सृतिका

हुयं इंद्रस्य ओजस्तेजोरूपाः स्थ भवथ यावो युष्मानादाय पृथिव्या देवयजने त्वमखस्य शिरो राध्यासं मखाय वो मह्यामि मखस्य

शीर्ष्णे महावीराय च वहामि इत्युक्तं २ ॥ ॥

मखायेतिपयः पयआदायमसीकृष्णाजिनेष्वतीकोतोदध्यादितिसूत्रार्थः मखाय पयोदेवत्यं हेपयः मखायमखशीर्षेत्वांगृह्णामि
तृसीगवेधुकश्रपियाह्यां का° संभृताननभिमृशतिमखायेति संभृतान्संभारान्करेणस्पृशेदित्यर्थः मखायसंभारदेवत्यं हेसं
भारदेवत्यं हेसंभारामखायनश्चीसेवचःस्पृशामि का° कृष्णाजिनेपरिगृह्यानरतः परिहृतेगच्छंतिप्रैतब्रह्मणस्पतिरिति अथ
युग्मतिग्रस्याश्रात्वयःकृष्णाजिनेसमंतादादायशैत्तिनिजयंतोऽन्नः पाश्वाङ्गनेपरिहृतेप्रतिगच्छंतिपंचारत्निमितःसमचतुरस्रः
प्राग्द्वारःसिकतोपकीर्णःपूर्वमेवकृतःसप्तभूसंस्कारसंस्कृतस्तादितप्रदेशःपरिहृतउच्यतेइतिसूत्रार्थः प्रैतुहृदनीव्याख्या
ता का° परिहृतेनिदधात्यसंज्ञारान्नुहृतावोत्तितेसिकतोपकीर्णेप्राग्द्वारेमखायेति अध्वर्युःकृष्णाजिनस्थानेवसंभारान्परिहृ

इन्द्रस्यौजस्थमखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्याः मखायत्वामखस्यत्वाशीर्ष्णे म
खायत्वामखस्यत्वाशीर्ष्णे मखायत्वामखत्वाशीर्ष्णे ६ प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसू
नृता अच्छावीरन्नर्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनःमखायत्वाशीर्ष्णे मखायत्वामख
स्यत्वाशीर्ष्णे मखायत्वामखस्यत्वाशीर्ष्णे ७ ॥ ॥ ॥

नेनिदधाति कीहृशेऽहृतावोत्तिते उल्लिखितजलसिक्ते यततसंस्कारहृयेपंचाधिकेसिकताष्टतेप्राग्द्वारेचेतिसूत्रार्थः मखायहे
संभारामखायपुष्माविदधामि का° संभारैःसंसृजतिमखायेतिगवेधुकाजापयसीपृथक्कृत्यवल्मीकवपादित्रिसंभारेर्मृत्पि
डेमिश्रयतीत्यर्थः मखाय हेसंभाराषुष्मान्मखायमृत्पिंडेनसंसृजामि का° मृदमादायमखायेतिमहावीरंकरोतिप्रादेश
मात्रमूर्ध्वमासेचनवंतमेखलावंतमध्यसंगृहीतमूर्ध्वेमेखलायास्त्र्यंगुले महावीरपर्यायमृत्सीमृत्पिंडेमिश्रयतीत्यर्थः म
(खाय हेसंभाराषुष्मान्मखायमृत्पिंडेनसंसृजामि का° मृदमादायमखायेतिमहावीरंकरोतिप्रादेशमात्रमूर्ध्वमासेचन.)
मादायमंत्रेणमहावीरंकरोति कीहृशं प्रदेशाच्च गतेवंतं मेखलायुतंमध्येसंऊवितंमेखलापरित्र्यंगुलोच्चमितिसूत्रार्थःमखा

प्र देशमहावीरमत्रहीसिवाकरोमि ६ ॥

का॰ निष्ठितमभिमृशति मखस्य शिरोसीति शाखी॰ एवमितरौ प्रतिमंत्रं इतरौ द्वौ महावीरौ प्रतिमंत्रमेवमेवकरोतीत्यभिमृश
तिचेत्यर्थः मखायत्वा द्वितीयं महावीरं करोमि मखस्य निःपन्नं स्पृशामि मखायत्वा तृतीयं महावीरं करोमि अभिमृशतिचेत्यर्थः मख
स्येति निःपन्नं स्पृशति पञ्चस्य शिरोसि मखायत्वा मखस्यत्वा शीर्ष्णेत्वामभिमृशामि का॰ गवेधुकाभिःश्लक्ष्णयति मखायेति प्रति
मंत्रं गवेधुकाभिर्महावीरान्प्रथमेणेन श्लक्ष्णान्करोति मखायेति प्रतिमंत्रमेकैकं मखाय मखस्य शीर्ष्णे चत्वा गवेधुकाभिःश्लक्ष्ण

मखस्य शिरोसि मखायत्वा मखस्यत्वा शीर्ष्णे मखस्य शिरोसि मखायत्वा मखस्यत्वा शीर्ष्णे मखस्य शिरोसि मखाय॰
त्वा मखस्यत्वा शीर्ष्णे मखायत्वा मखस्यत्वा शीर्ष्णे मखायत्वा मखस्यत्वा शीर्ष्णे मखायत्वा मखस्यत्वा शीर्ष्णे ५
अश्वस्यत्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः मखायत्वा मखस्यत्वा शीर्ष्णे अश्वस्यत्वा वृष्णः शक्ना धू
पयामि देवयजने पृथिव्याः मखायत्वा मखस्यत्वा शीर्ष्णे अश्वस्यत्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः
मखायत्वा मखस्यत्वा शीर्ष्णे मखायत्वा मखस्यत्वा शीर्ष्णे मखायत्वा मखस्यत्वा शीर्ष्णे ५ ॥ ॥

शिरइति निःपन्नं महावीरं वामकरस्थं दक्षिणेन स्पृशतीत्यर्थः मखस्य हे महावीर त्वं मखस्य १ टी॰

यामि एवमग्निमौ मंत्रौ का॰ अश्वशकृता धूपयत्यश्वस्येति प्रतिमंत्रं दक्षिणाग्निदीप्तेनाश्वपुरीषेण त्रिभिर्मंत्रैस्त्रीन्महावीरा
न्धूपयेत् एकैकधूपने सप्तसप्ताश्वशकृतेति ग्राह्याणि अश्वस्य हे महावीर पृथिव्या देवयजने मखाय मखस्य शीर्ष्णे च वृष्णसेक्तु
रश्वस्य शक्ना शकृता पुरीषेण त्वा त्वां धूपयामि यद्वत्त इति सूत्रेण शकृच्छब्दस्य शकन्नादेशः एवमितरमंत्राभ्यामितरौ
धूपयेत् का॰ वृहने च मखायेति प्रतिमंत्रं मखायेति त्रिभिर्मंत्रैस्त्रीन्महावीरानुखावत् श्रपयेत् पिन्वनरोहिणः॰
मखाय मखस्य शीर्ष्णे त्वा त्वां निर्दहामि एवमितरौ ५ ॥ ॥

का॰ एकान्नुहरतिऋजवेत्वेतिप्रतिमंत्रं एकान्महावीरान्नापाकाद्दिवोहरतीति त्रिभिर्मंत्रैरित्यर्थः ऋजवे असौलोकऋजु तत्र॰
सत्यमेव तत्कौटिल्यं सत्यं आदित्यः हे महावीर ऋजवे सत्यायादित्याय त्वां त्वा उद्धरामीति शेषः तथाच श्रुतिः स उद्धरति ऋजवे
त्वेत्यसौ वै लोक ऋजुः सत्यमेतत् सत्यमेष य एष तपत्येष प्रथमः प्रवर्ग्यः स्तदेतमेवैतत्प्रीणाति तस्मादाहर्जवे त्वेति अथ द्वितीये सा
यवेत्वा साथवे वायवे ऽर्थाय वायुर्हीत्येत्वा उद्धरामि तथाच श्रुतिः साथवे त्वेत्ययं से वायुर्योयं पवत एष हीमांल्लोकान् सिद्धान्वय॰
वतएष उद्द्वितीयप्रवर्ग्यः स्तदेतमेवैतत्प्रीणाति तस्मादाह साधवेत्वेति अथ तृतीयं सुक्षितिरेवा सुक्षितरां द्विपंति निवसंति सर्वं॰

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा
मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे १० ॥ ॥

भूतानि यस्यां सा सुक्षितिर्भूमिः सुक्षितिपतिरिपत्नि लोके सर्वाणि भूतानि क्षियंत्यथो ऽग्निर्वै सुक्षितिरग्निर्ह्येवास्मिंल्लोके स
र्वाणि भूतानि क्षियंत्येष उत्तृतीयः प्रवर्ग्यः स्तदेतमेवैतत्प्रीणाति तस्मादाहाह सुक्षित्यै त्वेति का॰ अजापयसा वसिंचति मखा॰
येति प्रतिमंत्रं अजादुग्धेन त्रीन् महावीरांस्त्रिभिस्तत्य मंत्रैः सिंचतीत्यर्थः मखाय मखस्य शीर्षे वा जाय सा त्वां सिंचामी॰
त्यर्थः इति महावीरसंभरणं समाप्तम् ५ ॥ ॥ ॥

का॰ ब्रह्मावृत्तानो यमाय त्वेति महावीरं प्रोक्षति प्रचरेति ब्रह्मणानुज्ञातोऽध्वर्युरुपविश्य यमाय त्वेति मंत्रत्रयेण प्रवरणीयं म
हावीरं वारत्रयं प्रोक्षतीत्यर्थः यमाय त्वा त्रीणि यजूंषि यमयति नियच्छति सर्वमिति यम आदित्यस्तस्मै यैत्वा त्वां प्रोक्षामि
तथा च श्रुतिः संप्रोक्षति यमाय त्वेत्येष वै यमो य एष तपत्येष हीदं सर्वं यमयत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह
यमाय त्वेति सूर्यस्य त्वा तपसे तपतीति पस्तेजः॥ मखाय त्वा मखाय तः प्रवर्ग्यः सूर्यरूपस्तस्मै त्वां प्रोक्षामि तथा च श्रुतिः
एष वै मखो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह मखाय त्वेति सूर्यस्य त्वा तपसे तपतीति पस्तेजः सू

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः
ॐ स्पृशस्पाहि अर्चिरसि शोचिरसि तपोऽसि ११ ॥ ॥

र्यस्तेजोरूपाय प्रवर्ग्याय त्वां प्रोक्षामि तथा च श्रुतिः एष वै सूर्यो य एष तपत्येष उ प्रवर्ग्यस्तदेतमेवैतत्प्रीणाति तस्मादाह सू
र्यस्य त्वा तपस इति का॰ अंक्तेति स्रुचमाने देवस्त्वेत्यवनक्ति महावीरमाज्येन संस्कृत्याहोत्वा अंक्तेति यं प्रथमेनेति मंत्र पद्यमानेः
ध्वर्युराज्यं विधिना संस्कृत्य तेनाज्येन प्रवरणीयं महावीरं मंत्रेणानक्ति देवस्त्वा सविता देवो मध्वा मधुना मधुरेण जगद्रूपेणा॰
स्नेन हे महावीर त्वामनक्तु लिंपतु मखेति नुमभावः आगमस्यानित्यत्वात् तथा च श्रुतिः सर्वं वा इदं मधु यदिदं किंच तदे
नमनेन सर्वेण समनक्त इति ९ ॥ ॥

रजतपात्रमानेवरउपरदहतिपृथिव्या संस्पृशइति रजतस्य पात्रमानेनशतरक्तिकामितेरजतंखरेसिकतोतरूपरदहती॰
त्यर्थः पृथिव्याः प्राजापत्यागायत्रीरजतदेवत्या संस्पृशातिउपदवार्थेस्पर्शंकरोतिसंस्पृकरात्तमः॰ किंवत पृथिव्याः से
वेयिनः संस्पृशो रात्तसात्महावीरंहेरजतत्वंपाहिरत्तार्थंअमेरपत्यंरजतंरत्नसात्महावीतायस्वरेनिदधुः अथावपृ॰
थिवीमहावीरपाकेऽयेभीता ततोसामादायतामिति रजतेखरेऽं ततहितमितिश्रुतोकथा तथाचश्रुतिः देवाअवि॰
भयुर्यद्वैनइममथस्यादतोसिनाग्नाताहमुरित्यये वोऽपतद्देतोपहिरण्णराष्ट्राणरत्नसामपदत्येइति तथा अयोपृ॰
थिव्युद्धवापतस्माद्धिमयोचकारयद्वैमायेतमः श्रुचातोनदिस्यादितितदेवास्यापतदं तद्द्यातिरजतमिति का॰ संसी
दस्वेतसुच्यमानेमंत्रपलवान्हिगुणानादीप्यप्रतिदिशं खरेकरोतितेषुमहावीरमात्यवंतमर्चिरसीति होत्रासंसीदस्वेति
पच्यमानेऽपर्युहित्रिगुणितान्मंत्रसंज्ञानाद्वेपत्यप्रदीप्यखरेचततहितकृत्वातेषुमुंजेषुसंस्थानाज्यशूर्णप्रवरणीयेमहा
वीरंनिदधातीतिसूत्रार्थः अर्चिरसि यजुस्त्रिष्टुप्घर्मदेवत्या हेमहावीरत्वंअर्चिरसिइकोतीरूपोसि शोचिरसितेजोरू
पोसि तपःसूर्यातपरूपोसि एषवैघर्मोयएषतपतिसर्ववायतदेषतदेतमेवेतन्प्रीणातीतिश्रुतेः यदादित्यगतं
तेजोजगद्भासयतेखिले यश्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमितिस्मृतेश्च ७ ॥

१६६ 166 काः अनाधृष्टेति वाचयति प्रादेशमध्यं धारयन्ते महावीरोपर्यंगुष्ठांगुलिदेशं धारयंते यजमानमध्वर्युर्मंत्रं वाचयतीति सू-
त्रार्थः अनाधृष्टा समयज्ञे यं पृथिवीदेवत्यानि यजमानस्याशीः हे पृथिवि या त्वं पुरस्तात्पूर्वस्यां दिशि अनाधृष्टा रक्षो-
भिरनाधर्षिता अग्नेराधिपत्ये स्वामित्वे सति मे मह्यं आयुर्दाः देहि ददातेर्लेङि मध्यमैकवचने ऽडभावश्छांदसः अग्निमेवास्या
अधिपतिं करोतीति श्रुतेः या त्वं दक्षिणतो दक्षिणस्यां दिशि इंद्रस्याधिपत्ये सति पुत्रवती पुत्रयुता सा मे मह्यं प्रजां पुत्रादिकां
दाः देहि इंद्रमेवास्या अधिपतिं करोति नाष्ट्राणां रक्षसामपहत्यै इति श्रुतेः २ या त्वं पश्चात्पश्चिमायां दिशि सुषदा भव

अनाधृष्टा पुरस्तादग्नेराधिपत्य ऽ आयुर्मे दाः पुत्रवती दक्षिणत ऽ इन्द्रस्याधिपत्ये प्र-
जां मे दाः सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा ऽ आश्रुतिरुत्तरतो धा-
त राधिपत्ये रायस्पोषं मे दाः विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्य ऽ ओजो मे दा वि-
श्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि १२ ॥ ॥

सि सुष्ठु अस्यां सीदंति जना इति सुषदा ईषद्दुःसुषु इति खल्प्रत्ययः सवितुर्देवस्याधिपत्ये सति सा त्वं मे चक्षुर्नेत्रेंद्रियं दाः
देहि देवमेवास्यै सवितारमधिपतिं करोतीति श्रुतेः ३ हे पृथिवी या त्वं उत्तरत उत्तरस्यां दिशि धातुर्ब्रह्मण आधिपत्ये स-
ति आश्रुतिरसि आश्रावयेति श्रुतिर्जायते यस्यामाश्रुतिः यज्ञियो ह्युत्तरदेशः सा त्वं मे रायो धनस्य पोषं पुष्टिं दाः देहि
धातारमेवास्या अधिपतिं करोतीति श्रुतेः ४ या त्वं उपरिष्टादुपरिप्रदेशे बृहस्पतेराधिपत्ये सति विधृतिरसि विशेषेण धा-
रयतीति विधृतिः उपरिष्टाज्जिह्वादिकं ध्रियते सा त्वं मे मह्यं ओजो बलं स देहि बृहस्पतिमेवास्या अधिपतिं करोतीति श्रुतेः १

का॰ विश्वाभ्यो मेति दक्षिणतउत्तानौ पाणी निदधाति महावीराद्दक्षिणो भूमौ यजमानो मंत्रं पठन् स्वकरौ निदध्यात् उत्ताने विश्वा
भ्यः यज्ञहृदिती हे महावीर दक्षिणभूमे विश्वाभ्यः सर्वाभ्यो नाष्ट्राभ्यो नाशकर्तीभ्यः पिशाचादिभ्यो लोकप्रसिद्धेभ्यो ऽस्मान्पा
हि रक्ष सर्वाभ्यो मातिभ्यो गोपायेति श्रुतेः छेदमिवाश्नोतितयोरिति विसर्गस्य सत्वे का मनोरश्वेति शादेशसन्नन्तः
महावीराउत्तरतो यजमानो निजप्रदेशे निदध्यातीत्यर्थः मनोः दैवी पङ्क्तिः देयमौत्तरभूमे त्वं मनोरात्न अश्वावृत्वा॰
मिवदनाय अश्वादवाईयभृत्वा मत्र सवाहेति श्रुतेः का॰ पृष्टिभ्यो भस्मना परिकीर्य गारे स्वविकंकतशकलैः परि

स्वाहा मरुद्भिः परिश्रीयस्व दिवः सꣳस्पृशस्पाहि मधुमधुमधु १२ ॥ ॥

सृयति त्रयोदशभिः प्रागुदग्भिः स्वाहा मरुद्भिरधिके दक्षिणतो होमं त्रेण अथ पृष्टिभ्यो गार्हपत्यस्य भस्मांगारांश्च महा
वीरे परितो निक्षिप्य प्रागग्रैरुदगग्रैस्त्रयोदशविकंकतशकलैर्महावीरं वेष्टयति अंगारोपरि शकलानि क्षिपतीत्यर्थः
तन्मध्यात् द्वौ शकलौ मंत्रेण प्राचौ निदधाति शेषाः स्वसीप एव प्रतिदिशं त्रिषु त्रिषु स्थानेषु अधिके त्रयोदशे दक्षिणतो नि
दध्यातीति सूत्रार्थः मासानां त्रयोदशत्वात् त्रयोदशशकलैराच्छादनं त्रयोदश मासाः संवत्सरस्य संवत्सरपथयपथनप
वत्वेषउग्रवर्ग इति श्रुतेः स्वाहा मरुद्भिः यजुः पंक्तिश्छन्दः मरुद्देवत्या हे घर्म त्वं ॥ ॥

५२

१६७

१६० स्वाहाकारोसिहविरायात्त्वात् सूर्यरूपोसि यद्वैस्वाहाकारोयएषतपत्येषउप्रवर्ग्य इतिश्रुतेः अतस्त्वंमरुद्भिः प्रजा
भिरस्मद्रूपाभिः परिश्रीयस्व सेव्यस्व कर्मणियक् मरुतस्त्वमाश्रयेत्यित्यर्थः विशोवैमरुतो विशोषैतदेतेत्रेपरिश्रेहृति
नदिदंतत्रत्रभयतो विशावैपरिवृढमितिश्रुतिः ५ का स्ववर्णेशतमानेनापिदधातिदिवः संस्पृशहति प्रातर-
क्तिकामितेन स्ववर्णेनमहावीरमाच्छादयति इतिसूत्रार्थः दिवः देवीजगती स्ववर्णेदेवत्या हेशतमानदिवो-
द्युलोकसंबंधिनः संस्पृशोरातस्मान्महावीरंपाहिरक्षेति यद्वादिवः संस्पृशः स्पर्शऊर्ध्वंदेवान्याहि देवारातसं-
स्पृशोभीतामहावीररतायैस्वर्णंस्थापितवंत इतिश्रुतो कथा देशः अविमधुरित्यादिकायो कात्या कृष्णाजिनावकृ
तैर्हविर्भ्रुरूपवाजयतित्रिभिर्होवह्निर्मधुमधिति कृष्णाजिनकृतैर्दंडयुक्तैस्त्रिभिर्व्यजनैरग्निंवीजयतिदीपनायेत-
तिसूत्रार्थः मधुत्रीणियज्ञेषु प्राणादेवत्यानि देवताशिक् मधुवरसमास्यात्रीणिमधुउच्यते मधुमधुप्राणोदान
व्यानत्रयंमहावीरोस्थापयामीत्यर्थः तथाचश्रुतिः अथैषवित्रैराधुनोतिमधुमधितित्रिः प्राणोवैमधुप्राणमेवा
स्मिन्नेतदधातित्रीणिभवंति त्रयोवैप्राणाः प्राणउदानोव्यानसमानेवास्मिन्नेतदधातीति १० ॥ ॥

काम्या॰ परिक्रम्योपतिष्ठन्ते ऋत्तं वेडुर्मो देवानामिति यविंत्रैवीजेन समयेउत्तरं देववत्परिक्रमणेआगच्छन्ते चेदि हविः परक्रम्ये
न यथाहूतिं सकृत्कृ यो गर्भो देवानामित्यादिभिर्नमस्ते अस्तु मामाहिंसीरित्यन्तैरेवकाशसंज्ञकैर्मन्त्रैः सयजमाना ऋत्विजो महा
वीरउपतिष्ठन्ते इति सूत्रार्थः गर्भो देवानां यमदेवत्या आवकाशमन्त्रा मामाहिंसीरित्यन्ता आद्या ऋचोपंक्तिः अथ मन्त्रार्थः दे
वो दीप्यमानो महावीरः सवित्रा देवेन सह संगत संगच्छते गमेर्लुङि वा गम इति आत्मनेपदे विकल्पेन सिचः किन्वाद

गर्भो देवानां पिता मतीनां पतिः प्रजानाम् सं देवो देवेन सवित्रा गत सं सूर्येण रो
चते १४

उदात्तोपदेशेति मलोपे ह्रस्वादङ्गादिति सिचो लोपः बहुलं छन्दस्यड्योगेपीति अडभावः समो गम्यृच्छीत्यादिना सङ् यश्च
घर्मः सूर्येण सह एकीभूतः सन् संरोचते सम्यग्दीप्यते तेन च येस्तम इति शेषः का॰ देवानां दीप्यमानो रश्मीनां दृश्यमानो
नां सर्वेषां वा गर्भः गृह्णातीति गर्भः गृहीता एष वै गर्भो देवानां यदेष तपत्येष हीदं सर्वं संगृभ्णात्यनेनेदं सर्वं गृभीत
मेष उ प्रवर्ग्य इति श्रुतिः तथा मतीनां बुद्धीनां पिता पालकः बुद्धिप्रवर्तकः प्रजानां पतिः पालकः ॥ ॥ ॥

समग्निः आग्नीमनुष्टुप्छन्दः अग्निर्यमः अग्निनासह संगत संगच्छते यश्च सूर्येणसह समरोचिष्ट संरोचते अत्र वषट्स्वा
हाकारं करोति परां देवतामसावेव वृधुरिति श्रुतेः स्वाहा अग्निः स्वादाम हितो भित्यर्थं तपसा सूर्यतेजसा संगत सं
गच्छते दैव्येन सवित्रा च संगच्छते सूर्येणसह समरूरुचत् मा सर्वं सम्यक् रोचयति प्रकाशयति रोचतेर्णिजंताल्लुङ्.
व्ययेस्तेस्तम इति शेषः धर्ता दिवः ऊर्ध्वबृहती त्रिजागतार्धबृहती अग्न्याद्यौ त्रयोदशार्णौ तृतीयः पञ्चदशार्णस्ते
नैकादशिकाः स देवो यमः अस्मे अस्मासु विभक्तेः शेआदेशः वाचं नियच्छ श्रुत्यक्षकत्यधः यत्तं नियच्छतुः स्थापय

समग्निरग्निनागत सन्दैव्येन सवित्रा सꣳ सूर्येणारोचिष्ट स्वाहा समग्निस्तपसागत स
न्दैव्येन सवित्रा सꣳ सूर्येणारूरुचत १५ धर्त्ता दिवो विभाति तपसस्पृथिव्यां धर्त्ता दे
वो देवानाममर्त्यस्तपोजाः वाचमस्मे नियच्छ देवायुवम् १६ ॥

तु किंयुवं देवान् । भर्त्तां वाचं देवयुवं देवान् यौति मिश्रयति देवयुः तां किंयिष्युग भाव आर्षः अनित्यमागमशासनमि
ति वचनात् देवसम्बन्धसाहय्यं ते यज्ञसमापयन्तीत्यर्थः यज्ञो वै वाग्यज्ञमस्मभ्यं प्रयच्छ येन देवान् प्रीणामस्ये वै तदाहेति
श्रुतेः देवयुवमित्यत्र संहितायां वकारस्य दीर्घः सकः यो देवः पृथिव्यां विभाति शोभते कीदृशः दिवो धर्त्ता द्युलोक
स्य धारयिता तपसो रश्मिजालस्य वयनां देवानां च यन्ता अमर्त्यो मनुष्यधर्मरहितः अजरामरः तपोजाः तपस आदि
त्यात्तस्माज्जायते इति तपोजाः सूर्योग्निः १७ ॥ ॥

अपश्यं विष्टह्रीयंतमोहृष्ट सचमीभुवनेषुत्रिलोकेषुअंतर्मध्येअवस्थितः आवरीवर्तिपुनः पुनरावर्तते वृत्तेर्यङ्
लुकिरूपं कीदृशः सध्रीचीः सहअंचतीसध्रीच्यः सहस्यसध्रिरादेशः सहांचनादिशोरश्मीन्वावसानः आच्छादयन्
वसआच्छादने शानच्प्रत्ययः विषूचीः विषुनिपातोनानार्थः विषुअंचंतीतिविषूच्यः ताः नानांचनादिशोरश्मीन्वा
वसानः क्विन्नंताङ्ङीपिअचइत्यकारलोपेचाविति पूर्वपददीर्घः सध्रीचीश्चऐषविषूचीश्चदिशोवस्तेत्यो

अपश्यङ्गोपामनिपद्यमानमाचपराचपथिभिश्चरन्तम् सस्रध्रीचीः
सविषूचीर्वसानः आवरीवर्तिभुवनेष्वन्तः १ ॥

रश्मीनितिश्रुतिः एकः सशब्दः पादपूरणः सकः यंअहंअपश्यं आदित्यरूपंयेयंपश्यामि कीदृशं गोपां गोपयतीतिगो
पां क्विपियलोपः अनिपद्यमानं निपद्यतेयन्तीतिनिपिनिपद्यमानः ननिपद्यमानोऽनिपद्यमानस्तं अंतरिक्षेगच्छं
तमपिनाद्यः परंतंचपुनः पथिभिर्दैवमार्गैः आचरंतेआगच्छंते पराचरंतेपरागच्छंतेच गमनागमनेकुर्वाणं ६

विश्वो सोभवो ग्रत्यषि: हे विश्वा सो भुवो पते सर्वासां पृथिवीनां स्वामिन् विश्वस्य सर्वप्राणिगतस्य मनसः पते थिपते विश्व
स्य वचनः पते सर्वप्राणिवचनस्य पालक सर्वस्य वपील ल्लणस्य वचसः पते प्रवर्त्तक हे देव स्कृत देवैः स्तूयते इति दे
व स्कृत देवश्रसिद्धः हे देव दीप्यमान हे यमं देव स्त्वं देवान् याहि रत्त एवं च मे संशायणाश्विनावाह हे अश्विनौ अत्र यत्ते
देववीतये देवतर्पणाया अनु अनेन तरेयमो वा युवां प्राचीः प्राचीत् तर्पयत् लोडर्थे लङ् पुरुषव्यत्यय युवयोस्तस्य
सर्वे देवास्तृप्यन्तीति भावः याभ्यां युवाभ्यां दध्यङ्ङाथर्वणो मधु संतेकं ब्राह्मण उवाच दध्यङ् ह वा आभ्यां माथर्वणो मधु
नाम ब्राह्मण मुवाचेति श्रुतेः कीदृशाभ्यां युवाभ्यां माधीभ्यां मधुब्राह्मणं ईयाते तौ माधो नाभ्यां ईगतो क्विप् तथा मा

विश्वा सोम्भुवाम्पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते.
देव श्रुत्त्वन्देव घर्म्म देवो देवान्याह्यत्र प्राविरनु वान्देव वीतये मधु माध्वीभ्याम्मधु १५
माधूचीभ्याम् ॥ ए स्यदेत्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ऊर्द्ध्वः अध्वरान्दिवि देवेषु धेहि

धूचीभ्यां मधुब्राह्मणं प्रवर्त्तः समयने सोमधवो तामभ्यां मधुङ्ग्रामिति प्राप्ने ङीपिअलोपे माधूचीभ्यामिति लिंगव्यत्ययः
आदिदीर्घच्छन्दसः हे देवा परोस्मिक घाधावष्टालौत्तरीयो हान् प्राणः सा परोस्मिक परोस्मि कपरन नरस्तु ज्ञो आयया धूं
हः हे यमं कदे त्वा स्यदयाथैं स्यदयस्वा स्यापयत्वा त्वां स्त्वम इति शेषः मनसे मनः श्रुध्यर्थं त्वा त्वां स्तृमः दिवे स्वर्गेश
फ्रै त्वां स्तृमः सूर्याय सूर्येन्तृप्ते त्वा त्वां स्तृमः स्यदयं संशोध्यमनोति मनं लुक्त्वा दिवमस्मात्त्वी त्वा सूर्येन तर्पयेति भावः
किंच ऊर्द्ध्वः सावधानः अध्वरमस्मदीयं यज्ञे विद्युलोके वर्त्तमानेषु देवेषु धेहि स्थापय यज्ञे गते यजमानो गच्छ त्वेवेति भावः १४

पितानः जगगायत्री हे महावीर त्वं नोऽस्माकं पितासि पालको भवसि पितेव नोऽस्मान्बोधि बोधय सर्वथा नमस्तेऽस्तु
देवेषु मोमाहिंसीः मा जहि महावीरोपस्थाने समाप्ते का· त्वष्टमन्तः इत्येनो वाचयति महावीरमीक्षमाणा अपतीशि
नशिरोवस्त्राच्चर्मे पश्यती पत्नी मखमुर्वी वाचयतीत्यर्थः त्वष्टमन्तः कचौ त्रिष्टुप्घर्मदेवत्या पत्न्याशीः हे घर्म वयं त्वा·
त्वां सपेम सपतिः स्पृशतिकर्मा मैथुनाय त्वामुपस्पृशामः कीदृशा वयं त्वष्टमन्तः त्वष्टा विद्यते येषां ते त्वष्टमन्तः त्वष्टा

पितानोसिपितानोबोधिनमस्तेऽअस्तुमामाहिंसीः त्वष्टमन्तस्त्वासपेमपुत्रान्प
शून्मयिधेहिप्रजामस्मासुधेह्यरिष्टाहंसहपत्याभूयासम् २० ॥

त्वेनसामर्थ्यकारी न सहिता मैथुनार्थौ यस्यार्थे वीर्याधिष्ठाता पेत्विति तेन एव तद्युक्ताः अतः पुत्रान्पशूंश्च मयि विषये त्वं·
धेहि स्थापय प्रजामन्तरोत्तरवंशवृद्धिमस्मासु धेहि स्थापय किंच पत्या भर्त्रा सह अरिष्टानुपहिंसिता अहं भूयासं भवे·
यं भर्तृमति चिरंजीवेयमित्यर्थः ह्यापावै प्रवर्ग्यो योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते इति श्रुतेः २५ ॥ ॥

३२

१२॰ कात्या॰ अहः केतुनेति दक्षिणे रोहिणे जुहोति उपस्थानगान्योः समासौ रोहिणाद्धवन्या स्त्वचाद दक्षिणे रोहिणं पुरोडाशं सर्व
हुतेऽत्र होतीत्यर्थः अहः केतुना यमं देवस्येयुन्नषी सामानुष्टुभो केतुः प्रज्ञा कर्म वा केतुना प्रज्ञया कर्मणा वसदिते अ
170 हर्दिने जुषतां रोहिणस्तेमेन प्रीयतां कीदृशा अहः ज्योतिषा स्वकार्येनैव तेजसा सज्योतिः शोभनं ज्योतिः यस्य तत्
विशिष्टतेजस्के स्वाहा एतद्धविः सुहुतमस्तु रोहति स्वर्गं यजमानो याभ्यां तौ रोहिणौ अग्न्यादित्यौ अहो रात्रे वा इमौ लो

अहः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा रात्रिः केतुना जुषतां सुज्योति
ज्योतिषा स्वाहा २१ इति संहितापाठे सप्तत्रिंशोऽध्यायः ३७ ॥ ॥

कौवा वत्सधीवा शिरः प्रवर्ग्यो रोहिणौ वत्सधी तत्र दयात्तीत्या द्वि रोहिणप्रशंसा स्कन्तौ तेषा का॰ रात्रिरिति सायं स
यं कालीने प्रवर्ग्ये रात्रे रितिमन्त्रेण द्वावपि प्रवर्ग्ये यथाकालेऽत्र होतीत्यर्थः रात्रिः केतुना सहिता रात्रिः जुषतां प्रीयतां
ज्योतिषा कृत्वा सज्योतिर्विस्तके श्रीमन्महीधरकृते व्याये वेददीपे हरि ॐ अध्याये रोहिणौ सप्तत्रिंशो दूपितः

का० देवस्य त्वेति रज्जुसंदानमादायेड एहीति गां नामाह्वयति नाम्ना च त्रिरुच्चैरपरेण गार्हपत्यं गच्छन्। अध्वर्युर्देवस्य।
त्वेति रज्जुसंदानमादाय गार्हपत्यस्य पश्चाद्गच्छन् इडा एहीति वाक्यत्रयेणाग्निमेकां गामाह्वयति असावेहीति गोनाम्नो
वोच्चैस्त्रिवारमाह्वयतीति सूत्रार्थः रज्जुदेवस्य त्वा इत्यस्य प्रजापतिर्गायत्री हे रज्जो सवितुर्देवस्य आज्ञायां वर्तमानोऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्यां त्वामाददे स्वीकरोमि यतः त्वं अदित्यै अदित्या देवमातुः मातुः रसना मेखला असि भवसि षष्ठ्यर्थे च
तुर्थी गामाह्वयति इड एहि इडे मानवि एहि आगच्छ हे अदिते देवमातः एहि हे सरस्वती वाक् अतस्मिन् कर्मणि त्वस्या
इत्यस्यार्थः इडादि गौरदितिर्हि गौः सरस्वती हि गौरिति श्रुतेः नाम्ना त्रिरुच्चैराह्वयति असौ धवलि एहि पवित्रिः कात्या०

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् आददे दित्यै रास्नासि १ इड एह्य
दित एहि सरस्वत्येहि असावेह्यसावेह्यसावेहि २ अदित्यै रास्नासीन्द्राण्या उष्णीषः पूषासि

अदित्यै रास्नेति गां पाशेन प्रतिमुच्य पूष्णायांवध्वा पूषासीति वत्समुत्सृजति आगतो (घर्माय दीष्व ३
गामदित्यै इति मंत्रेण पाशेन बध्नाति पाशस्तं भवे बध्वा पूषासीति वत्समुंचतीत्यर्थः अदित्यै हे रज्जुपाश त्वं अदिते रास्नार।
सनासि इन्द्राण्या इन्द्रपत्न्या उष्णीषः शिरोवेष्टनमसि एतेन पाशेन इन्द्राण्युष्णीषं करोतीत्यर्थः तमेवैनमेतत्करोतीति श्रुतेः व
त्सं मुंचति पूषासि देव्युष्णिक् वत्सो देवता हे वत्स त्वं पूषा वायुरसि वायुर्यथा वृष्टिमाप्याययति तथा त्वं प्रस्रवेन पयआप्याय
यसीति भावः अयं वै पूषा योऽयं पवते एष हीदं सर्वं पुष्यत्येष उ प्रवर्ग्य इति श्रुतेः कात्या० संदाय घर्माय दीष्वेति वत्समुन्नयति धे।
नुं रज्वा पश्चिमपादयोर्बध्वा वत्समयाकरोतीत्यर्थः घर्माय दैवी पंक्तिः वत्सो देवता हे वत्स घर्माय घर्मार्थं दीष्व देहि पयः पयं शे

बध्नामीत्यर्थः दीक्षतेर्वृद्धिकर्मणो लोट् १

१८
१८

का॰ अश्विभ्यां पिबस्वेति पिबत्वने दोग्धि पिबत्वेने पात्रे प्रतिमंत्रं गां दोग्धीत्यर्थः अश्विभ्यां पिबस्व इंद्राया यजुर्गायत्री सरस्वै
यजुरनुष्टुप् लिंगोक्ता देवताः हे गाय अश्विभ्यामर्थाय त्वं पिबस्व मंत्रस्व सरस्वत्यै च पिबस्व इंद्राय च पिबस्व अ।
श्विनौ वा पतयज्ञस्य शिरः प्रत्यधत्तां तावेवैतत्प्रीणातीति श्रुतिः सरस्वत्या वाचा कृत्वा इंद्राय यज्ञशिरोऽश्विभ्यां स
हितमिति तयोरर्थे तरस्वेति भावः का॰ स्वाहेंद्रवदिति विप्रुषोऽभिमंत्रयते पिबत्पतितास्ययः कर्णान भिमंत्रय
ते इत्यर्थः स्वाहेंद्रवत् यजुर्जगती विप्रुषो देवता यत्तइयमाने स्तान्तेतत् स्वाहा सुहुतमस्तु इंद्रवत् इंद्रसंयुक्तं च वा।
स्त २ का॰ यस्ते स्तन इति स्तनमालभते जानावेकवचनमित्यर्थः यस्ते स्तनः वागदेवत्या त्रिष्टुप् दीर्घतमो दृष्टा हे सर

अश्विभ्यां पिबस्व सरस्वत्यै पिबस्वेन्द्राय पिबस्व स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ४ यस्ते
स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः येन विश्वा पुष्यसि वार्याणि सर
स्वति तमिह धातवे कः उर्वन्तरिक्षमन्वेमि ५ ॥ स्वति त्वं स्तनं इहास्मिन्स्थाने धातवे धेट् पाने तुमर्थे त

वे प्रत्ययः पानार्थे अकः कुरु मम पानाय प्रयच्छेत्यर्थः लोडर्थे लङ् शपिलुक्मेर्गुणाः तेवेयः तेन च स्तनः स्तन इव।
स्तनः शशयः शेते इति शशयः अच्छ्रान्तये हि त्वं पूर्वस्थाने च बोदसं स्वप्न इवास्ते अस्मे रत उपभुक्तवान् यस्ते नो निहिवो।
गुहायामिति श्रुतेः यश्च तनो मयोभूः मयः सुखं भावयति प्रापयति सर्वभूतानामिति मयोभूः यश्च रत्नधाः रत्नानि दधाति र।
त्नधाः रमणीयानां धनानां धारयिता यश्च वसुवित् वसु धनं विंदति वेति वा वसुवित् यश्च सुदत्रः सुष्ठु ददातीति सुदत्रो दाता
धनवान् न्योदातुं न शक्नोति सुदत्तं न स्तु धनवान्दाता चेति प्रमेभ्य प्राधिकं किंच येन स्तनेन विश्वा विश्वानि सर्वाणि वार्या।

का॰ परीशासावादत्ते गायत्रंछंदोसीति प्रतिमंत्रं गायत्रमिति मंत्राभ्यां परीशासौ संदंशौ गृह्णामीत्यर्थः गायत्रं यजुर्गा
यत्र्यौ परीशासौ देवते हे परीशास त्वं गायत्रंछंदोसि गायत्र्येव गायत्रं स्वार्थेऽण् गायत्रीछंदोरूपोसि त्रैष्टुभं त्रिष्टुवे
व त्रैष्टुभं त्रिष्टुप्छंदोरूपोसीति द्वितीयं का॰ ताभ्यां महावीरं परिगृह्णाति द्यावापृथिवीभ्यां त्वा परिगृह्णामीति।
ताभ्यां परीशासाभ्यां महावीरमादत्त इत्यर्थः द्यावा यजुर्जगती महावीरो देवता हे महावीर द्यावापृथिवीभ्यां द्युभ्यां।

गायत्रंछंदोसि त्रैष्टुभंछंदोसि द्यावापृथिवीभ्यां त्वा परिगृह्णाम्यन्तरिक्षेणोपयच्छामि इ
न्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् स्वाहा सूर्यस्य रश्मये वृष्टिवन
ये ६

मिभ्यां कृत्वा त्वां परिगृह्णामि परीशासयोर्द्यावाभूमी अध्यस्ते। महावीरे वादित्योऽध्यस्तः तथा च श्रुतिः इमे वै द्यावापृ
थिवी परीशासावादित्यः प्रवर्ग्योऽमुं तदादित्यमाभ्यां द्यावापृथिवीभ्यां परिगृह्णातीति का॰या॰ उपयमनं मुंजवेदेन।
पमन्योपयमन्योपगृह्णात्यंतरिक्षेणोपयच्छामीति परीशासगृहीतं महावीरमूर्ध्वं कृत्वा मुंजनवेदेन संमार्ज्योप
यमन्यामृचा तं गृह्णातीत्यर्थः अंतरिक्षेण यजुर्बृहती घर्मो देवता हे घर्म अंतरिक्षेणाकाशेन द्वारेण वा त्वामुपयच्छा
मि गृह्णामि उपयमन्यंतरिक्षं वैतोदरवेन च स्तूयते तथा च श्रुतिः अंतरिक्षं उपयमन्यंतरिक्षेण हीदं सर्वमुपयत।

२८ मघोदरं वा उपयमन्सुदेशगाहीदेसवमेवावं सर्वेस्रुपपनेतस्मादाद्यंनविते णोपपक्षामिशति ४ का॰ अपयस्मावशिखशं
१०२ तेगोः पयोऽवनयतीं द्वाभ्यिनेति अत्राद्वयेनमहावीरं तू स्मीमिका शांतेदीणान्वालेनत्र गोपयः सिचतीत्यर्थः इंद्रा।
श्विना ब्राह्मीगायत्री विश्वेदेवादेवताः हे इंद्र हे अश्विना अश्विनौ हे वसवः वा सर्ये तिते वसवो वा सपितारो यूयं मधुनोम
धुरस्यपघसोवर्मे भरसेपात पिवत पिवादेशाभावश्छांदसः कीदृशस्य मधुनः सारवस्य सरघामधुमक्षिका अत्र
सरघामधुकृतो भ्रमरा रवञ्जविजस्तैः कृतं सारघं तस्य वर्मे पानेति रसं पातेर्वैवेतदाहेति श्रुतिः किंच हे इंद्रादयवाट्
वषट्कारेण स्वाहा स्वधा कृतं सारघं मधु सूर्यस्य रश्मये किरणाय यूयं यजत दत्त यजतिर्दानार्थः वषट्कृतं हुतमेव
मस्मै तद्भवतीति श्रुतेः किंभूताय रश्मये वृष्टिवनये वृष्टिंवनति ददाति वृष्टिवनिस्तस्मै यो
रश्मिर्वृष्टिदस्तेन तस्मै मधुदत्तेत्यर्थः तथा च श्रुतिः सूर्यस्य दवा एको रश्मिर्वृष्टि
वनिर्नामयेमेसाः सर्वाः प्रजा विभर्ति तमे
वैतत्प्रीणातीति
५

१७१ १०२

का॰ प्रैतु ब्रह्मणस्पतिरित्युच्यमाने समुद्राय त्वेति वातनामानि जपति गच्छन्नाहवनीयं प्रैतीति होत्रोच्यमाने आहवनी
यं प्रति गच्छन्नध्वर्युः समुद्राय त्वेत्यादीनि द्वादश वातनामानि स्वरेण जपतीत्यर्थः समुद्राय त्वा द्वादश यज्ञेषु वातनाम
देवत्यानि हे यजमान वाताय त्वां स्वाहाकारेण जुहोमि कीदृशाय वाताय समुद्राय समुद्र इव समुद्र इवेति सर्वाणि भूतानि यस्मा
त्समुद्रः तस्मै यो वै समुद्रो योऽयं पवते एतस्माद्धि समुद्रात्सर्वे देवाः सर्वाणि भूतानि समुद्रवन्तीति तस्मा एनं जुहोतीति।

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा प्रति
धृष्याय त्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा ७

श्रुतेः १ सरिराय सरिरे ह्येते गच्छन्ति सर्वभूतानि सरिरं वा इति श्रुतेः अनाधृष्याय न आधर्षितुं पराभवितुं शक्योऽना
धृष्यः तस्मै ३ अप्रतिधृष्याय न प्रतिधर्षितुं प्रतियोद्धुं शक्योऽप्रतिधृष्यस्तस्मै वनाये स्वकं अयं वा अनाधृष्योऽप्रतिधृ
ष्यो योऽयं पवत इति श्रुतेः ४ अवस्यवे अवो रक्षणमिच्छति अवस्यति अवस्यतीत्यवस्युः सुप आत्मनः क्यच् क्याच्छन्दसी
उप्रत्ययः अवनशील ५ शिमिदाय क्लेशाय कं कर्म शिमि तद्ददातीति शिमिदस्तस्मै क्लेशनिवर्तकाय वाताय।

अयं वा अवस्युः शिमिदो योऽयं पवत इति श्रुतेः ६७

३८ इंद्रायत्वा वसवोविद्यंतेयस्यसवसुमान् रुद्राविद्यंतेयस्यसरुद्रवान् तस्मैवसुयुताय रुद्रयुतायेंद्रायवातायदेवघर्मंत्वंस्वा
१७२ हाञ्जुहोमि अयंवाइंद्रायोऽयंपवतेइतिश्रुतेः ७ इंद्राय आदित्याविद्यंतेयस्यसआदित्यवान् तस्मैआदित्ययुक्तायेंद्राय।
वातायस्वाहा ८ इंद्राय अभिमानीसपत्नान्हंतीत्यभिमातिहा सपत्नोवाअभिमातिरितिश्रुतेः शत्रुनाशकायेंद्राय
173 वातायत्वांजुहोमि ९ सवित्रे सूतेससविता तस्मैचेष्टयित्रेवातायत्वांजुहोमि अयंवैसविता योऽयंपवतइतिश्रुतेः की
दृशायऋभुमते ऋभुरस्यास्तिऋभुमान् विभुरस्यास्तिविभुमान् वाजोस्यास्तिवाजवान् आंगिरसस्यसंबंधवतस्त्वय
युवात भुविभुवजास्तयुक्तायवाताय १० बृहस्पते बृहतांमहतांपतिर्वातस्तस्मै अयंबृहस्पतिर्योऽयंपवतेइतिश्रुतेः।

इन्द्रायत्वावसुमतेरुद्रवतेस्वाहेन्द्रायत्वाभित्यवतेस्वाहेन्द्रायत्वाभिमातिघ्नेस्वाहा सवित्रेत्वऽ
ऋभुमतेविभुमतेवाजवतेस्वाहा बृहस्पतयेत्वाविश्वदेव्यावतेस्वाहा ८ यमायत्वांगिर
स्वतेपितृमतेस्वाहा स्वाहाघर्मायस्वाहाघर्मःपित्रे ९

कीदृशाय विश्वदेव्यावते विश्वेषांदेवानांसमू
हो विश्वदेव्यं तदस्यास्तिविश्वदेव्यावान् तस्मै मंत्रेसोमाक्षेद्रियविश्वदेव्यस्समताविति दीर्घः सर्वदेवसहितायत्वा।
होमि ११ यमाय यमायवायवेदेवघर्मंत्वांजुहोमि अयंवैयमो योऽयंपवतेइतिश्रुतेः कीदृशायघर्माय आंगिरसो
मुनयोस्यसंतीति अंगिरस्वान् अपस्यथादीनिछंदसीतिमसंज्ञायांसस्यविसर्गाभावः पितृमते पितरोस्यसंतीतिपि।
तृमान् तस्मै अंगिरःपितृयुतायवातायेत्यर्थः १२ वातनामानिसमाप्तानि ७ का० स्वाहाघर्मापित्रेउपयमन्यासिं
चति घर्मे उपयमन्यास्रुवास्रुकां स्रुतंघर्मेसिंचतीत्यर्थः स्वाहाघर्माय घर्मायस्वाहा एतदाज्यंस्रुक्स्रुतमस्तु ॥ १७३

का॰ स्वाहा घर्मः पित्र इति जपित्वा निक्रम्याश्राव्याह घर्मस्य यजेति अपसव्यवान् दक्षिणास्यः स्वाहेति मंत्रं स्वरेणाज।
पिता सव्येनजलं स्पृष्ट्वा घर्मं हस्तोऽतिक्रम्याश्राव्य घर्मस्य यजेत्याहेत्यर्थः स्वाहा घर्मः स्वाहुतो घर्मः पित्रे पित्रर्थाया
स्तु का॰त्या॰ वषट्कृते जुहोति विश्वा आशा इति वषट्कृते सति घर्मं जुहोति इत्यर्थः विश्वा आशाः अश्विदेवत्या।
नुष्टुप् इह यजेद्दक्षिणाशा तद्दक्षिणस्यां दिशि सीदतीति दक्षिणसत् सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः दक्षिण।
तः स्थितोऽध्वर्युर्विश्वाः सर्वा आशा दिशो विश्वान् देवांश्च अयाट् अपातीत् यजेर्लुङि॰ हलो लोपे रूपं दृष्टवान् दक्षिणतः

विश्वाऽआशा दक्षिणसद्विश्वान्देवानयाडिह स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना।
९ दिविधा इमं यज्ञमिमं यज्ञं दिविधाः स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥

स्थितो ह्वाङ्गतीर्जुहोति अतो ब्रवीमि हे अश्विनौ अश्विनौ स्वाहाकृतस्य वषट्कारानन्तरं हुतस्य मधोर्मधुरास्वादस्य
घर्मस्य घर्मं युवां पिबतं कर्मणि षष्ठी का॰त्या॰ दिविधा इति त्रिरुत्कंपयति महावीरं त्रिरूर्ध्वं कंपयति सकृन्मंत्रेण द्वि।
स्तूष्णीमिति सूत्रार्थः दिविधाः यज्ञघर्मं देवास्पे सामो स्निक् हे महावीर त्वमं मदीयं यज्ञं त्वं दिवि घस्लोके धाः येदि स्थाप
य इमं यज्ञं दिविधा इति पुनरुक्तिरादरार्था अभ्यासे भूयांसमर्थं मन्यंत इति वचनात् का॰ स्वाहाग्नय इत्यनुवषट्कृते
अनुवषट् स्वाहेति मंत्रेण घर्मं जुहोतीत्यर्थः स्वाहाग्नये यज्ञियाय यज्ञहिताय अग्नये स्वाहा सुहुतमस्तु यजुर्भ्यः सकाशम्।

[illegible] ॥

२८ का॰ अश्विनाघर्ममिति ब्रह्मानुमंत्रयते ब्रह्मा घर्ममभिमंत्रयतेऽस्यार्थः अश्विना स्वराडुष्णिक् अश्विनावादित्यौ द्यावा
१७४ पृथिव्यौ च देवताः हे अश्विना अश्विनौ युवां घर्मं पातं पिबतं काभिः ऊतिभिः अवनैर्निमित्तैः ये कालोपलक्षिता-
भिः प्रवर्ग्यकालः स एव यत्नः कीदृशं घर्मं हार्द्वानं वा गतिगंधनयोः लुट् इति वाने गमने यस्य स हार्द्वानः हार्द्वा-
नमेव हार्द्वानस्तं स्वार्थेऽण् हृदयप्रियमित्यर्थः एवं घर्मपानायाश्विनौ संप्रार्थ्यंते तस्माद्द्यापरूयोदीन्नमतिते

अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरू-
तिभिः तंत्रायिणे नमो द्यावापृथिवीभ्याम् १२

त्रायिणे नमः तन्यते तन्तं तंत्रं पटरचनायां तंत्रीशलाकाप्रोतास्तंतवस्तंत्रमुच्यते तद्वन्नभसि कालचक्रमपि तंत्रमु-
च्यते तथा चाभिधाने तंत्रं राष्ट्रे परच्छंदप्रधानयोः अगदे कुटुंब कृत्ये तंतुवाने परिच्छदे श्रुतिशाखांतरे शास्त्रे कर-
णे द्व्यर्थसाधके इति कर्तव्यतातंत्रयोरिति तंत्रे कालचक्रे पतित्वा निरंतरं गच्छति तंत्रायी तस्मै आदित्याय नमोऽस्तु एष
वै तंत्रायी य एष तपत्येष हीमांल्लोकांस्तंत्रमिवानुसंचरतीति श्रुतेः द्यावापृथिवीभ्यामुभाभ्यां लोकाभ्यां नद्यिष्टा। १७४

का॰ अपातामितियजमानः यजमानोयमेममभिमंत्रयतेइत्यर्थः अपातांककुब्स्निकअधिदेवस्या मध्यमःपादोहा।
प्राणेः आयंतावशाणींसाककुप् मध्यमश्चैककुविराजैः अश्विनोवमेअपातां अधिदेवतं लङ् द्यावापृथिवीद्यावा
पृथिवीअवमंसातां अनुमतवन्तौ साधुकृतमितिअनुमन्यातेइत्यर्थः अतएवास्यादिप्रमादोत् इहैवास्मद्धेस्थिता
नामस्माकंतयोधनानिसंत इहैवरातयःसंतितीदेवतोधनानिसंतिसैवेदोतद्वेतिश्रुतेः का॰ इषेपिन्वस्वेतिपिन्वमा।
नमनुमन्त्रयते पिन्वमानगतिनमंत्रयमेममभिमंत्रयतेइत्यर्थः इषेपिन्वस्व स्वोपंक्तिः यमेदेवस्यादेपिन्वमानघर्मः
षट्हेपिवस्व पुष्टाभवह्लार्थे ऊर्जेऽन्नायपिन्वस्व अन्नंवर्द्धय ब्रह्मणेब्राह्मणेभ्यःपिन्वस्व त्तत्रायत्तत्रियेभ्यःपिन्वस्व

अपातामश्विनाघर्ममनुद्यावापृथिवीअमंऽसाताम् इहैवरातयःसन्तु ८२ इषेपिन्वस्वोर्जेपि
न्वस्वब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्वद्यावापृथिवीभ्यांपिन्वस्व धर्मासिसुधर्मामेन्यस्मेनृ।
म्णानिधारयब्रह्मधारयक्षत्रंधारयविशंधारय ८४ द्यावापृथिवीभ्यांपिन्वस्व ब्राह्मणक्षत्रियद्या।

वापृथिवीस्तर्पयेत्यर्थः कात्या॰ धर्मासीत्युद्धाममस्मेरर्वाहे पेशानीदिशिप्रत्युद्धामतीत्यर्थः धर्मासि यजुर्गायत्री
घर्मदेवस्याहेघर्मत्वधर्मे सुष्ठुधारयतीतिसुधर्मः हेसाधुधरणशीलत्वंधर्मअसिसर्वजगतोधारणमसि आहुतिपरिण
मद्वारेणसर्वंधरणीमर्थः का॰ अमेन्यस्मेइतिविरेकरोति महावीरंविरंआसादयतीत्यर्थः अमेनितिअगृह्णतीत्यमेदेव।
साहेघर्मअमेनिमित्रहिंसायांमिनोतिहिनस्तीतिमेनिः नमेनिरमेनिः सुपांसुलुगितिसुलोपः अमेनिःअहिंसनुम्
ऊद्युत्मनअस्मेअस्मासुनृम्णानिधनानिधारयस्थापयनृन्नमयतीतिनृम्णं अकुध्यन्तोधनानिधारयेतिश्रुतिःब्रह्म

३८ का॰ विकंकतं शाकलेऽजुहोति घर्मेण्यस्याश्रुतिः अध्वर्युर्विश्वेदेवाः इत्यादीनन्तर्दशावे स्वाहा पूष्णे शरसे इति।
१७५ प्रतिमंत्रं घर्मेनितनामका विकंकतशाकलैर्घर्माज्ये जुहोति स्वाहा पूष्णे इति प्रतिमंत्रमित्यर्थः स्वाहा पूष्णे सममलिंगो
क्तदेवतानियतेषि शरः शब्दो दध्युपरिस्थस्तेहवाचकः अत्र स्नेहमात्रवाची शरसे स्नेहकर्त्रे पूष्णे वा नाय प्राणरूपा
य स्वाहा सुहुतमस्तु अथवा स्वाहाकारं करोति परोऽदेवतामिति श्रुतेरादौ स्वाहाकारस्ततो देवतापदानि अयं वै पूषा यो
ऽयं पवते एष हीदं सर्वं पुष्यमेषः प्राणः प्राणमेवास्मिन्नेतद्दधातीति श्रुतेः १ स्वाहा ग्रावभ्यः गृह्णन्तीति ग्रावाणः।
प्राणविषयग्रहणशीलाः तेभ्यः स्वाहा प्राणा वै ग्रावाणः प्राणानेवास्मिन्नेतद्दधातीति श्रुतिः २ स्वाहा प्रतिरवेभ्यः।

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपाव
भ्यः स्वाहा द्यावापृथिवीभ्या ᳪ स्वाहा विश्वेभ्यो देवेभ्यः १५

प्रतिरुवंति शब्दं कुर्वंति प्रतिरमंते वा यान्याप्येति प्रतिरवाः प्राणाः तेभ्यः स्वाहा प्राणा वै प्रतिरवाः प्राणा ह्यदं सर्वं
प्रतिरतमिति श्रुतिः ३ का॰ चतुर्थमहुतमुदङ्ङीत्वा मार्जालीये दक्षिणतो बर्हिषुपगूहति चतुर्थं वाणः प्राणानेवास्मि
न्नेतद्दधातीति श्रुतिः शाकले अहुतमेवोदीचीपश्चात्वेदेर्दक्षिणभागे आनीय ख्याबर्हिषि प्रवेशयतीत्यर्थः स्वाहा पितृभ्यः
पितृभ्यः स्वाहा कीदृशेभ्यः ऊर्ध्वबर्हिभ्यः ऊर्ध्वप्राग्रं बर्हिर्येषां ते ऊर्ध्वबर्हिषः तेभ्यः सोमपाभ्य इत्यर्थः तथा घर्मेया
वभ्यः घर्मं पिबंतीति ते घर्मपावनः तेभ्यः स्वाहा ४ स्वाहा द्यावापृथिवीभ्यां द्यावापृथिवीशब्देन प्राणोदानावुच्येते ता
भ्यां सुहुतमस्तु प्राणोदानौ वै द्यावापृथिवी प्राणोदानावेवास्मिन्नेतद्दधातीति श्रुतिः ५ स्वाहा विश्वेभ्यः विश्वेभ्यो देवे।

भ्यः प्राणेभ्यः स्वाहा प्राणा विश्वे देवाः प्राणेनैवास्मिन्नेतद्दधातीति श्रुतिः ॥ १७५

175

स्वाहा रुद्राय कात्या॰ सम्राण्मंच सर्वलेपान्दक्षिणेन मार्जाले प्रतिप्रस्थात्रे प्रयच्छति मूलाग्रावधिर्घर्मं हुताभ्यक्तं सम्राण्मंश
कलं दक्षिणेन प्रतिप्रस्थात्रे ददातीत्यर्थः रुद्र इति स्तोत्रनाम सपठितैः रुद्रैः स्तोतृभिर्हूयते आहूयत इति रुद्रहूतिः।
तस्मै स्तोत्रस्तुताय रुद्राय रुद्रहूतये स्वाहा एवं सम्राड्यजुषां मध्ये चतुर्थं सम्राण्मयोर्विनियोग उक्तः शेषैः पंचशकले राज्ञ्यदो
मः का॰ स्वाहा संज्योतिषेत्युपयमन्या मार्जाले सिंचतीति घर्मं घर्मसंबंधि हुतमुपयमन्या मार्जाले सिंचति पूर्वं सम्राट्कल्के घर्मेनोन्मधु।
नाघर्मस्थं सम्यक् विनयतीत्यर्थः स्वाहा सा पयो देवसंयजुरनुष्टुप् ज्योतिर्घर्मस्थं हुतं ज्योतिषा पयसा तीर्थेन हुतेन संगच्छ
तां स्वाहा रुद्रहूतमस्तु ज्योतिर्वा इतरस्मिन्पयो भवति ज्योतिरितरस्मिंस्तेनैवैतदुभे ज्योतिषी संगच्छेते इति श्रुतेः पयो देवता।
कात्या॰ मंत्रक्रमेणोत्तरं रौहिणं जुहोति उत्तरं रौहिणं मंत्रक्रमेण संज्योतिषा ज्योतिरेनमंत्रक्रमेणेनोत्तरं जुहोतीत्यर्थः

स्वाहा रुद्राय रुद्रहूतये स्वाहा संज्योतिषा ज्योतिः अहः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वा
हा रात्रिः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा मधुहुतमिन्द्रतमे अग्नावश्याम ते देव।
घर्म नमस्ते अस्तु मा मा हिंसीः १८ अहः केतुना व्याख्याते यजुषी का॰ अग्निहोत्रहुतं हुत्वा वा
जिनवद्भक्षयंति मधुहुतमिति उपयमन्या मार्जालीतं घर्मान्यं अग्निहोत्रहोमप्रकारेण समंत्रकं हुत्वा वाजिनवदुपहूय आर्ध्व
न पूर्ववद्भक्षयंति होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्राग्नीध्रयजमानाः मधुहुते घर्म देवसं उरगहुती अग्नौ मधुमधुरं घर्मा
ज्यं हुतं अस्माभिः कीदृशे अग्नौ इन्द्रतमे इंद्रे वीर्यमस्यास्तीति इंद्रवान् अतिशयेन इंद्रवान् इंद्रतमः वत्प्रत्ययलोपः वीर्यवत्तमे इत्यर्थः
मधुहुतमिन्द्रियवत्तम अग्नाविप्येतदाहेति श्रुतेः हे घर्म हे देव तेतव हुतं शेषमवयं अश्याम भक्षयाम आश्नाते विकरणव्य
त्ययेन बहुलं छंदसीति शपो लुक् लिङि उत्तमबहुवचने ते तुभ्यं नमोस्तु मा मां मा हिंसीः आत्मनः परित्राणमर्थ्यते ९

२८ का॰ अभीममितिमहावीरं प्रचरणीयं घर्ममभ्यासं वांकरोतीति मैत्रेयेणैनवाणितन्त्सौ ततः शान्तिपाठ इत्यर्थः अभीमं गायत्रीच्छ
२९ न्दस्यौमध्ये ऽवमानतीने अभीमं गायत्री संसीदस्वचृहती यद्वावसानत्रयोपेतानि शाक्करीषष्ठ्यत्राग्निर्देवत्यापकेचश्र।

176

कृत्स्नगृह्यं चेत्यर्थः हे अग्नेत्वमहिमाऽऽदिदिवं अभिवभूव अभिभवति छन्दसिलङ्लुङ्लिटः दिवशब्दः पुंलिंगः अर्द्धर्चादि
त्वात् कीदृशो महिमा विप्रः विशेषेण प्रापिपूरयति सर्वमिति विप्रः मेधावी सप्रथाः प्रथनं प्रथो विस्तारस्तेन सहि
तस्सप्रथाः उतापिच श्रवसा धनेन यशसा वा पृथिवीं अभिभवतीत्यनुषंगः संसीदस्वेति व्याख्यातं एकादशे ध्यायेष।
ट्त्रिंशीकण्डिका तत्रशोचस्वेतिपाठे ऽन्नरोचस्वेत्यर्थपक्कपव का॰ चतुर्गृहीतेनाभिजुहोतिपानेघर्मदिव्याशुगितेप्र

अभीमंमहिमादिवंविप्रोवभूवसप्रथाः उतश्रवसापृथिवीं॑ संऽ सीदस्वमहाँ २ऽ॑असिरोच
स्वदेववीतमः विधूममग्नेऽअरुषम्मियेध्यसृजप्रशस्तदर्शतम् ९ यातेघर्मदिव्याशुग्गया
यत्राऽऽछ्न्दविर्द्धाने सातऽआप्यायतान्निष्ठ्यायतान्तस्यैतेस्वाहा यातेघर्मान्तरिक्षेशुग्गयात्रिष्टुप्।
आग्नीध्रे सातऽआप्यायतान्निष्ठ्यायतान्तस्यैतेस्वाहा यातेघर्मपृथिव्याँ शुग्गयाज्जगत्याँ।
सदस्या सातऽआप्यायतान्निष्ठ्यायतान्तस्यैतेस्वाहा ५० \ तिमंत्रं अध्वर्युराग्नेयसंस्कृत्यचतुर्गृहीतेनकृवानेन
जुहोति आग्नीध्रादि देयप्राणे ऽवति पृशलाकात्रिके शुत्रिभिर्मंत्रैः तृतीयेनोपविश्यपेत्यर्थः पातेघर्मागायत्रेपिध
मदेवत्यानि अरकाङ्क्रयः हेघर्मयातेतवदिव्यादिविभवाशुक्दीप्तिः यागायत्र्यां छन्दसिप्रविष्टा याहविर्द्धानेयजमान
हेप्रविष्टा सातेऽनच शुक आप्यायतां वर्द्धतां विष्ठ्यायतां संहतादृढा भवत्वेषस्तेपेशाद्वसंघातयोः लोट्तस्यैशुचेतेतत्।
मचस्वाहाहेघर्म १ पातेतवान्तरिक्षे शुकत्रिष्टुभिछन्दसि आग्नीध्रे सदनेच प्रविष्टा सातेऽइतिपूर्ववद् २ यातेहेघर्मपृथि।

वांघ्रुकृजगत्यांछंदसिप्रविष्टाकीदृशीसदस्यासदसिप्रविष्टा
वत्साटदेसितानातेऽस्तुगृ ३ ५३

कार्या॰ तत्रएवेति निःक्रमणं पुरस्तात्पत्नीमंतर्हो यहोमानंतरं सुवधर्षुं पत्नीमग्रे कृत्वा शालायाः निःक्रमतीत्यर्थः तत्र।
स्थित्वा उपरीष्टाद्बृहतीवर्मदेवत्या देवधर्मवद्यं वानां अनुक्रामाम अनुगच्छाम त्वं ब्रह्मणः तनवं शरीरं पाहि पालय कि
मर्थमनुगमनं तत्र सवितुः स्य देवस्य संसूर्यस्य परमाय परमपालोनाय परः श्रेष्ठोऽव्ययं पर उत्कृष्टे पायने त्वा तेऽइ।

तस्मै त्वा परमाय ब्रह्मणस्तन्वं पाहि विश्वस्य धर्म
णा व्रयमनुक्रामाम सुविताय नव्यसे १९

तिपरस्यं तस्मै पतद्दै देवं तत्रेयं यपव्रतपतीति श्रुतेः किंच विश्वो यज्ञस्य धर्मणा धारणेन निमितेन वयं त्वामनुक्रा।
माम यज्ञो वै विश्वो यज्ञस्य त्वारिष्टेइति श्रुतेः किमर्थं नव्यसे सुविताय नवीयसे नूतनाय सुगताय प्रसूताय कर्मणेक
र्मसिध्यर्थं त्वामनुगच्छामेत्यर्थः सुष्ठु इतं सुवितं इण् गतौ क्तः उपसर्गस्यो वकृ दादेशः यद्वा षूप्रेरणे सूयं ते प्रेर्यं।
ते सुवितं इडागमे धातो ह्रस्वड्. १४

२८ का॰ नाभिस्पर्शं प्रवृंजनीयं निदधातिचतः स्रक्तिरिति प्रवृंजनीयं महावीरं उत्तरवेदौ नाभिलग्नं स्थापयतीत्यर्थः चतस्रः
१२२ क्तिः महाचूहतीच्छर्मदेवत्या सद्घर्मो नोऽस्माकं सर्वायुरस्तु सर्वं पूर्णं आयुर्यस्मात्स सर्वायुः पूर्णायुः प्रदोऽस्त्वित्यर्थः
पुनरुक्तिरादरार्था कीदृशः सः चतः स्रक्तिः चतस्रः स्रक्तयः कोणादिरूपा यस्य सः एषवैचतः स्रक्तिर्यद्घर्म इ
177 ति दिशोऽनेन सर्वाः कल्पयन्ति इति श्रुतेः तथा ऋतस्य यत्तस्य सत्यस्य वा नाभिर्नहनं बन्धनस्थानं सप्रथाः सविस्तराः वि
श्वायुः विश्वस्य जगत आयुर्यस्मात् जगत् आयुर्हीता सप्रथाः सर्वतः प्रथिपिताच हे घर्म त्वत्प्रसादात् द्वेषः अपगच्छ
त्विति शेषः अस्मत्तो द्वेषोगच्छतु वीतरागाः स्यामेति भावः ह्वरश्चलने ह्वरः चलनं जन्ममरणलक्षणं चास्मत्तोऽपगच्छ

चतः स्रक्तिर्नाभिरृतस्य सप्रथाः सनो विश्वायुः सप्रथाः सप्रथाः सनः सर्वायुः सप्रथाः अ

पद्वेषोऽअपह्वरोऽन्यव्रतस्य सश्चिम २॰ घर्मैतत्तेपुरीषन्तेन वर्द्धस्व चा च प्यायस्व वर्द्धिषीमहि।

च वयमा च प्यासिषीमहि २१ न वयं अन्यव्रतस्य सश्चिम अन्यत् मनुष्यकर्मणः सकाशाद्भिन्नं

व्रतं कर्म जगदनुग्रहरूपं यस्य सोऽन्यव्रतः परमात्मा तस्य कर्मणि षष्ठी सश्चिम सेवने धातुः अन्यव्रतं परमात्मानं से

वामहे सायुज्यं प्राप्नुम इति भावः अन्यदृष्टापतस्य व्रतमन्यन्मनुष्याणामिति श्रुतेः काण्वा॰ आसेचनवंति पयसः पूरयति

घर्मैतत् इति आसेचनं गर्तः तद्युक्तानि पात्राणि दुग्धेन पूरयति तानि सप्त महावीरद्वयं द्विपिवने उपयमनी स्रुवः

स्रुवत्यर्थः हे घर्म एतत्ते अनुपुष्ट घर्मदेवत्या हे घर्मदेवत्या हे घर्म पयसा पयस्तेन वपुरीषं एणानिपूरयति पुरीषं पूरयित अन्नं

अन्नं वै पुरीष मन्नमेवास्मिन्नेतद्दधातीति श्रुतेः तेन पयसा वर्द्धस्व आप्यायस्व च भवत्प्रसादाद्वयं वर्द्धिषीमहि आप्या

कात्या॰ त्रिःपरिषिच्याविक्रदददिति सामगानानंतरमुत्सादनदेशे परिषिच्य वक्ष्यमाणं करोतीत्यर्थः अविक्रदत् परो
क्षिकवर्मदेवत्या घर्मः सूर्यात्मना स्तूयते वृषाश्वाऽइति होवेण वृष्टिकर्त्ता घर्मः प्रमज्यमानः सन् अतिक्रन्दनक्रदिश
ब्दं पुनः पुनः शब्दमकरोत् कीदृशः हरिः हरितवर्णः रसानां हर्त्ता वा पयैव वृषाद्धरिर्यश्च घर्मपयोघस्प्रवर्ग्यं इतिश्रु
तिः महान्महावमः मित्रोनदर्शतः न उपमार्थः मित्रइवदर्शनीयः अतएव सूर्येण संदिद्युतत् सूर्यतत्स्या द्योततेद्यु
तेर्लुङि णिजंतस्य रूपं अडभावः सूर्यवत्सर्वं द्योतयतीत्यर्थः उदधिः उदकं धीयते यस्मिन् जलस्यधर्त्ता निधिः स्वर्वा।

अविक्रदद्वृषाहरिर्महान्मित्रोनदर्शतः सᳫ सूर्येणदिद्युतदुदधिर्निधिः २२ सुमित्रिया
नऽआपऽओषधयः सन्तुदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः २३ उद्व।
यन्तमसस्परिस्वः पश्यन्तऽउत्तरं देवन्देवत्रासूर्यमगन्मज्योतिरुत्तमम् २४ एधो
स्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि २५ नाममितिशेषः स्वनिधि का॰ चात्वालेमा

र्जयंतेसपत्नीकाः सुमित्रियानइति सपत्नीका ऋत्विग्यजमाना श्चात्वाले मार्जनं कुर्वते पत्न्या अपि मंत्रपाठ इत्यर्थः
सुमित्रियानः व्याख्याता का॰ उद्वयमित्युत्क्राममंतरपूर्वार्द्धे ऐशानीं दिशं प्रति यजमानो गच्छतीत्यर्थः उद्वये व्या
ख्याता का॰ अनपेक्षमेधोसीति समिधमादायाहवनीयेऽभ्यादधाति समिदसीति यजमानः पश्चादनवलो।
कयन्नीशानदेशादेत्यैधोसीति मंत्रेण काष्ठं समिधं गृहीत्वा समिदसीति मंत्रेणाहवनीये दधातीत्यर्थः एधोसि सा
मिदसि मंत्रद्वयं व्याख्यातं ९६

३८ का॰ यावतीद्यावापृथिवीइतिदधिघर्मग्रहणं सप्तविंशायामग्निदेवत्यापांदधिघर्मं गृह्णातीत्यर्थः यावती द्यावीउरि
१२८ कदधिघर्मदेवत्या इंद्रदेवत्याच हेइंद्रजोअन्नेनसहअक्षितंअनुपक्षीणंतेतवग्रहंतावंतंतत्परिमाणंअहंगृह्णामिम
1128 यिअक्षितंयथास्यात्तथागृह्णामि तवग्रहणेन ग्रहणेनमयियज्ञस्तयोमास्त्वित्यर्थः तावंतंकियंतंद्यावापृथिवीया
वती द्यावाभूमीयत्परिमाणे चपुनः सप्तसिंधवः सप्तसमुद्राः तरोदायाः यावत्परिमाणेदेशेवितस्थिरे विशेषेण।
स्थिता तावंतमतिमहत्तरंदधिघर्मंगृह्णामीत्यर्थः का॰ मयिमदितिभक्षणं इतशेषंदधिघर्मं यजमानघर्मंत्विजः

यावतीद्यावापृथिवीयावच्चसप्तसिंधवोवित

स्थिरे तावंतमिंद्रतेग्रहमूर्जागृह्णाम्यक्षितंमयिगृ

ह्णाम्यक्षितम् २६ मयित्यदिन्द्रियंबृहन्मयिदक्षोमयिक्र

तुः घर्मस्त्रिशुग्विराजतिविराजाज्योतिषासहब्रह्मणाते

सोपहवंभक्षयंतीत्यर्थः मयित्यत् पंक्तिः अष्टा \जसासह २७ तस्यंचयादादधिघर्मदेवत्या यजमानाशी।
ईश्वतेतिकेचित् बृहत्महत्यत्ततइंद्रियंप्रसिद्धंवीर्यंमयिविजनाति विराजत लकारव्यत्ययः दक्षः संकल्पसि।
द्धिर्मयिविराजत क्रतुः ससंकल्पोमयिविराजत विशेषेणराजतेविराट्तेनजगत्प्रसिद्धेनज्योतिषातेजसा आदित्या।
ख्येनसहब्रह्मणात्रयीलक्षणेनज्योतिषाचसहघर्मोमयिविराजत कीदृशोघर्मः त्रिशुक् तिस्रः शुचोदीप्तयोयस्यसः १२८
नास्तिसः शुचोयातेघर्मदिव्याशुगित्यष्टादशपांकंडिकायांशालाकमंत्रेव्याख्याताः ७

पयसो रेतः गायत्र्यवसाना दधिघर्मभक्षणे एव विनियुक्ता पयसो रेतो वीर्यं सारं जगदुत्पत्तिबीजं यत् आभृतं आहृ
तं दधिघर्मरूपं तस्य दोहं प्रपूरणं उत्तरां उत्तरां समां उत्तरोत्तरवर्षमभिव्याप्य अशीमहि व्याप्नुयाम कालाध्वनोरिति द्वितीया
वयं सर्वदा यायजूकाः स्यामेत्यर्थः कात्या त्विषः संवृगिति महाव्रतीये महाव्रतीयेऽदन्ति त्विषइति मन्त्रेणाद्वन्त शेष
दधिघर्मभक्षणं कार्यमित्यर्थः त्विषः संवृक् अतिजगती दधिघर्मदेवत्या संवृणक्ति वशीकरोतीति संवृक् स्वीकर्ता सं
पूर्वो वृजिः स्वीकरणार्थः क्विप् त्विषः संवृक् कान्तेः स्वीकर्तः हे सखे सुमेधः शोभनमेधायुक्त यस्मात्सुमेधाः तस्मात्त्वं बोध।
ने हे सखे देवाः ते हे दधिघर्म अहं उपहूतः कृतोपहवः सन् ते तवांशं भक्षयामि कर्मणि षष्ठी वा तां भक्षयामि पक्षे।

पयसो रेतऽआभृतं तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् त्विषः संवृक्क्रत्वे दक्षस्य ते सुषु।
म्णस्य ते सुषुम्णाग्निहुतः इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमतऽउपहूतऽउपहूतस्य भक्ष
यामि २८ इति संहितायां अष्टत्रिंशोऽध्यायः ३८

शब्दः पादपूरणः कीदृशस्य ते क्रत्वे दक्षस्य चतुर्थी षष्ठ्यर्थे क्रतोः संकल्पस्य दक्षः सिद्धिदाता तस्य संकल्पसिद्धिदा
तुः क्रतुशब्दस्य चतुर्थ्येकवचने गुणाभाव आर्षः तथा सुषुम्णस्य शोभनसुखभूतस्य अग्निहुतः अग्नौ हूयते इत्यग्नि
हुत् तस्य अग्निहुतस्य इन्द्रपीतस्य इन्द्रेण पीतो भक्षितः तस्य प्रजापतिभक्षितस्य प्रजापतिना भक्षितस्य मधुम
तः मधुरस्वादोपेतस्य उपहूतस्य कृतोपहवस्य एवंविधस्य तवांशं हे दधिघर्म अहं भक्षयामीत्यर्थः समाप्ताधर्मेति कर्त
व्यता श्रीमन्महीधरकृते वेददीपे निरूपितः अष्टत्रिंशोऽयमध्यायो महावीरनिरूपणः ३८

२९ प्रवर्ग्येत्वर्ममेरेशायश्मिन्ते तत्रकात्यायनः स्वाहाप्राणेभ्यः साधिपतिकेभ्यः इति पूर्णाहुतिमाज्यामन्त्रमं चमनसः काम।
१२९ माकूतिमिनीति नरर्थोयं अध्वर्युर्भूमिर्भूमिं यस्तेविदितिमंत्राभ्यां भग्रेवर्ममभिमन्त्र्य परमेष्ठ्यादिचतस्रि शदाहुती
र्हुत्वा स्वाहाप्राणेभ्यः इत्याद्यं पूर्णाहुतिंहुत्वा पृथिव्यैस्वाहेत्यादि इति विंशतिं सकृदुत्तहीतेनहुत्वा मनसः इत्यंत्यां पूर्णाहु।
तिंकरोतीति मंत्रार्थोयथा साधिपतिकेभ्योधिपतिनाहिरण्यगर्भेणसहवर्तमानेभ्यः प्राणेभ्यः इंद्रियदेवताभ्यः
स्वाहा स्वहुतमस्तु इतिपूर्णाहुतिमंत्रः ततोविंशतिः सप्तधाः मंत्राः पृथिव्यैस्वहुतमस्तु एवमग्रेपि १ अग्नये २ अंतरि।

स्वाहाप्राणेभ्यः साधिपतिकेभ्यः पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहावायवेस्वाहा दिवेस्वा
हासूर्यायस्वाहा १ दिग्भ्यःस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यः स्वाहाद्भ्यःस्वाहावरुणायस्वाहा ना।
भ्यैस्वाहापूतायस्वाहा २ वाचेस्वाहाप्राणायस्वाहाप्राणायस्वाहा चक्षुषेस्वाहाचक्षुषेस्वाहाश्रो।
त्रायस्वाहाश्रोत्रायस्वाहा ३ मनसःकाममाकूतिंवाचःसत्यमशीय पशूनांरूपमन्नस्यरसो
यशः श्रीः श्रयतांमयिस्वाहा ४ क्षाय ३ वायवे ४ दिवे ५ सूर्याय ६ दिग्भ्यः ७ चंद्राय ८ नक्षत्रेभ्य ९
अद्भ्यः १० वरुणाय ११ नाभ्यैदेवतायै १२ पूतायशोधकाय पुनातिपूतः देवस्तस्मै १३ वाचे वागधिष्ठात्रे १४ एवमग्रे।
पि प्राणायाप्राणेंद्रियाधिष्ठात्रे घ्राणादीनांद्वित्वान्मंत्रावृत्तिः चक्षुषेतदधिष्ठात्रे १८ श्रोत्राय १९ श्रोत्राय २० मनसः।
कामंद्वितीयः पूर्णाहुतिमंत्रः अहंमनसः काममभिलाषंआकूंचनमाकूतिः प्रयत्नंस्तंवाशीयप्राप्नुयां वाचः सत्यं
चाशीय महाकसमंवदनमयिपतत्सर्वंश्रयतांतिष्ठत पशूनांरूपंपशुसंबंधिनीशोभा अन्नस्यरसः स्वादुत्वं यशःकी

ह्रीःकृतिक्र ८
१२९

काम्या॰ प्रजापतिः संभ्रियमाण इति च यथाकालमिति संभ्रियमाणायां महावीरभेदे प्रजापतये स्वाहेत्या।
घायथाकालमाहुतयो दीनव्या इति सूत्रार्थः तद्यथा मेध्यौ दर्शयति संभ्रियमाणो महावीरो यदि भिद्यते तदा प्राय।
श्चित्तदेवतोपक्रमत्वात् निष्टिताभिमर्शनादारभ्याज्यपयोवसेचनान्ते संभ्रियमाणः १ सम्राड् संभृतः पयोवसेका
न्तेन रुक्मासादनान्ताक् संभृत इत्युच्यते तत्र भेदे सम्राड् प्रायश्चित्तदेवता सम्राजे स्वाहेति १ वैश्वदेवः संपन्नः आसा।
दनादारभ्य मुञ्जप्रलवेष्वधिश्रयणान्ताक् संपन्नः तत्र भेदे विश्वेदेवदेवतः विश्वेभ्यो देवेभ्यः स्वाहेति २ घर्मप्रवृक्तः

प्रजापतिः सम्भ्रियमाणः सम्राड् संभृतो वैश्वदेवः सन्नो घर्मः प्रवृक्तस्तेज ऽउद्यत ऽआ
श्विनः पयस्यानीयमानो पौष्णो विष्यन्दमाने मारुतः क्लथन् मैत्रः शरसि संताय्यमाने वा
यव्यो ह्रियमाण ऽआग्नेयो हूयमानो वाग्घुतः ५

४ अधिश्रयणादारभ्य परिशासाभ्यां ग्रहणान्ताक् प्रवृक्तः प्रवृज्यत इति तत्र भेदे घर्मो देवता घर्माय स्वाहेति ते
ज उद्यतः उद्यम्यत इत्युद्यतः उद्यमनादारभ्य प्रागाज्यपयोवसेकादुद्यतः तत्र भेदे तेजो दे तेजसे स्वाहेति आश्वि।
नः पयस्यानीयमाने अजापयस्यासिच्यमाने घर्मभेदे आश्विनो ऽश्विदेवत्यो घर्मः अश्विभ्यां स्वाहेति ज्ञ ६ पौष्णो।
विष्यन्दमाने संयुक्तस्रवणो विशेषेण स्यन्दमाने घृतेव दीप्तिः सरति मतिवेदघर्मः पौष्णः पूषदेवत्यः पूष्णे स्वाहेति ज्ञः १
मारुतः क्लथन् क्लथति क्लथन् क्वथनं मध्ये घृतस्यावर्तने तदा मरुद्देवत्यः तत्र भेदे मरुद्भ्यः स्वाहेति ज्ञः २

२९ मैत्रः शारसिसंताप्यमाने ऽपयो वर्मेकेथोपरितनिकाजायते सार्शारः शाहेनोच्यते तस्मिन्संताप्यमाने पच्यमाने मैत्रोसि।
१८० 180 त्रदेवतः नाशपालनसंततयोः कर्मणिप्रियकिशानिविहरूपं तत्र शारं आदित्यहरणात्वाक् भेदे मित्राय स्वाहेतिजः ९ व्या
पच्योद्धियमाणः आहवनीयं हिमाणोरोमान्नाक्वायुदेवतः तत्र भेदे वायवे स्वाहेतिज १० आग्नेयो हूयमा।
नः हूयमानो वर्मोग्निदेवतः तत्र तद्भेदे ऽग्नये स्वाहेतिज ११ वाकद्भुतः क्तौहोमाहुर्ध्वे प्रागुत्तरवर्मो रेभात्त्वा।
कवायदेवतः तत्र भेदे वाचे स्वाहेतिजः १२ एता आहुतयः सकृद्गृहीताज्येः सविता का॰ सविता प्रथमेऽहन्।

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे चन्द्रमाः पंचम ऋतुः षष्ठे।
मरुतः सप्तमे बृहस्पतिरष्टमे मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वेदेवा द्वा
दशे ६

नितप्रत्यहमिति प्रथमे ऽहनि दिने वर्मभेदे सविता देवता सवित्रे स्वाहेतिज॰ एवमग्रेपि अग्निर्द्वितीये द्वितीये ऽह्।
नि वर्मभेदेग्निर्देवता वायुस्तृतीये तृतीये ऽहनि वायुर्देवतश्चतुर्थे आदित्यो देवता चंद्रमा पंचमेऽह्नि ऋतुः षष्ठेह्नि मरु।
त सप्तमेह्नि बृहस्पतिरष्टमेह्नि मित्रो नवमेह्नि वरुणो दशमेऽहनि इंद्र एकादशेह्नि विश्वेदेवा द्वादशे द्वादशेह्नि वि। १८०
श्वेदेवा देवता तत्र भेदे विश्वेभ्यो देवेभ्यः स्वाहेतिज्ञ ऊद्धयात् उपसत्स्वहर्ह्यैपत एवाहुतयः पुनरादितआरभ्यावर्त्यंते २

उग्रश्च० का० विमुखेनारण्येऽनूच्यमिति च षष्ठे मारुतान् षड् पुरोडाशान् शुक्रज्योतिश्चेत्यादिषड्मारुतमंत्रैर्हुत्वा अ
रण्येऽनूच्यमंत्रं सप्तमं पुरोडाशं विमुखमंत्रेणोग्रश्चेति मंत्रेणान्तं जुहुयात् तथा चानुक्रमणी उग्रश्च मारुती गायत्री।
विमुखो व्योमंत्रो ग्नौ विनियुक्तस्तस्मादाग्निकपक्षाद्दृषिः परमेष्ठी प्राजापत्यो वेति अग्निकः प्रजापतिर्ऋषिः अत्र।
मंत्रस्यात्र पाठो ऽरण्ये पाठयोग्यत्वात् अथ मंत्रार्थः यद्येते उग्रादिनामकाः सप्त मरुतः तेभ्यः स्वाहा सुहुतमस्तु उग्र

उग्रश्च भीमश्च ध्वांतश्च धुनिश्च सा
सह्वांश्चाभियुग्वा च विक्षिपः स्वाहा ७

उग्रः १ बिभेत्यस्मादसौ भीमः २ ध्वनति शब्दं करोतीति ध्वांतः ३ धूनयति कंपयति शत्रूनिति धुनिः ४ सासह्वा
न् सहते शत्रूनभिभवतीति सासह्वान् सहतेः क्वसुश्चेति क्वसुप्रत्ययः संहितायामभ्यासदीर्घश्छांदसः ५ अभियुग्वा
अभियुनक्ति अस्मत्संयुक्तं वियोगं प्राप्नोतीत्यभियुग्वा अन्येभ्योऽपि दृश्यन्त इति युजेः क्वनिप्प्रत्ययः ६ विक्षिपः वि।
विथं क्षिपति विक्षिपतीति विक्षिपः इगुपधेति कप्रत्ययः ७

३९ का॰ विशुत्वोत्तरपरेभ्यो मा नो मित्र इति प्रत्यृचमनुवाकाभ्यां मंत्रयोर्द्यावापृथिवीयामिति अस्यार्थः उग्रश्चेति मंत्रो
विशुत्वः ततः परेभ्यो देवतांशेभ्योऽग्निं हृदयेनेत्यादिभ्यस्त्रयस्त्रिंशद्गृहीतमाज्यं गृहीत्वा गृहीत्वा जुहोति तत्रापि पद
१८१ हृयं अग्नये स्वाहा हृदयाय स्वाहा अशानये स्वाहा हृदयाग्राय स्वाहा इत्यादिकात्यायनीनामभिः प्रायः
अग्निं हृदयेन प्रीणामि स्वाहेत्यादि हरिस्वामिमते प्रयोगः ततश्चाग्निं हृदयेनेत्यादीन् विश्वेभ्यो दे
181
वेभ्यः स्वाहेति मंत्रान् होमान् हुत्वा मानस्त्यनुवाकाभ्यां षोडशाहुतीर्हुत्वा द्यावापृथिवीभ्यां स्वाहे
ति चरमामाहुतिं जुहोतीति सूत्रार्थः अरण्येऽनूच्यान् द्यावापृथिव्यामुत्तमामाहुतिं जुहोतीति श्रुतेः
अरण्येऽनूच्यान् अरण्ये पठितानग्निं हृदयेनेत्यादीन् विश्वेभ्यो देवेभ्यः स्वाहेत्येवमेतान् होमान् हु।
त्वा द्यावापृथिवीयामुत्तमामाहुतिं जुहोतीति श्रुतेरर्थः तथा चानुक्रमणी अग्निं हृदये
नाश्वमेधिकानि तत्रत्यपवत्रऋषिर्लोमभ्यः स्वाहेति प्रायश्चित्ताहुतयो द्वाचत्वारिंशत्तर
ति तत्रयः प्रजापतिः तत्राग्निं हृदयेन उग्रं लोहितेनेति कंडिकेत्राह्मणरूप
देवताश्चावयवसंबंधविधानात् अरण्येऽध्ययनादिह पाठः लोमा
दीस्त्वंगान्येव पठितानि आयामादयो देवता एव अथ
मंत्रार्थः
॥ १८१

का॰ पंचगृहीतं जुहोत्यग्निस्तिग्मेनेत्यत्र च शालाया आगत्य पंच गृहीतमाज्यं शालाद्वार्येग्नौ जुहोति अग्निस्तिग्मेन आग्नेयी गाय
त्री भरद्वाजदृष्टा अग्निः विश्वं सर्वं अत्रिणं रात्रसं नियासत् नितरां तीर्णं करोतु यासत् यमु उपरतये लेट् इतश्च लोपः परस्मै
पदेष्विति इयर इकारलोपः अत्रमदनं भक्षणमस्यास्तीत्यत्री भक्षकस्तेनेति तिग्मेन शोचिषा तीक्ष्णेन तेजसा तिग्मं तेजसे रुक्मादि
कर्मणो नियामकः किंच अग्निर्नोऽस्मभ्यं रयिं धनं वनतु ददातु वनतिर्दानार्थः का॰ षोडशगृहीतार्द्धं यजुर्वाकशेषेण पंचगृही
तहोमानंतरं षोडशगृहीतमाज्यं जुह्वां कृत्वा तस्यार्द्धमनुवाकशेषेण पंचगृहीतहोमानंतरं षोडशगृहीतमाज्यं जुह्वां कृत्वा त
स्यार्द्धं समनुवाकशेषेण शालाद्वार्ये पवन जुहोति अनुवाकशेषश्च य इमा विश्वेत्यारभ्य विरुद्धोपध्यासदित्यंतोऽध्वर्वः स्मर्थः

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम्। अग्निर्नो वनते रयिम् १६ य इमा विश्वा भुवनानि जु
ह्वदृषिर्होता न्यसीदत्पिता नः स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ२ आविवेश ७

य इमा भुवनेति विश्वकर्मदृष्टा विश्वकर्मदेवत्याः षोडश त्रिष्टुभः प्रजाः संहरंतं सृजंतं विश्वकर्माणं पश्यन्नृषिः क
थयति यो विश्वकर्मा इमा इमानि विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि जुह्वत् संहरन् सन् न्यसीदत् निषण्णः
स्वयं स्थितवान् कीदृशः ऋषिः अतीन्द्रियद्रष्टा सर्वज्ञः होता संहाररूपस्य होमकर्मा योऽस्माकं प्राणिनां पिता जनकः प्र
लयकाले सर्वलोकान्संहृत्य यः परमेश्वरः स्वयमेक एवासीदित्यर्थः तथा चोपनिषदः आत्मैवेदमग्र आसी
न्नान्यत्किंचन मिषत् सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमित्याद्याः स तादृशः परमेश्वर आशिषि भितादृशेण वङ्स्यां अ
नापेयेत्येवं रूपेण पुनः सृष्टावद्रूपेण द्रविणं इच्छमानो जगद्रूपं धनमपेक्षमाणः अवरान् अभिव्यक्तोपाधीनाविवेश

२८(प्रविष्टः कीदृशः प्रथमछत् प्रथममपकमद्वितीयं स्वरूपं छादयन्नीति प्रथमछत् छादयते क्विपि ह्रस्वः उक्तं हि रूपा
मात्रं प्रपञ्चप्रविष्टा ईक्षमाना इतीयं यात्मनेपदे मार्षं सोकामयत बहुस्यां प्रजायेय स तपोतप्यत स तपस्तप्त्वा इदं
सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेः १ अथ प्रश्नेरोपयथा न रात्मन्नति तत्प्रश्नोत्तराभ्यामाह
किंस्विदिति लोके हि घटादि चिकीर्षुः कुलालो गृहादिकं स्थानमधिष्ठाय मृद्रूपेणारंभकद्रव्येण चक्रादुपकरणेन घटादिनि
र्मापयति ईश्वरस्य तदा तिष्ठते स्विदिति वितर्के द्यावाभूमी सृजतो विश्वकर्मणोऽधिष्ठानं किमासीत् अधितिष्ठत्यस्मिन्निति
त्वधिष्ठानं निवासस्थानं प्रथतनातिरधिष्ठानाः किमपि न ऊर्ध्वेति स्विदिति वितर्के आरंभणं कतमत्स्वित्किमासीत् आ

किंस्विदासीदधिष्ठानमारम्भणं कतमात्स्वि
त्कथासीत् यतो भूमिं जनयन्विश्वकर्मा वि
द्यामौर्णोन्महिना विश्वचक्षाः १८ ॥

रभ्यतेऽनेनेत्यारंभणं उपादानकारणं मृदिव घटानां कथा क्रिया च किंप्रकारा आसीत् निमित्तकारणमा
पि किमासीदित्यर्थः थाहेतौ च छंदसीति किमः थाप्रत्ययः दंडचक्रमृत्तिलसूत्रादिभिर्घटादयो निपाद्यन्ते त
त्स्थानीयं किमासीत् यतो यस्मिन्काले विश्वकर्मा भूमिं द्यां स्वर्गं च जनयन्सन् महिम्ना स्वसामर्थ्येन विउर्णोत् सृष्टे
द्यावापृथिवी आकाशादितवान् ऊर्णोञ् आच्छादने लङ् उपसर्गव्यवधानमार्षं व्यवहिताश्चेति वचनात् कीदृशः विश्वच
क्षाः विश्वं चष्टे स विश्वचक्षाः सर्वद्रष्टा अतीतानागतवर्तमानकालानां पुरुगायत द्रष्टा अन्यनशक्तिरित्यर्थः १८ १२ २५

अग्निं हृदयेन हृदयेनांगेनाग्निं देवं प्रीणामि अशनिं हृदयाग्रेण हृदयस्याग्रभागेनाशनिं देवं प्रीणामि पशुपतिं
कृत्स्नहृदयेन समग्रहृदयेन पशुपतिं देवं प्रीणामि भवं यक्ना यक्ना यकृता कालखंडेन भवं देवं प्रीणामि पद्
न्वश्स्यांदिना यकृच्छब्दस्य यकन्नादेशः शार्वं मतस्नाभ्यां मतस्ने हृदयास्थिविशेषौ ताभ्यां शर्वं देवं प्रीणामि ई-
शानं मन्युना मन्युना अस्थिसंबंधिक्रोधेन ईशानं देवं प्रीणामि महादेवमन्तःपर्शव्येन अन्तर्वर्तमानेन पर्शव्येन।

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना शर्वं मतस्ना
भ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि
कोश्याभ्याम् ८

पार्श्वअस्थिसंबंधिना मांसेन महादेवं देवं प्रीणामि पर्शवः पार्श्वास्थीनि उग्रं देवं वनिष्ठुना वनिष्ठुः स्थूलांत्रं तेनोग्रं
देवं प्रीणामि वसिष्ठहनुर्वसिष्ठस्य देवस्य हनुः कपोलैकदेशो तामव्य यद्वा वसिष्ठाया हनुः कपोलाधोदेशः।
तत्परा हनुर्विस्मरः तस्याः कायोलाधोभागस्था हंस्याहारभिति हनुः लिंगव्यत्ययः वसिष्ठहनवा कोश्याभ्यां।
कोशो हृदयकोशस्तत्स्थाभ्यां मांसपिंडाभ्यां च शिंगीनि सिंगिसंज्ञानि देवतानि प्रीणामि ८

२९ उग्रं लोहितेन लोहितेन यस्त्वजा उग्रं देवं प्रीणामि मित्रं सौव्रतेन शोभनं व्रतं कर्म यस्य स सुव्रतस्तस्य भावः सौव्रत्यं।
१८२ शोभनगमनादिकर्मकर्तृत्वं तेन मित्रं देवं प्रीणामि रुद्रं दौर्व्रत्येन दुष्टं सर्वलोकप्रलयादिव्रतं यस्य स दुर्व्रतस्तस्य भावो
182 दौर्व्रत्यं तेन रुद्रं देवं प्रीणामि इन्द्रं प्रक्रीडेन प्रकृष्टं क्रीडनं प्रक्रीडः तेनेन्द्रं देवं प्रीणामि मरुतो बलेन बलेन सामर्थ्येन
मरुतो देवान्प्रीणामि साध्यान्प्रमुदा प्रकृष्टा मुत् हर्षः प्रमुत् तया साध्यान्देवान्प्रीणामि भवस्य कंठ्यं श्रवष।

उग्रं लोहितेन मित्रं सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा भव
स्य कंठ्यं रुद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ९

कंठ्यो देवः अंगे प्रथमोक्तं कंठं कंठभवं मांसं भवस्यात्र विभक्तिव्यत्ययो वा कंठ्येन भवं देवं प्रीणामि एवम्।
अग्रेपि रुद्रस्यांतः पार्श्व्यं पार्श्वस्यांतर्मध्ये भवं मांसमंतः पार्श्व्यं तेन रुध्ये भवं मांसमंतः पार्श्व्यं तेन रुद्रस्यात्र १८२
महादेवस्य यकृत् यकृत्कालखंडं महादेवास्यात्र शार्वस्य वनिष्ठुः वनिष्ठुः स्थूलान्त्रं शार्वस्यात्र पशुपतेः पु।
रीतत् पुरीतत् हृदयाच्छादकं अन्त्रं पशुपतेर्देवस्यात्र ६

लोमभ्यः स्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंशत् लोमादीन्यंगानि लोमभ्यः स्वाहा लोमानि त्वग्लोमीत्यर्थः एवमग्रेपि मे
द्राहुतिः सर्वेषां लोमादीनामंगानां होमार्थं २ त्वचे ४ लोहिताय ६ मेदोभ्यः मेदो धातुविशेषः ८ मांसेभ्यः १० स्नावभ्यः
स्नावानः स्नायवो नसाः १२ अस्थभ्यः छंदस्यपि दृश्यत इत्यस्थिशब्दस्य हलादि विभक्तावप्यनङादेशः १४ मज्जभ्यः ।
मज्जा षष्ठो धातुः १६ रेतसे रेतो वीर्यं १७ पायवे पायुर्गुदं १८ आयासाय आयासादयो देवविशेषाः १९ प्रायासाय आ
यासाद्यो देवविशेषाः १९ प्रायासाय २० संयासाय २१ वियासाय २२ उद्यासाय २३ शुचे २४ शोचते २५ शोचमाना

लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा
माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा
मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा रेतसे स्वाहा पायवे स्वाहा १० आयासाय स्वाहा प्रायासाय स्वाहा सं
यासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा शुचये स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शो
काय स्वाहा ११ तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा निष्कृत्यै
स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा १२ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहा
ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा १३ इति संहितापाठे एकोनच

य २६ शोकाय २७ तपसे २८ तप्यते २९ तप्यमानाय ३० तप्ताय ३१ घर्माय ३२ निष्कृत्यै ३३ प्रायश्चित्त्यै ३४ भेषजाय ३५
यमाय ३६ अंतकाय ३७ मृत्यवे ३८ ब्रह्मणे ब्रह्महत्यायै ४० विश्वेभ्यो देवेभ्यः ४१ एतेभ्यो देवेभ्यः स्वाहुतमस्तु एता आहु
तीर्हुत्वा मानोमित्र इति षोडशर्चेन षोडशाहुतीर्हुत्वा द्यावापृथिवीभ्यां स्वाहेत्यंतां हुतिं जुहुयात् ४२ एतावता कर्मकांडे ।

[illegible]

[illegible]

५०

एकोनचत्वारिंशताध्यायैः कर्मकांडं निरूपितमिदानीं कर्मवशात् शुद्धांतःकरणं प्रति तत्त्वज्ञानकांडमेकेनाध्यायेन नि-
१८३ रूप्यते ईशावास्यमित्यादिमंत्राणां कर्मसु विनियोगो नास्ति तेषां शुद्धत्वैकत्वापापविद्धत्वाशरीरत्वसर्वगतत्वाद्या-
त्मयाथात्म्यप्रतिपादनात् तच्च कर्मणा विरुध्यते नहीदृगात्मोत्पाद्यो विकार्य आप्यः संस्कार्यः कर्ता भोक्ता वा।
भवेद्येन कर्मशेषता स्यात् तस्माद्यद्यपि आत्मनोऽनेकत्वकर्तृत्वभोक्तृत्वाशुद्धत्वपापविद्धत्वाद्युपादाय लोकबु-
द्धिसिद्धानि कर्माणि विहितानि यो हि दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना कर्मफलेनार्थी सन् द्विजातिः कर्मा-
धिकारवानित्यात्मानं मन्यते तस्य कर्माधिकारः तस्मादेते मंत्रा आत्मयाथात्म्यप्रकाशनेन शोकमोहादिसाधनम-
ज्ञानं विनिवर्त्यात्मज्ञानं जनयंतीत्यभिधेयसंबंधप्रयोजनानि इदानीं मंत्रा व्याख्यायंते ईशावास्य आत्मदेवत्यमनु-
ष्टुप्छंदस्कोध्यायो दधीचाथर्वणेन दृष्टः गर्भाधानादिसंस्कारसंस्कृतमधीतवेदं जनितसुतं यथाशक्तिकृतयज्ञं।

ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्। १

तिः पापेतिः स्पृहं यमनियमोपेतं मुमुक्षुमुपसन्नं शिष्यं पुत्रं वा ऋषिरुपदिशन्नाह ईशा ईश ऐश्वर्ये किप् ईष्टे इतीट् ई-
शिता परमेश्वरः स हि सर्वजंतूनामात्मा सन् सर्वमीष्टे तेन स्वेनात्मनेशा इदं प्रत्यक्तत्त्वेन रूपमानेन सर्वं वास्यं वस
आच्छादने अस्य लोपार्थे इति ण्यत्प्रत्ययः आच्छादनीयं परमाहमेवेदं सर्वमिति परमार्थसत्यरूपेणात्मना सर्वमिदं
मत्तमाच्छादनीयं परमात्माहमेवास्मि नान्यदस्तीति चिंतयेदित्यर्थः यत्किंचेति भिन्नः क्रमः किंच यत् जगत्यां
लोकत्रये जगत् जंगमादिकं स्वस्वामिसंबंधालिंगितं भवेत् तेन सर्वेण त्यक्तेन त्यक्तस्वस्वामिसंबंधेन भुंजीथाः भोगान्
अनुभवेः मा गृध गृधु अभिकांक्षायां आकांक्षां मा कृथाः ममेदमिति धियं त्यजेत्यर्थः किमिति स्विदिति निपातो वितर्के
धनं कस्यस्वित् न कस्यापीत्यर्थः सर्वाणि द्रव्याणि अन्यान्यमुपगच्छंतीति दृश्यंतेऽतो ममेदमिति बुद्धिरविद्याजनिता १ १८३

आत्मज्ञानाशक्तस्य कर्मोपदेशमाह कुर्वन्नेव कर्माण्यग्निहोत्रादीनि निःकामानि मुक्तिहेतुकानि कुर्वन्नेवेह लोके।
शतं समाः शतवर्षपर्यन्तं जिजीविषेत् पुरुषव्यत्ययः त्वं जिजीविषेः जीवितुमिच्छेः पुरुषायुषः शतवर्षत्वाच्छतग्रह
णं त्वयीति विभक्तिव्यत्ययः त्वय्येवं कर्म कुर्वतो जिजीविषयो मुक्तिरस्तीति शेषः इतः प्रकारादन्यथा प्रकारान्तरेण मु।
क्तिर्नास्ति अयमर्थः स्वर्गादिप्राप्तौ यथा नानाप्रकारा न तथा मुक्ताविप्यर्थः निःकामकर्मानुष्ठानेन शुद्धान्तःकर।
णस्यैव मुक्तिरित्यर्थः ननु कर्मणः फलेन भाव्यं कथं मुक्तिरित्यत आह न कर्मेति मुक्त्यर्थं क्रियमानुष्ठानेन शुद्धान्तः

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे २

करणस्यैव मुक्तिरित्यर्थः ननु कर्मणः फलेन भाव्यं कथं मुक्तिरित्यत आह न कर्मेति मुक्त्यर्थं क्रियमाणं कर्म नरे।
मनुष्ये न लिप्यते न संबध्यते मुक्तिकारणान्तःकरणशुद्ध्यापादकत्वेनोपक्षीणशक्तित्वात् यावदिच्छा तावत्कर्मस्व
धिकार इति दर्शितं उत्तरार्द्धस्यार्थान्तरं वा एवंप्रकारेण त्वयि जिजीविषति नरे नरत्वाभिमानिनि इतः पूर्वस्मात्कर्मकरणा
दन्यथा प्रकारान्तरं नास्ति येन प्रकारेण शुभं कर्म न लिप्यते अतः शास्त्रविहितं कर्म कुर्वन्नेव जीवितुमिच्छेत् सत्यवाय्यप
विद्यायेत्यर्थः तदुक्तं द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभाषित इति २

ई० अथ काम्यकर्मपरान्निंदति असुर्यानाम येकेच येकेचित् नरा आत्महनः आत्मानं घ्नंतीत्यात्मनः हनः अविद्वांसः का

१८४ म्यकर्मपराः विद्यमानस्याजरामरस्यात्मनोऽविद्यादोषेण तिरस्करणादात्मकेतारस्ते प्रेत्यमरणादेहंत्यक्त्वा तान् लो।

1.84 कान् जन्मानि स्थावरांतान्यपि गच्छंति प्राप्नुवंति तान्कान् नाम प्रसिद्धं तेपि यतदोर्षेन्वयः येलोकाः लोक्यंते दृश्यंते

असुर्यानामतेलोकाः अंधेनतमसावृताः

तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः ३

भुज्यंतेकर्मफलानियत्रेतिलोकाजन्मानि असुर्याः असुराणामिमेऽसुर्याः असुषुप्राणेषुरमंतेऽसुराः प्राण। ईशोप १८४

पोषणपराः अद्वैतमपेक्ष्यदेवाअपिअसुराः कीदृशाः लोकाः अंधेनतमसाअदर्शनात्मकेनाज्ञानेनवृताआच्छा।

दिताः अनात्मज्ञाः पुनर्जायंतेम्रियंतेचेत्यर्थः सुखदुःखिर्योदर्शाव्रह्मात्मत्वेनोपास्यं यस्मात्तन्नाशेसंसारस्तदात्मविद्

जवेन विशुद्धं स्वक्रियमक यतब्रह्मानेजत् एजृकंपने नएजतीत्यनेजत् अचलत् सर्वदा प्रच्युतिःकंपनेनरहि।
तं सदैकरूपमित्यर्थः एकमद्वितीयः सर्वभूतेषु विज्ञानघनरूपेण मनसः संकल्पादिलक्षणाज्जवीयो वेगव-
त्तरं जवो ऽस्यास्तीति जववत् अत्यंतजववत् जवीयः ईयसुनि कृते विन्मतोर्लुगिति मतुपो लुक् नन्वनेजदेव।
तो विरोधः मैवं निरुपाधिकेनानेजत् संकल्पविकल्परूपान्तःकरणस्योपाधेरनुवर्तनाज्जविष्ठं देहस्थस्य मन।
सो हृदयस्थस्य ब्रह्मलोकादिसंकल्पनेन क्षणमात्राद्गवतीति मनोवेगवत्तरं लोके प्रसिद्धं मनसि हृदि गच्छत्यात्मचैतन्या।

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरि-
श्वा दधाति ४

भासः प्रथममग्रासरूपवगच्छते तो मनसो जवीय इत्युक्तं देवा द्योतनात्मकाश्चक्षुरादीनीन्द्रियाणि एनत प्रकृतमात्मन।
तं नाप्नुवन् न प्राप्नुवन्तः चक्षुरादिभ्यो मनो जवीयोऽतो मनोव्यापारव्यवहितत्वादात्मन आभासमात्रमपि देवानां
गोचरो भवतीत्यर्थः यतः पूर्वमर्षत् वेगवन्मनसोपि प्रथममेव गच्छत् अशागतो व्योमवद्व्यापित्वात् सर्वसंसार
धर्मवर्जितं तदात्मतत्त्वं निरुपाधिकेन स्वरूपेण विक्रियते न सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभव।
तीति विविवेकिनां प्रतिदेहमनेकमिव प्रतिभासत इति भावः यद्वा पूर्वं पूर्वमपि विद्यमानं अर्षत् विशद्विसमाने

४· अर्षत् विशर्हिंसायां विशन्तिन अर्षतिविशत् नविशत् अविशत् अर्षत् धातोरिकारलोपश्छांदसः किंच तत् ।
१८५ तद्ः स्थाने पदोवृत्तिः पदात्मतत्वे धावतो द्रुतं गच्छतोऽन्यानात्मनो वाणींद्रियादीनात्मविलक्षणानत्येति आती-
त्यगच्छतीव कीदृशं तिष्ठत् स्वयमविक्रममेव सत् गच्छतीव मातरिश्वंतरिक्षे स्वसिति गच्छतीति मातरिश्वा वा-
युस्तस्मिन्नित्यचैतन्यस्वभावे आत्मतत्वे सति अपः कर्माणि दधाति धारयति कार्यकारणजातानि यस्मिन्ने
तानि प्रोतानि यः सूत्रसंज्ञः सर्वस्य जगतो विधारयिता सर्वप्राणभृत्क्रियात्मकः सोपि वायुः प्राणिनां
चेष्टालक्षणानि अग्निरविमेघादीनां ज्वलनदहनप्रकाशाभिवर्षणादीनि च कर्माणि यस्मिन्ब्रह्मणि
सत्येव स्थानि विभजति धारयति वा भीषास्माद्वातः पवते भीषोदेति सूर्यः इत्यादिश्रुतेः सर्वा हि
कार्यकारणादिक्रिया सर्वा स्पंदे नित्यचैतन्यरूपे ब्रह्मणी सत्येव भवतीत्यर्थः यद्वा मातरिश्वा
धातुस्थाः ऋक्कर्माणि आप्यते आप्यंते स्वर्गादिः लोकानि याभिस्ता आपः कर्माणि आप्नोते-
र्हस्वश्च विकीप् धातोर्हस्वश्च तानि कर्माणि यज्ञदानहोमादीनि यस्मिन्दधाति स्था-
पयति स्वाहा वा ते धारयति समभीष्टयज्ञेषु वायुस्थानोग्नेः कर्माणि ता-
वद्धायी स्थाप्यंते समष्टिव्यष्टिरूपो असौ वायुर-
पि यस्मिन्कर्माणि स्थापयति या-
गहोमदानादिकर्माणि
परमेतिधानमि
त्यर्थः ५ १८५

रहस्यं शक्तृकृत्कंवित्तेनापातीति पूर्वमंत्रोक्तमस्यार्थं पुनर्वदति तदेजति तत्प्रकृतमात्मतत्वमेजतिचलति तदेव।
वनराजति स्वतोनैवचलति अचलमेवसन्मूढदृष्ट्याचलतीचेत्यर्थः तद्दूरे अविदुषामब्दकोट्याप्यप्राप्यत्वाद्दूरे।
त्यर्थः तदुअन्तदेवांतिके समीपे विदुषामात्मत्वेनभासमानत्वात् नकेवलंदूरेऽन्तिकेच अस्यसर्वस्यनामरूप
क्रियात्मकजगतोऽन्तरभ्यंतरेतदेव अस्यसर्वस्यवाह्यतोवहिरपितदु तदेवब्रह्म नभोवद्व्यापकत्वात् अस्यमंत्र।
स्यार्थांतरं यथा पूर्वमंत्रेणकारणरूपमात्मानमुद्दिश्यकार्यरूपमुद्दिश्यति तदेजति तिस्रोऽनुष्टुभः तदात्मत

तदेजतितन्नैजतितद्दूरेतद्वन्तिके तदन्तर
स्यसर्वस्यतदुसर्वस्यास्यवाह्यतः ५

त्वेराजति सर्वजंतुरूपेणस्थितंसंकंपते क्रियावद्भवति तदेववनराजति स्थावररूपावस्थंनचलति तदेवदूरे।
आदित्यनक्षत्रादिरूपेणस्थितंसंकंपते क्रियावद्भवत्वात् तद्वन्तिके समीपेधरादिरूपत्वात् सर्वंखल्विदंब्रह्मे।
तिश्रुतेः अस्यसर्वस्यप्राणिजातस्यांतर्मध्येतदेवास्तिविज्ञानघनरूपेण अस्यसर्वस्यवाह्यतनतदुतदेव जडरूपत्वात् चेतनावे
तनरूपमनेतंब्रह्मेत्यर्थः एतदुपासितुरर्चिरादिमार्गेणगमनेनास्तिदूरेदेवब्रह्मप्राप्तेः नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंते

ईशवास्यवृत्तिश्रुतेः ५

५० अथोपासनाप्रकारमाह यस्त्विति यः मुमुक्षुः सर्वाणि भूतानि अव्यक्तादीनि स्थावरान्तानि चेतनानि आत्मन्न स
१८६ म्यगालक्ष्य आत्मन्येवानुपश्यति यथैव सर्वभूतानि स्थितानि न मत्तोऽतिरिक्तानीति पश्यति आत्मव्यतिरिक्तानि।
186 न पश्यतीत्यर्थः सर्वभूतेषु चात्मानमवस्थितमव्यतिरिक्तं पश्यति तेषां भूतानां स्वमात्मानमात्मत्वेन पश्यतीत्य।
र्थः अयमर्थः अस्य कार्यकरणसंघातस्यात्माहं सर्वप्रत्ययसाक्षीभूतश्चेतयिता निर्गुणश्च तथाहं तेनैव स्वरूपेण
अव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं निर्विशेषं पश्यति ततस्तस्माद्दर्शनान्न विचिकित्स

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विचिकित्सति ६
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यतः ७

ति न संशेते नो किट्टो गायन यने संशायेचेति धातोर्गुप्तिज्किद्भ्यः सन्निति स्वार्थे सन्प्रत्ययः आत्मनोऽन्यस्य पश्यतः स
र्वः संदेहो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न संदेहावकाश इति भावः अत आत्मज्ञस्य विचारनिवृत्तिः इम
मेवार्थमन्यो मन्त्रो वदति यस्मिन्सर्वाणि यस्मिन्नवस्थाविशेषविजानतः आत्मैवेदं सर्वं खल्विदं ब्रह्मेत्यादिवाक्य।
विचारेणावधृतपरमार्थस्य सतः सर्वाणि भूतान्यात्मैवाभूत् परमार्थदर्शनादात्मैव संवृत्तः तत्र तस्यामवस्थाया
मेकत्वं विशुद्धं गगनोपममात्मैकत्वं पश्यतो ज्ञानमः को मोहः कः शोकश्च अविद्याकार्ययोः शोकमोहयोरसंभ।

१८६ वात्मकारणमसंसारस्यांसंलक्षेदाष्टिभावः १

एवंभूतात्मतत्त्वस्य फलमाह सपर्यगात् य एवमात्मानं पश्यति स ईदृशं ब्रह्म पर्यगात् परिगच्छति प्राप्नोतीत्यर्थः की
दृशं शुक्रं शुक्रं शुक्लं शुद्धं विज्ञानानन्दस्वभावमचिन्त्यशक्ति अकायं न कायः शरीरं यस्य तत् अकायत्वादेवाव्रणं अ
क्षतं अस्नाविरं न विद्यन्ते स्नावाः शिरा यत्र तदस्नाविरं स्नायुरहितं अकायत्वादेव शुद्धमनुपहतं सत्त्वरजस्तमोभिः
अपापविद्धं न पापैर्विद्धं क्लेशकर्मविपाकाशयैरस्पृष्टं अकायमव्रणमस्नाविरमिति पुनरुक्तत्वमर्थातिशयद्यो

सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् कविर्मनीषी परिभूः स्वयं
भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ८

तनाय अभ्यासे भूयो समर्थं मन्यन्त इति यावत्श्लोकेः ईदृशं ब्रह्मात्मत्वः प्रतिपद्यत इत्यर्थः पुनस्तस्यैव फलान्तरमाह य
ईदृश उपासकः स शाश्वतीभ्यः समाभ्यो अनन्तवर्षेभ्योऽर्थाननन्तवर्षप्राप्येय याथातथ्यतो यथातथाभावो याथात्म
थ्यं तेन यथास्वरूपमर्थान् व्यदधात् विहितवान् एकस्य स्वामिसंबंधे अनन्तानाचेतनैरर्थैरुपभोगं कृतवानित्यर्थः की
दृशः कविः क्रान्तदर्शी मनीषी मेधावी परि सर्वतो भवतीति परिभूः ज्ञानबलात्सर्वरूपः स्वयं भवतीति स्वयंभूः।

ध॰ ब्रह्मरूपेणभविता ईदृशोपिपूर्वोक्तंशुक्रमकायमित्यादिविशेषणविशिष्टंब्रह्मप्राप्नोतीत्यर्थः एतस्याऽक्षरयोऽ।
९८ र्थान्तरंयथा योयमनीतमंत्रोक्तआत्मासपर्यगात् परितः सर्वत्रगच्छति नभोवत्सर्वंव्याप्नोति व्याप्यचशाश्वती
(98) भ्योनित्याभ्यःसमाभ्यःसंवत्सराख्येभ्यःप्रजापतिभ्योयथातथ्यतोयथाभूतकर्मफलसाधनतो
ऽर्थान्कर्तव्यपदार्थान्व्यदधात् यथानुरूपंभजदित्यर्थः सकीदृशः शुक्रमित्यादिविशेष
णानिलिंगव्यत्ययेनपुल्लिंगेनेतव्यानि शुक्रः शुद्धोदीप्तिमान् अकायः अशरीरः
लिंगशरीरवर्जितइत्यर्थः अव्रणोऽक्षतः अस्नाविरः शिरारहितः अव्र
णोस्नाविरइतिविशेषणद्वयेनस्थूलशरीरप्रतिषेधः शुद्धोनिर्म
लः अपापविद्धोऽधर्मादिवर्जितः कविः सर्वदृक् नान्यदतो
स्तिद्रष्टेतिश्रुतेः मनीषिमनसईशिता सर्वतः परिभूः
परिसर्वेषामुपर्युपरिभवतीतिपरिभूः स्वयंभूःस्व
यमेवभवतीति येषामुपरिभवतियश्चोप
रिभवतिसस्वयमेवभवतीतिस्वयंभूः
सनित्यईश्वरः सर्वेन्नत
वानित्यर्थः
५

अतः परमुपासनामंत्रा उच्यंते अंधंतमः षट्अनुष्टुभः यमनियमसंबंधवासितानात्माकश्चिन्नास्ति जलबुद्बुदव
ज्जीवाः मदशक्तिवद्विज्ञानं इत्यादिमतवादिनोबौद्धाः प्रलयनिंद्यंते येनवाअसंभूतिंअसंभवमुपासते मृतस्यपुनः
संभवोनास्ति अतः शारीरांतेऽस्माकंयुक्तिरेवेतिवदंति तेअंधंतमोऽज्ञानलक्षणंप्रविशंति येउयेचसंभूत्यामेवर
ताः संभवत्यस्माइतिसंभूतिरात्मानंचैवासक्ताः कर्मपराङ्मुखाः खत्रुडिलाघवमज्ञानानात्मज्ञानमात्ररताः आ
त्मैवास्तिनान्यत्कर्मादीतिकर्मकांडज्ञानकांडयोः संबंधोनास्तिअभिप्रायवंतइत्यर्थः तेनरास्ततोऽंधातमसोभूय।

अन्धन्तमः प्रविशन्ति येसम्भूतिमुपासते ततोभूयइवतेतमोयऽउसम्भूत्यांरताः ९

इवइवशास्त्रोऽनर्थकः बहुतरंतमोऽज्ञानंविशंति अस्याऋचोऽर्थांतरमुच्यते अधुनाव्याकृताव्याकृतोपासन।
योः समुच्चिचीषयाप्रत्येकंनिंदोच्यते अंधंतमः संभवनंसंभूतिः कार्यस्योत्पत्तिः तस्या अन्या असंभूतिः प्रकृतिः
कारणमव्याकृताख्यं तामसंभूतिमव्याकृताख्यांप्रकृतिंकारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकांयेउ
पासते तेतदनुरूपमेवांधंतमोऽदर्शनात्मकंसंसारंप्रविशंति येसंभूत्यांकार्यंब्रह्मणिहिरण्यगर्भाख्येरतास्तेतत

तस्मादपिभूयोबहुतरमिवतमः प्रविशंति १०

ध॰ अथोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह अन्यदेव संभवात्संभूतेः कार्यब्रह्मोपासनादन्य।
देवहृदयगेवाणिमाद्यैश्वर्यलक्षणं फलमाहुः कथयंतिधीराः तथा असंभवादसंभूतेरव्याकृतादव्याकृतोपा

१८८ सनादन्यदेवफलमुक्तमंधंतमः प्रविशंतीत्यत्र प्रकृतिलय इति पौराणिकोक्तं फलमाहुः इत्येवं विधं धीराणां।

188 विदुषां वचः शुश्रुमः वयं श्रुतवंतः येधीरानोऽस्माकं तदुभौ संभूत्यसंभूत्युपासनफले विचचक्षिरे व्याख्यातवं
तः संभूतिंच संभूतिं सर्वं जगत्समवैकदेवं परंब्रह्म विनाशं विनाशोऽस्यास्तीति विनाशं अशीत्रादिनादश्यमयः
विनाशधर्मकं शरीरं तदुभयं शरीरि शरीररूपं द्वयं यो योगी सद्रूपकीभूतं वेद जानाति देहभिन्नोहं देही वासकर्म

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ९ सम्भू
तिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥

वशादित्यनात्मा शरीरेणाज्ञानोत्पन्निकराणिनिः कामकर्माणि करोतीत्यर्थः सविनाशेन विनाशिना शरीरेण मृ
त्युं तीर्त्वा अंतःकरणशुद्धिं संपाद्य संभूत्यात्मज्ञानेनामृतममृतं मुक्तिं प्राप्नोति अस्मात्स्वोऽर्थांतरं यथा संभूत्यसंभूत्यु।
पासनयोरेकपुरुषार्थत्वात्समुच्चयपक्षमुक्तमिदमाह संभूतिंच अविनाशंशाहृदयेऽवर्यालोपोदृष्टव्यः पृषोदरादि।
त्वात् अन्यदाहुरसंभवादित्युक्तेः संभूतिमविनाशंचाव्याकृतोपासनद्वयं यः सहवेद उभयमुपास्त इत्यर्थः स योगी
अविनाशेनाव्याकृतोपासनेनमृत्युमनैश्वर्यमधर्मकामादिदोषजातंचतीर्त्वातिक्रम्य संभूत्या हिरण्यगर्भोपासने। नाकंपकृतिलयपदगमसमकृतेः ॥ १८८

येत्वकर्मनिष्ठाः कर्मकुर्वन्तएवजीजीविषंति तान्प्रत्युतेऽथंतमः विद्याविद्ययोः समुच्चिचीषयाप्रत्येकंनिंदोच्यते।
विद्यायाअन्याअविद्या कर्म येजनाअविद्यामग्निहोत्रादिलक्षणं केवलामुपासते स्वर्गार्थानिकर्माणिकेवलम
नुतिष्ठंति तेअंधमदर्शनात्मकंतयोऽज्ञानंप्रविशंति संसारपरंपरामनुभवंतीत्यर्थः ततस्तस्मादेथात्मकात्तम
सोभूयइव बहुतरमेवतमस्तेप्रवेशंति येउयेपुनर्विद्यायांआत्मज्ञानेदेवताज्ञानेपवरताः कर्माणिहित्वाकर्माक
रणेप्रत्यवायोत्पत्तेः करणश्रद्धाभावेनज्ञानात्तुदयादितिभावः तयोःफलभेदमाह अन्यदेव विद्यायाआत्म।

अन्धंतमः प्रविशन्ति येऽविद्यामुपासते ततोभूयऽइवतेतमोयउविद्यायांरताः ९ अन्य
देवाहुर्विद्ययाऽअन्यदाहुरविद्यया इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे १० विद्यां
चाविद्यांचयस्तद्वेदोभयंसह अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते ११

ज्ञानस्यफल
मन्यदेवाहुरुक्तरूपं अविद्यायाः कर्मणश्चफलंपितृलोकरूपमन्यदेवाहुः धीराः कर्मणापितृलोविद्ययादेवलो।
करितिश्रुतेः येधीराधीमंतआचार्यानोऽस्मभ्यंज्ञानंकर्मचविचचक्षिरेव्याचख्युः तदुक्तमित्येवंधीराणांवचः शुश्रुमः
श्रुतवंतः समुच्चयमाह विद्यांचा विद्यांदेवताज्ञानंअविद्याकर्मचतदुभयंविद्यारूपद्वयंयः सहवेद एकीकृत्यवेद।
एकेनपुरुषेणानुष्ठेयं जानाति कर्मकांडज्ञानकांडस्यभूयुणभूतमित्यर्थः सोऽविद्ययाग्निहोत्रादिकेर्णामृत्युंस्वाभा
विककर्मज्ञानेस्मशाहवाच्यंतीर्त्वातर्यातःशुद्धात्तःकृत्योभूत्वाविद्ययादेवताज्ञानेनाम्रंतंदेवतात्मभावमश्नुते प्रा।

५०
१८९ 189

अथकृतोयामनोयोगीअंतकालेप्रार्थयते वायुरनिलं हेयजुषी अथेदानीमरिष्यतोममवायुप्राणः वायुअरणं। समष्टिकलिंगोपलक्षणार्थं समष्टात्मकलिंगरूपः प्राणोऽध्यात्मपरिच्छेदंहित्वाऽधिदेवतरूपंसर्वात्मकअमृतंसूत्रात्मानंअनिलंवायुंप्रतिपाद्यतामितिवाक्यशेषः वायुर्वैगौतमसूत्रंवायुनागौतमसूत्रेणोदंसर्वंसंदृब्धमिति श्रुतेः ज्ञानकर्मसंस्कृतंलिंगमुत्क्रामत्वित्यर्थः अथइदंस्थूलंशरीरंअग्नौहुतं सत्भस्मांतंभस्मरूपंभूयात्भस्मांतःस्वरूपंयस्यततकृतप्रयोजनत्वात् अथायोगिनोऽवलंबभूतमक्षरमुच्यते ॐमिति ब्रह्मणःप्रतिमानामवाअस्य।

वायुरनिलममृतमथेदंभस्मान्तꣳशरीरम् ॐक्रतोस्मरक्लिबेस्मरकृतꣳस्मर १५

ब्रह्माऋषिः गायत्रीछंदः परमात्मादेवता वेदारंभेहोमेशांतिपुष्टिकर्मसुकाम्येषुनैमित्तिकेषुपिकसुविनियोगः अप्रतीकात्मकत्वात्स्मात्मकमयाख्यंब्रह्माभेदेनोच्यते हेअग्नेक्रतोहेक्रतोसंकल्पात्मकस्मर यन्मस्मर्तव्यंतस्यायंकालःप्रत्युपस्थितोऽतस्मर जयस्त्वंब्रह्मचर्येगार्हपत्येचमयापरिचरितस्तन्स्मर क्लिबेस्मरऽकल्पतेभोगायेतिक्लुशलोकस्तस्मैस्मर जशादेशश्चार्षः छंदस्युभयथेतिपदांततत्वात् मयास्मैअयंलोकोभोगायदातव्यतस्मैक्लृप्तायलोकायस्मर कृतंस्मर ज्ञा १८९
यन्मयाबाल्यप्रभृत्यनुष्ठितंकर्मतच्चस्मर स्मरेत्यस्याद्वृत्तिरादरार्था क्रतोत्रिभिर्यत्नभिरेतेयत्नाप्योगीस्मारयतीतिकात्याय १८

पुनरन्येन मंत्रेणाग्निं ब्रह्मप्रतियोगीमार्गं याचते अग्ने नय अपरूपदृष्टाग्नेयी त्रिष्टुप् आख्याता पि विशेषाय पुनर्व्या।
ख्यायते हे देव दानादिगुणयुक्त हे अग्ने अस्मान् त्वय याशोभनेन मार्गेण देवयानेन नय गमय सुपथेति विशेषणाद्।
दक्षिणमार्गनिवृत्त्यर्थं गतागतलक्षणेन दक्षिणमार्गेण निर्विण्णोऽहं अतोऽग्ने त्वां याचे पुनर्गमनागमनवर्जितेन शोभ
नेन पथा अस्मान् कर्मफलविशिष्टांश्च नय किमर्थं राये धनाय भुक्तिलक्षणाय कर्मफलभोगायेत्यर्थः किंविधस्त्वं वि
श्वानि सर्वाणि वयुनानि कर्माणि प्रज्ञानानि वा विद्वान् जानन् किंच जुहुराणं कुटिलं कौटिल्ये श्मशानवितहोस्या

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि
विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम
ऽउक्तिं विधेम १८

दिवेन रूपं कुटिलं प्रतिबंधकं वंचनात्मकमेनः पापं अस्मत् अस्मत्तः सकाशात् युयोधि पृथक्कुरु वियोजय
नाशयेत्यर्थः युमिश्रणामिश्रयेणयोः ह्वादित्वात् शपलोपः हिवे क्वोदसंदेहैः हिवं ततो विशुद्धा वयं ते तुभ्यं भूयिष्ठां व
हुतरां नमउक्तिं नमस्कारवचनं विधेम कुर्याम इदानीं सपापत्वात् वपरिचर्यां कर्तुं न शक्नुमस्ततस्तव पापाय।
नाशे कृते शुद्धा वयं नमस्कारेण त्वां परिचरेमेत्यर्थः १८

४० पुनरादित्योपासनमाह हिरण्मयेन ज्योतिरूपमर्हयामो ज्योतिर्ज्योतिः पदं ज्योतिर्द्वादशक इति वचनात् हिरण्मयमिव हि।
१९० रण्मयं ज्योतिर्मयं यस्मात्त्रैपि तेनेति यत्र प्रथितः इत्यस्मात् इति पात्रं मंडलं तेन तेजो रूपेण मंडलेन सत्यस्यादित्य मंड।
लस्थस्याविनाशिनः पुरुषस्य मुखं शरीरं अपिहितं आच्छादितं वर्तते तथापि यः असौ प्रत्यक्ष आदित्ये रविमंडले पुरुषः
पुरुषाकारत्वात् पूर्णमनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति वा पुरुषः पुरिशयनाद्वा स मंडलस्थः पुरुषः असौ।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। योऽसावादित्ये पुरुषः
सोऽसावहम्। १७ ओं खं ब्रह्म। इति वाजसनेयसंहितायां
चत्वारिंशोऽध्यायः ४०

प्रत्यक्षः कार्यकरणसंघातप्रतिष्ठोऽहमस्मि एतां चोपासनां कुर्यादित्यर्थः ओं खं ब्रह्मेति यजुषी ओमिति नाम निर्दे
श्यो ब्रह्मणः खं ब्रह्मेत्याकाशरूपमनेन ब्रह्म ध्यायेत् यद्यप्येव ब्रह्म चेतनमाकाशस्त्वचेतनस्तथाप्येकदेशसादृश्यं नभोव। १९०
द्व्यापकं ब्रह्म ओमिति जपन् ध्यायेदित्यर्थः सूर्यमंडलस्थः पुरुषोऽहमेवेत्यभेदेन चिंतयेत् १७

४० अथ विचारः विद्यां चाविद्यां चेत्यत्र विद्याशब्देन किं स्वख्यापरमात्मविद्योच्यते उतोपासना वा अमृतमश्नुत इत्य
१९ त्रामृतशब्देन साक्षान्मुक्तिरुत क्रममार्गेण परंपरया वा नाद्यः विद्याः कर्मणोर्यस्तद्वेदोभयं सहेति समुच्चया।
नुपपत्तेः तयोर्विरोधात् विद्योत्पत्तौ तदाश्रयेऽविद्यानुत्पत्तेः वह्निरूष्णः प्रकाशश्चेति ज्ञानोत्पत्तौ शीतोऽग्निर।
१९। प्रकाशश्चेति अविद्योत्पत्तिर्न संभवति नापि संशयोऽज्ञानं वा यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मो।
हः कः शोक एकत्वात् किंच विद्याशब्देन परमात्मविद्याग्रहणेऽग्रे नयेति स्वपथयाचनमनुपपन्नं तस्मा।
द्विद्योपासना अमृतं चापेक्षिकमिति दिक् श्रीमन्महीधरकृते वेददीपे मनोहरे व्यरमच्चरमोऽध्यायः परमा।
त्मनिरूपकः इति वेददीपे चत्वारिंशोऽध्यायः माघ्यं वुध्यामममालोक्य माधवो भट्टशांकरं यन्मया लिखितं से
तस्तत्रतु हंस्वातेनमहृण ९ संवत २१ ॥ ॥ ॥ ॥

१९

५४८